Srinivas Publication
(A Unit of Srinivas University)

SRINIVAS UNIVERSITY
SAMAGRA GNANA
ESTD: 1988

# Proceedings of "Anveeksha – 2022" National Conference on Resiliance, Innovation & Reinvention




16th July 2022

**Edition: I**

**ISBN: 978-93-94676-01-5**

**Editors**

**Dr.P.S. Aithal**
**Dr. Shantala Vishwasa**
**Dr. Shankara Narayana Bhat**
**Dr. Aravind Shanabhag**

**Copyright@Authors**

All rights reserved, including right of reproduction in whole or in part in any form.

**SRINIVAS PUBLICATION**

**Mangalore, Karnataka State, INDIA**

Printer: Srinivas Press, G.H.S. Road, Hampankatta, Mangalore, Karnataka,India

# Proceedings of "Anveeksha – 2022" National Conference on Resiliance, Innovation & Reinvention

## ORGANISING TEAM

### Chief Patron

**Sri. CA. A. Raghavendra Rao**
Chancellor, Srinivas University, Mangalore

### Patrons

**Dr. A. Srinivas Rao**
Pro-Chancellor

**Dr. P. S. Aithal**
Vice-Chancellor

**Dr. Shantala Vishwasa**
Event Director

**Dr. Shankara Narayana Bhat**
Event Convenor

**Dr. Aravind Shanabhag**
Event Advisor


**SRINIVAS PUBLICATION**
(An International Publisher for Academic & Scientific Journals and Books)
Srinivas University, A. Shama Rao Foundation
G.H.S. Road, Mangalore - 575 001, Karnataka State, India
Managing Editor: Mr. Harischandra P
srinivaspublication@srinivaspublication.com www.srinivaspublication.com +91 8242411383

# SRINIVAS UNIVERSITY

**Mukka, Surathkal, Mangaluru, D.K., Karnataka.**

## SRINIVASA YOGA SAMSKRIT RESEARCH CENTRE

# Invitation

# ANVEEKSHA - 2022

## A Modern view at Ancient Texts

## प्राचीनग्रन्थेषु आधुनिकी दृष्टिः

## A National Level Virtual Conference

**Date : 16 July, 2022**

**Time : 6.00 - 7.30 p.m.**

**Dr. CA. A. Raghavendra Rao**
Chancellor Srinivas University & President ASF.Mangalore
will preside over the function

**Dr. Tirumala P. Kulakarni**
Professor in Samskrit Poorna Prajna Vidya Peetam, Bangaluru
will be the Chief Guest

**Dr. A. Srinivas Rao**
Pro-Chancellor Sivas University & Vice-President ASF. Mangalore

**Smt. A. Vijayalakshmi Rao**
Member Board of Governors, Srinivas University Mangalore

**Smt. Mitra S. Rao**
Member Board of Governors, Srinivas University Mangalore

**Dr. P. S. Aithal**
Vice Chancellor. Srinivas University Mangalore

**Dr. Jillella Satya Sai Kumar**
Pro-Vice Chancellor, Sresives University Mangalore

***You are cordially invited***

**Dr. Anil Kumar**
Registrar

**Dr. Shrinivasa Mayya D.**
Registrar (Evaluation)

**Dr. Ajay Kumar**
Registrar (Development)

**Mr. Adithya Kumar Maiya**
Registrar (Academic & Devlp.)

**Dr. Praveen B.M.**
Director - Research

**Dr. Shantala Vishwas**
Conference Convener

**Contact No. : 9480503411**

# CONTENTS


| Sl.NO. | Title | Author/s Name | Page No |
|---|---|---|---|
| 1 | वैदिकसाहित्येषु पर्यावरणसंरक्षणपरिकल्पना | Dr. Shantala Vishwasa | 1-4 |
| 2 | महाकवेः कालिदासस्य काव्येषु पर्यावरणम् | Shivarama Guptha B. | 5-10 |
| 3 | योगः कर्मसु कौशलम् | Sheela Shankari k | 11-14 |
| 4 | ईशावास्योपनिषदि साधनानिरूपणम् | Shridhar Hegde | 15-19 |
| 5 | गोवर्धनगिरिपूजा गोवर्धनोद्धारणं च | Saku Bai | 20-24 |
| 6 | याज्ञवल्क्यस्मृतौ प्रतिपादिताः अंशाः | Mrs. Jyothi U | 25-29 |
| 7 | षड्दर्शनानां निरूपणम् | Kameshwari Sumana Kumar | 30-35 |
| 8 | मनः एव कारणं बन्धमोक्षयोः | Mrs. Vijaya Bhat H | 36-42 |
| 9 | सुन्दरकाण्डस्य सामान्यदृष्ट्या आध्यात्मिकदृष्ट्या च अध्ययनम् | Krishnamurti Shantarama Hegde | 43-46 |
| 10 | प्रतिज्ञायौगन्धरायणनाटके प्रमुखपात्रपरिचयाः | Anitha H.C. | 47-50 |
| 11 | सुभाषितेषु चारित्र्यविकासः | Deeksha U Prabhu | 51-54 |
| 12 | ज्योतिश्शास्त्रे राजयोगस्य लक्षणं तत्फलं च | Abhishek Bayari G | 55-57 |
| 13 | मायामयमिदमखिलम्..... | Narasimha Shetty | 58-60 |
| 14 | विवेकानन्दस्य तत्त्वचिन्तनम् | Srilaxmi Adiga, | 61-64 |
| 15 | महाभारते स्त्री-उपदेशः | Sumana H.C | 65-68 |
| 16 | वरणीयगुरुगुणाः | Dr.k.v.Shankaranarayana Bhat | 69-72 |
| 17 | दानेतिहासः | Akshay K.R | 73-76 |
| 18 | मनुष्यजन्मसाफल्यं धर्मसेवनात् | Shivaraj | 77-81 |
| 19 | आर्षविज्ञानम | Lakshmisha M | 82-87 |
| 20 | कालिदासस्य कवितावैशिष्ट्यम् | Rajendra Prasad | 88-91 |
| 21 | संस्कृतवाङ्मये आश्रमचतुष्टयम् | Ravishankar Shambhulinga Hegde | 92-98 |
| 22 | श्रीमद्भागवतम् | Prasad Dattatreya Deshpande | 99-104 |
| 23 | सुरवाणीसागरे सूरिरत्नानि | Raghavendra B.J. | 105-109 |
| 24 | ज्यौतिषम् | Vishnumurthy B. Borkar | 110-112 |
| 25 | संस्कृतं, संस्कृतिः, सामरस्यं च | Chitra Hegde | 113-120 |

| | | | |
|---|---|---|---|
| **26** | बालादपि शुकादपि | Dr. Kadandale Ganapathy Bhat | **121-124** |
| **27** | **एकदर्शी- एकादशी** | Shrikara Tantry | **125-130** |
| **28** | **याज्ञीयमन्त्रमथनम्(ईशावास्योपनिषत्)** | Radhesh | **131-137** |
| **29** | माध्वग्रन्थविमर्शः | N.Vittal Bhat | **138-142** |
| **30** | **महाभारतस्य एककर्तृकत्वम्** | Krishnaraja Bhat | **143-147** |
| **31** | वेदाङ्गस्य महत्वम् | Hariprasad Bhat P | **148-151** |
| **32** | ज्योतिःशास्त्रप्रशंसा | Srikantha Upadhya B | **152-155** |
| **33** | **भगवद्गीतायाम् आहरपद्धतिः** | Thulasi Shenoy | **156-159** |
| **34** | **कोंकणी-संस्कृताचे संबंध आनी साम्यता** | Dr. Aravind Chandrakant Shanbhag | **160-163** |
| **35** | **आंजेल - कादंबरिची विशलेषण** | Flavy D'Souza | **164-170** |
| **36** | **चा. फ्रा. देकोस्ताच्या सोस्याचे कान पुस्तकाचेर विमर्सो** | Prem Moras | **171-178** |
| **37** | **लोकगीतांत जाल्लेली वाडावळ** | Prem Moras | **179-185** |

Paper 1

# वैदिकसाहित्येषु पर्यावरणसंरक्षणपरिकल्पना

**Dr. Shantala Vishwasa**
Research Professor, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - shantalavishwas@gmail.com
https://orcid.org/0000-0003-4238-5001

**सार:** (ABSTRACT)

**पर्यावरणप्रदूषणस्य प्रभावाद् जगति रोगदीनां वृद्धिः सञ्जाता, अन्नपानादिषु (रेडियो) धर्मिपदार्थानां सम्मिश्रणात् सर्वत्र वायुमण्डलं तु दूषितं भवत्येव, तस्माद् आनुवंशिकप्रभावोऽपि भवति । अनेन भविष्यत्काले मानवसभ्यताया विनाशोऽवश्यम्भावीति निश्चप्रचम् । विश्वस्वास्थ्यसंघटनेन पर्यावरणसन्तुलनार्थमनेके उपायाः प्रतिपादिताः । अस्माकं देशेऽपि पर्यावरणप्रदूषणस्य निवारणार्थं सर्वकारद्वारा व्यवस्था क्रियते, तदनुसारं, गङ्गानद्याः स्वच्छताभियानं, अशुद्धजलमलादीनां विशुद्ध्यर्थं संयन्त्राणि स्थाप्यन्ते जनजागरणमपि प्रचलति प्रदूषणनिवारणस्योपायाः, विधयश्चापि निर्दिश्यन्ते एवञ्च विविधोपायैरेव पर्यावरणस्य संरक्षणं भवितुमर्हति । एतत् अस्माभिः सदा चिन्तनीयः अंशः ।**

**प्रस्तावना**

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते । इयं सर्वान् पुष्णाति विविधैः प्रकारैः, सुखसाधनैः च तर्पयति । पृथिवी, जलम्, तेजः, वायुः, आकाशः च अस्याः प्रमुखाः भागभूताः अंशाः । ते एव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति । आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम्। 'परितः आवरणम्' पर्यावरणम् । तन्नाम चतसृषु दिक्षु आच्छादनं करोति इति अर्थः । यथा अजातशिशुः मातृगर्भे सुरक्षितः तिष्ठति तथैव मानवः पर्यावरणकुक्षौ सुखम् आस्ते । परिष्कृतं प्रदूषणरहितं च पर्यावरणम् अस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसङ्कल्पं माङ्गलिकसामग्रीञ्च प्रददाति । प्रकृतिकोपैः आतङ्कितो जनः किं कर्तुं प्रभवति? जलप्लावनैः, अग्निभयैः, भूकम्पैः, वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मङ्गलम् ?

**विषयपरामर्शः**

साम्प्रतिके काले निखिलेऽस्मिन् जगति मानवसभ्यतायाः समक्षमनेके समस्यात्मका दुष्प्रभावाः दरीदृश्यन्ते । पर्यावरणस्य प्रदूषणमपि तथैव मुख्या समस्या मानवसभ्यतायै परिदृश्यते । अधुना औद्योगिकप्रसारेण न केवलं जलं, वायुः फलमन्नादिकं च प्रदूषितम् अपि तु समग्रमपि भूमण्डलं दूषितं भवति । प्रतिदिनं परमाणुयन्त्राणां अणुकिरणः सर्वत्र प्रसरति, विषयुक्तानां अनिलानां प्रसारेण, बृहदाकारोद्योगिकयन्त्राणामवशेषितैः पदार्थैः विविधेभ्यः यानेभ्यः निस्सरद्भिः धूमैः, तथैवान्यैः संयन्त्रादिभिः सर्वत्र भूलोकस्य वायुमण्डलं प्रदूषितं भवतीति विषयोऽयं दृग्गोचरी भवति । तस्मात् अस्माभिः अधुनैव निर्मलं वायुमण्डलं कथं स्यादिति चिन्तनीयम् । अत एव अस्माभिः प्रकृतिः रक्षणीया । तेन च पर्यावरणं रक्षितं भविष्यति । प्राचीनकाले लोकमङ्गलाशंसिन ऋषयो वने निवसन्ति स्म । यतो हि वने सुरक्षितं

पर्यावरणमुपलभ्यते स्म । तत्र विविधा विहगाः कलकूजिश्रोत्ररसायनं ददति । यज्ञयागादीनां करणेन पर्यावरणं शुद्धं भवति । अयमंशः सर्वश्रेष्ठः योग्यसाधनहेतुः इति वेदे अपि उक्तः –

*आ वात वाहि भेषजं हि वात यद्रूपः ।*
*त्वं हि विश्वभेषजं देवानांदूत ईयसे ॥*
*त्रायन्तमिमं देवास्त्रायन्ता मरुता गणाः ।*
*त्रायन्तां विश्वाभूतानि यथायमरण असत् ॥ अथर्ववेदे ॥*

अद्य वयं स्वच्छवायुनिमित्तं कष्टम् अनुभवामः, स्वच्छजलाय परिभ्रमणं कुर्मः, शान्तस्थानार्थं व्यग्राः स्मः । वेदे इयं स्तुतिः दृश्यते –

*या ते रुद्र शिवा तनूः शिवा विश्वहा भेषजी ।*
*शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥ यजुर्वेदः 16.49*
*यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहाः ।*
*पृथिवी विश्वधायसं घृतामच्छावदामसि ॥। अथर्ववेदः 12.1.27*

पृथिवी वेदेषु ईश्वरस्वरूपा इति मन्यते । अतः तस्याः रक्षणं पूजनं च अस्माकम् अविभाज्यम् अङ्गं स्यात्। अस्माकं मातृभूमौ अतीव श्रद्धा स्यात् अयं विषयः अथर्ववेदे उक्तः। एवं तस्याः नमस्करणस्य विषये स्पष्टम् उक्तमस्ति तत्र – "*सा नो भूमिर्विसृजतां माता पुत्राय मे पयः ॥*" इति

वैदिकमन्त्रेषु नद्यः देवीस्वरूपाः मन्यन्ते । अतः तेषां शुद्धतारक्षणम् अस्माकं कर्तव्यम् अस्ति। वैदिकानुष्ठानेषु तेषां पदार्थानां शुद्धतारक्षणं बलमिति वर्णितम् अस्ति । पृथिव्यां जलं देवीनां संशोधिका, सदा गमनशीला, दिव्या, पवित्ररूपा च इति ऋग्वेदे वर्णितम् अस्ति । जलं मनुष्यस्य आन्तरङ्गिकं बाह्यं च मालिन्यं दूरीकरोति । तद् विना जीवनमेव दुष्करम् । विश्वे ब्रह्मणा सृष्टाः सर्वे जन्तवः जलमाधारीकृत्य जीवन्ति ।

*या आपो दिव्या उत वा स्रवन्ति*
*खनित्रिमा या उत वा स्वयन्जा*
*समुद्रार्था या शुचयः पावकास्ता*
*आपो देवीरिहमामुवन्त ॥ ऋग्वेदः॥*

निरन्तरं वर्धमानं प्रदूषणं सर्वेषां चिन्तायाः विषयः जातः । यतः प्रदूषणेन अधिकाः मनुजाः रुग्णाः भवन्ति । अनेन प्रकृत्याः हानिर्भवति, जीवानामपि हानिर्भवति । असमाधाने वैज्ञानिकाः प्रयतन्ते किन्तु पर्यावरणस्य रक्षणम् अस्माभिः सर्वैः करणीयम् । यावत् देशस्य नागरिकः पर्यावरणस्य रक्षणे दृढनिर्णयवान् न भवति, तावत् अस्याः समस्यायाः समाधानं न लभ्यते ।

फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम् ।
गुल्मवल्लेलतानां च पुष्पितानां च वीरुधाम् ॥१४२ मनुस्मृतिः ११ अध्यायः।

ये वृक्षा फलं यच्छन्ति तेषां कर्तनं नकरणीयम् । यदि कर्तनं क्रियते तर्हि सावित्र्यादि ऋक्-शतं जपः करणीयः प्रायशित्तरूपेण इति सूच्यते । कदाचित् मानवः स्वयमेव वर्धितं वृक्षं स्वयमेव कर्तयति । तत्तु असाम्प्रतम् । विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुम् अस्माप्रतम् इति कुमारसम्भवे उक्तमस्ति ।

तडगकृत् वृक्षरोपी इष्टयज्ञश्च यो द्विजः ।
एते स्वर्गे महीयन्ते ये चान्ये सत्यवादिनः ॥
महाभारतम्- अनुशासनपर्व । अध्यायः -५८ श्लोकः ३२

ये जलसौकर्याय तडागनिर्माणम्, परिसररक्षणाय वृक्षारोपणम्, लोककल्याणाय यागयज्ञादिकं च कुर्वन्ति ते, वेदाध्ययन-अध्यापनादिकं कृतः ब्राह्मणः, ये च अन्ये सत्यवादिनः एते सर्वे अपि स्वर्गलोके महीयन्ते इति महभारते अपि उक्तमस्ति । तन्नाम तस्मिन् काले अपि वृक्षादीनां रोपणं परिसरादीनां रक्षणं सर्वम् आसीदेव ।

पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान् ।
वृक्षदं पुत्रवद् वृक्षास्तारयन्ति परत्र च ॥

महाभारतम्- अनुशासनपर्व । अध्यायः -५८ श्लोकः ३०

परन्तु खेदावहः विषयः यत् स्वार्थान्धो मानवः तदेव पर्यावरणम् अद्य नाशयति । स्वल्पलाभाय जना बहुमूल्यानि वस्तूनि नाशयन्ति । जनाः यन्त्रागाराणां विषाक्तं जलं नद्यां निपातयन्ति । तेन मत्स्यादीनां जलचराणां विनाशः क्षणेनैव भवति । नदीजलमपि तत्सर्वथाऽपेयं जायते । जलप्रदूषणनिवारणार्थं जलशुद्धिः करणीया । व्यापारवर्धनाय वनवृक्षान् निर्विवेकं छिन्दन्ति । तस्मात् अवृष्टिः प्रवर्धते, वनपशवश्च शरणरहिता मानवेभ्यः उपद्रवं विदधति । शुद्धवायुरपि वृक्षकर्तनात् सङ्कटापन्नो जायते। एवं हि स्वार्थान्धमानवैः विकृतिम् उपगता प्रकृतिः एव सर्वेषां विनाशकर्त्री भवति। विकृतिमुपगते पर्यावरणे विविधाः रङ्गः भीषणसमस्याश्च सम्भवन्ति । तत्सर्वमिदानीं चिन्तनीयं प्रतिभाति ।

**पर्यावरणरक्षणाय उपायाः**

सरितो गिरिनिर्झराश्च अमृतस्वादुयुक्तं निर्मलं जलं प्रयच्छन्ति । वृक्षा लताश्च फलानि पुष्पाणि इन्धन्काष्ठानि च बाहुल्येन समुपहरन्ति । शीतमन्दसुगन्धवनपवनाः औषधकल्पं प्राणवायुं वितरन्ति । अतः स्थाने-स्थाने विविधाः वृक्षा रोपणीयाः । तेषां च संवर्धनमपि अवश्यं कर्त्तव्यम् । विद्यालयेषु सार्वजनिकस्थलेषु सर्वेषु स्थलेषु च वृक्षारोपणदिवसस्य आयोजनं भवेत् । वृक्षारोपणं सर्वेषां नैतिकं कर्तव्यमस्ति । अवकरः मार्गे यत्र कुत्रापि न क्षेपणीयः। सर्वत्र पर्यावरणस्वच्छतादिविषयेषु गोष्ठीनाम् आयोजनं भवेत् । ध्वनिप्रदूषणम् अपि निवारणीयम् । ध्वनिप्रदूषणं निवारयितुं ध्वनिप्रसारणयन्त्राणां प्रयोगः न्यूनतमः करणीयः । यदि सर्वे नागरिकाः पर्यावरणविषये कृतसंकल्पाः भवन्ति, तर्हि किमपि दुष्करं नास्ति ।

पर्यावरणप्रदूषणस्य प्रभावाद् जगति रोगदीनां वृद्धिः सञ्जाता, अन्नपानादिषु (रेडियो) धर्मिपदार्थानां सम्मिश्रणात् सर्वत्र वायुमण्डलं तु दूषितं भवत्येव, तस्माद् आनुवंशिकप्रभावोऽपि भवति । अनेन भविष्यत्काले मानवसभ्यताया विनाशोऽवश्यम्भावीति निश्चप्रचम् । विश्वस्वास्थ्यसंघटनेन पर्यावरणसन्तुलनार्थमनेके उपायाः प्रतिपादिताः । अस्माकं देशेऽपि पर्यावरणप्रदूषणस्य निवारणार्थं सर्वकारद्वारा व्यवस्था क्रियते, तदनुसारं, गङ्गानद्याः स्वच्छताभियानं, अशुद्धजलमलादीनां विशुद्धयर्थं संयन्त्राणि स्थाप्यन्ते जनजागरणमपि प्रचलति प्रदूषणनिवारणस्योपायाः, विधयश्चापि निर्दिश्यन्ते एवञ्च विविधोपायैरेव पर्यावरणस्य संरक्षणं भवितुमर्हति ।

पर्यावरणरक्षणार्थं सर्वत्र वृक्षाः आरोपणीयाः । ते अस्मभ्यं महान्तम् उपकारं कुर्वन्ति । प्राचीन काले, पुराणेषु अपि वृक्षाणां महत्त्वं प्रतिपादितं दृश्यते । यः पञ्चानाम् आम्रवृक्षाणाम् आरोपण करोति स कदापि नरकं न गच्छति इति कथ्यते । वृक्षाः अस्माकं कृते किं किं कुर्वन्ति एतत् अस्मिन् सुभाषिते कथितम् -

***धत्ते धारं कुसुमपत्रफलावलीना धर्मव्यथां वहति शीतभवां रुजं च ।***
***यो सर्वमर्पयति चान्यसुखस्य हेतोः, तस्मै वदान्यगुरवे तरवे नमोऽस्तु ।।***

वृक्षाः स्वयं कुसुमपत्रफलानां भारं वहन्तः, सर्वं अन्येभ्यः गच्छन्ति । वृक्षाः मूलं, वल्कलं, पत्रं, पुष्पं, फलं च सर्वं परेभ्यः यच्छन्ति । एतादृशाः परोपकारिणः वृक्षाः जनेभ्यः किमपि न वाञ्छन्ति । किन्तु आधुनिके युगे जनाः स्वार्थिनः अभवन् । स्वान्तःसुखाय, गृहनिर्माणाय ते वृक्षान् छिन्दन्ति । वृक्षाः जनानां शरीरस्वास्थ्याय अपि सन्ति । ते कार्बनडायऑक्साइड' वायुं गृहह्णन्ति, आम्लजनकं वायुं च विसृजन्ति । नूनम् एते समस्तप्राणिभ्यः उपयोगिनः सन्ति ।

***छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।***
***फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥***

वृक्षाः स्वयम् आतपे तिष्ठन्ति, अन्यस्य छायां यच्छन्ति । येभ्यः अर्थिनः कदापि निराशा न यान्ति यात्रां कुर्वन्तः नराः यदा श्रान्ताः भवन्ति, तदा मार्गे स्थितानां वृक्षाणां छायायां विश्रामं कुर्वन्ति । एवं परोपकारिणां वृक्षाणां छेदनं कदापि न कर्तव्यम्। प्राचीनकाले तु वृक्षभेदनं दण्डनीयः अपराधः मन्यते । एतादृशाः परोपकारिणः वृक्षाः जनेभ्यः किमपि न वाञ्छन्ति । अस्माकं संस्कृत्यां वृक्षच्छेदनं पापं मन्यते । "न पापफलम् इच्छन्ति पापं कुर्वन्ति यत्नतः" इति उक्त्यनुसारं सर्वदा मानवाः पापात् भीताः भवन्ति । परन्तु स्वार्थेन अन्धः सः कार्यकरणसमये तद् न चिन्तयति । तदनन्तरं पश्चात्तापम् अनुभवति । विवेकी कार्यकरणावसरे युक्तायुक्तं साध्वसाधु चिन्तयित्वा कार्यं कुर्यादिति । प्रत्येकं नागरिकस्य एतत् कर्त्तव्यं यत् तेन वृक्षारोपणम् अवश्यं कर्तव्यम्।

वृक्षाणां परोपकारित्वात् ऊर्ध्वगतिमाप्नुवन्तीत्यस्मादपि हेतोः ऊर्ध्वस्रोतसः । पनसकूष्माण्डादिरूपं फलं वहन्तो द्रुमलतादयो न खलु स्वयं तत्फलं खादन्ति । परेषामुपकारायैव ते फलन्ति, पुष्प्यन्ति, श्वसन्ति, शुष्यन्ति च । ते श्वसन्तः आम्लजनकं सृजन्ति। पुष्प्यन्तः प्रकृतिमलङ्कर्वन्ति, वनानि स्थानानि च सुगन्धयन्ति, द्विरेफादीन् पुष्णन्ति च । मृता अपि ते शुष्काः सन्तः इन्धनरूपेण पाकेषूपयुज्यन्ते । मरणानन्तरमपि उपकुर्वन्तीत्यहो वृक्षाणां जन्मसार्थक्यम् । अस्माकं शरीरं खलु मरणात्परं पूतिपर्युषितञ्च भवति, न किमपि प्रयोजनम्, अतः विशोषित्वं वृक्षाणामसाधारणो गुणः ।

**उपसंहारः**

इत्थं पर्यावरणं रक्षितुं मनुष्यैः विविधप्रकारकाः कार्ययोजनाः कार्यान्वितानि करणीयानि । तस्य रक्षणेन शान्तः परिसरः निर्मितः भवति । शान्ते परिसरे सदा मनः उल्लसितं भवति । कार्यकरणाय उत्साहः निरन्तरं वर्धते । कुत्रापि रोगबाधाः न भवन्ति । जनाः सानन्दं उत्तमकार्यतत्पराः भवन्ति । यदि पर्यावरणं शुद्धं स्वच्छं च तर्हि मानवसमाजः स्वस्थः सुदृढः, बलिष्ठः च भवति ।

**ग्रन्थऋणम् –**


- https://cpdarshi.com/2021/01/30/atharvaveda-4-13
- https://hindi.indiawaterportal.org/content/vaedaon-maen-jala-sauukata/book/6466
- मनुस्मृतिः ११ अध्यायः
- महाभारतम्- अनुशासनपर्व । अध्यायः -५८ श्लोकः ३२
- सुभाषितरत्नभाण्डागारम्


https://doi.org/10.5281/zenodo.7234104

Paper 2

# महाकवेः कालिदासस्य काव्येषु पर्यावरणम्

**Shivarama Guptha B**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - shivaramasri@gmail.com

सारः (ABSTRACT)

**महाकविः कालिदासो रससिद्धकवीश्वरः । रसश्च स्थायीभावानां परिपाकरूपः । भावश्च मानवचित्तवृत्तेविकासः । कालिदासो हि रसनिष्पादनानुकूलव्यापारे कृताभिनिवेशो दृश्यते। अतो रसनिष्पत्तये जडात्मिकां प्रकृतिमपि उद्दीपनविभावतया स्वकाव्येषु वर्णयति । यथा - कानन गहनादीनाम्, सन्ध्याप्रभातसुषमातिशयानाम्, नदीनदपर्वतरत्नाकराणाम्, षण्णामृतूनां वर्णनं मानवनिसर्गेण सह सामरस्यमधिगन्तुं कविवरः प्रवर्तते रससिद्धः कविः जडात्मकस्य निसर्गस्य वर्णनं उत्तमतया चिकीर्षति । अस्य कवेः सर्वे विषयाः अस्मान् प्रेरयन्ति, उत्साहयन्ति, हितं च बोधयन्ति ।**

**प्रस्तावना**

संस्कृतवाङ्गमये बहवः कवयः, बहवः नाटककाराः, अनेके गीतकाराः राजन्ते तेषु कविकुलगुरुकालिदासः सर्वश्रेष्ठोऽस्ति उक्तं च

**पुरा कवीनां गणना- प्रसङ्गे,कनिष्ठिकाधिष्ठित कालिदासः ।**
**अद्यापि तत्तुल्यकवेरभावा दनामिका सार्थवती बभूव ॥**

महाकविना जयदेवेन कालिदासः संस्कृतसाहित्यकामिन्याविलासः उद्घोषितः । यथा

**यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो**
**भासो हासः कविकुलगुरुः कालिदासो विलासः।**
**हर्षो- हर्षो हृदयवसतिः पञ्चवाणस्तु बाणः**
**केषां नैषा कथय कविता कामिनी कौतुकाय ।।**

एवं विवेचनेन निश्चीयते यत् प्राचीनकाले कविकुलगुरुकालिदासस्य प्रतिष्ठा सर्वाधिका आसीत् । कालिदासस्य काव्येषु काव्यस्य सर्वे गुणाः पौनः पुन्येन नरीनृत्यन्ति भावानुकूला भाषा, रसानुकूला पदयोजना आदर्शचरित्रस्य उपस्थापना अलङ्काराणां समुचितगुम्फनं समुचित-च्छन्दोयोजनेत्यादिकं महाकवेः वैशिष्ट्यं यत्र-तत्र सर्वत्र लोचनपथमायाति उपमालङ्कार-योजनायां तस्य वैशिष्ट्यं विश्वविख्यातमस्ति उक्तं च -

**उपमा कालिदासस्य भारवेरर्थगौरवम् ।**
**नैषधै पदलालित्यं माघे सन्ति त्रयो गुणाः ।।**

'वाग्' शब्दमादृत्य अनेन महाकविना रघुवंशमहाकाव्यस्य रचना कृता । यथा-

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरो बन्दे पार्वतीपरमेश्वरी ।।**

अयं कविः सुरभारत्याः महान् विद्वान् आसीत् । सर्वेषां शास्त्राणां ज्ञानं कालिदासस्य आसीत्। तस्य काव्यस्य अध्ययनेन ज्ञायते यदयं शास्त्राणां महान् ज्ञाता आसीत् । महाभारतमाहत्य अभिज्ञानशाकुन्तलस्य रचना

अनेन विहिता रामायणामादृत्य रघुवंश-महाकाव्यस्य रचना कविकुलगुरुणा विहिता । कविरयं शिवस्य परमः भक्तः आसीत्। सर्वेषां नाटकानां प्रारम्भः अपि शिवस्य प्रार्थनया कृतः ।

नाट्यशास्त्रस्य दृष्टिकोणेऽपि कवेरस्य नाटकानि समीचीनानि सन्ति । कवेरस्य काव्यस्य अध्ययनेन ज्ञायते यत् अनेन कविना सम्पूर्णभारतस्य यात्रा विहिता । सम्पूर्णभारतस्य ज्ञानं तस्य आसीत् । असौ महान् यात्री आसीत् । सम्पूर्णभारतस्य भौगोलिकं, सामाजिकं, सांस्कृतिकं च वर्णनमनेन विहितम् । ज्योतिष्ये, वेदान्तशास्त्रे एवं व्याकरणशास्त्रेपि तस्य ज्ञानं अनौपमम् इति ज्ञायते । हिमालयादारभ्य समुद्रपर्यन्तं सम्पूर्णभारतस्य वर्णनमनेन कृतम् । इदं स्पष्टं भवति यत् कविकुलगुरुकालिदासः भारतस्य महान् कविः नाटककारश्चासीत् इति ।

**विषयप्रस्तुतिः**

**कालिदासस्य कृतिषु लोकवर्णनम् ।**

**<u>ऋतुसंहारः</u>** -

काव्यमिदं सुललितं माधुर्यसमन्वितञ्च अस्ति । अत्र षट्सर्गाः राजन्ते ।

प्रथमसर्गे अष्टविंशतिः श्लोकाः सन्ति । प्रथमसर्गे ग्रीष्मऋतोः वर्णनम् अस्ति । दृश्यतां तावत् यथा -

**प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सुखावगाहः क्षतवारिसञ्चयः ।**
**दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये ।।**

**निशा: शशाङ्कक्षतनीलराशयः क्वचिद्विचित्रं जलयन्त्रमन्दिरम्**
**मणिप्रकाशः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम् ।।**
**सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकम्पितं मधु ।**
**सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिनः ।।**
**नितम्बबिम्बैः सदुकूलमेखले स्तनेः सहाराभरणैः सचन्दनः ।**
**शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाधं शमयन्ति कामिनाम् ।।**
**नितान्तलाक्षारसरागरञ्जितेर्नितम्बिनीनां चरणेः सनूपुरेः ।**
**पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथम् ।।**

अत्र ग्रीष्मऋतोः अत्यन्तं रमणीयवर्णनं समवलोक्यते ।एवम् एतादृवर्णनं सम्पूर्णसंस्कृतवाङ्मये अतिदुर्लभम् अस्ति । अत्र ग्रीष्मऋतोः सर्वेषां पक्षाणाम् उपस्थापनं कविना कृतमस्ति । वर्ष ऋतोः वर्णने मयूराणां नृत्यं मनांसि आकर्षयन्ति । वसन्तवर्णने यथा -

**आदीप्तवह्निसदृशैर्मरुतावधूतैः सर्वत्र किंशुकवनैःकुसुमावनम्रैः**
**सद्यो वसन्तसमयेन समाचितेयं रक्तांशुका नववधूरिव भाति भूमिः॥**

इत्यादिवर्णनेनापि ज्ञायते यत् बाह्यनिसर्गवर्णनं लोकनिसर्गेण सह सामरस्यमधिगन्तुमेव इति। ऋतुसंहारस्य अन्तिम श्लोके कविना प्राकृतिक वर्णनेन सह सर्वेषां कल्याणस्य कामना कृता। यथा -

**आम्री मञ्जुलमञ्जरी वरशरः सत्किंशुकं यद्धनु**
**र्ज्या यस्यालिकुलं कलङ्करहितं छत्र सितांशु सितम् ।**
**मत्तेभो मलयानिलः परभृता यद्वन्दिनो लोकजि-**
**त्वसोऽयं बो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥**

एवं वर्णनेन स्पष्टं भवति यद् ऋतुसंहारम् मुख्यरूपेण प्राकृतिकवर्णनयुक्तं काव्यमस्ति पर्यावरणस्य सर्वाणि तत्वानि ऋतुसंहारे दरीदृश्यन्ते । अत एव अस्यकाव्यस्य प्रतिष्ठा सम्पूर्ण- संस्कृतवाङ्गमये अस्ति ।

काव्यस्यास्य भाषा सुललिता सुमनोहराऽस्ति । सर्वाणि काव्यानि रससमन्वितानि सन्ति । एवं कथयितुं शक्यते यत् काव्यमिदं पर्यावरणदृष्ट्या महत्वपूर्णमस्ति ।

**मेघदूतम् -**

कविकुलगुरुकालिदासरचितेषु काव्येषु मेघदूतम् एकम् अन्तिमं गीतकाव्यमस्ति । अत्र सर्वे श्लोकाः प्राकृतिक वर्णनदृष्ट्या महत्वपूर्णाः सन्ति । मेघदूते द्वौ भागौ स्तः । पूर्वमेघः उत्तरमेघश्च । काव्यस्य कथानकं संक्षिप्तमस्ति । कश्चिद् यक्षः आसीत् । असौ यक्षः कुबेरस्य सेवकः आसीत् । अनेन यक्षेण स्वस्वामी कुबेरस्य आज्ञायाः उल्लंघनं कृतम् । कुबेरस्य शापेन शापितः यक्षः रामगिरि- आश्रमे निवासं चकार । वर्षाऋतोः आगमनं भवति यक्षेण मेघः अवलोकितः मेघं दृष्ट्वा यक्षस्य हृदयं द्रवितं जातम् । यक्षः स्वभार्यां प्रति सन्देशं प्रेषयितुं मेघं याचितवान् । यथा

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः,**
**संदेशार्थाः क्वपटुकणैः प्राणिभि प्रापणीयाः ।**
**इत्योत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे,**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।**

यक्षस्य माध्यमेन कविना कालिदासेन सम्पूर्णभारतस्य भौगोलिक दशाया: यथार्थं रससमन्वितं वर्णनं पूर्वमेघे कृतम् । यथा

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथात्वा**
**वामश्चायं नदति मधुरं चातकस्ते सुगन्धः ।**
**गर्भाधान क्षणपरिचयान्नूनमावद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।।**

अस्मिन् श्लोके पवनस्य गत्याः वर्णनम् अवलोक्यते । पर्यावरणस्य निर्माणे पवनस्य स्थानंसर्वाधिकं महत्वपूर्णमस्ति । पवनात् वयं जीवनधारकम् आक्सीजननामकं वायुं स्वीकुर्मः वायुमिमं विना मानवस्य जीवनं नष्टं भविष्यति । शुद्धवायुः अस्माकं कृते आवश्यकमेव। सम्प्रति सम्पूर्णविश्वे वायुप्रदूषणं पर्यावरणे अवलोक्यते । वायुप्रदूषणस्य कारणेन विश्वे अधिकांशमानवाः रोगग्रस्ताः सन्ति । मानवस्य रोगानां विनाशस्यकृते शुद्धवायोः आवश्यकताऽस्ति । अत एव कविना कालिदासेन वायोः महत्त्वं मेघदूते स्पष्टं कृतम् । यथा –

**त्वामारुढं पवनपदवी मुदृहीताल कान्ताः**
**प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्व सत्यः ।**
**कःसन्नद्धे विरहविधुरां त्वय्युपेक्षेतजायां**
**न स्यादन्योऽप्यहमिव जनो यःपराधीन वृत्तिः ॥**

मेघदूते कविना इदं स्पष्टं कृतं यत् सर्वाणि कार्याणि वायुप्रेरितानि भवन्ति । अत एव मेघं प्रति कथितं यत् सम्प्रतिवायुः अपि तव सहायतां करिष्यति । वायोः शुद्धीकरणे वृक्षाणां वनानां च महत्वपूर्णं योगदानमस्ति । वनैः अपि वायुः शुद्धो भवति । अत एव वनस्य आवश्यकता अस्माकं कृते सर्वाधिकमस्ति । वनैः पर्यावरणं शुद्धं भवति सम्प्रति विश्वे वनोच्छेदनं सर्वत्र विधीयते।अस्मात् कारणत् वायुप्रदषणे वृद्धिर्जायते । वायुप्रदूषणस्यसमाप्तये वृक्षारोपणम् अत्यावश्यकम् । सर्वकारैःअपि वृक्षारोपणं सम्पूर्णे वर्षे विधीयते । वनस्य उच्छेदनस्य अवरोध आवश्यकोऽस्ति । मेघदूतस्य सम्पूर्णकथानकं वनविषयकम् एव दृश्यते । मेघदूतस्य नायकस्य यक्षस्य निवासस्थानं रामगिरी एवं अस्ति । यथा –

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्त**
**शापेनास्तङ्गमितमहिमा वर्षभोग्येन भर्त्तुः ।**

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।**

आम्रकूटपर्वतेऽपि वनानि राजन्ते । तस्यस्थानस्य वर्णनम् अधोलिखित प्रकारेण कविना कृतम् ।

यथा -

**नीपं दृष्ट्वा हरतिकपिशं केसरैरर्धरुदै**
**रविर्भूतप्रथममुकुलाः कन्दलीचानु कच्छम्**
**जगध्वाऽरण्येष्वधिक सुरभिं गन्धमाध्राय चार्व्याः**
**साङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।।**

पर्यावरणस्य द्वितीयतत्त्वं जलमस्ति, जलं सर्वेषां प्राणिनां कृते आवश्यकमस्ति । जलं विना जीवनं निरर्थकमस्ति जलस्य महत्त्वं एतादृषरीत्या प्रस्तौति । मेघदूतेऽपि नदीनां वर्णनं कृतमस्ति । एवं प्रकारेण मेघदूते प्रकृत्याः चारुवर्णनं पोनःपुण्येन विराजते।

**कुमारसम्भवम् -**

कुमारसंभवम् कविकुलगुरुकालिदासरचितप्रथममहाकाव्यमस्ति । महाकाव्यस्य सर्वाणि लक्षणानि अत्र राजन्ते । महाकाव्यस्य भाषा भावानुकूला दृश्यते । रसालंकारादीनां समुचितप्रयोगः अत्र दृश्यते । पार्वत्याः जन्मनः आरभ्य कुमारस्य जन्मपर्यन्तस्य घटनायाः चारुवर्णनम् अस्मिन् काव्ये कविना विहितम् । सम्पूर्णमहाकाव्ये प्राकृतिकतत्त्वानि पौनः पुण्येन अवलोक्यन्ते अस्य महाकाव्यस्य प्रारम्भः हिमालस्य वर्णनात् जातः ।

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।**
**पूर्वापरी तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः ।।**
**सर्वशैलाः परिकल्प्य वत्संमेरौस्थिते दोग्धरि दोहदक्षे ।**
**भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ।।**
**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्**
**एकोहि दोषो गुणसन्निपाते निमज्जतीन्द्रो: किरणेष्विवाङ्कः ।।**
**यश्चाप्सरोविभ्रमण्डनानां संपादयित्रीं शिखरे बिभर्ति ।**
**बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम् ।।**

कुमारसम्भवस्य प्रत्येकस्मिन् सर्गे प्रकृत्याः वर्णनमस्ति । प्रथमसर्गे वायोर्वर्णनं दृश्यतां तावत् । यथा -

**भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।**
**यद्वायुरन्वितष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ।।**

द्वितीयसर्गे तारकासुरस्य सेवायां सर्वे ऋतवः तस्य पुष्पवाटिकायां राजन्ते स्म । यथा_

**व्यावृत्तगतिरुद्यानेकुसुमस्तेयसाध्वसात् ।**
**न वाति वायुस्तत्पार्श्वेतालवृन्ता निलाधिकम् ।।**

पञ्चमसर्गे पार्वती तपोवने तपस्यां चकार। पावत्याः तपस्यास्थलमपि प्रकृत्याः क्रोडे आसीत् ।

यथा - **विरोधिसत्वोज्झितपूर्वमत्सरं द्रुम्मैरभीष्टप्रसवार्चितातिथि ।**
**नवोटजाभ्यान्तरसंभृतानलं तपोवनं तच्च बभूव पावनम् ।।**

अर्थात् हिमालयपुत्र्याः पार्वत्याः कृते वृक्षाः अभीष्टफलानि ददति स्म । पार्वती उग्रतपस्यायां केवलं वर्षायाः जलं गृह्णाति स्म । यथा-

**आयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मय ।**
**बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः ।।**

एवं प्रकारेण कुमारसम्भवे पर्यावरणस्य तत्त्वम् अनायासेन लोचनपथमायाति ।

**रघुवंशम्**

रघुवंशम् कवेरस्य सर्वश्रेष्ठं महाकाव्यमस्ति । काव्यमिदं संस्कृत महाकाव्यस्य सर्वश्रेष्ठं महाकाव्यं विद्यते । प्रस्तुत महाकाव्यस्य प्रमुखविशेषता कथावस्तु अविदिन्ता मानवजीवनस्य सम्पूर्णचित्रणमिति । संक्षेपरूपेण रघुवंशमहाकाव्यं रघुवंशानां राज्ञां संक्षिप्तेतिहासः कविकुलगुरुकालिदासेन वर्णितोऽस्ति पर्यावरणदृष्ट्याऽपि महाकाव्यमिदं महत्वपूर्णम् अवलोक्यते। अस्मिन् महाकाव्ये प्राकृतिक दृश्यानां यथास्थानं वर्णनम् अवलोक्यते। रघुवंशस्य त्रयोदशसर्ग प्रकृत्याः वर्णनम् अवलोक्यते तावत् । यथा -

**वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।**
**छाया पथेनैव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ।**
**गुरोर्वियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे ।**
**तदर्थमुर्वीमवदारयद्भिः पूर्वः किलायं परिवर्धितो नः ।।**

एवमेव रघुवंश महाकाव्ये अत्र समुद्रस्य यथार्थम् प्रभावोत्पादकं वर्णनं राजते। मेघस्य वर्णनं राजते । पर्वतस्य वर्णनमपि दृष्यते। रघुवंश महाकाव्ये पर्यावरणदृष्ट्यावर्णितमस्ति ।

**अभिज्ञानशाकुन्तलम् -**

अभिज्ञानशाकुन्तलम् संस्कृतसाहित्यस्य सर्वश्रेष्ठं नाटकं विद्यते । उक्तञ्च- 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इति । नाट्यशास्त्रस्य सर्वाणि तत्त्वानि नाटकेऽस्मिन् राजन्ते । नाटकस्य कथावस्तु महाभारतात् उद्धृतमस्ति । अस्मिन् नाटके दुष्यन्त - शकुन्तलयो: प्रणयगाथा सुललितभाषायाम् कविना समुद्धृता ।

अस्मिन् नाटके पर्यावरणस्य सर्वाणि तत्त्वानि गुम्फितानि सन्ति। नाटकस्यास्य अधिकाः घटनाः तपोवने एव भवन्ति शकुन्तला प्रकृत्याः क्रोडे एव पालिता । प्रकृत्याः वर्णनम् अवलोक्यतां तावत् । यथा -

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टि: ।**
**पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसां पूर्वकायम् ।**
**दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा,**
**पश्योदग्रद्प्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।**

अस्मिन् श्लोके मृगस्य अति मनोहरं वर्णनमस्ति । नाटकस्यास्य प्रारम्भे सूत्रधारेणापि ग्रीष्मसमयमधिकृत्य एवं वर्णनं विहितम् । यथा -

**सुभगसालिलावगाहा: पाटलसंसर्गिसुरभिवनवाता: ।**
**प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ।॥**

प्रथमाङ्के तपोवनस्य वर्णनमपि पर्यावरणदृष्ट्या अतिमहत्त्वपूर्णम् अस्ति । यथा

**कुल्याम्भोभिः प्रसृतिचपले: शाखिनो धौतमूलाः**
**भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ।**
**एते चार्वागुफानभुविच्छिन्नदर्माकुरायां**
**नष्टाशङ्का हरिण शिशवो मन्द मन्दं चरन्ति ॥**

नाटकस्यास्य द्वितीयाङ्केपि प्रकृत्याः अतिसुन्दरं मनोहरं वर्णनं यत्र तत्र सर्वत्र लोचनपथमायाति। यथा -

**गाहान्तां महिषा निपानसलिलं श्रृङ्गैस्ताडितं**
**छायावद्धकदम्बकं मृगकुलं रोमन्थमध्यस्य तु ।**

**विश्रब्धं क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले**
**विश्रामं लभतामिदं च शिथिलज्यावन्धमस्मद्धनुः ।।**

शाकुन्तलनाटकस्य चतुर्थोङ्कः तु प्रकृतिवर्णनदृष्ट्या विश्वे प्रसिद्धः । अस्मिन् सर्गे प्रकृत्याः चारु उपस्थापनम् अवलोक्यते ।

**यात्येकतोऽस्तशिखरं पतिरोपधीना**
**मविष्कृतोऽरुणःपुरः सरः एकतोऽर्कः ।**
**तेनो द्वयस्य युगपद्व्यसनोदयाभ्यां**
**लोको नियम्यत इवात्मदशान्तरेषु ।।**

**उपसंहारः**

भारतीये साहित्ये सर्वस्मिन् अपि च भारतीये लोकजीवने कालदासस्य प्रभावः अतुलितरूपेण विराजते । अस्य काव्येषु यद्यपि विविधानां विषयाणां धाराः प्रवहृन्त्यः वर्तन्ते, किन्तु तत्र विशेष्यधारा प्रकृतिवर्णनधारा वर्तते । अस्तु ! एतादृशम् अतिरमणीयम् उपजीव्यभूतम् च कालिदासस्य काव्यम् । महामहिमशालि सांस्कृतिकम् कालिदासकाव्यं सर्वदा अनुशीलनीयम् अस्ति, तेन प्रणीताः विषयाः नूतनप्रतिभाशक्तिं, काव्येरुचिं, पर्यावरणरक्षणे उत्सुकताम् जनयतीति नास्ति संशीतिः । तदर्थमेव मल्लिनाथेन प्रशंसा कृता । यथा-

**कालिदासगिरां सारं कालिदासः सरस्वती ।**
**चतुर्मुखोथवा साक्षात् विदुर्नान्ये तु मादृशः ॥**

## ग्रन्थ-ऋणम्


ऋतुसंहार – चौखम्बाप्रकाशनम् - शिवप्रसादद्विवेदी।
मेघदूतम् - चौखम्बाप्रकाशनम् – आचार्य श्रीषेशराज शर्मा ।
कुमारसम्भवम् - चौखम्बाप्रकाशनम् ।
रघुवंशम् - चौखम्बाप्रकाशनम् ।
कालिदास ग्रन्थावली – आ .सीतारामचतुर्वेदी ।
साहित्यदर्पणः – मोतिलाल् बनारसीदास्


https://doi.org/10.5281/zenodo.7242165

Paper 3

# योगः कर्मसु कौशलम्

**SHEELA SHANKARI K.**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - sheelask01@gmail.com

सार: (ABSTRACT)

**यः आहारविहारेषु कर्मसु, निद्रा-अवबोधस्थितिषु च युक्तः तस्मै योगः दुःखनिवारकः भवति । यदा नियतचितः आत्मनि एव तिष्ठति तदा सः कामरहितः भूत्वा योगी भवति । यदा योगेन चित्तः शान्तः भवति यदा शुद्धमनसा आत्मानं पश्यत् आनन्दम् अनुभवति यत् प्राप्तं तत् एव उत्तमम् इति मत्वा आनन्देन तिष्ठति यत् दुःखसम्बन्धं दूरीकरोति, सः एव योगः । तादृशं योगं दृढचित्तेन उत्साहेन कुर्यात् । प्रशान्तचित्तः रजोगुणरहितः कल्मषरहितः ब्रह्मभावं प्राप्तः योगी उत्तमं सुखं प्राप्नोति । एवम् आत्मसंयमी योगी आत्मानं योगे संस्थाप्य निरायासेन ब्रह्मत्वं प्राप्नोति । सर्वत्र समदर्शी योगयुक्तात्मा सर्वभूतेषु आत्मानं पश्यति । तथा च आत्मनि सर्वभूतान् पश्यति । यः सर्वप्राणिषु सुखदुःखं समानं पश्यति सः एव श्रेष्ठः योगी भवति ।**

**प्रस्तावना**

भगवता गीता भगवद्गीता । एतस्य गीतोपदेशः इत्यपि नामान्तरं वर्तते । श्रीकृष्णः अत्र उपदेशकः अर्जुनः श्रोता । वैदिकसतानवर्णाश्रमधर्मावलम्बिनां हैन्दवानां धर्मग्रन्थत्वेन विद्यते एषा भगवद्गीता । गीतायाम् अष्टादश अध्यायाः सन्ति । अस्याः मोक्षशास्त्रं ब्रह्मविद्या, गीतोपनिषत् इत्यादीनि नामानि अपि सन्ति । प्रत्येकस्यापि अध्यायस्य पृथक् नाम वर्तते । कृष्णार्जुनयोः संवादानुसारं अध्यायाः विभक्ताः । योगविद्या भारतवर्षस्य अत्यमूल्यनिधिः । पुरातनकालादेव अविच्छिन्नरूपेण गुरुपरम्परापूर्वकं प्रचलिताऽसीत् गुरुपरम्परेयम् । योगसमाधिना ऋषयः मन्त्रान् द्रष्टुं समर्थाः आसन् । श्रीमद्भगवद्गीतायां योगः द्विधा वर्णितः श्रीकृष्णेन । यथा – ज्ञानयोगः, कर्मयोगश्च ।

**विषयप्रस्तुतिः**

तदुक्तम् -

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥

परम्परनिरपेक्षं मोक्षसाधनत्वेन कर्मज्ञानयोगरूपं निष्ठाद्वयमुक्तम् । शुद्धान्तःकरणानां ज्ञानभूमिः - कामारूढानां ज्ञानपरिपाकार्थं ज्ञानयोगः उपदिष्टः । सुखदुखं समानभावेन यः स्वीकरोति सः ज्ञानी एव, सः अमृतत्वं प्राप्नोति । कर्मयोगस्य ज्ञानं यः प्राप्नोति सः कर्मरूपी बन्धनस्य त्यागं करोति । अस्मिन् निष्कामकर्मयोगे आरब्धकर्मणः नाशः न भवति। निश्चयस्वभावयुक्तस्य बुद्धिः एकनिष्ठा भवति कर्मयोगे । 'समत्वम् एव योगः' इति उच्यते । काम्यकर्म अत्यन्तं निकृष्टम् । अतः फलापेक्षया विना निष्काम कर्म करणीयम् ।

बुद्धियुक्तो जहातीह उभे सुकृत-दुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥

बुद्धियुक्तः जनः पापं पुण्यं द्वयमपि अत्रैव त्यजति । अतः योगार्थं प्रयत्नः करणीयः । योगः कर्मसु कौशलम् अस्ति । तदेव योगः इति उक्तवान् श्रीकृष्णः । अतः यत् कर्म वयं कुर्मः तस्मिन् कुशलता आवश्यकी । अस्माकं

कर्तव्यं-कार्यं च कौशल्येन सम्यक्तया कुर्मः चेत् तदेव योगः । अतः कार्ये प्रावीण्यता एव योगः इति वक्तुं शक्यते । बुद्धियुक्तः ज्ञानी कर्मणः फलं त्यक्त्वा जन्मबन्धमुक्तः भूत्वा परमपदं प्राप्नोति । यदा बुद्धिः मोहरूपी कल्मषेन आवृता भवति तदा कर्मफलानां विषये वैराग्यं प्राप्नोति । विक्षिप्ता बुद्धिः यदा अचलः भवति तदा योगः प्राप्यते । यः इन्द्रियनिग्रहं कर्तुं शक्नोति सः स्थितप्रज्ञः भवति ।

अस्मिन् लोके द्विविधा निष्ठा ते ज्ञानयोगः तथा कर्मयोगः इति श्रीकृष्णः अवदत् । कर्मणः अनारम्भात् कर्मरहितः न भवति । केवलं कर्मत्यागात् सिद्धिं न प्राप्नोति । कोऽपि एकक्षणमपि कर्मरहितः भवितुं न शक्नोति । यतोहि सर्वे प्राकृतिकगुणैः जातानि कर्माणि कुर्वन्ति । यः कर्मेन्द्रियाणि निगृह्य मनसा इन्द्रियविषयान् सदा स्मरति सः विमूढात्मा मिथ्याचारी च भवति । यः ज्ञानेन्द्रियं मनसा निगृह्य असक्तः भूत्वा कर्मेन्द्रियद्वारा कर्मयोगाचरणं करोति सः विशिष्यते । अकर्मणा जीवनयात्रा न भवति । यज्ञकर्म विहाय अन्यकर्मसु कर्मबन्धनः भवति । यः मानवः आत्मप्रीतः, आत्मतृप्तः च भवति तस्य कोऽपि कर्तव्यः न भवति । अतः कर्मफलेषु असक्तः भूत्वा कर्माचरणं कुर्मः चेत् मोक्षः लप्स्यते ।

प्रकृतेः गुणाः सर्वरीत्या कर्माणि कुर्वन्ति । किन्तु अहङ्कारेण विमूढात्मा यः अस्ति सः 'अहमेव कर्ता' इति चिन्तयति । इन्द्रियाणि, मनो-बुद्धेः आश्रयस्थानमिति कथ्यते । अतः इन्द्रियनिग्रहं कृत्वा निष्कामकर्म करणीयम् । ईदृशम् अव्ययं नाशरहितं कर्मयोगं ज्ञानयोगं च श्रीमन्नारायणः सूर्याय अबोधयत् । सूर्यः मनवे, मनुः इक्ष्वाकवे बोधितवान् । एवं परम्परागतं ज्ञानं राजर्षयः जानन्ति स्म । सामान्यतः जनाः प्रतिफलापेक्षया एव देवताराधनं कुर्वन्ति । तथा चेत् मुक्तिः नास्ति । प्रतिफलापेक्षया विना कर्म करणीयम् । तदा एव मोक्षप्राप्तिः । यः कर्मणि अकर्म, अकर्मणि कर्म च पश्यति सः एव बुद्धिमान् । यस्य कर्माणि कामसङ्कल्पवर्जितानि सन्ति सः एव ज्ञानी । आशारहितः इन्द्रियनिग्रहयुक्तः भूत्वा यः निष्काम कर्म करोति सः योगी भवति । सः जीवने कष्टमपि न प्राप्नोति । आत्मतृप्तः द्वन्द्वातीतः मत्सररहितः लाभालाभयोः समचितः योगी कर्म करोति चेदपि कर्मबन्धनं न प्राप्नोति । द्रव्यमययज्ञस्य अपेक्षया ज्ञानयज्ञः एव श्रेयस्करः । कर्माणि ज्ञाने परिसमाप्तिः भवन्ति । ज्ञानप्राप्तेः अनन्तरं मोहः न भवति । अनन्तरं सर्वप्राणिषु आत्मनि अपि परमात्मा एव दृश्यते । अस्मिन् लोके ज्ञानसमानं पवित्रं वस्तु अन्यत् नास्ति ।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

एवं तादृशं पवित्रं ज्ञानं योगेन संसिद्धः साधकः प्राप्तुं शक्नोति । श्रद्धावान् जितेन्द्रियः मनुष्यः ज्ञानं प्राप्नोति । ज्ञानं प्राप्य शीघ्रं परमश्रेष्ठां शान्तिम् अपि प्राप्नोति । ज्ञानरहितः श्रद्धारहितः संशयात्मा नाशं प्राप्नोति । अतः यः योगेन कर्मत्यागं कृत्वा ज्ञानेन संशयं दूरीकरोति तस्मै कर्मबन्धनं नास्ति ।

कर्मत्यागः कर्मयोगः च मोक्षसाधकौ । किन्तु तयोः कर्मत्यागस्य अपेक्षया कर्मयोगः उत्कृष्टः । द्वन्द्वरहितः सर्वबन्धनात् मुक्तिः प्राप्नोति । ज्ञानयोग-कर्मयोगयोर्मध्ये यत् किमपि एकस्य अनुष्ठानं सम्यक् कुर्मः चेत द्वयोः फलमपि प्राप्तुं शक्यते । ज्ञाननिष्ठाः यत् स्थानं प्राप्नुवन्ति तदेव स्थानं निष्कामकर्मयोगिनः अपि प्राप्नुवन्ति । ज्ञानयोगं कर्मयोगं च समानरीत्या यः पश्यति सः एव ज्ञानी । कर्मयोगस्य साहाय्यं विना संन्यासप्राप्तिः कष्टकरम्।

योगयुक्तः, विशुद्धात्मा, जितेन्द्रियः सर्वभूतेषु आत्मानं यः पश्यति सः कर्म करोति चेदपि कर्मबन्धनं न प्राप्नोति । यः ईश्वरे कर्माणि संस्थाप्य फलापेक्षया विना कर्माणि करोति सः कमलपत्रमिव अम्भसि पापेन लिप्तः न भवति । योगिनः एवं फलापेक्षया विना आत्मशुद्धये कर्म कुर्वन्ति । योगि कर्मफलं त्यक्त्वा शान्तिं प्राप्नोति । अयुक्तः कामप्रेरणया फलासक्तः भूत्वा कर्मबन्धनं प्राप्नोति । जितेन्द्रियः सर्वकर्माणि मनसा त्यागं करोति । आत्मा कस्यापि सम्बन्धस्य सृष्टिं न करोति । सः आत्मा पापं वा पुण्यं वा न करोति । किन्तु ज्ञानम् अज्ञानेन आवृतमस्ति। अतः सर्वेषु प्राणिषु मोहः जायते । किन्तु आत्मज्ञानद्वारा अज्ञाननाशः शक्यते। तादृशाः ज्ञानिनः सूर्यः इव प्रकाशन्ते ।

यः ब्रह्मणि एव मनः संस्थाप्य निष्ठः भवति, ज्ञानेन कल्मशरहितः भवति सः मोक्षं प्राप्नोति। यस्य मनः ब्रह्मणि एव स्थितं सः संसारे विजयी भवति । स्थिरचितः मोहरहितः जितेन्द्रियः ब्रह्मज्ञानी प्रियं प्राप्य हर्षं वा अप्रियं प्राप्य दुःखं वा न अनुभवति । ताद्शः बाह्यविषयेषु अनासक्तः अन्तरङ्गे अक्षयं सुखं प्राप्नोति ।

इन्द्रिय-विषयाणां संयोगेन यत् सुखं प्राप्यते तत् क्षणिकम् । एवमेव दुःखकारकं च । ज्ञानिनः तेषु न रमन्ते । शरीरमोक्षणात् पूर्वम् अत्रैव कामक्रोधाद्भवं वेगं सोढुं यः शक्तः सः योगी । सः एव सुखी मानवः । यः आत्मनि सुखी भवति सः योगी ब्रह्मस्वरूपं प्राप्य मुक्तिं प्राप्नोति । कल्मषरहितः द्वन्द्वरहितः जितेन्द्रियः सर्वभूतहिते रतः मुक्तिं प्राप्नोति । कामक्रोधरहितः यतचेतसः आत्मज्ञानी परिपूर्णः भवति । सः ब्रह्मत्वं प्राप्तुं शक्नोति । बाह्यविषयान् दूरीकृत्य भ्रूमध्ये दृष्टिं स्थापयित्वा प्राणापानं समानं कृत्वा इन्द्रिय-मनो-बुद्धेः निग्रहं कृत्वा इच्छा-भय-क्रोधादिरहितः भूत्वा यः जीवति सः सदा मुक्तः एव । अतः कर्मफलम् अनाश्रित्य यः कर्म करोति सः योगी भवति । स एव संन्यासी । केवलं कर्मत्यागात् योगी न भवति । यत् संन्यासम् इति इच्यते सः एव योगः । यतः सङ्कल्पत्यागं यः न करोति सः योगी न भवति ।

योगप्राप्तेः मार्गः 'निष्काम कर्म करणम्' । सर्वसङ्कल्पत्यागी एव योगारूढः भवति । "उद्धरेदात्मनात्मानं नात्मानमवसादयेत्' । मानवः स्वयं मनसा स्वस्य उद्धारं कुर्यात् । स्वयम् अधोगतिं प्रति न नेतव्यम् । यतः मानवः स्वयं मित्रं शत्रुः च । यः जीवात्मा मनः इन्द्रियाणि शरीरं च जितः सः स्वयं मित्रं भवति । यः जीवात्मा मनः इन्द्रियाणि शरीरं च न जितः सः शत्रुः भवति । आत्म्,असंयमी जितेन्द्रियः पुरुषः शीतोष्णसुखदुःखेषु मानापमानयोः च समचितः भवति । ज्ञान-विज्ञानेन तृप्तात्मा मनोविकाररहितः भवति । सः जितेन्द्रियः मृत्तिकां शिलां सुवर्णं धनं च समानरूपेण द्रष्टुं समर्थः योगी भवति ।

मित्रेषु शत्रुषु बन्धुषु सर्वेषु अपि स्मबुद्धिः यस्य अस्ति सः श्रेष्ठः । योगी सर्वदा एकाकी भूत्वा मनः शरीरं च निग्रहं कृत्वा मनः योगे स्थापयेत् । अतः योगसाधनाय स्वच्छप्रदेशे उपविश्य एकाग्रतया अन्तःकरणशुद्धये योगं कुर्यात् । एवं मनो निग्रहं यः करोति सः योगी ब्रह्मत्वं प्राप्नोति । अत्याहारिणम् एवमेव अल्पाहारिणम् अपि तथा च अतिनिद्रां ये कुर्वन्ति, निद्राहीनानां कृते अपि योगह् न युक्तः ।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखाः ॥

यः आहारविहारेषु कर्मसु, निद्रा-अवबोधस्थितिषु च युक्तः तस्मै योगः दुःखनिवारकः भवति । यदा नियतचितः आत्मनि एव तिष्ठति तदा सः कामरहितः भूत्वा योगी भवति । यदा योगेन चित्तः शान्तः भवति यदा शुद्धमनसा आत्मानं पश्यत् आनन्दम् अनुभवति यत् प्राप्तं तत् एव उत्तमम् इति मत्वा आनन्देन तिष्ठति यत् दुःखसम्बन्धं दूरीकरोति, सः एव योगः । तादृशं योगं दृढचित्तेन उत्साहेन कुर्यात् । प्रशान्तचित्तः रजोगुणरहितः कल्मषरहितः ब्रह्मभावं प्राप्तः योगी उत्तमं सुखं प्राप्नोति । एवम् आत्मसंयमी योगी आत्मानं योगे संस्थाप्य निरायासेन ब्रह्मत्वं प्राप्नोति । सर्वत्र समदर्शी योगयुक्तात्मा सर्वभूतेषु आत्मानं पश्यति । तथा च आत्मनि सर्वभूतान् पश्यति । यः सर्वप्राणिषु सुखदुःखं समानं पश्यति सः एव श्रेष्ठः योगी भवति ।

**उपसंहारः**

मनोनिग्रहः कठिणतमः । मनः चञ्चलः । किन्तु निरन्तर अभ्यासेन वैराग्येण च मनोनिग्रहः साध्यः । मनोनिग्रहः नास्ति चेत् योगः दुःसाध्यः । किन्तु प्रयत्नेन अभ्यासेन जितेन्द्रियः योगं प्राप्तुं शक्नोति । योगी ज्ञानिभ्यः कर्मिभ्यः अपि श्रेष्ठः । यः श्रद्धया देवं भजति सः योगी श्रेष्ठतमः । योगद्वारा अव्यभिचारधृत्या मनः-प्राण-इन्द्रियाणां कर्माणि या धृतिः नियन्त्रणं करोति सा धृतिः सात्विकी धृतिः । अतः इन्द्रियनिग्रहं कृत्वा प्रतिफलापेक्ष्या विना कौशलेन कर्म कुर्मः चेत् तदेव योगः इति उच्यते । भगवद्गीतायां श्रीकृष्णः अर्जुनाय इन्द्रियनिग्रहविषये, निष्काम कर्मविषये, योगविषये एवं बोधितवान् । अर्जुनः श्रीकृष्णस्य वचनानुसारं आचरणं कृत्वा जयं प्राप्तवान् । एवमेव

लोके बहवः साधकाः गीतातत्त्वम् अनुसृत्य ज्ञानं योगाचरणं कृत्वा योगिनः भूत्वा सिद्धिं प्राप्तवन्तः । अतः साधकानां कृते गीतासारः मार्गदर्शकः भवति ।


- Bhagavad-Gita – Sri Ramakrishna ashrama yadagiri, Mysore


https://doi.org/10.5281/zenodo.7243881

Paper 4

# ईशावास्योपनिषदि साधनानिरूपणम्

**Shridhar Hegde**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id- shreear@gmail.com

**सारः** (ABSTRACT)

**अनन्तगुण-अनन्तशक्ति-अनन्तज्ञानैः युक्तः परमात्मा । परमात्मा सर्वसम्पूर्णः इति विख्यातः। अस्य विश्वस्य अपि न्यूनताः कुत्रापि न सन्ति । ईदृशं सर्वसम्पूर्णं जगत् सर्वशक्तपरमात्मना एव उद्भूतम् । परमात्मा तु अखण्डः, अनन्तः, अच्युतः, , सर्वव्यापी, सम्पूर्णश्च। परमात्मा विश्वानि सृष्ट्वा स्वयं दूरं गच्छति किम् इति प्रश्ने कृते नैव । परमात्मा विश्वस्य अणुरेणुतृणकाष्टादिषु अपि व्याप्तः इत्यतः समग्रं विश्वम् अस्य वासस्थानम् । सः अनन्तः, अपारः, अगाधश्च । एतादृश-परमात्मव्याप्ते प्रपञ्चे मनुष्यः 'मदीयम्' इति वस्त्वात्मकं कथं चिन्तयेत् ? सर्वं परमात्माधीनम् । तेन दत्तं त्यक्तमेव अस्माभिः त्यागबुद्ध्या उपभोक्तव्यम् । "इदं मदीयम्" इति भावनया वस्तुनः विषये प्रभुत्वकथनं सर्वथा अनुचितम् । सः सत्यमार्गोऽपि नैव । तस्मात् श्रेष्ठः भक्तः सदापि एष एव ईशप्रसादः इति भावनया भोग्यवस्तूनि उपभुञ्जीत ।**

**प्रस्तावना**

ईशावस्योपनिषत् संहिताभागस्य एकमात्रम् उपनिषत् । सर्वसाम् उपनिषदाम् प्रथमं तथा च प्राचीनम् । अध्यात्ममहद्दर्शनस्य अनुभूतिं प्रति लीलया नीयमानः अत्यन्तं सरलभागः । भारतस्य सनातनसंस्कृतेः रहस्यं सर्वम् अत्र निहितमस्तीति अस्याः मान्यता अधिका । अस्याः रहस्यम् अधिगत्य लोकसंग्रहार्थं अन्येभ्यः अपि ज्ञापयित्वा ब्रह्मानुभूतेः वितरणं स्यादिति उद्देशेन अनेकैः आचार्यमहानुभावैः अस्याः उपनिषदः व्याख्यानम् अक्रियत ।

**विषयपरामर्शः**

देहेन्द्रिय-मन- आदीनि चैतन्यवच्छेदकानि "उपाधयः" इत्युच्यन्ते । एषामुपाधीनां मन एव प्रधानम् । तदेव कारणं जीवस्य बन्धमोक्षयोः, तथा च श्रुतिः –

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ अमृतबिन्दूपनिषत् ॥

यदा तद्विषरूपान् विषयान् भुङ्क्ते तदा तन्मनो मालिन्यम् अधिगच्छति संसारं च आवाहयति । यदा विषयेभ्यः विमुखं भवति तदैव तन्नैर्मल्यमार्गम् अधिरोहति । यावदत्यन्तं निर्मलीकृतं तावदेव त्वग्रहितपलाण्डु इव प्रविलीयते परमात्मा प्रकाशते । मानसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन । (बृहदारण्यकोपनिषद् – ४.४.९) इत्युक्त्वा श्रुतिरेव ब्रह्मणो मनसः उपयोगित्वमुपदिशति ।

एकमपि एतन्मनः, वृत्तिभेदेन त्रिधा प्रवर्तते । यदा तत् चिन्तन-मनन-विवेक-विचाररूपेण प्रवर्तते तदा बुद्धिः इत्युच्यते । यदा तु राग-द्वेष-अनुकम्प-लोभ-मोहादिरूपेण प्रवर्तते तदा संवेदनम् इति मन्यन्ते । यदा च करिष्यामि न करिष्यामि इत्यादि इच्छाशक्तिं प्रदर्शयति तदा इच्छा इति वा सङ्कल्पः इति वा उच्यते । अतः

विचारशक्ति-संवेदनशक्ति-इच्छाशक्तिमत् मनः इति अवगम्यते। अहङ्कारस्तु एतासु सर्वासु वृत्तिषु अनुस्यूतः वर्तते ।

अथ इदानीं एकैकः योगः मनोविशुद्धिं कथं साधयति इति संग्रहेण उच्यते । मनोविशुद्धिस्तु द्वाभ्यां सोपानाभ्यां साधितव्या । इन्द्रिय-विषय-संयोगानां प्रथमं सोपानम् । अवशिष्टः संस्कारबीज-नाशः द्वितीयं सोपानम् । तत्र तावत् आद्यं सोपानं सर्वयोगसमानम् । विशेषस्तु प्रतियोगं द्वितीये एव । श्रवणादिद्वारा प्रत्यगात्मचिन्तनाद् ब्रह्मानुसन्धानाद् उभयोः ऐक्यसन्धानात् च यावत्प्रमाणं मनः ब्रह्माकारवृत्तिं प्राप्नोति तावत्प्रमाणं संस्कारबीजोऽपि नश्यति। निखिल-हेय-प्रत्यनीक-कल्याण-गुण-गणौघस्य दिव्यमङ्गलस्वरूप-रूपविभवविग्रहस्य रसाख्यस्य परमेश्वरस्य सन्ततचिन्तनात् संस्कारबीजं मनः निःशेषं प्रविलीयते यथा लवणपुत्थलिका जलधौ विलीयते । वेदेषु पुराणेषु वर्णितं ब्रह्मस्वरूपं, तत् कीदृशम् ? तदपि तटे स्थित्वा सागरदर्शनमिव। केवलं महती जलराशिः, उल्लोलाः तरङ्गाः दृश्यन्ते । समाधिस्थस्य एव ब्रह्मज्ञानं स्यात् ब्रह्मदर्शनं च । तदा विचारः सम्पूर्णतया निवर्तते, जोषमास्यते मानुषैः । लवणपुत्थलिका कथा एवं भवति - काचित् लवणपुत्थलिका समुद्रं परिमातुं गता । समुद्रजलं कियत् गभीरमिति ज्ञातुं तत्र उपस्थिता । यावद् अवातरत् जले तावदेव गलिता लीना अभवत् । तस्याः ज्ञानं तु न अभूत् ।

एषा भक्तियोगविधा । कर्मफलचिन्तनाद् उपरतेः अहङ्कारः । अत एव मनश्चापि कृतप्रायोपवेशन-पन्नगवद् विनश्यति । एतत्कर्मयोगविधानम् । यमनियम-आसनादि-आष्टाङ्गैः एकाग्रीकृतस्य मनसः प्रत्यगात्माभिमुखं प्रवाहणं अथवा ईश्वराभिमुखम् उन्नयनं मनोनिरोधस्य उपायः । तद्वारा तल्लयस्य उपायः । सा एषा राजयोगरीतिः । एतेन ज्ञानयोगः भक्तियोगश्च, संवेदनसंशुद्ध्या कर्मयोगश्च, सङ्कल्प-इच्छयोः आधारीभूतस्य अहङ्कारनिर्मलीकरणेन राजयोगश्च, मनोवृत्तिनिवृत्तिद्वारा च मनोविशुद्धिम् आवहन्ति इत्युक्तं भवति । एकैकयोगो मनसः एकदेशं संस्करोत्यपि कृत्स्नं मनः विशुद्धिं लभते एकवस्तुत्वात् । साधकाः स्वशक्ति-प्रवृत्ति-संस्कार-अभिरुचि-भेदानुसारेण चतुर्षु योगेषु एतस्मिन्नेव निरताः अपि इतरयोगसाहाय्यम् अंशतः स्वीकृत्य यदि योगसमन्वयम् अभ्यस्येयुः तर्हि शीघ्रं फलगामिनः भवेयुः, बुद्धि-संवेदन-सङ्कल्पयुक्तस्य मनसः ऐक्यत्वादिति ।

अथ परमेश्वरानुग्रहः प्रसङ्गतः पर्यालोच्यते – *"नायमात्मा प्रवचनेन लभ्यः.....* इति आत्मलाभः आत्मवरणाद् एव भवतीति उक्तम् कठोपनिषदि । ब्रह्मणः प्रसादोक्तिः येन प्रसादेन अकृतुः पुरुषस्य आत्मनः महिमानम् पश्यति वीतशोकश्च भवति । गीतायां च *"दैवं चैवात्र पञ्चमम्"* इति कर्मणः फलप्रदानस्य च दैवाश्रयत्वं भगवता एव स्पष्टं निर्दिष्टम् । तथा *"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया"* ॥ गीता १८-६१) इति ईश्वनियन्त्रणम् उक्त्वा तदनन्तरमेव "*तमेव शरणं गच्छ भारत । तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥*(१८.६२॥) इति तत्प्रसादान्मुक्तिः प्राप्यत इति उक्तम् । भगवतः शरणागतेः सर्वपापविमोचनं तु तत्रैव चरमश्लोके उक्तम्, अघमोचनार्थं वा मोक्षार्थं वा कृता भगवत्प्रवृत्तिः एतद् भगवदाश्वासनफलमेव । श्रूयते च – तं ह देवम् आत्मबुद्धिं प्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये"। श्वेताश्वतरोपनिषद् ६.८) इति ।

**भक्तस्य प्रार्थना**

भक्तस्य प्रार्थनं भगवतः प्रसादनं च अद्वैतदृष्ट्यापि व्याख्यातुं शक्यते । या शक्तिः परमेश्वराख्या भक्तसंसेविता स भक्तस्य प्रत्यगात्मा एव । प्रसुप्तवानरशिशुः कश्चित् निद्रायां वृक्षात् पतन्निव अनुभवं प्राप्य स्वपुच्छमेव शाखा इति मत्वा आकृष्टवान् । ततः सः प्रबुद्धवान् इति । अत्रापि एतादृशी व्याख्या । भक्तः परमेश्वराख्यं यम् आधारं गृह्णाति सः स्व-अभिन्न-प्रत्यगात्मा एव इति अनुभूत्या ज्ञायते । परमेश्वरप्रार्थनाद्

यावत्प्रमाणं तस्य हृदयद्वारम् अपाव्रियते तावत्प्रमाणं तस्य एव शुद्धचैतन्यस्य प्रवाहः स्यन्दते, स एव परमेश्वरानुग्रहः इति मन्यते।

**ईशावस्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्॥ १॥** ***(ईशावास्योपनिषद्)***

परिणामात्मके अस्मिन् प्रपञ्चे यत्किञ्चित् परिणामस्वभावयुक्तम् अस्ति तद् सर्वं परमेश्वरेण व्याप्तम्। ननु "सर्वं खल्विदं ब्रह्म" (छान्दोग्योपनिषद् ३.१४.२.) "स एव अथस्तात् त उपरिष्टात्" (छान्दोग्योपनिषत् ८.२५.१.) "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" (महानारायणोपनिषत् ११.६) इत्यादि श्रुतेः सर्वस्यास्य जगतः ब्रह्मात्मकत्वाद् वास्यमिति। तेन त्यागवृत्या सह अनुभवति। संसारं घोरतमसा मीनमकराः इव ग्रसनभययुक्तत्वाद् संसारस्य त्यागः एव एकमात्रोपायः इति प्रथमं दृश्यते। इति चेत् तथा न यतः – कस्यचन ललाटे उपविष्टां काञ्चित् मक्षिकां मारयितुं शिलाखण्डेन ताडितवान् तदा सः शिलाखण्डः मक्षिकया सह तं मनुष्यमपि अमारयत् इतिवत् परिहारः अस्ति खलु इति चेत् तथा न। सर्वभोग्यवस्तूनामपि ईश्वरेण व्याप्यत्वात् मम सङ्गलेशस्य अपि अभावात् च सर्वाण्यपि भोग्यजातानि ममैव सन्तु इति जम्बूकबुद्धिः मा भवतु इति। परवस्तुकाङ्क्षया दुःखं परम्परयैव भवेदिति।

**परमात्मनः स्वरूपम्**

अनन्तगुण-अनन्तशक्ति-अनन्तज्ञानैः युक्तः परमात्मा। परमात्मा सर्वसम्पूर्णः इति विख्यातः। अस्य विश्वस्य अपि न्यूनताः कुत्रापि न सन्ति। ईदृशं सर्वसम्पूर्णं जगत् सर्वशक्तपरमात्मना एव उद्भूतम्। परमात्मा तु अखण्डः, अनन्तः, अच्युतः, , सर्वव्यापी, सम्पूर्णश्च। परमात्मा विश्वानि सृष्ट्वा स्वयं दूरं गच्छति किम् इति प्रश्ने कृते नैव। परमात्मा विश्वस्य अणुरेणुतृणकाष्टादिषु अपि व्याप्तः इत्यतः समग्रं विश्वम् अस्य वासस्थानम्। सः अनन्तः, अपारः, अगाधश्च। एतादृश-परमात्मव्याप्ते प्रपञ्चे मनुष्यः 'मदीयम्' इति वस्त्वात्मकं कथं चिन्तयेत्? सर्वं परमात्माधीनम्। तेन दत्तं त्यक्तमेव अस्माभिः त्यागबुद्ध्या उपभोक्तव्यम्। "इदं मदीयम्" इति भावनया वस्तुनः विषये प्रभुत्वकथनं सर्वथा अनुचितम्। सः सत्यमार्गोऽपि नैव। तस्मात् श्रेष्ठः भक्तः सदापि एष एव ईशप्रसादः इति भावनया भोग्यवस्तूनि उपभुञ्जीत। प्रथमम् ईश्वरार्पणं कृत्वैव भक्तः स्वयं सुखभोगं अनुभवति। सर्वं परमात्माधिष्ठितम् अतः सर्वं तदीयम् इति भावनया उपयोगः योग्यमार्गः। ईशसङ्कल्पमात्रेण लब्धं स्वीकृत्य ईश्वरार्पणदृष्ट्या तानि सेवित्वा सन्तृप्तिप्राप्तिरेव श्रेयः इति तात्पर्यम्।

बृहदारण्यके "*आनन्दनाम ते लोका अन्धेन तमसाऽवृताः।*
*तांस्ते प्रेत्याभिगच्छन्ति अविद्वांसोऽबुधा जनाः॥* (४.४.१) इति श्रूयते

एतेन सादृश्यात् अन्धेन तमसावृताः जनाः एव अविद्वांसोऽबुधा जनाः इति दृश्यते। अतः नैषः द्राविडप्रणायामः किन्तु *"आयुर्वै घृतम्"* इत्यादीनां व्याख्यानं युक्तमेवेति।

आत्मतत्त्वम्

अनेजदेकं मनसो जवीयं नैनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यान् अत्येति तिष्ठत् तस्मिन्नपो मतरिश्वा दधाति॥

एतत् आत्मतत्त्वम् अचलम्। सर्वप्राणिषु अपि समानम्। मनसोऽपि वेगवत् पूर्वगामि इदं देवताभिः अपि न प्राप्तम्। तद् अचलरूपेण स्थित्वा धावत् इतरवस्तूनि अतिक्रामति। तत्र वायुः जलं धरति। तस्मिन् सर्वगते सर्वव्यापिनि आकाशरूपे आधारे मातरिश्वा वायुः जलं मेघरूपेण परिणतं कृत्वा धारयति इति तात्पर्यम्। अपि च –

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥

तद् आत्मतत्त्वं चलनशीलवस्तुरूपेण चलति । अचेतनवस्तुरूपेण न चलति । देहादीनाम् उपाधिसम्बन्धेन चलत् इव दृश्यते न तु स्वतः चलति । तद् दूरे समीपे च अस्ति । यतः सर्वगतं च तत् । अज्ञानिनः तद् अप्राप्य दूरे तिष्ठन्ति ज्ञानिनां तु प्रत्यगात्मा अस्तीत्यतः तेषाम् अत्यन्तं समीपम्। तद् अन्तर्यामिरूपेण सर्वेषामन्तः भवति । अत एव तद् सर्वगतं सर्वव्यापि च ।

अतः आत्मदर्शनफले एवमुक्तम् –

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

दैवीसम्पद्युक्तः साधनानन्तरं सर्वाणि भूतानि आत्मनि एव साक्षात्करोति, सर्वभूतेषु च अन्तर्यामिनम् आत्मानं आत्मत्वेन अनुभूय 'सर्वं मयि वर्तते, अहं सर्वेषु च वर्ते' इति पश्यति सः तद्दर्शनात् पश्चात् न विजुगुप्सते इति ।

यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कश्शोक एकत्वमनुपश्यतः ॥

यः बहुप्रयासेन प्रथमवारं समाधिं प्राप्तवान् तस्य प्रमादवशात् स्कलनभयं भवत्येव । तस्य ज्ञानमपि सुदृढं न भवति । तस्मात् समाधितः यदा उत्तिष्ठति तदा तस्मिन् शोकमोहौ सम्भवेताम् । परं यः विज्ञानी स्व-इच्छानुसारम् एताम् अवस्थां प्राप्तवान्, अन्तः बहिश्च भेद एव नास्तीति चिन्तयतः यदेकत्वं समाधावानुभूतं तस्य मोहः वा शोकः वा न । ज्ञानी अनुभूतिः नाम क्षीरं पुनः पुनः पीत्वा पुष्टं परमार्थं परिज्ञानं प्राप्नोति । अयमेव अत्र विशेषः ।

**आत्मनः स्वरूपलक्षणम्**

स पर्यगाच्छुक्रमकार्यमव्रणम् अस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूः याथातथ्यतोऽर्थान् व्यदधात्
शाश्वतीभ्यस्समाभ्यः ॥

आत्मनः लक्षणम् – सर्वव्यापी, ज्योतिर्मयः, अशरीरः, अव्रणः, नररहितः, शुद्धः, अपापविद्धः, कविः, पण्डितः, सर्वोत्तमः स्वयम्भूः च । सः शाश्वतीभ्यः समाभ्यः प्रपतिभ्यः तेषां कर्तव्यानि यथानुरूपं वितीर्णवान् । यः व्रतादिकम् आचरति, वा न किञ्चित् व्रतम्, स्नातकः अस्नातको वा, वैदिकाग्निं धरति वा, ब्रह्मचारी, गृहस्थो वा, वानप्रस्थकर्ता वा प्रव्राजको वा यः परमात्मानं येन केनापि प्रकारेण वा अधिगच्छति सः एव अमृतत्वं प्राप्नोति । अतः ब्राह्मणादित्रिषु वर्णेषु जन्म सर्वकर्मणां संन्यासः काषायवस्त्रम् दण्डकमण्डलुधरणमात्रेण परिव्राजकाः इत्यादयः अमृतत्वं प्राप्तुम् आवश्यकम् इति आग्रहः सम्यक् न ।

सूक्ष्मः, अशरीरः, शुद्धः चात्मा एव स्वशक्त्या सर्वत्र प्रसार्य सृष्टेः उत्पन्नाय कारणीभूतः अभवत् । तत्रत्यानि सर्ववस्तूनि अनुशासनबद्धानि अकरोत् । एवम् अनादिकालात् अस्य विश्वस्य योग्यां व्यवस्थाम् अकरोत् । केवलं व्यक्तज्ञानेन उपासनेन वा मनुष्यः मुक्तिं प्राप्तुं न शक्नोति । यतः व्यक्तं नाम अव्यक्तेन स्थलकालेषु निर्मितः नामरूपविशेषः । व्यक्तं चलम्, चञ्चलम्, क्षणभङ्गुरम्, दुःखमयम्, अपूर्णम्, च विद्यते । अव्यक्तं नाम परमात्मनः अगोचरी तपःशक्तिः । विश्वनिर्माणे परमात्मना उपयुक्ता योगशक्तिः एव अव्यक्तम् । अनया दृष्ट्या यदि पश्यति तर्हि अव्यक्तं आनन्दरहितां शून्यरूपां मुक्तिं प्राप्नुयात् । जन्ममरणयोः चक्रात् रक्षणं अधिगच्छेत् परन्तु सः नित्यानन्दगतिं न विन्देत । परमात्मनः प्रसादात् ऋते तस्य साक्षात्कारो वा मोक्षो वा न सिध्यतीत। इदं मोहकं जगत् अस्माकम् इन्द्रियाणि आकृष्य मनः विषयेषु प्रवर्तयति । परमात्मा सर्वत्र व्याप्तः चेदपि सः प्रकृतिमायया रक्तवर्णेन आच्छादितः अस्ति । अतः सत्यस्य ज्ञानमपेक्षितम् इत्यतः अस्माभिः प्रकाशस्य

उगमस्थानस्य प्रकाशः आवश्यकः । दृश्यसूर्यः दृश्यमानायाः सृष्टेः पोषकः नियामकः, प्राणदाता च यथा, तथा ज्ञानसूर्यः चित्सृष्टेः पोषकः प्रकाशकः च विद्यते । एकान्तज्ञानसूर्यस्य भक्ताय ज्ञानस्य साक्षात्कारः भवति न संशयः । मरणकालपठनीयाः तत्प्रार्थनाः मन्त्राः एवम् सन्ति। तत्र तावत् आदित्यरूप-भगवत्प्रार्थनम् –

*हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।*
*तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥*

सत्यस्य मुखं सुवर्णस्य आवरणेन पिहितम् अस्ति । हे पोषक भगवन् ! सत्यधर्मयुक्तं त्वां द्रष्टुं तद् अपावृणु इति अस्य तात्पर्यम् । एकात्मदर्शनं प्राप्य अनन्तरं मृत्युसन्निहितः साधकः स्वमनः चोदयति । अधुना मम प्राणवायुः मृत्युरहितं वायुं प्राप्नोतु, अयं देहः भस्मीभूतः एव । हे क्रतो ! स्मर । कृतं स्मर । यः अग्निः पञ्चभूतात्मकं शरीरं भस्मसात्कुरुते तस्य अन्तर्यामिनः भगवतः प्रार्थनापूर्वकं श्रुतिः उपसंह्रियते –अग्ने नय सुपथा राये अस्मान् -

विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्टां ते नम उक्तिं विधेम ॥

हे अग्ने धनार्थम् अस्मान् उत्तममार्गेण नय । हे देव ! सर्वज्ञानी त्वं अस्माकं कुटिलं पापं संहर। तुभ्यं नमः इति पुनः पुनः स्मरन्तः वदेम इति अस्य तात्पर्यम् ।

**उपसंहारः**

प्रपञ्चे विद्यमानं यत् अस्मदीयं न, अस्माभिः सम्पादितं न, तस्मात् विषयात् मनः प्रति स्वीकुरुत । अतः मानवः प्रामाणिकपरिश्रमेण प्राप्तफलेन जीवनस्य उपभोगं कृत्वा दुराशां त्यजेत्। जीवने अध्यात्मिकस्वभावस्य नैतिकस्वभावस्य वर्धनमेव जीवनस्य लक्ष्यम् । प्रपञ्चे विद्यमानानि वस्तूनि सर्वाणि भगवता आवृतानि इति दृष्ट्या, आलस्यं मत्सरादिकम् अरिषड्वर्गान् च त्यक्त्वा कार्यं करणीयम् । उत्तमप्रयोजनकारिकर्मणा एव अस्माकं दीर्घं जीवनं स्यात् । अर्थपूर्णं, योजनाबद्धं, अनुशासनयुक्तं च जीवनं कर्तुं अस्माभिः चारित्र्यशक्तिः सम्पादनीया । सा शक्तिः उपनिषत्सु निहिता । तां साक्षात्कर्तुं वयं तासां तत्त्वानाम् उपासनां निरन्तरं कुर्मः । तेन आस्माकं जीवनं सुन्दरं सुखमयं हर्षमयं च भवति इत्यत्र न कापि संशीतिः ।

## ग्रन्थऋणम् –


- Ishavasyopanishad Sankara Bhashya with Hindi Translation - Gita Press 1940


https://doi.org/10.5281/zenodo.7243801

Paper 5

# गोवर्धनगिरिपूजा गोवर्धनोद्धारणं च

**SAKU BAI**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - gnacharya25@gmail.com

**सार**: (ABSTRACT)

**भगवान् श्रीकृष्णः मन्दरगिरिं स्वस्थाने सर्वभूतेषु पश्यत्सु पूर्ववत् लीलया उन्नीतवान् । यशोदा, रोहिणी, नन्दः, बलराम: च कृष्णम् आलिङ्ग्य स्नेहकातरा: आशिष: दत्तवन्तः । दिवि देवगणा: सर्वे, सिद्धगन्धर्वचारणा: तुष्टुवु: । सर्वे पुष्पवर्षाणि पातयामासुः । दिवि देवप्रचोदिता: शङ्खदुन्दुभय: नदन्ति । तुम्बरुप्रमुखा: गन्धर्वपतय: गायन्ति। सर्वेऽपि अस्य कृष्णस्य हृदिस्पृश: गायन्तः मुदिता: गोकुलं प्रति ईयु: । इत्थं भगवान् श्रीकृष्णः स्वाश्रितान् शरणागतान् जनान् प्रीतिपूर्वकं सविश्वासं रक्षितवान् तदानीन्तनकाले । एतेन वयं इदं जानीमः यत् अस्माकं मनोभिलषितान् कामान् देवाः पूरयन्ति एव । तान् वयं भक्त्या श्रद्धया अर्चाम एव । परन्तु अस्माभिः प्रकृतिः कदापि न पूजिता । इयं प्रकृतिः अस्मभ्यं सर्वविधं आनुकूल्यं कल्पयति ददाति च । परं वयं प्रकृतिमातरं न पूजितवन्तः । भूगिरिपर्वताः अस्माकं वासस्थानम्, जलम् अस्माकं जीवनम् । वायुः जीवनाधारः । अग्निः जीवितस्य अङ्गम्, आकाशः अस्मत् प्रेरणादायकः च । तस्मात् वयं मनुषेभ्यः जीवनप्रदां प्रकृतिं सर्वदा आराधयाम ।**

**प्रस्तावना**

श्रीकृष्ण: पौगण्डवयसि कृताः लीलाः निरूप्य सिंहावलोकनन्यायात् कौमारावस्थायाम् कृतस्य गोवर्धनोद्धारमहिमानं सर्वेभ्यः ज्ञापयितुमिष्टवान् । अतः उपोद्धातरूपेण सर्वज्ञ: श्रीकृष्ण: स्वस्य महिमानम् अभिव्यञ्जयितुम् तथा इन्द्रस्य मदस्य दमनं कर्तुं किं करणीयमिति नन्दादीन् पृष्टवान् । कृष्णस्य उपदेशात् गोपालका: इन्द्रयागम् अकृत्वा गोवर्धनयज्ञमहोत्सवं आचरितवन्तः इति श्रीमन्महाभागवते दशमस्कन्दे वर्ण्यते । उत्पथवर्तिपुरुषाय सन्मार्गोपदेशं कृत्वा शास्त्रानुसारेण सन्मार्गे आनेतुम् आरभे इति वदति ।

**विषयप्रस्तुतिः**

भगवान् श्रीकृष्णः अपि तत्रैव बलदेवेन सह निवसन् इन्द्रयागकृतोद्यमान् गोपान् अपश्यत् । सर्वात्मा सर्वदर्शन: भगवान् तस्य महोत्सवस्य उद्देशं जानाति चेदपि वयोवृद्धान् नन्दादीन् विनम्रतया प्रश्नम् अप्रच्छत् । तत्रापि वञ्चनं न करोतीति नन्दम् एव अपृच्छत् अहो जनक! अयं संभ्रम: कुतः ? किमुद्दिश्य अयम् उत्सवः क्रियते ? अहं समीपे अस्मि चेदपि युष्मभ्यम् अन्तरङ्गे किमर्थं भ्रमः ? केन साधनेन अथवा अधिकारेण अस्मिन् मख: साध्यते इति सर्वं विषयं मे ब्रूहि । एतत् ज्ञातुम् महती इच्छा अस्ति अत: सविवरं वदतु । हे पितः ! शुश्रूषवे मह्यं एतत् ब्रूहि । हि साधूनाम् सर्वात्मना कीर्त्यम् इह विषये गोप्यं न ।

"कृष्ण ! सर्वं तुभ्यं वदनीयमेव, मह्यं तावत् ज्ञानं नास्त्येव, परन्तु बाल्ये सन्ध्यावन्दनादीन् कृतमेव पुनः कुर्म: इत्युक्ते फलज्ञानं विना युष्मभ्यं फलं न प्राप्यते इति वदति । पुनरपि भगवान् मन्त्रोच्चारणेन द्रव्यसम्पत्ते: ऋत्विजाम् अनुगुणं किञ्चित् फलं प्राप्यते चेदपि पूर्णफलं न विन्दते । प्रकृतं त्वं कं समाह्वयति इति वद तात !

इति पृच्छति । तत्र देवताकार्यादीषु तावत् क्रियायोगा: भवता विचारिता: अथवा लौकिका: इत्युक्ते अज्ञानात् करिष्यति वा इति पृच्छत: मे तत् साधु भण्यताम् ।

मां वक्तुं न किमपि रहस्यं खलु ? स्वकीय: परकीय: इत्यादिकम् अचिन्त्य लोकदृष्ट्या शत्रून् न वदति चेदपि मित्राणि अवश्यं वदन्ति एव । अत: भवतां सखा अहं, मां सर्वमपि वदतु । केचन जनाः फलदेवताः ज्ञात्वा कर्माणि कुर्वन्ति चेत्, अन्ये केचन किमपि अज्ञात्वा कुर्वन्ति । परन्तु ज्ञात्वा कृतस्य कर्मणः सम्पूर्णं फलम् लभ्यते एव । ये किमपि न जनन्ति तेभ्य: फलं न लभ्यते । अत: युष्माभिः आरब्धं एतत् यज्ञकार्यम् अग्रिमफलविचारम् कृत्वा कुर्वन्तु, अथवा अन्धपरम्परया आगत्य लोकाचारान् अनुसृत्य क्रियताम् । अयं विषय: मया अवश्यं ज्ञातव्यः इति वदति । एवं रीत्या प्रश्नान् पृष्टवतः पुत्रस्य सन्देहान् परिहरन् पिता युक्तिं विचार्य एव अयं यागः क्रियते इति वदन् "किम् फलम्, कां देवताम् उद्दिश्य इत्यादीन् संक्षेपेण वदति ।

श्रुणु कृष्ण ! मेघा: भगवतः इन्द्रस्य आत्ममूर्तय: इव । इमे मेघा: अपि भूतानां प्राणीनां जीवनं साधनं, पय: अभिवर्षन्ति । अतः इन्द्र: देवता, वर्षा एवं फलमिति सूचितमस्ति । ते मेघा: लोकोपकरका:. अत: वार्मुचः ईश्वरयागं न करोति चेत् शिक्षितुं समर्थ: सः इन्द्रः । इन्द्रम् उद्दिश्य तपः क्रियते । इहलोके अलभ्याः धर्मार्थकामा: इति, त्रयाणां पुरुषार्थानां सिद्धये सः पूजनीयः एव । तत् यागशेषादेव आत्मन: जीवनम् नेतव्यम् । वर्षादेव अस्माकं जीवनम् । प्रयत्नशीलेभ्यः पुरषेभ्य:, कर्षकाणां फलोत्पादक: इन्द्र: एव फलसिद्धिं यच्छति । हे कृष्ण! य: इन्द्रयाग: अस्माकम् पूर्वजानां कालेभ्य: कुलपरम्परया आगतः धर्मः, कामात् वा लोभात् वा इतरेभ्य: भयात् वा तत् वयं न कुर्म: चेत् न श्रेय: भविष्यति । अतः अस्माकं कुलपरम्परया आगतम् इदं पर्व वयम् आचराम इति नन्द: वदति ।

**श्री भगवान् उवाच -** पुनरपि सः एतेन कर्मणा इन्द्राय रागं जनयित्वा तद्वारा तस्मै "अहमेव नियामक:" इति लोकाय दर्शयितुम् मनसा इच्छत: नन्दादीन् दृष्ट्वा हरि: वदति "फलजनकं कर्म करोति चेत् सर्वं लभ्यते एव तत् कर्म भगवदधीनमस्ति । कर्मफलं ये यच्छन्ति, कर्मप्रेरक:, कर्मशब्दवाच्य:, सकलजगज्जन्मदिकारणकर्ता श्रीमन्नारयण: एव, तस्य आराधनम् अकृत्वा तस्य अधीनस्य इन्द्रस्य आराधनेन किम् फलम् इति वदन् - अहो जनक! लोके समस्तजन्तव: कर्मणा जायन्ते कर्मणैव प्रलीयन्ते, एतन्मध्ये जीवितकाले सम्भवत: सुखं दु:खं, भयं, क्षेमः, मोक्षं च अभिपद्यन्ते । प्रवृत्ति: बुद्धिपूर्वकम्, कर्माणि अचेतनानीति पौरकत्वं न दास्यति। अत: जगत् कर्माधीनमिति वक्तुं न शक्यते । कारणं चेतनाधीनमिति वक्तव्यम् । सोपि साधारणं भवति चेत् न पर्याप्तम् उत्तमम् एव भवितव्यमिति कृष्णस्य अभिप्रायः । सः अज्ञातस्य नन्दगोपस्य मानसिकशङ्कां परिहरति।

अकर्मिभ्य: दातुं न शक्यते, कर्मानुवर्तिनां प्राणीनां विषये इन्द्र: किम् करिष्यति? सत्वादिगुणानुसारेणैव तत्तत्प्राणीनां स्वभावः अपि भिन्नः भविष्यति । तत्तत्स्वभावम् अनुसृत्य कर्मसु प्रवृत्ति: भवति । कर्मिभ्य: योग्यं फलं लभ्यते । एवं जीवराशि: सर्वं स्वभावाधीनतया स्वभावमेव अनुवर्तते ।

"स्वभावेकर्मणि चय: सत्वादिषु गुणेषु च।
स्थितो विष्णु: सर्वकर्ता पृथक् संस्थश्चसर्वग:।

तेषां अस्वातन्त्र्यादिवत् स्व स्वातन्त्रादीन् प्रदर्श्य इन्द्रस्य मदपरिहाराय, पर्वतादिषु स्वयमेव गोपालकद्वारा पूजामकरोत् । विष्णुः सर्वेषां समानतया तिष्ठति । उच्चनीचभेदभावान् निवारयन् युक्तायुक्तफलम् आदधानः हिताहितं विचिन्त्य सर्वान् पालयति इति उक्तवान् । तथैव शङ्कया स्थितानां समाधानं वदन्

अवान्तरेश्वरेभ्य: सामर्थ्यं नास्तीति तान् पूजयित्वा लाभ: नास्ति तत्कारणाद् हरिरेव पूजनीयः। स: सर्वत्र अस्ति, अत: एवं कुर्वन्तु इति वदति । किमर्थं गोपर्वतादीन् पूजनीयम् इत्युक्ते वदति । अञ्जसा येन वर्तेत तदेव तस्य दैवतं इत्युक्ते गोपालका: तेभ्य: आवश्यकतृणेभ्य: पर्वतात् उपजीवन्ति अत: तदेव पूजास्थानमस्ति ।

हे जनक, इदानीं यूयम् आराधनमावश्यकमिति इन्द्र: अपि स्वकर्मानुगुणसारेणैव प्रचलिष्यति एव । अत: स्वयं अस्वतन्त्र: इन्द्र: अपि युष्मभ्यं किं पुरुषार्थान् दास्यत्येव? स्वस्वकर्मानुवर्तिनां भूतानां स्वभावविहितं अन्यथाकर्तुं अनीशेन इन्द्रेण नृणां किम् प्रयोजनम् ? केवलं सर्वेश्वर: एव जीवान् सदा सत्कर्मसु प्रेर्यमाणः तेषां सुखद्:खानां मार्गं दर्शयति एव विना अन्यै: न । कर्मापेक्षतया फलं दातुं स्वामी समर्थः, जन्तव: उत्तमाधमनीचजन्मानि प्राप्य अन्ते निवर्तन्ते । शत्रुमितृ-उदासीनेषु स्थित्वा तत् तत् भावनां ददत् कर्मवाच्छ्य: श्रीहरि: एव तत्त्वोपदेशकः गुरु: । अत: निजस्वभावाय कर्माणि कुर्वन् पुरुष: स्वस्य स्थितिगते: कारणीभूत: कर्म एव पूजनीयम् ।

त्रयाणां वर्णानां सेवां कृत्वा जीवनं यापनीयमिति शास्त्रविधि: । वार्तायां कृषिः, वाणिज्यम्, गोरक्षणं, कुसीदम् इति चत्वार: भेदा: सन्ति । वयम् सदा गोरक्षणेन जीवाम । इयम् अस्माकं वृत्तिः । अस्य इन्द्रस्य च को सम्बन्ध: ? सत्त्वरजस्तम - इति त्रय: गुणा: क्रमश: स्थित्युत्पन्नहेतव: । एतस्मादेव प्रपञ्चस्य व्यवहारः जायते । रजोगुणः स्त्रीपुरुषाणां संयोगाय हेतु: भूत्वा तेन जगत: उत्पत्तिकार्यं प्रचलिष्यति । मेघा: ते रजस्वभावात् प्रेरिताः काले वर्षन्ति । प्राणिभ्य: वर्षात् जीवनं प्रचलिष्यति । तत्र इन्द्रस्य करणीयं कार्यं किमस्ति जनक?

वयं गोपा:, अस्मभ्यम् नगरं जनपदं, ग्राम:, गृहं वा नास्त्येव । वयं सदा वनगिरीषु स्थित्वा जीवाम: । पशुभ्य: अस्माकं जीवनम् । यथा नारी जारं आसती क्षेमं न विन्दते तथा एकतरं भावं आजीव्य य: अन्यं भावं उपधावति स: तस्मात् क्षेमं न विन्दते । हे पूज्या,: पूर्वमेव जागरूकै: भवनम् उचितम् । ब्राह्मणा: अस्माकं कुरुतकुलगुरव: । गिरय: अस्माकम् वासस्थानम् । अत: वयं ब्राह्मणान्, गा:, गिरीन् पूजयाम, इन्द्रात् अस्मभ्यं किम् प्राप्यते ? इदानिं यूयम् सर्वे इन्द्रस्य पूजायै कृतसाधनैः अमुं पर्वतं पूजयध्वम् । मृष्टान्नं सि । सूपं, पायसं, यवान्नं, शल्कुली, भक्ष्यम् इत्यादीनां सिद्धतां कुरुत । अस्माकम् समूहे लब्धमानं दुग्धं, दधि, नवनीतं च संगृह्णीत । ब्राह्मणानां द्वारा होमकर्माणि कुरुत । तेभ्य: मृष्टान्नभोजनानि यच्छत, भूरिदक्षिणान् अपि यच्छत । गोदानं कुरुत, अन्येभ्य: अश्वचाण्डालपतितेभ्य: योग्यतानुसारं भोजनं यच्छत । गोभ्य: यथेष्टं यवसं दत्वा गिरये बलि: दीयताम्। पर्वतानां प्रदक्षिणं कुरुत। एतन्मम मतम्, यदि तुभ्यं रोचते क्रियताम् ।

अहो परिक्षिद्राज ! कालात्मना भगवता शक्रदर्पजिघांसया प्रोक्तं निशम्य नन्दाद्या: साधु अग्रह्णन् । मधुसूदन: यथा आह तथा सर्वे विददु:। स्वस्त्ययनं वाचयित्वा गोविप्रभृताम् द्रव्यै: बलीन् उपहृत्य, गोभ्यः यवसं उपहृत्य गावः पुरस्कृत्य गिरेः प्रदक्षिणां चक्रु:। अनडुद्युक्तानि आरुह्य सद्विजेभ्यः आशीष: प्राप्य, स्वलङ्कृता: च गोप्य: कृष्णवीर्याणि गायन्त्य: प्रदक्षिणानि चक्रु: । कृष्ण: तु गोपविश्रंभणं अन्यतमं रूपं गत: अहं शैल: अस्मि इति वदन् बृहद्वपु: सन् भूरिबलीन् अभक्षयत् । अहो महदाश्चर्यं पश्यत ! अयं शैलरूपी सन् न: अनुग्रहं व्यधात् इति वदन् स: कृष्ण: व्रजजनै: सह तस्मै आत्मना नमस्कृत: । कामरूपिवनेचर: एष: शैलरूपी भगवान् अवजानत मर्त्यान् हन्ति, अत: आत्मन:, गवां शर्मणे नमाम: । इति अद्रिगोद्विजमखं वासुदेवप्रचोदिता: यथा विधाय सहकृष्णा: गोपाला: व्रजं ययु:।

शुकमुनि: परीक्षित् राजानं प्रति – राजेन्द्र श्रुणु ! इन्द्र: आत्मन: पूजां अविहतां विज्ञाय तदा कृष्णनाथेभ्य: नन्दादिभ्य: गोपेभ्य: कुपितवान् । आत्मन: लोकस्वामी इति मत्त्वा गर्वान्ध: इन्द्र: कृष्णनाथ: नन्दादिगोपेभ्य: तेषां गणेभ्य: हानिं कर्तुमिच्छन् दुरुद्देशेन प्रलयकाले लोकनाशाय प्रेष्यमाणान् सावर्तकमेघगणान् आहूय एतत् वदति - हे मेघा: ! काननौकसां गोपानां कृतं कार्यं पश्यन्ति खलु? केवलं मर्त्यं कृष्णम् उपाश्रित्य ये देवहेलनं चक्रु:। ज्ञानमानिन: ये सन्ति कर्ममयै: कुप्लवै: अथवा बिम्बदर्शनं हित्वा भवार्णवं तितीर्षन्ति।

श्री शुक उवाच- मघवता इत्थं आज्ञाप्ता: निर्मुक्तबन्धना: मेघा: नन्दगोकुलं ओजसा असारै: पीडयामासु: । अत्र इन्द्र: उच्चै:श्रवसमिति अश्वं वा रथं वा त्यक्त्वा ऐरावतमारुह्य आगतं किमित्युक्ते तस्य नागस्य शुण्डया जलस्य धाराः सिञ्च्यन्ताम् इति सूचितं ज्ञातव्यम् । विद्युद्भि: विद्योतमाना: स्तनयत्नुभि: नन्दन्त: तीव्रै: मरुद्गणै: नुन्ना जलशर्करान् ववृषु: । मेघा: अभीक्ष्णश: स्थाणुस्थूला: वर्षधारा: मुञ्चत्सु सत्सु जलोघै: प्लाव्यमाना भू: नतोन्नतम् न दृश्यत । अत्यासारति वातेन जातवेपना: पशव: शीतार्ता: गोपा: गोप्यश्च गोविन्दं शरणं गच्छन्ति । आसारपीडिता: गोपा: सुतान् आच्छाद्य कायेन वेपमाना: भगवत: पादमूलं शरणं गच्छन्ति।

कृष्ण ! महाभाग ! हे प्रभो ! त्वय्येव विश्वस्य व्रजाम, सर्वं आसारेषु मरणं प्राप्नुवन्ति । कुपितात् देवात् त्वन्नाथं गोकुलं न: त्रातुं अर्हसि । शीतवर्षातिवातेन हन्यमानं अचेतनं गोकुलं निरीक्ष्य कृष्ण: कुपित:, इन्द्रकृतमिदं इति ज्ञायते । अस्माभि: तन्मखे विहते इन्द्र: नाशाय शिलमयं अतिवातं उल्भणं वर्षं वर्षति इति ज्ञायते । तत्र प्रतिविधिं आत्मयोगेन साधये। मनसि व्यतिथं गोपालकानां हितं साधये। मौढ्यत् लोकेशमानिन: इन्द्रस्य श्री मदम् तम: सम्यक् हरिष्ये। मद्भावयुक्तानां सुराणां स्वयम् ईश: इति विशेषगर्व: नहि युक्त:। मत्तं सततम् मानभङ्ग: प्रशमाय उपपद्यते । इत्युक्ते "भावोलीलाक्रियाचेष्टा भक्त्यादिष्वर्थेषु भावशब्दप्रवृते" इति पदरत्नावलिषु उक्त: भगवत: लीलादीन् प्रदर्शयन् सर्वकालेषु भगवति मनसां निधायते चेत् भक्ति: इति उक्तमस्ति अत: भक्त्यै स्थिरताम् प्रयाति । अहं द्वेषात् देवतानाम् निग्रहं न करोमि, तेषां अनुग्रहितुमेव करोमि इति श्रीकृष्णस्य अभिप्रायमस्ति ।

प्रमुखतया इदानीम् कृष्णः एव शरणम् इति विश्वस्य इदं गोकुलम् अपायं विना रक्षणीयम्, देवताः सन्मार्गे आनेतुं इदानीम् उचितः समयः, आश्रिताः रक्षणीयाः एव, इदं मम व्रतम् इति निश्चित्य, अग्रे स्थितं गोवर्धनपर्वतम् एकेन हस्तेन उन्नीतवान् । बालक: कृष्णः एकया अङ्गुल्या च छत्रमिव लीलया तं पर्वतं वामकनिष्टिकाङ्गुल्या धारयामास । अत: कृष्ण: बृहत् पर्वतं छत्रमिव चित्रार्पितमिव कुर्वन् अग्रे स्थितान् नन्दादीन् उद्दिश्य एवं वदति- "अम्ब ! अहो जनक! हे गोपालका: ! यूयम् सर्वे स्वे स्वे गोधनं सहितम् अस्य पर्वतस्य अध: आगत्य सुखेन तिष्ठन्तु ! हे कृष्ण एतत् "वृश्चिकभयात् पलायमानस्य अशीविषमुखे पतनमिव" वर्षभयात् भीता: वयम् तव हस्तात् पर्वत: पतति चेत् सर्वे एकवारं नष्टाः भविष्याम: इति वदति ।

तदा स: वदति -"मद्धस्ताद्रिनिपातनात् त्रासेन कार्य: व: वातवर्षभयेन अलम्, तत्त्राणं विहितम्" । पर्वतधारणेन उपरिष्टात् पत्यमानं केवलं जलम् निवारयितुमेव । परितः प्रवहतः जलादेव जना: क्लेदयन्ति न वा ? अत: कृतः प्रयत्नः व्यर्थ: भविष्यतीति शङ्कां कुर्वतां कृते उत्तरम् एवम् अस्ति "आत्मयोगेन" स्वसामर्थ्यात् इति उक्तवन्त: योगसामर्थ्यादेव परितः जलम् अवरोधित: इति । कृष्णस्य वचनं श्रुत्वा गोपालका: सर्वे मनसि स्थितं

भयं त्यक्त्वा स्वस्वगोधनम्, अनुचरान् च नीत्वा अनुकूलस्थलेषु पर्वतस्य अध: आगत्य तिष्टन्ति । तथा सप्तदिनपर्यन्तं कृष्ण: क्षुत्, तृट्, व्यथां, सुखापेक्षां हित्वा वृजवासिभि: तै: वीक्षमाण: हसन् अचलं तिष्ठति।

श्री शुक उवाच - तं कृष्णं योगानुभावं अतिविस्मित: इन्द्र: निस्तम्भ: भ्रष्टसंकल्प: स्वान् मेघान् न्यवारयत् । खं व्यभ्रं उदितादित्यम् दारुणं वातं, वर्षं च उपरतं निशम्य गोवर्धनधर: गोपान् अब्रवीत् । "अहो जनक! अहो गोपालका: इदानिम् त्रासं त्यजत । सस्त्रीधनार्भका: निर्यात, वातवर्षं च उपारतं, निमग्ना: व्युदप्राया:। तत: ते गोपा: स्वं स्वं शकटाटोपकरणम् आदाय स्त्रीबालस्थविरा: शनै: निर्ययु: । भगवानपि तं शैलं स्वस्थाने सर्वभूतेषु पश्यत्सु पूर्ववत् लीलया स्थापयामास । व्रजौकस: प्रेमवेगात् निभृता: परिरम्भणादिभि: यथा समीयु: अपूजयन्, तथा गोप्य: सस्नेहं मुदा दद्यक्षताद्भि: प्रोक्षयित्वा अपूजयन् आशीषश्च कृतवन्त:। यशोदा, रोहिणी, नन्द: बलीनां श्रेष्ट: बलराम: कृष्णं आलिङ्ग्य स्नेहकातरा: आशीष: कृतवन्त:। दिवि देवगणा: सर्वे, सिद्धगन्धर्वचारणा: तुष्तुवु: । सर्वे पुष्पवर्षाणि सिञ्चन्ति। दिवि देवप्रचोदिता: शङ्खदुन्दुभय: नदन्ति । तुम्बरुप्रमुखा: गन्धर्वपतय: गानं गायन्ति । तत: अनुरक्तै: पशुपै: परिश्रित: बलरामेण सहितं श्रीकृष्ण: गोष्टं प्राविशत् । गोपिका: तथाविधानि अस्य कृष्णस्य हृदिस्पृश: गायन्त्य: मुदिता: गोकुलं प्रति ईयु: ।

**उपसंहारः**

इत्थं भगवान् श्रीकृष्णः स्वाश्रितान् शरणागतान् जनान् प्रीतिपूर्वकं सविश्वासं रक्षितवान् तादानीन्तनकाले । एतेन वयं इदं जानीमः यत् अस्माकं मनोभिलषितान् कामान् देवाः पूरयन्ति एव । तान् वयं भक्त्या श्रद्धया अर्चाम एव । परन्तु अस्माभिः प्रकृतिः कदापि न पूजिता । इयं प्रकृतिः अस्मभ्यं सर्वविधं आनुकूल्यं कल्पयति ददाति च । परं वयं प्रकृतिमातरं न पूजितवन्तः । भूगिरिपर्वताः अस्माकं वासस्थानम्, जलम् अस्माकं जीवनम् । वायुः जीवनाधारः। अग्निः जीवितस्य अङ्गम्, आकाशः अस्मत् प्रेरणादायकः । एतादृशं भावम् अस्मिन् सन्दर्भे कृष्णः अस्मान् जागरयति । यथा देवाः पूज्यन्ते तथैव प्रकृतिः अपि पूजनीया, अर्चनीया, माननीया च ।

* Pam Pu. Guttal Rangacharya, kulapati. Jayateertha Vidyapeetha
Vidyamandiram. Bengalore

https://doi.org/10.5281/zenodo.7243940

Paper 6

# याज्ञवल्क्यस्मृतौ प्रतिपादिताः अंशाः

**Mrs. Jyothi U.**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - jyothiudupa245@gmail.com

**सार**: (ABSTRACT)

**स्मृतय: बहु प्रकारा: सन्ति। तत्र प्रमुखा: - मनुस्मृति:, अत्रिस्मृति:, विष्णुस्मृति:, हारीतस्मृति:, याज्ञवल्क्यस्मृति:, उशनास्मृति:, अङ्गिरास्मृति:, यमस्मृति:, आपस्तम्भ स्मृति:, संवर्तस्मृति:, कात्यायनस्मृति:, ब्रहस्पतिस्मृति:, पराशरस्मृति:, व्यासस्मृति:, गौतमस्मृति:, शतातपस्मृति:, वसिष्ठस्मृति:, शङ्खस्मृति:, लिखितस्मृति:, दक्षस्मृति:, चेति विंशति: स्मृतयः उल्लिखिताः । मनुष्याणां दैनन्दिनजीवनस्य प्रत्येकं विषया: स्मृतिसाहित्ये अन्तर्भवन्ति । स्मृतीनां परिमितौ सर्वेऽपि विषयाः युक्ताः एव, तत्र अविद्यमानाः विषयाः इति न सन्ति । देवतार्चनम्, मृत्युवशगतानां स्मरणार्थं क्रियमाणा: श्राद्धक्रमाणि, जनन-मरण विषये धार्मिकशुद्धिक्रियाः, प्रायश्चित्तादय: यज्ञ-यागा:, दैनन्दिनजीवने वयवहारे च पालनीया: रीति-नीति-स्वधर्मविचारा: अन्ये च बहव: विचारा: तत्र उल्लिखिता: सन्ति ।**

ओं पूर्णमद: पूर्णमिदं पूर्णत् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

**प्रस्तावना**

यद्यपि वेद–वेदाङ्गानि इत्यादय: हिन्दु संस्कृते: आधारस्तम्भा: इति परिगण्यन्ते तत्रापि स्मृतय: बहु विशिष्टस्थानं प्राप्नुवन्ति । वेदविरोधरहितस्य वेदानुकूलजीवनधर्मस्य प्रतिपादनमेव स्मृतीनां आशय: । **"स्मृति:"** इत्यस्य शब्दस्य अर्थस्मरणं इति वक्तुं शक्नुम: । अनेन ज्ञायते यत् स्मृतिग्रन्था: इत्युक्ते वेदान् गभीरतया अधीत्य तेषु प्रतिपादितानां विधि– निषेधानां स्वाधीनतां प्राप्य महर्षिभि: लिखितं स्मरणमेव इति निश्चयेन वक्तुं शक्नुम:। वेदा: अपौरुषेया: तन्नाम पुरुषै: कृतं न, अपि तु प्रमाणग्रन्था: । किन्तु स्मृतय: पुरुषकृताः एव, वेदानां अगाधज्ञानं प्राप्य महर्षिभि: लिखिताः सन्ति । तस्मात् केषाञ्चित् स्मृतिवाक्यानां आधररूपेण वेदवाक्यानि उपलभ्यन्ते । अत: ए□□दृशवाक्यानि एकदा कालगर्भे आसन्नेव इति निर्विवादतया ग्रहीतव्यानि ।

**विषयपरामर्श:**

बहुनां विदुषाम् अभिप्रायेण स्मृतीनां काल: १५०० वर्षेभ्य: पूर्वं इति । स्मृतिपूर्वकाले शिष्याणां उपदेशाय विभिन्नरीत्या रचिता: पाठ्यांशा: आसन्। ततोऽपि पूर्वं पश्याम: चेत् गुरु: शिष्याय निरन्तरं कण्ठस्थीकरणं केवलं यच्छति स्म। तदनन्तरकाले ग्रन्थारूपिस्मृतिषु प्रतिपादिता: विषया: वैदिकप्राग्वैदिककाले वा परिदृश्यन्ते । स्मृतिषु न केवल शास्त्रणि प्रतिपादितानि अपि च लौकिकव्यवहारा:, दण्डनीतिनियमा: वंशक्रमगतनियमा: विवादा: तथा कुटुम्बनियमा: च तत्र प्रतिपादिता: सन्ति ।

पाश्चात्यविद्वांस: प्राचीनकाले रोम्- देशस्य न्यायनिर्णयमेव साधु इति भूरिप्रशंसां कृतवन्त: । किन्तु रोम् -देशस्य अपेक्षया प्राचीनभारतस्य स्मृतिकारा: सहस्राधिकवर्षेभ्य: पूर्वमेव प्रकृष्ट-सुप्रौढ-गभीर शासन-प्रज्ञायुक्ता:

आसन् इति स्मृतीनां समीचीनाध्ययनेन ज्ञायते । स्मृतय: जीवनं प्रमुखतया धार्मिकनियमेषु बध्नन्ति। स्वेच्छ-जीवनस्य मार्गं स्वैराय भवति इति भावना स्मृतिकाराणां मनसि बद्धमूलासीत् इति दृश्यते । तस्मात् ताः अनेकान् नियमान् आरोप्य तेषाम् उल्लङ्घनं पापाय भवति इति पूर्वसूचनाम् ददति । यथा-

***कन्या शय्या गृहं चैव देयं यद्गोस्त्रियादिकम् ।***
***तदेकस्मै प्रदातव्यं न बहुभ्य: कथञ्चन॥*** (कत्यायन)

कन्या, शय्या, गृहं, गौ:, स्त्री: इत्यदिकम् एकस्मै एव दातव्यं , बहुभ्य: न दातव्यम् । एतादृशानि बहूनि बोधकतत्त्वानि स्मृतिषु निबद्धानि । सन्ध्योपासनायाः ब्रह्मविद्याया: च विषये अपि याज्ञवल्क्यस्मृतौ बहु उपयुक्ता: विचारा: उल्लिखिताः सन्ति ।

याज्ञवल्क्यस्मृति: धर्मानुबद्धलौकिकजिवनस्य निरूपणं प्रधानतया करोति । यथा अन्यासु स्मृतिषु दृश्यते तथैव अस्यां स्मृतौ अपि चतुर्वर्णानां उल्लेख:, ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-सन्यासाश्रमेषु साधनीयानि धर्मानुष्ठानानि शास्त्राणि च उपनिबद्धानि । मनुष्याणां जीवनस्य निरायासगतिशीलया आवश्यकानि मार्गदर्शनानि अत्र उपलभ्यन्ते । यथा विवाह विषयः एव स्वीक्रियताम् - विवाह: मानवाणां जीवने एक: प्रमुख: घट्ट: । मनुष्यस्य जीवनस्य समग्रपरिवर्तनाय, श्रेयोभिवृध्यर्थं विवाह: समीचीनमार्गे सम्पन्न: भवेत् । नो चेत् जीवनम् अशान्तिविषण्णपीडादीनाम् आवासस्थानं भवेत् । एवं न भवेत् इति कारणात् स्मृतिकारा: वैवाहिक-व्यवस्थाम् अत्यन्तं सुसम्बद्धनियमै: समाकृतवन्तः सन्ति । याज्ञवल्क्य: अपि स्वस्य स्मृतौ, विवाहप्रकरणे, वधुवरौ विवाहरूपिपवित्रसंस्कारसूत्रे निबद्ध्य तयो: उच्छृङ्खल- अनर्गलभोगप्रवृत्तिं संयत-नियन्त्रितयुक्तं कर्तुं नियमान् निषेधानि च रचितवान् अस्ति । न केवलं एतत् अपि च कीदृशीं वधूं परिणयेत् इत्यपि महर्षिणा याज्ञवल्क्येन उक्तमस्ति ।

**अविप्लुत ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।**
**अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् । (याज्ञवल्क्यस्मृति:-विवाह प्रकरणम्)**

अत्र ब्रह्मचारी, यथासम्भावित, भिन्नगोत्री, आत्मन: अपेक्षया कनिष्ठां वर्षीयाम् अविवाहितां कन्यां च परिणयेत् इति प्रोक्तमस्ति । अनेन अभिप्रायेण महर्षे: मानसशास्त्रीयसमर्थनाभाव: स्पष्टतया दृष्यते । एवं रीत्या गृहस्थधर्मप्रकरणं, भक्ष्याभक्ष्यप्रकरणं, गृहशान्तिप्रकरणं, व्यवहराध्यायप्रकरणं, प्रायश्चित्तप्रकरणं इत्यादिषु प्रकरणेषु तदानीन्तनसमकालीनजिवनस्य बह्वीनां समस्यानां न्यायरीत्या परिहारा:, तेषां प्रचोदनकाराणां स्मृतिकाराणां विषये आदराभिमानश्च स्मृतिग्रन्थेषु युगपत् दृश्यते ।

यद्यपि स्मृतय: वेदानां छायानुवर्तिन: एव तथापि संहिताकाले विद्यमानं उन्मुक्तस्वातन्त्र्यं स्मृतिकारा: न्यूनीकृतवन्त: इति तु ऐतिहसिकं सत्यमेव । श्रुतिकालीनधर्मसन्धान: विशेषतया भावनापरवशतां अनुमन्यते एवमेव स्मृतिकालीनधर्म: सम्प्रदाय: विधिनिषेधै: युक्त: अस्ति । व्रत-पर्व-यज्ञधर्म-इत्यादिषु विषयेषु स्मृतय: दृढाः तथा उग्रशासनयुक्ताः च सन्ति इति अनेन ज्ञातुं शक्नुम: । ***"व्रतोपयोगी ज्ञतव्या: विषया: याज्ञवल्क्यस्मृते:"*** गृहस्थधर्मप्रकरणं"," श्राद्धप्रकरणं", "स्नातकधर्मप्रकरणं" इत्यादिषु प्रकरणेषु बहुधा दृश्यन्ते । यथा

**आयु: प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।**
**प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामह:॥** (याज्ञवल्क्यस्मृति: - श्राद्धप्रकरणम्)

श्राद्धकर्मणा सन्तुष्टा: पितर: नराय आयु:, सन्ततिं, धनं, विद्यां, मोक्षं, राज्यं च प्रयच्छन्ति इति उक्त्वा

श्राद्धकर्मण: महत्वं महर्षिणा याज्ञवल्क्येन अत्र उक्तमस्ति । न केवलं शास्त्रविषये अपि च राज्ञः विषये इत्युक्ते राजा कथम् उत्साही, महादानी, कृतज्ञ:, वृद्धसेवासक्त: , विनयवान्, सत्वशाली, कुलीन:, सत्यवादी, पवित्रात्मा, अदिर्घसूत्री, स्मृतिमान्, धार्मिक:, अव्यसनी, पण्डित:, शूर:, रहस्यज्ञ: च भवेत् इति याज्ञवल्क्यमहर्षि: तस्य स्मृतौ उल्लिखति । यथा

**महोत्साह: स्थूललक्ष: कृतज्ञो वृद्धसेवक:।**
**विनीत: सत्वसम्पन्न: कुलीन: सत्यवाक् शुचि:॥३०९॥**
**अदीर्घसूत्र: स्मृतिमानक्षुद्रो अपरुषस्तथा ।**
**धार्मिको अव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥३१०॥**
**स्वरन्द्रगोप्ता आन्विक्षिक्यां दण्डनीत्यां तथैव च ।**
**विनीतस्त्वथ वार्तायां त्रय्यां चैव नरधिप: ॥३११॥** (याज्ञवल्क्यस्मृति:-- राजधर्मप्रकरणम्)

एवं स्मृतय: विस्तारस्य जीवनस्य क्षेत्रे आगतान् बहुविधान् विषयान् अत्यन्तं व्यावहारिक-निश्चित-सामाजिकप्रज्ञाया: दृष्ट्या सम्भवनीयाया: समस्याया: यथाशक्ति समाधानं यच्छन्ति । सामान्यत: स्मृतीनां उद्धेश: जीवनस्य पवित्रीकरणमेव । एतासु स्मृतिषु याज्ञवल्क्यस्मृति: मनुष्यस्य बहिरन्तर्जीवनस्य पूतार्थं साधकान् सर्वान् अंशान् सान्द्ररूपेण वदति । तत्र प्रशंसनीयसाफल्यमपि प्राप्तमस्ति । तथापि स्मृतय: समकालीनजीवनप्रज्ञाया: सीमितवलये आसक्ताः सन्ति, अत: तत्र विद्यमाना: केचन विषया: इदानीन्तनकाले अप्रस्तुताः इति विपरीतवाद: श्रूयते । किन्तु तस्मिन् समये स्मृतिकारेषु विद्यमाना समकालीनजीवनप्रज्ञा तु प्रशंसनीया एव ।

ब्रह्मर्षि याज्ञवल्क्य: महान् योगी , परमज्ञानी , धर्मात्मा , आध्यात्मवेत्ता च आसीत् । अयं ब्रह्मण: अवतार: इत्यपि पुराणेषु उक्त: अस्ति । याज्ञवल्क्य: स्वस्य गुरुणा महर्षिणा वैशम्पायेन वेदज्ञानं प्राप्तवान् इति श्रूयते । किन्तु तेनैव गुरुणा शापग्रस्त: याज्ञवल्क्य: अधीतविषयाणां वमनं कृतवान् । वामनरूपेण बहिरागतम् अगाधं ज्ञानराशिं अन्ये शिष्या: तित्तिरिपक्षिरूपेण तां विद्यां ग्रसितवन्तः इति कारणात् यजुर्वेदस्य इयं शाखा तैत्तरीयशाखा इत्येव प्रथितः अभवत् । अस्या: शाखाया: द्रष्टा महर्षिः याज्ञवल्क्य: इति वक्तुं शक्नुम: । असौ महर्षिः शतपथब्राह्मण: ब्रहदारण्यक-उपनिषद: च दृष्टा अस्ति । योगशास्त्रे अपि प्रवीण: याज्ञवल्क्य:, याज्ञवल्क्यस्मृति:, याज्ञवल्क्यगीता, यज्ञवल्क्य-उपनिषत्, याज्ञवल्क्यशिक्षा, गायत्रीभाष्य: इत्येताः कृतीः रचितवान् अस्ति । अस्य त्याग:, तप:, सदाचारयुक्तजीवनं च सर्वै: अनुकरणयोग्यम् ।

स्मृतिषु बहव: विषया: उक्ता: चेदपि तेषाम् आत्यन्तिकध्येयमस्ति ब्रह्मसाक्षात्कारमेव । याज्ञवल्क्यस्मृतौ अपि एतादृशदार्शनिकविचारा: अनुभवगोचरा: भवन्ति । महर्षिणा भारतीयवेदान्तदर्शनस्य मूलतत्त्वं सम्यक् प्रतिपादितमस्ति । यथा

**आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।**
**तथात्मैक्यो ह्यनेकश्च जलाधारेष्विवांशुमान् ॥** (याज्ञवल्क्यस्मृति: -- यतिधर्मप्रकरणम्)

"यथा आकश: घटादिवत् न दृश्यते, सूर्य: जलधारेषु भिन्न: दृश्यते तथैव आत्मा एक: एव चेदपि भिन्नरूपेण दृश्यते" इति । श्रुति: स्मृति: च भरतीयधर्मशास्त्रस्य शक्तिद्वयमस्ति । तयोर्मध्ये विशिष्टव्यत्यय: अस्ति। श्रुतिषु द्वैदीध्वनि-अनुरणनं भवति, परन्तु स्मृतिषु ऋषीणं तीक्ष्णसामाजिकप्रज्ञायाः ध्वनिः श्रूयते ।

एतस्य स्मृतिग्रन्थ: एक: विद्वत्पूर्णग्रन्थः अस्ति । याज्ञवल्क्यस्मृति: आचाराध्याय:, व्यवहाराध्याय:, प्रायश्चित्ताध्याय: चेति त्रिधा विभक्त: अस्ति । एकसहस्रश्लोकात्मकं स्मृतिग्रन्थस्य प्रत्येकं अध्याय: भिन्नभिन्नप्रकरणेषु विभक्त: अस्ति ।

आचाराध्याये – उपोद्घात:, ब्रह्मचारी, विवाह:, वर्णजातिविवेक:, गृहस्थधर्म:, भक्ष्याभक्ष्यम्, द्रव्यशुद्धि:, दानम् , श्राद्धम्, गणपतिकल्प:, ग्रहशान्ति:, राजधर्म: - इत्येतानि त्रयोदश प्रकरणानि सन्ति ।

व्यवहाराध्याये – साधारणव्यवहारमातृका, असाधारणव्यवहारमातृका, ऋणदानम्, उपनिधि:, साक्षी, लेख्यम्, दिव्यम्, दायविभाग, सीमाविवद:, स्वामिपालविवाद:, अस्वामिविक्रय:, दत्ताप्रदानिकम्, क्रीतानुशय:, अभ्युपेत्याशुश्रूषा, संविद्व्यतिक्रम:, वेतनादानम्, द्यूतसमाह्व्य:, वाक्पारुष्यम्, दण्डपारुष्यम्, साहसम्, विक्रीयासम्प्रदानम्, सम्भूय-समुत्थानम्, स्तेयम्, स्त्रीसङ्ग्रहणम्, प्रकीर्णकम् चेति पञ्चविंशति: प्रकरणानि सन्ति ।

इदनीम् आचाराध्याये राजधर्मप्रकरणम् अवलोकयाम: - यथा पूर्वमेव उक्तमासित् , राजा न केवलं महोत्साही, स्थूल - लक्ष्ययुक्त:, सत्वसम्पन्न:, सत्यवान्, कुलीन:, शुचि: च भवेत्, अपि च अर्थशास्त्रे, वार्तायां (कृषि:, पाशुपाल्यं, वाणिज्य च वार्ता ) दण्डनीत्यां च तस्य आसक्ति: भवेत् । सद्गुणसम्पन्न: राजा विवेकसम्पन्नं, राजनीतिकुशलं, प्राज्ञं च मन्त्री कारयेत् । एवमेव शास्त्रोक्तासु विद्यासु प्रवीणं, सत्कुलजातं, अनुष्टानसमृद्धं, अर्थशास्त्रकुशलं , दण्डनीतिकुशलं च पुरोहितं कारयेत् इति याज्ञवल्क्य: प्रथममेव उक्तवान् अस्ति । एवं नियुक्त: पुरोहितसकाशात् राजसूयादियागान् यथाशक्ति आचरेत् । यागकरणसमये ब्राह्मणेभ्य: द्रव्य-पशु-भूमि-इत्यादीन् दानरूपेण दद्यात् ।

**अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत् ।**
**पालितं वर्धयेन्नीत्या वृद्धं पत्रेषु निक्षिपेत् ।।**

यत् अप्राप्तमस्ति तत् धर्मशास्त्रस्य प्रयत्नेन प्रापयेत् । यत् प्राप्तमस्ति तत् यत्नेन रक्षयेत् । रक्षितं वर्धयेत्। एवं वर्धितं धर्म-अर्थ-काम इत्यादिषु पुरुषार्थेषु व्ययं कुर्यात् इति याज्ञवल्क्येन स्पष्टतया उक्तमस्ति ।

**तत्र तत्र च निष्णातानध्यक्षान्कुशलान् शुचीन् ।**
**प्रकुर्यादायकर्मान्तव्यकर्मसु चोद्यतान् ॥**

धर्म-अर्थ-काम इत्यादिषु कार्येषु चतुरं, निष्कपटिनं, कुशलं, शुचिनं, प्राज्ञं च अधिकारस्थानेषु नियोजयेत् तन्नाम कार्यस्य निर्विघ्नसम्पन्नतायै इति याज्ञवल्क्य: अभिप्रेति ।

**ये राष्ट्राधिकृतास्तेषं चरैर्ज्ञात्वा विचेष्टितम् ।**
**साधून्समानयेद्राजा विपरीतांश्च घातयेत् ॥**

एवं नियोजिताधिकारिणाम् आचरणं गुप्तचारै: ज्ञात्व य: सज्जन: अस्ति तं दान-सम्मानै: सत्कारयेत् । य: दुराचारी अस्ति तं योग्यरीत्या दण्डयेत् । राजा देश-काल- बल-वय-कर्म-द्रव्य-इत्यादीन् अपि दृष्ट्वा दण्डं दद्यात् । कृतापराधं ज्ञात्वा अथवा इदं प्रथमतया कृतापराधो वा इत्यपि सम्यक् चिन्तनं कुर्यात् तदनुसारं दण्डं चिन्तयेत् । प्रियभाषणम्, सुवर्णदाम्, मन्त्रिषु परस्परवैरत्वं, साम-भेद-दण्डानाम् उपाय: इति नूतनप्रयोगेण सफलतां प्राप्तुं राजा शक्नोति ।

**मन्त्रमूलं यतो राज्यं तस्मान्मन्त्रं सुरक्षितम् ।**
**कुर्याद्यथाऽस्य न विदु: कर्मणामाफलोदयात् ॥**

राज्यं मन्त्रालोचनद्वारा सुरक्षितमस्ति । तस्माद् तान् मन्त्रान् गोपयेत्, सन्धि-विग्रहाणां विषये राजा गोपनं कुर्यात् । इष्टानिष्टफलानि दैवेनैव प्राप्यन्ते इति केचन वदन्ति । कारणं विनापि फलसिद्धि: भवति इति अन्ये अभिप्रयन्ति । कालस्य कारणात् फलप्राप्ति: इति केषाञ्चन जनानं अभिप्राय: । किन्तु दैवम्, स्वभाव, काल:, पौरुषम् इत्यादीनां समुच्छयेनैव इष्टानिष्टफलानि प्राप्यन्ते इति मनु:, याज्ञवल्क्य: इत्यादीनां स्मृतिकाराणां अभिप्राय: । यथा

**यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् ।**
**एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥**

एकेन चक्रेण रथस्य गति: न भवति तथैव पौरुषम् विना दैवसिद्धि: न भवति । सुवर्णस्य भूमे: अपेक्षया मित्रप्राप्ति: श्रेष्ठा । अत: मित्रलाभाय सावधानेन प्रयत्नः करणीयः । सत्यं मित्रलाभस्य मूलमिति यज्ञवल्क्य: स्मृतौ उल्लिखति ।

लोभी चञ्चलबुद्धियुक्त: च राजा कदापि दण्डनीते: प्रयोगं कर्तुम् न शक्नोति । लोभादिभि: शास्त्रस्य अतिक्रमणं कृत्वा कृत: दण्ड: पापाय भवति इति याज्ञवल्क्य: स्पष्टतया वदति । कान् कान् कीदृशै: दण्डै: दण्डयेत् इत्यपि महर्षि: उल्लिखति । य: स्वधर्मेण च्युत: भवति – स: बन्धु: वा पुत्र: वा आचार्य: वा श्वशुर: वा मातुल: वा दण्डयोग्य: भवति एव । किन्तु अदण्ड्यं पुरुषं यदा राजा दण्डयति तदा स: दोषी भवति । अत: राजा सर्वा: प्रजा: स्वधर्मेण भवेयु: इति दर्शयेत् प्रेरयेत् च ।

**उपसंहार:**

यद्यपि वेदपुराणानि, वेदाङ्गानि च हिन्दुसंस्कृते: आधारस्तम्भा: इति परिगण्यन्ते तत्रापि स्मृतय: वेदानां सारभूतान् अंशान् प्रतिपादयन्ति । वेदविरोधरहितस्य वेदानुकूलजीवनधर्मस्य प्रतिपादनमेव स्मृतीनां आशयः । एवं धर्मिक अनुशासनै: युक्त: याज्ञवल्क्यस्मृति: प्राचीनानां भारतीयाणां सामाजिकप्रज्ञाया: साक्षिरूपेण तिष्ठति इति वक्तुं शक्नुम: । अहिंसा, दानं, वेदशास्त्राणां अध्ययनम्, शास्त्रोक्तकर्माणाम् अनुष्ठानम्, आत्मदर्शनम् इत्यादि सर्वोत्तमधर्मा: इति अत्र प्रतिपादिताः सन्ति ।

आधारग्रन्थः - दि. अ .नागेश: रङ्गो कुलकर्णि:, याज्ञवल्क्य स्मृति:, धारवाड

https://doi.org/10.5281/zenodo.7244165

Paper 7

# षड्दर्शनानां निरूपणम्

**KAMESHWARI SUMANA KUMAR**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - sumana.naik@gmail.com

**सार**: (ABSTRACT)

**अत्यधिकभारतीयग्रन्था: सूत्ररीत्या लिखिताः सन्ति, अपि च दर्शनानि । एतेषु ग्रन्थेषु या शैली उपयुज्यते सा शैली पाश्यात्यशैल्या: अपेक्षया भिन्ना अस्ति । गुरु-शिष्य-परम्पराम् अनुसृत्य एव दर्शनानि रचयितानि सन्ति । एतानि ज्ञानतत्त्वानां प्रसाराय मोक्षस्य परिकल्पनायै च सदा मार्गदीपाः इव सन्ति । भारतीयपरम्परायां आध्यात्मविषयबोधनाय ये ग्रन्थाः सन्ति तेषु दर्शनानि अपि अन्यतमानि षड्दर्श। नेषु मोक्षं कथं साधनियम् इत्येव सामान्यविषय:।**

**प्रस्तावना**

भारतदेशे वैदिककालत: एव दर्शनस्य प्रादुर्भाव: दृश्यते। भारतस्य सनातनदर्शनेषु षड्दर्शनानि अधिकतया प्रसिद्धानि। शतादिवर्शेभ्य: षड्दर्शनानि भारतस्य दार्शनिक-धार्मिकचिन्तनस्य बौद्धिकसम्पत्ति: अस्ति । सर्वेषु दर्शनेषु ब्रह्मज्ञानस्य विषय: एव भिन्नभिन्नरीत्या प्रतिपादितम् अस्ति।

महर्षिगौतमस्य निर्मितं 'न्याय:', महर्षिकाणादेन विरचितं 'वैशेषिकम्', कपिलमहामुने: लिखितं 'साङ्ख्यम्', पताञ्जलिना रचितं 'योगसूत्राणि', महर्षि जैमिनिना विरचितं 'पुर्वमिमांसा', बादरायणस्य 'वेदान्तम्' इति षड्दर्शनानि अपि वेदाधारिता: सन्ति। प्रतिदर्शनं विविधा: वेदांशा: एव विवृता: सन्ति। अत: वैदिकदर्शनानि इति नाम्ना ज्ञायन्ते। अपि च आस्तिकदर्शनानि उच्यन्ते। यानि दर्शनानि वेदप्रमाणं न अङ्गीकुरुवन्ति तानि नास्तिकदर्शनानि इति कथयन्ति। बुद्ध-जैन-चार्वाक इत्यादीनि नास्तिकदर्शनानि। प्रत्येकं दर्शनं सूत्रशैल्यां लिखितम् अस्ति। सूत्रम् इति भारतीयदर्शनपरंपरायाम् एका अद्भुतशैली अस्ति।

*अल्पाक्षरम् असन्दिग्धं सारवद्विश्वतोमुखम्।*
*अस्तोभम् अनवद्यं च सूत्रं सूत्रविदो विदु: ॥*

सूत्रं सङ्क्षिप्तपदानि उपयुज्य सन्देहरहितं कृत्वा, प्रतिपदं विश्वतोमुखं गभीरार्थसहितं च भूत्वा अस्तोभं, निर्दोष-योग्यपदानि बोधयति । सूत्राणि ज्ञानभाण्डाराणि भवन्ति । सूत्रशैली सर्वेषु शास्त्रेषु दृश्ते । अत्यधिक भारतीयग्रन्था: सूत्ररीत्या लिखिताः सन्ति, अपि च दर्शनानि। एषा शैली पाश्यात्यशैल्या: अपेक्षया भिन्ना अस्ति। गुरु-शिष्य-परम्पराम् अनुसृत्य एव दर्शनानि रचयितानि सन्ति। षड्दर्शनेषु मोक्षं कथं साधनियम् इत्येव सामान्यविषय: । अथ षड्दर्शनानि किञ्चित् विस्तरेण अवलोक्यन्ते -

**विषयपरामर्श:**

**१ साङ्ख्यम् –**

साङ्ख्यदर्शनम् अत्यन्तं प्राचीनम् अस्ति। प्राचीनकाले अत्यन्तं लोकप्रियम् अपि आसीत्। साङ्ख्याशास्त्रस्य प्रवर्तक: महर्षिकपिल: इति प्रसिद्ध:। तस्य काल: प्राय: ७०० ई.पु. वर्षेभ्य: पूर्वम् इति उच्यन्ते। साङ्ख्याशब्दस्य अर्थ: विश्लेशणम् अथवा परावर्तनम् अस्ति। जड्-अजड्पदार्थयो: विश्लेशणेन जगत: ज्ञानं प्राप्नुम:। एतस्य सर्वप्रथमधारणा अस्ति सृष्टि: प्रकृति-पुरुषो: संयोग:। प्रकृति इत्युक्ते पञ्चभूतेभ्य: निर्माण जडपदार्थ:, पुरुष: इत्युक्ते जीवात्मा अथवा चेतनाशक्ति:। साङ्ख्या मूलत: तत्वं द्विधा (प्रकृति-पुरुष:) इति निर्देशयति । प्रकृति: अव्यक्तरूपे त्रयाणां गुणानां (सत्व-रजस्-तमस्) साम्यं भवति। परन्तु प्रकृति: यदा पुरुषेण सह संयोगं प्राप्नोति तदा सा पुन: परिणामस्वरूपी त्रयोविंशति: तत्वानि व्यक्ती करोति । तानि कानि? तानि, त्रीणि

अतं:करणानि (महत् अथवा बुद्धि:, अहङ्कार:, मनस्), पञ्चज्ञानेन्द्रियाणि: (नासिका, जीह्वा, त्वक्, नेत्रम्, कर्ण: च) पञ्चकर्मेन्द्रियाणि (पाद:, हस्त:, उपस्थ, पायु, वाक्), पञ्चतन्मात्राणि (शब्द:, स्पर्श:, रूप:, रस:, तथा गन्ध:), पञ्चमहाभूतानि (आकाश:, वायु:, तेज:, आप:, धरणी)। एवं महत् अथवा बुद्धि:, बुद्धे: अहङ्कार:, अहङ्कारात् पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि च, तत: उभयात्मकं मन:, तत: पञ्चतन्मात्राणि, तन्मातृभ्य: क्रमश: पञ्चमहाभूतानि, आकाश:, वायु:, तेज:, आप:, पृथवी, एवं त्रयोविंशतितत्वानि क्रमश: उत्पन्ना: भवन्ति।

अपि च साङ्ख्यादर्शनम् निरीश्वरवादी दर्शनम् इति उल्लेखनं भवति। साङ्ख्यम् उपदिशति जड्प्रकृति: सत्व, रजस् एवं तमस् – एते त्रयाणां गुणानां साम्यावस्था अस्ति। अत: समग्रविश्वं त्रिगुणात्मकप्रकृत्या: वास्तविक परिणामम् अस्ति। प्रकृति-पुरुषयो: सङ्गमे विश्वस्य निर्माणं भवति। विश्वं प्रकृते: वास्तविकफलितांशम् अस्ति। अत: साक्षात् अनुभवार्थे साङ्ख्या वस्तुवादी दर्शनम् इत्यपि उच्यन्ते। साङ्ख्यादर्शनस्य मुख्याधार: अस्ति सत्कार्यवादसिद्धान्त:। सत्कार्यवादम् इत्युक्ते, कारणं विना कार्यस्य उत्पत्ति: न भवति। कार्यस्य उत्पत्ति: पूर्वं, कारणं तत्र विद्यमान: भवति एव। कार्यं कारणस्य सारम् अस्ति। कार्यं तथा कारणं वस्तुत: समानप्रक्रियाया: व्यक्तमव्यक्तं रूपम् अस्ति। सत्कार्यवादसिद्धान्तस्य भेदद्वयम् अस्ति, परिणामवाद:, विवर्तवाद: च। परिणामवाद: सूचयति वस्तुत: कारणं कार्ये परिवर्तयति। यथा तिल: तैलं भवति, क्षीरं दधि। विवर्तवादसिद्धान्तं बोधयति परिवर्तनं वास्तविकता अभूत्वा केवलं तस्य आभास: भवति। यथा रज्जु: सर्प: इव। वस्तुत: विवर्तवाद: अद्वैतवेदान्तस्य सिद्धानतम् आचरति । भारतीयसंस्कृत्यां साङ्ख्यादर्शनस्य स्थानं परम् अस्ति। महाभरते अपि एतस्य उल्लेखनम् दृस्यते । ***"ज्ञानं च लोके यदिहास्ति किञ्चित् साङ्ख्यागतं तच्च महन्महात्मन"***– (शान्तिपर्व ३०१.१०९) । एकस्मिन् समये साङ्ख्यादर्शनम् अत्यन्तं लोकप्रियम् आसीत।

**२ योग**:

योगदर्शनं महर्षिपतञ्जले: योगदानम् अस्ति। योगसूत्राणि योगदर्शनस्य मूलाधाराणि सन्ति। योगसूत्राणि ३००० वर्षेभ्य: पूर्वं पतञ्जलिना रचितानि सन्ति। योग: शरीरम्, मन:, आत्मा च त्रयाणां समवायस्थितिं आनेतुं एका आध्यत्मिका साधना अस्ति। योगशास्त्रस्य सार: अस्ति, चित्तं कथं एकाग्रं कृत्वा समाध्यवस्थां प्राप्तुम:। प्रथममेव पतञ्जलि: विवृणोति "**योगश्चित्तवृत्तिनिरोध:**"। इत्युक्ते योग: चित्तस्य चञ्चलवृत्ती: निरोधयति। मन: वानारेव अत्र-तत्र-सर्वत्र कूर्दते। एकस्मिन् स्थाने स्थिरं न भवति। तादृशमनस: निरिक्षणं कृत्वा एकस्यैव वस्तुन: एकाग्रकरणम् एव योग:। परन्तु मनस: कथं निरिक्षणं करणीयम्? तदर्थं महर्षि: पतञ्जलि: अष्टसिद्धान्तान् योगसूत्रेषु प्रतिपादयति। एवं योगस्य अष्टाङ्गानि सन्ति।

- ❖ यम – यमशब्देन निर्धारित: पञ्च अंशान् पालने (अहिंसा-सत्यम्-आस्तेयम्-ब्रह्मचर्यम्-अपरिग्रह: चेति), आत्मानं सामाजिक-नैतिक-जीवनस्य मार्गदर्शनं करोति।
- ❖ नियम: – व्यक्तिगतनैतिकतां निरूपयति नियम:। पञ्चनियमानां अनुसरणं करणीयम्।
- ❖ १ शौचम् - शरीरश्च मनसश्च । २. सन्तोष: - स्वकर्तव्यपालने सर्वदा सन्तुष्ट: भूत्वा अनर्थकविषयेषु वृथा तृष्णा न दर्शनीया । ३. तप: - अनुशासनं पालनीयम् ।४ स्वाध्याय: – आत्मचिन्तनं करणीयम् । ५ ईश्वर-प्रणिधानम् – कार्यफलं प्रति अभिलाषां त्यक्तवा फलितांश: सर्वश्रेष्टगुरुवे अथवा ईश्वराय समर्पणीय: ।
- ❖ आसनम् – "**स्थिरसुखमासनम्**" अर्थात् स्थिरभावे, नीश्चलरूपे, सुखेन उपवेशणं करणीयम्। तदेव आसनम्। यथा पद्मासनम्, वृक्षासनम् इत्यादि।
- ❖ प्रणायाम: - श्वासपूरककुम्भकरेचकानुष्ठाने प्राणनियन्त्रणम्।
- ❖ प्रत्याहार: – इन्द्रियाणि अन्तर्मुखीं प्रति करणियानि।
- ❖ धारणा – एकाग्रचित्तम्।
- ❖ ध्यानम् – निरन्तरं तप:।

समाधि: - मोक्षप्राप्ति-अवस्था अथवा परमेश्वरप्राप्ति:।

"**योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्याते:**" ।।२८। अर्थात् यम-नियम-इत्यदीनाम् अष्ठविधयोगाङ्गानाम् आचरणं क्रियते चेत्चित्तगतदोषानां निवारणं भवति। मनो-विक्षेप: न भवति। अविद्या-अस्मिता-राग-द्वेष इत्यदि दोषानां निवृत्ति: भूत्वा ज्ञानस्य प्राप्ति: भवति।

पतञ्जलिना विरचित: एष: ग्रन्थ:, आधुनिकयुगे इतोऽपि प्रसिद्ध: अभवत्। बह्वीषु भाषासु एतस्य ग्रन्थस्य अनुवाद: अभवत्।

**३ न्याय:**

न्यायदर्शनस्य प्रवर्तक: महर्षि: अक्षपादगौतम: अस्ति। तेन विरचित न्यायसूत्राणि एव न्यायदर्शनस्य आधारणि सन्ति। यानि साधनानि ज्ञात्वा तत्वज्ञानं प्राप्नुम:, तानि साधनानि एव 'न्याय:' इति संज्ञा दत्ता आसीत।

"**नीयते विवक्षितार्थ: अनेन इति न्याय:**"

अर्थात् यत् साधनं विवक्षिततत्वं ज्ञातुं साहाय्यं करोति तत् साधनं एव न्याय: इत्युच्यते। प्रमाणानुसारेण किमपि सिद्धान्तस्य अर्थज्ञानस्य परीक्षणं भवति चेदपि न्याय: इति वक्तुं शक्यते। अत: मनुष्य: कस्मिन् विषयेऽपि किमपि सिद्धानतं स्थिरीकरोति चेत् तत्र न्यायशास्त्रस्य साहाय्यं अपेक्षितम् अस्ति। न्यायदर्शनं विचारशीलमानवसमाजस्य आधारभूता अस्ति। यत: तद् विना मनुष्य: तस्य विचारणानि सिद्धान्तानि च परिष्कृतानि एवं सुस्थिराणि न कर्तुं शक्नोति। प्रतिपक्षात् रक्षणं अपि न कर्तुं शक्यते। अत: न्यायशास्त्रं संस्कृतसाहित्ये विशेषत: भारतीयदर्शनेषु उच्चस्थरीयं प्रवेशद्वारं अस्ति। वस्तुत: न्यायशास्त्रं बुद्धीं तीव्रं, सुपरिष्कृतं विशदं च करोति।

न्यायदर्शने वैशेषिकदर्शनमिव तत्वज्ञानात् नि:श्रेयसिद्धिं प्राप्तुं विधानं बोधयति। न्यायदर्शने १६ पदार्थानि अन्तर्भवन्ति - प्रमाणं, प्रमेयम् इत्यादि। यत्र प्रमेयपदार्थे वैशेषिकदर्शनस्य षोडशपदार्था: सम्मिलिता: सन्ति।

१ प्रमाणम्, २ प्रमेयम्, ३ संशय: ४ प्रयोजनम्, ५ दृष्टान्त: ६ सिद्धान्त:, ७ अवयव:, ८ तर्क:, ९ निर्णय:, १० वाद:, ११ जल्प:, १२ वितण्डता, १३ हेत्वाभास:, १४ छलम्, १५ जात:, १६ निग्रहस्थानम् च।

प्रथमपदार्थं प्रमाणं किञ्चित् विस्तरेण पश्याम: -

प्रमाणम् इत्युक्ते तत्वं ज्ञातुं साहाय्यकरणम्। तस्य अवगमने अन्यस्य यथार्थज्ञानस्य परिग्रहमपि भवति। न्यायदर्शने चत्वारिप्रमाणानि सन्ति। **प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्द**:।

- **प्रत्यक्षम्** - प्रत्यक्षप्रमाणं द्विधा अस्ति। (१) बाह्यप्रत्यक्षप्रमाणं इन्द्रियाणां सन्निकर्ष: अस्ति, यथा घ्राण: रस: चक्षु त्वक् श्रोत्र: च। (२) आंतरप्रत्यक्षप्रमाणं मनसा सह आत्मगतम् अस्ति।
- **अनुमानम्** – एतत् प्रमाणं ज्ञापयति यदा पदार्थ: दूरस्थ: अस्ति चेदपि इन्द्रियाणां सन्निकर्षे अविद्यमानपदार्थस्य अवगमनं भवति। अनुमानप्रमाणस्य पञ्चावयवा: सन्ति – प्रतिज्ञा, हेतु:, उदाहरणम्, उपनयनम्, निगमनम्। अधोलिखित उदाहरणेन सम्यक् अवगमनं भवति । प्रतिज्ञा – "पर्वतो वह्निमान्" हेतु: - "धूमात्" उदाहरणम् – "यो यो धूमवान् स स वह्निमानम्" उपनयनम् – तथा चायम् निगमनम् – तस्माद् वह्निमान् ।
- **उपमानम्** – एकस्मिन् पदार्थे अन्यस्य पदार्थस्य सादृश्यज्ञानम् उपमानप्रमाणम् इत्युच्यते। यथा – अरण्यवासी ग्रामीणकं वदति, अरण्येऽपि गो: सदृश: पशु: अस्ति। कदाचित् ग्रामीणक: अरण्ये गो: सदृशं पशुं पश्यति, झटिति अरण्यवासिन: कथनं स्मरति, अवगमनं भवति। अत: तं तस्मिन पशौ गोशब्दस्य शक्तिसम्बन्ध: दृश्यते। एवं गोसादृश्य दर्शने उपमानक्रमणं भवति।
- **शब्द:** - यदा पदार्थस्य लक्षणस्य ज्ञानेन पदार्थस्य स्मरणम्, अनुभव: भासते, तदा शब्दप्रमाणम् इत्युच्यते। यथा – घटशब्देन घटपदार्थस्य स्मरणं, लक्षणं च ज्ञापयते। अत: अत्र शब्दशक्तिद्वारा अमुकशब्द: अमुकार्थं बोधयति।

एवं न्यायशास्त्रस्य अध्ययनं अर्थात् प्रमाणं, प्रमेयम् इत्यादि षोडशपदार्थानां नित्यं मननं, दीर्घकालव्यापी अविच्छिन्नाभ्यासं कुर्वन्ति चेत् परमात्मन: साक्षात्कारं प्राप्य जीवनमुक्ति: साधयति।

**४ वैशेषिकम्**

वैशेषिकदर्शनस्य प्रवर्तक: महर्षिकणाद:। तस्य काल: २ शताब्दि ई. पु., एतस्य दर्शनस्य साम्यं न्यायदर्शनेन सह भवति, परन्तु वस्तुत: एतत् दर्शनम् स्वतन्त्रभौतिकविज्ञानवादीदर्शनम् अस्ति । वैशेषिकस्य अर्थम् अस्ति, "विशेषं पदार्थमधिकृत्य कृतं शास्त्रं वैशेषिकम्" अर्थात् 'विशेष' नामकं पदार्थं एव मूलप्रवृत्तं भवति इति कारणात् अस्य शास्त्रस्य नाम वैशेषिकम् आख्यति । वैशेषिकदर्शनम् षड्पदार्थान् गणयति – **द्रव्यं, गुणं, कर्म, सामान्यं, विशेषः, समवायः** च । **द्रव्याणि** नव: सन्ति। पृथिवी, जलम्, तेज:, वायु:, आकाश:, काल:, दिक्, आत्मा, मन: च। २४ **गुणाः** अन्तर्गताः सन्ति - स्पर्ष-रस-रूप-गन्ध,शब्द-संख्या-विभाग-संयोग-परिणाम-पार्थक्य-परत्व-अपरत्व-बुद्धि-सु:ख-दु:ख-इच्छा-द्वेष-धर्म-अधर्म-प्रयत्न-संस्कार-स्नेह-गुरुत्व-द्रव्यत्व च। क्रिया एव **कर्म** अस्ति। पञ्चप्रकाराणि कर्माणि गणितानि। तानि उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनम् च । **सामान्यं** द्विधा अस्ति । सत्तासामान्यं तथा विशिष्टसामान्यम् । **विशेषं** नित्यद्रव्येषु परस्परभेदकारणं पदार्थः अस्ति । **समवायः** सम्बन्धं दर्शयति – अवयव-अवयवी, गुण-गुणी, क्रिया-क्रियावान्, जाति-व्यक्ति तथा विशेष-नित्यद्रव्ययो: सम्बन्धं दर्शयति । वैशेषिकदर्शने न्यायदर्शने च द्वयोऽरपि अतीवसाम्यं दृश्यते । एते दर्शने जगत: व्यवहारं वास्तविकम् इति मन्येते ।

**५ मिमांसा**

मिमांसादर्शने वेदाधारिता: यज्ञविधय: महर्षिजैमिनीना श्रेष्ठरूपेण व्याख्याता: सन्ति । एतस्य दर्शनस्य गणिनं अनीश्वरवादिदर्शनेषु अस्ति । आत्मा, ब्रह्म, जगत् इत्यादिनां विवेचनानि न सन्ति । मिमांसा इत्युक्ते गभीरविचारविमर्शनम् । मिमांसादर्शने धर्मस्य विषयः प्रतिपादितः अस्ति । 'धर्म: क:?', वेदवाक्ये यानि कर्माणि अभिहितनि सन्ति तानि करणीयानि, तदेव अनिवार्यम् धर्माचरणम् अन्यथा निषिद्धम् । एतत् शास्त्रं केवलं, वेदम् अथवा तस्य शब्दं एव नित्यम् अन्यत् सर्वम् अनुचितम् इति प्रतिपादयति । तस्य अनुसरेण मन्त्रम् एव सर्वस्वम् । 'शब्द: मन्त्रं देवता', इति उक्तम् । अत: देव-देवता: न सन्ति। केवलं शब्दः एव प्रमाणम् । एतस्य शास्त्रस्य नाम पूर्वमिमांसा, वेदान्तस्य उत्तरमिमांसा इति आख्याते । पूर्वमीमांसाया: विचारा: धर्मनिमित्ताः सन्ति, उत्तरमीमांसाया: ब्रह्मनिमित्तम् । अतः पूर्वमीमांसां धर्ममीमांसा, उत्तरमीमांसां 'ब्रह्ममीमांसा' इत्यपि उच्यन्ते ।

मीमांसकानां कृते तर्क: कर्मफलस्य उद्देश्यम् अस्ति। फलस्य प्राप्ति: कर्मद्वारा एव भवति। अत: तै: उक्तम् अस्ति, कर्म तस्य प्रतिपादकवचनानि अतिरिच्य अन्यदेवता अथवा ईश्वरस्य आलोचना एव न आवश्यकी । मीमांसकानां नैयायिकानां मध्ये महान् भेद: अयम् अस्ति, मीमांसका: शब्द: एव नित्यं इति चिन्तयन्ति, नैयायिका: शब्द: अनित्यम् इति। सांख्यका: मीमांसाका: द्वावपि अनीश्वरवादिनौ. अपि च वेद: एव प्रामाणम् इति द्वयो: मतम् । भेद: एतावानेव अस्ति, सांख्या: प्रत्येककल्पे वेदस्य नूतनप्रकाशनं मन्यते, मीमांसका: वेद: नित्यं अर्थात् 'कल्पान्ते अपि नष्ट: न भवति' इति वदन्ति ।

**६ वेदान्त:**

वेदान्तदर्शनम् ज्ञानयोगस्य एकं मूलम् अस्ति, यत: व्यक्ति: ज्ञानप्राप्तिदिशि गन्तुं प्रेरित: भवति । एतस्य मुख्यस्रोत: उपनिषद: सन्ति, याभ्य: वैदिकसाहित्यस्य सार: अवगन्तुं शक्यते। उपनिषद: वैदिकसाहित्यस्य अन्तिमभागा:। अत: वेदान्त: इति आख्याति । वेदान्तस्य तिस्र: शाखा: प्रसिद्धा: । **अद्वैतवेदान्तम्, विशिष्टाद्वैतम्, द्वैतम्** च । आदिशङ्काराचार्य:, रामानुजार्यः, मध्वाचार्य: क्रमश: एता: तिस्र: शाखानां प्रवर्तका: मन्यन्ते । एता: विहाय अन्यशाखा: अपि सन्ति तासां संस्थापका: भास्कर:, वल्लभ:, चैतन्य:, निम्बार्क:, वाचस्पति:, मिश्र:,

सुरेश्व: इत्यादयः । आधुनिककाले प्रमुख वेदान्तिन: - रामकृष्णपरमहंस:, स्वामी विवेकानन्द: अरविन्दघोष:, स्वामी शिवानान्द:, रमणमहर्षि: उल्लेखनिया:।

वेदान्तस्य ग्रनथेषु परममुख्यग्रन्था:, उपनिषद:, भगवद्गीता, ब्रह्मसूत्राणी च। ब्रह्मसूत्राणी महर्षिबादराणस्य योगदानम् अस्ति। तान् त्रयान् ग्रन्थान् प्रस्थानत्रयी इति उच्यन्ते। तदनुसारे आदिशङ्कराचार्य:, रामानुज:, माध्वाचार्य:, एते त्रय: उदासीना: प्रस्थानत्रयी आधारभूतेन महत्वपूर्णविशिष्टरचना: जगत: दत्तवन्त:। एवं ब्रह्म, जीव: तथा जगत: विषये अनेके उपन्यासा: लिखितानि सन्ति। अनेन प्रकारेण वेदान्तस्य अनेके रूपाणि निर्मितानि अभवन।

**अद्वैतवेदान्त:**

गौणपादाचार्यस्य आदिशङ्कराचार्यस्य काल: ७०० ई. पू. आसीत् । तस्य मतानुसारेण ब्रह्म एव प्रधानं, जीव: जगत् च तस्मात् अभिन्न: । तत्त्वस्य उत्पत्ति: नास्ति, विनाश: अपि नास्ति । नश्वरजगत् तत्त्वशून्य: अस्ति । जीवा: अपि यथा दृश्यन्ते तथा तत्त्वानि न सन्ति । जाग्रत-स्वप्नावस्थासु जगति अस्ति परन्तु सुषुप्तौ जीवप्रपञ्चः ज्ञानशून्य-चेतनावस्थायां भवति। इत्थं सिद्धं भवति जीवस्य शुद्धरूपसुषुप्ति: । सुषुप्तावस्था अनित्यम् अस्ति अत: एतादृशा परा तुरीयावस्था जीवस्य शुद्धं रूपं प्रकटयति । अस्याम् अवस्थायां नश्वरजगता सह कोऽपि सम्बन्ध: न भवति । अर्थात् जीवेन पुन: नश्वरजगति न प्रवेष्टव्यम् । एषा तुरीयावस्था अभ्यासात् प्राप्यते, ब्रह्म-जीव-जगत् अभेदानां ज्ञानं यदा भवति, तदा जगत् जीवे, जीव: ब्रह्मणि च विलीन: भवति । त्रिषु वास्तविकाः अभेदा: सन्ति चेदपि अज्ञानकारणात् जीव: जगत् स्वस्मात् पृथक् इति चिन्तयन्ति । परन्तु स्वप्नसंसारवत् भाति जाग्रतसंसार: अपि जीवस्य कल्पना एव। भेद: एवम् अस्ति स्वप्न: व्यक्तिगतकल्पनाया: परिणामः अस्ति, यथार्थे जागृतानुभव: समष्टिगतः महाकल्पनाया: । स्वप्नजगत: ज्ञानं यदा भवेत्, तदा द्वयो: मिथ्यात्वं इति ज्ञायते ।

**विशिष्टाद्वैतम्**

रामानुजाचर्य: (११ शताब्दी) शङ्करमतस्य विपरीतवाद: आसीत् । तस्य मतानुसारेण ब्रह्म स्वतन्त्रतत्वम् अस्ति, परन्तु जीव: अपि मिथ्या नास्ति, सत्यम् एव । जीवस्य ब्रह्मणा सम्बन्धः अस्ति । अयम् सम्बन्ध: अज्ञानकारणात् न, वास्तविककारणात् अस्ति। भौतिकजगत: सत्यं, जीवस्य सत्यं द्वयोर्पि यथार्थं परन्तु ब्रह्मण: सत्यं तु विलक्षणम् अद्भुतं च। ब्रह्म पूर्णम् अस्ति, जगत् जड:, जीव: अज्ञान: दु:खत: च। एतेषां त्रयाणां मेलने एक: आकार: भवति, तस्मात् जगत् जीव: च, ब्रह्मण: शरीर: भवत:। ब्रह्म द्वयो: आत्मा अत: शासक:। द्वयो: ब्रह्मण: पृथक् अस्तित्वं नास्ति। तयो: धर्म: ब्रह्मण: सेवा एव। एतस्मिन सिद्धनते अद्वैतस्य स्थाने बहुत्वं कल्पयति। ब्रह्म अनेकेषु एकत्वं स्थापयति। तस्य तत्वं साधयतुं, तन् मध्ये विलिनं भवितुं, मोक्षं प्रामुं एकमेव मार्ग: सर्वोत्तम भक्ति: एव। अनन्तज्ञानम् आनन्देन युक्त: ब्रह्म, नारायण: इति कथयति। सृष्टिकाले नारयण: एव सूक्ष्मं तथा स्थूलं रूपं धारणं कृत्वा प्रत्येकस्मिन् जीवे, जगति वसति। अत: बहुत्वात् विशिष्टाद्वयब्रहमण: प्रतिपादनकारणात् विशिष्टाद्वैतं नाम्ना प्रसिद्धम् अभवत्।

**द्वैतवेदान्त:**

माधवाचार्यस्य काल: द्वादशशताब्दौ आसीत् । स: द्वैतसिद्धान्तस्य प्रवर्तक: प्रचारक: च आसीत् । सप्तमवयसि मध्व: द्वारकानगरे अद्वैतवेदान्तगुरुकुले प्रविष्टवान् । तत्र तस्य अध्ययनम् आरब्धम् । बहुवारं वादविवादं कृत्वा स: गुरुकुलं त्यक्तवान् । अनन्तरं द्वैतसिद्धन्तस्य उपस्थापनं कृत्वा प्रचारक: अभवत् । तस्य वेदान्ते स: पञ्चभेदान् दर्शयति । (१) जीव: - ईश्वर: (२) जीव: - जीव: (३) जीव: - जगत् (४) ईश्वर: - जगत् (५) जगत् – जगत् । जगत् , जीव: ईश्वरात् पृथक् परन्तु ईश्वरं द्वारा नियन्त्रितौ स्त: । सगुणईश्वर: जगत: सृष्टा, पालक: संहारक: च । भक्त्या प्रसन्नस्य ईशवरस्य निर्देशने एव सृष्टि: चलति । यद्यपि जीव: स्वभावात् ज्ञानमय: आनन्दमय: च अस्ति तथापि शरीर-मनसादीनाम् संसर्गेन दु:खम् अनुभवति । यत: संसर्गे यानि कर्माणि परिणामस्वरूपे निर्मितानि भवन्ति तानि एव दु:खकारणानि भवन्ति । जीव: कर्ता, फलभोक्ता अपि च । अत: ईश्वरे नियन्त्रित: भूत्वा ईश्वरं प्रति नित्यप्रेम एव भक्ति: । तदेव ईश्वरस्य सान्निध्यं दत्त्वा नित्यानन्दं मोक्षं च ददाति । भौतिकजगत: शासक: ईश्वर: एव । ईश्वरेच्छानुसृत्य सृष्टि: प्रलय:, द्वयो: क्रमश: स्थूल-सूक्ष्मावस्थायां स्थिति: भवति । रामानुज इव मध्वाचार्य: अपि जगत् ब्रह्मण: शरीरम् इति चिन्तयति । अत: जगत्-ब्रह्मणो:

परस्परभेदं तु वास्तविकम् अस्ति । केवलम् ईश्वर: एव जगत् नियन्त्रयति । एतत् दर्शनं बोधयति ब्रह्म एव जगत: निमित्तकारणं अस्ति प्रकृति:, तस्या: भौतिकतत्त्वानि च उपादासकारणानि सन्ति ।

**उपसंहारः**

भारतीय दर्शनानि तर्कज्ञानस्य आधारस्थम्भाः इति कथ्यन्ते । एतानि षड्दर्शनानि केवलं भारतीयसारस्वतलोके एव न सम्पूर्णविश्वे विशिष्टस्थानं प्राप्नुवन्ति । एतेषां दर्शनानां कृते जगति साम्यं नास्ति, सम्पूर्णविश्वे तत्वज्ञानग्रन्थेषु अन्यतमा एव । न केवलं पाश्चात्त्याः अपि च भिन्नभिन्नदेशीया:, चीना-अरबदेशीया: इत्यादय: भारते आगत्य दर्शनानाम् अध्ययनं कृत्वा स्वदेशं गत्वा तर्क-वेदान्त-प्रचारका: अभवन् । एतेषां दर्शनानां निरन्तराध्ययेन बुद्धिविकसनं तु भवति एव, कदाचित् केषाञ्चित् मोक्षसाधनाय अपि भवन्ति । दर्शनानि आधुनिके जगति अपि अत्यन्तं प्रसिद्धानि, अध्यात्मचिन्तकानां मोक्षस्वरूपं प्राप्तुं साहाय्यकानि च सन्ति ।

## परामृष्टाः ग्रन्थाः

https://hi.wikipedia.org/s/ngy
https://hi.wikipedia.org/s/is
https://hi.wikipedia.org/s/118
https://hi.wikipedia.org/s/rq
https://hi.wikipedia.org/s/bh

https://doi.org/10.5281/zenodo.7244222

Paper 8

# मनः एव मनुष्याणां कारणं बन्धमोक्षयोः

MRS. VIJAYA BHAT H

Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - vijayacbaliga@gmail.com

**सार**: (ABSTRACT)

**गीतोपदेशः एककाले, केवलं एकधर्मानुयायिने न उपदिष्टः । अपि तु मानवस्य सर्वसमस्यानां सार्वकालिकं परिहारं प्रददाति श्रीमद्भगवद्गीता । एतत् केवलं एकः अध्यात्मिकग्रन्थः इत्यपि न । जगतः "प्रप्रथमः मनःशास्त्रीयग्रन्थः" इति कथयति चेत् नातिशयोक्तिः । सर्वमनश्शास्त्र-समस्यानां अपि परिहारः अस्ति अत्र गीतायां । परन्तु मूर्खेभ्यस्तु किमपि औषधं व्यर्थमेव । एतादृशरत्नं प्राप्यापि केचन ज्ञानदरिद्राः एव चरन्ति अस्माकं भारते । श्रीकृष्णः ७०० श्लोकयुक्तां भगवद्गीतां युद्धरङ्गे कथयितुं कथं शक्नोति ? इति संशयः अस्ति लोके । अतः भगवद्गीता केवलं एका 'ऊहा' अथवा 'कथा' इति जल्पन्ति केचन अर्धपण्डिताः । अस्य उत्तरं किमिति चेत् श्रीकृष्णः अर्जुनस्य समस्यायाः परिहारं गीतोपदेशद्वारा शीघ्रं सूचयित्वा तस्य मोहं निवार्य अन्ततः स्वनिर्णयाय स्वतन्त्रं करोति । तस्य उपदेशः केवलं कानिचन वाक्यानि एव । परन्तु भगवता वेदव्यासेन अस्माकं सर्वेषां सुलभज्ञानाय विस्तारेण पश्चात् लिखिता अस्ति । तथाऽपि सा कष्टवेद्या इति अनेकाचार्यवराः तस्याः व्याख्यानं लिखितवन्तः । सर्वे जनाः धर्ममेतं ज्ञानन्तु मोक्षमार्गं अनुसरन्तु इति उद्देशेन श्रीकृष्णस्य वैदिकवाङ्मयस्य सारभूतं एतदुपदेशं महाभारतस्य मध्ये अतिसुन्दररीत्या स्थापितवान् दयालुः श्रीवेदव्यासः ।**

**प्रस्तावना**

संस्कृतसाहित्ये बह्वयः गीताः दृश्यन्ते । तासु गोपी गीता, उद्धवगीता इत्यादयः प्रसिद्धाः परन्तु तासु भगवद्गीता एव प्रसिद्धतमा, प्रख्याता भीष्मपर्वणि सुष्ठु स्थापिता अस्ति । गीतोपदेशार्थम् एव महाभारतं विरचितम् इत्यपि वक्तुं शक्यते । "येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयप्रदीपः" इत्यनेन महाभारते गीतायाः स्थानं, मानं महत्त्वं च सम्यक् ज्ञायते।

एषा भगवद्गीता गृहे वा आश्रमे वा शान्तरीत्या उपविश्य गुरुशिष्यबोधनरीत्या न उपविष्टा । परन्तु कुरुक्षेत्रयुद्धभूमौ कौरवपाण्डवानां युद्धारम्भकाले मोहजालावृतस्य अर्जुनस्य मोहपरिहारार्थम् स्वकर्तव्ये नियोजयन् च भगवता श्रीकृष्णेन उपदिष्टा अस्ति । वस्तुतः श्रीकृष्णः एतदुपदेशं सर्वेभ्यः अपि उपदेष्टुं, तद्रूपेण अस्माकं सर्वेषाम् मङ्गलं कर्तुम् इच्छन् , अस्माकं प्रतिनिधिरूपेण अर्जुनं स्वीकृत्य एतां गीतम् उपदिष्टवान् इत्यपि वक्तुं शक्यते ।

विषयपरामर्शः

एतां भगवद्गीतां श्रीकृष्णः अर्जुनं प्रति कुरुक्षेत्रे उपदिष्टवान् इति तु सत्यम्, परन्तु एतत्कुरुक्षेत्रं तु केवलं उत्तरभारतमध्ये स्थितः भूप्रदेशः इत्येव न । अस्माकं हृदयमपि एकं कुरुक्षेत्रमेव । अत्रपि कौरवाः पाण्डवाश्रयाः सन्ति। अस्माकं हृदयस्थः दुर्योधनः परधनं इच्छति, दुश्शासनः परस्त्रियः कांक्षति । तदा अन्तस्थितः युधिष्ठिरः

"अन्यायं मा कुरु । अधर्मं मा चर" इति जागरयति । अर्जुनभीमसेनौ अन्यायस्य विरुद्धं योद्धं इच्छतः । एतेषु धर्म-अधर्मौ, न्याय-अन्यायौ नीति-अनीती - युद्धेषु कौरवाः एव विजयं प्राप्नुवन्ति । यतः वयं कौरववचनं बहु शृण्मः स्वीकुर्मः च । अस्मि समये भगवद्गीता अस्मान् सत्यमार्गे नयति । अधर्मात् नियन्त्रयति । सा अस्मान् "अस्मज्जीवसारथ्यं श्रीकृष्णाय अर्पय" इति प्रेरयति ।

गीतोपदेशः एककाले, केवलं एकधर्मानुयायिने न उपदिष्टः । अपि तु मानवस्य सर्वसमस्यानां सार्वकालिकं परिहारं प्रददाति श्रीमद्भगवद्गीता । एतत् केवलं एकः अध्यात्मिकग्रन्थः इत्यपि न । जगतः "प्रप्रथमः मनःशास्त्रीयग्रन्थः" इति कथयति चेत् नातिशयोक्तिः । सर्वमनश्शास्त्र-समस्यानां अपि परिहारः अस्ति अत्र गीतायां । परन्तु मूर्खेभ्यस्तु किमपि औषधं व्यर्थमेव । एतादृशरत्नं प्राप्यापि केचन ज्ञानदरिद्राः एव चरन्ति अस्माकं भारते ।

श्रीकृष्णः ७०० श्लोकयुक्तां भगवद्गीतां युद्धरङ्गे कथयितुं कथं शक्नोति ? इति संशयः अस्ति लोके । अतः भगवद्गीता केवलं एका 'ऊहा' अथवा 'कथा' इति जल्पन्ति केचन अर्धपण्डिताः । अस्य उत्तरं किमिति चेत् श्रीकृष्णः अर्जुनस्य समस्यायाः परिहारं गीतोपदेशद्वारा शीघ्रं सूचयित्वा तस्य मोहं निवार्य अन्ततः स्वनिर्णयाय स्वतन्त्रं करोति । तस्य उपदेशः केवलं कानिचन वाक्यानि एव । परन्तु भगवता वेदव्यासेन अस्माकं सर्वेषां सुलभज्ञानाय विस्तारेण पश्चात् लिखिता अस्ति । तथाऽपि सा कष्टवेद्या इति अनेकाचार्यवराः तस्याः व्याख्यानं लिखितवन्तः । सर्वे जनाः धर्ममेतं ज्ञानन्तु मोक्षमार्गं अनुसरन्तु इति उद्देशेन श्रीकृष्णस्य वैदिकवाङ्मयस्य सारभूतं एतदुपदेशं महाभारते अतिसुन्दररीत्या स्थापितवान् दयालुः श्रीवेदव्यासः ।

नैके सन्दर्भाः मानवम् अतीन्द्रियसत्य समीपं नयन्ति । अर्जुनस्य दयारूपः तामसिकमोहः श्रीकृष्णस्य गीतोपदेशप्रवातेन दूरीकृतः । ज्ञान-भक्ति-वैराग्यरूपचण्डमारुतेन अर्जुनस्य अज्ञानरूपं भस्म सम्पूर्णं प्रक्षालितम् । पूर्वकाले वेदाः, उपनिषदः, पुराणाः च आसन् एव । परन्तु ते ज्ञानप्रधानाः आसन् न तु भक्तिप्रधानाः । सर्वजनेभ्यः स्त्रीभ्यः च तत्पाठनविषये नियन्त्रणमपि आसीत् । अतः सर्ववर्णाश्रमाणां, सकलपण्डितपामराणाम् अध्ययनयोग्यः, जगतः दुःखतापत्रयात् अभयप्रदः, कर्मयोगिभ्यः प्रोत्साहदायकः उपदेशः श्रीकृष्णद्वारा भगवद्गीतारूपेण प्रादुरभवत् । सकलबुद्धिजीविभ्यः संशयतुमुले दग्धमनिभ्यः परिहाररूपेण वर्तते । सर्वकालेषु, सकलदेशेषु, सकलवर्णाश्रमधर्माश्रिताणां, पण्डितपामराणां, यतिगृहस्थानां च सदुपयोगकरः आत्मास्ति एतद्भगवद्गीतायां गीता ।

केवलं मरणानन्तरम् अस्य गृन्थपठनं अध्ययनं वा न । इहलोके सुखं, स्वकार्यरंगे नवोत्साहं देयमानं गृन्थमस्ति । एतत् केवलं पठनगृन्थं न, अपि तु अनुष्ठेययोग्यं ग्न्थं । वयं सर्वे अर्जुनवत् बाह्यशत्रुभ्यः युद्धं न कर्मः परन्तु अर्जुनवत् प्रश्नानि, संशयानि, धर्मसंकटानि, दुःखानि अस्माकं जीवने अपि उद्भवन्ति एव । श्रीकृष्णः न केवलं पार्थस्य सारथिः अस्ति । भगवद्गीतां विहाय जनप्रियं, सर्वाङ्गीक्तं साहित्यमेव नास्ति इति कथयति चेत् जगन्मोहकौ कृष्णार्जुनौ ।

मलिने मोचनं पुंसां जलस्नानं दिने दिने
सकृत् गीताम्भसि स्नानं संसारमलमोचनम् ॥

भगवद्गीता 'पञ्चमवेदः' इति मन्यते । यः कोऽपि एतां पठितुं शक्नोति । अर्थगृहणम् अपि तावत् कष्टं नास्ति । तत्समीपम् आगतानां जनानां गीता निराशं न करोति । अपि च गीता एकं योगशास्त्रम् । 'योगः' नाम योजनम् । जीवात्मानं परमात्मना सह योजनं एव योगः । गीतां विना महाभारतं केवलं एका ऐतिहासिका कथा भवति ।

वयं वयोवृद्धाः स्याम परन्तु आध्यात्मिकविषये वयं शिशवः एव । एतादृशशिशुभ्यः श्रीकृष्णेन प्रदत्तं दुग्धमेव एषा भगवद्गीता । अस्मान् सर्वान् संसारबन्धनात् मोचयितुं श्रीकृष्णस्य काचित् कृपा एव अलं इत्येतत् सत्यवचनमेव ।

भगवद्गीतानामकवृष्टेः अर्जुनविषादः एव मेघः । कुरुराजधृतराष्ट्रवचनात् भगवद्गीता प्रारभते। कुरुक्षेत्रस्य पूर्वनाम "स्यमन्तपञ्चकं" इति आसीत् । तत् महत् पुण्यक्षेत्रं, धर्मक्षेत्रं च आसीत् । कुरुराजैः ऊर्जितानन्तरं तस्य नाम "कुरुक्षेत्रम्" इति अभवत् । अधर्मिणः कौरवाः अन्यायात् युद्धे प्रवृत्ताः । धर्मक्षेत्रे कुरुक्षेत्रे अधर्मिणां स्वपुत्राणां विजयं असाध्यम् इति धृतराष्ट्रस्य अपि संशयः आसीदेव । अन्धराजस्य धृतराष्ट्रस्य मनः अपि अन्धमेव आसीत् । तस्य स्वार्थः, पुत्रव्यामोहः च सर्वोपरि आसीत् । दुर्योधनः स्वपक्षे अक्षोहिणीसैन्यं प्राप्य अपि, भीष्मद्रोणसदृशवीराधिवीराः आसन् इत्यतः विजयविषये संशयगृस्थः आसीत् । सः द्रोणस्य समीपं आगत्य सर्वे मिलित्वा स्वसेनापतेः भीष्मस्य रक्षणे तिष्ठन्तु इति आदिशति । भीष्मः अपि तत् श्रुत्वा दुःखितः अपि स्वप्रतिज्ञार्थं हस्तिनापुरस्य रक्षणाबद्धः स्वराजस्य दुर्योधनस्य हर्षं वर्धयितुं गम्भीरध्वनिना उच्चैः सिंहनादं कृतवान् । तदा सर्वे शत्रुमित्रपक्षीयाः सैनिकाः स्वस्वशङ्खान्, तथा अन्ययुद्धवाद्यानि घोषितवन्तः । इदानीं युद्धाय केवलं क्षणगणनास्थितिः।

तदा अर्जुनः स्वसारथिं श्रीकृष्णं स्वरथं कौरवपाण्डवसेनानां मध्ये स्थापयितुं निवेदयति। कृष्णः तथैव कृत्वा भीष्म-द्रोणादीनां पुरतः रथं स्थापयति । तत्र अर्जुनः स्वप्रियपितामहं भीष्माचार्यं, गुरुवरं द्रोणाचार्यं स्वकुलाचार्यं कृपम् अन्यान् सर्वबन्धून् तत्र पश्यति । मोहपूर्णः, दुःखितः च भवति । अत्र वेदव्यासः अर्जुनं 'गुडाकेशः' इति सम्बोधयति । गुडाकेशः इत्यत्र जितनिद्रः अथवा अनालसः इति अर्थः । अर्जुनस्य अकालमोहं निवरयितुं श्रीकृष्णः गीतोपदेशं प्रारभते । अर्जुनस्य मोहाख्यं मनोरोगं जगतः प्रथममनोवैज्ञानिकः श्रीकृष्णः निवारितवान् । अर्जुनः स्वस्वभावविरुद्धकरुणया आर्द्रः अभवत् । तस्य हस्तात् गाण्डीवधनुः अस्रंसत । सः श्रीकृष्णं स्वावस्थां वर्णयित्वा 'अहं तान् स्वबन्धून् गुरून्, मित्राणि च हन्तुं न इच्छामि" इत्युक्त्वा गाण्डीवं त्यक्त्वा तूष्णीम् उपाविशत् ।

पुरा युधिष्ठिरस्य राजसूययागावसरे अर्जुनः राजाधिराजानः अपि जितवान् आसीत् । देवतानां शत्रून् कालकेयनामकासुरान् जितवान् आसीत् । साक्षात् परमेश्वरेणापि सह युद्धं कृतवान् । तत्समये सः विशादं न उपगतवान् । तर्हि इदानीं कुतः ? इति चेत् अर्जुनः इदानीं मोहपरवशः, ममकारपरवशः च अस्ति । ममत्वं यदि आवृणोति चेत् यः कोऽपि भ्रमाधीनः भवति एव । "अहमेव सर्वं करोमि । यद्यहं युद्धे प्रवृत्तः तदा एतत्सर्वनाशं दूरीकर्तुं शक्यते" इति अर्जुनः चिन्तयति । अतः अस्य विशादः अहंकारमूलः । एतादृशसन्दर्भे व्यामोहः आवृणोति इत्यत्र निश्चितम् यत् शताधिकं शस्त्रचिकित्सां कृतवतः वैद्यस्य, स्वपुत्रस्य शस्त्रचिकित्सासमये करौ कम्पेते एव । अर्जुनस्य एतद्विशादः श्रीकृष्णस्य अमृतधारासदृशगीतोपदेशाय कारणम् अभवत् । महात्मनः सर्वमपि कार्यं शुभान्तं एव भवति इति वाक् एतदुदाहरणम् ।

अद्य अर्जुनस्य रथस्य सूतः, सकलमहाभारतयुद्धस्य सूत्रधारश्च श्रीकृष्णः अर्जुनस्य अनार्यजुष्टम् अस्वर्ग्यं, अकीर्तिकरं हृदयदौर्बल्यं निवारयितुं प्रारभते । यतः कस्यापि हृदयदौर्बल्यं धर्माधर्मविवेचनां अपि नाशयति । सर्वोऽपि यदा कदा वा मृत्युं प्राप्नोति एव । जननं, शैशवं, बाल्यं, यौवनं तथा वृद्धाप्यमिव जीर्णात् एतच्छरीरात् अन्यशरीरप्रवेशः अपि अनिवार्यः । यस्य जननमेव नास्ति सः मरणं न प्राप्नोति । तदेव आत्मवस्तु । आत्मानुभवः तु अवर्णनीयः केवलम् अनुभववेद्यः । यद्यपि अर्जुनः स्वक्षत्रियधर्मं चिन्तयन्नपि "दुष्टनाशनम्, शिष्टपरिपालम्" इत्यादि तस्य स्वधर्मः एव । 'क्षतात् त्रायते इति क्षत्रियः' इदानीं दुष्टानां कौरवाणां वधमेव तस्य विहितकर्तव्यम् । नो चेत् सः धर्मभृष्टः भवति । युद्धे विजयात् राज्यप्राप्तिः अपजयात् स्वर्गप्राप्तिः । अतः 'जयापजये समोभूत्वा युद्धे

प्रवर्तय' इति श्रीकृष्णः आदिशति । सर्वेषां मानवानामपि स्वकर्मणि एव अधिकारः, न फले । स्वकर्तव्यदृष्ट्या एव कर्म कुर्यात्, न फलापेक्षया ।

यदा सर्वकामान् त्यक्त्वा स्थिरबुद्ध्या आत्मनि लयीभूत्वा आत्मानन्दं प्राप्नोति तदा सः स्थितप्रज्ञः' इति कथ्यते । देहात्मभेदं ज्ञातस्य मृत्युभयं कुतः ? इन्द्रियार्थानां प्रति धावन्तं मनः भगवतः समीपं नेतव्यम् । तदर्थं मनः वासुदेवपरायणं कुर्यात् । विषयव्याकुलबुद्धिनां कर्मयोगे अधिकारः । अव्याकुलबुद्धिनां ज्ञानयोगे अधिकारः । ज्ञानयोगः कर्मयोगात् महत्तरः अपि अर्जुन कर्मयोगस्य एव अधिकारी । न ज्ञानयोगस्य । अतः प्रभुः अर्जुनं कर्मयोगे एव नियोजयति । यतः सः जनकराजः इव कर्म कुर्वन् एव ज्ञानयोगयोग्यः भवति । न तु सनकादीनाम् इव त्यागे वा तपसि वा ज्ञानयोग्यः । जन्मान्तरेण आगतानि प्रारब्धकर्माणि वारयितुं, चित्तशुद्धि-कारकाणि कर्माणि कुर्यात् । विना चित्तशुद्धिं यदि स्वकर्म वर्जते तदा अन्यकर्म लिप्यते । अतः चित्तशुद्धिकराणि कर्माणि द्वन्द्वातीतः भूत्वा, ममकारं विना, पुण्यापेक्षां विना कुर्वतः मानवस्य कर्माणि स्वयमेव निवार्यन्ते । परन्तु कर्मणां त्यागमात्रेण ज्ञाननिष्ठः न भवति । यः कोऽपि क्षणमात्रमपि कर्मणा विना जीवितुमेव न शक्यते । प्रकृतिजन्याः सत्वरजतमोगुणाः तं कर्मणि नियोजयन्ति । तामसगुणवान् स्वस्य, परस्य च अनुपयुक्तं कर्म करोति । रजोगुणवान् कीर्तिकामनार्थं कर्म करोति। परन्तु मेधावी सत्वगुणोपेतः नरः कीर्तिकामनारहितः परोपकारार्थं सर्वं कर्म करोति। एवं सर्वेऽपि यत्किमपि कर्म कुर्वन्तः सन्ति । "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" । अतः निष्कामबुद्ध्या, निर्ममः भूत्वा कर्म कुर्यात् । स एव "कर्मयोगः" । कर्म विना श्वासोच्छ्वासमपि न शक्नुमः । अर्जुनस्य वाक् इव भिक्षावृत्तिना जीवितुमपि कर्म तु कर्तव्यमेव । अतः यथा कर्मफलं न स्पृशति तथा कर्म करणीयम् । अन्यानि सर्वकर्माणि संसारबन्धनकारणानि भवन्ति ।

सर्वेऽपि विविधविषयेषु तृप्ताः भवन्ति । केचन खादिष्ट्भोजनेन, केचन अन्यादृशधनसम्पादनेन, केचन कामोभोगेन, सन्तुष्टाः, तृप्ताः भवन्ति चेत् अङ्गुलिगणनीया एव केचन आत्मरतयः सन्ति । ते अत्मध्यान-आत्मनिधिध्यासनेन तृप्ताः भवति । एतादृशात्म-ज्ञानिभ्यः स्वजीवने किमपि कर्तव्यमेव न भवति । ते केवलं ज्ञानप्राप्त्यर्थं कर्म कुर्वन्ति । ज्ञानतृप्तानां तु कर्तव्यस्य आवश्यकता एव न विद्यते । एवं जीवन्मुक्तज्ञानिभ्यः कर्मणा कोऽपि लाभः नास्ति, अकर्मणा नष्टं अपि नास्ति । अत एव श्रीकृष्णः अर्जुनम् अनासक्तः, स्वकर्तव्यं ईश्वरार्पणबुद्ध्या कर्तुं कथयति । यः कर्मफलं त्यजति तेन महाफलं प्राप्यते एव ।

श्रीकृष्णेन अर्जुनाय उक्तः अयमुपदेशः अस्माकमपि अन्वितं भवति । अस्माकं कर्म सदैव श्रुद्धापूर्णं भवेत्। तदैव जीवने सर्वसमस्यानां परिहारः दृश्यते । श्रीकृष्णः देवधिदेवः । तस्य किमपि कर्तव्य नास्ति । तेन जीवने पाप्तव्यं साधितव्यं वा नास्ति । तथापि सः स्वकर्म करोत। कंसादीन् असुरान् हन्ति, अर्जुनस्य सारथिरूपेण उपकारं करोति । यतः दुष्टसंहरणं, धर्मसंस्थपनम् एव तस्य अवतारस्य कारणम् । न हि चेत् सर्वे तं एव अनुसरन्ति अतः ज्ञानी अज्ञानी वा स्ववर्णाश्रमोचितं नित्यनैमित्तिकं कर्म कुर्वन्ति एव । अज्ञानी स्वेच्छापूर्त्यर्थं, स्वर्गप्राप्त्यर्थं कर्म करोति चेत् ज्ञानी कर्मफल-अनासक्तः लोककल्याणार्थं, ईश्वरार्पणबुद्ध्या कर्म करोति ।

मनुष्याणां पूर्वकर्मफलानुसारं सत्वरजतमोगुणाः देहिनं आवृण्वन्ति । अतः सः परतन्त्रः। ते त्रिगुणाः एव तं खेलयन्ति । अतः यावत् गुणातीतः न भवति तावत् जन्मान्तरप्राप्तिः भवति एव। प्रथमं कर्मविषये 'एतत् मया कृतं, एतत् मह्यं' इत्यादीन् अहङ्कारममकारादीन् त्यजेयुः । 'अहं' इति भावनया यदा कर्म करोति, तदा सफलः भवति चेत् सन्तुष्टः भवति, असफलः भवति चेत् असन्तुष्टः दुःखितः वा भवति । यदा वयं कर्मकररूपेण वा मध्ये कार्यं कुर्मः, तदा वयं तस्य लाभनष्टं प्रति न उत्सुकाः यतः तत्र लाभः वा नष्टः वा यजमानस्य एव भवति । वयं श्रुद्धया कार्यं कुर्मः तदर्थं वेतनं प्राप्नुमः । तथैव चत्कर्म वयं कुर्मः तत्कर्म "परमात्मनः श्रीकृष्णस्य सेवा" अस्य

फलाफलमपि श्रीकृष्णस्य एव इति भक्त्या, निष्ठया, श्रुद्धया करोति, तदा कर्मणः फलाफलेषु अस्माकं सन्तोषः वा दुःखं वा, उद्वेगः वा न भवति । अतः ममकारं त्यक्त्वा उद्वेगरहितः युद्धस्य जयापजयं अगणय्य स्वधर्मोचितम् एतत्युद्धं श्रद्धया, कर्तव्यबुद्ध्या करोति चेत् भीष्मद्रोणादीनां संहारस्य पापदोषः अर्जुनं न स्पृशति इति वदति वासुदेवः । एतास्मिन् शरीररूपककुरुक्षेत्रादपि ममकारकामक्रोधादीनां ज्ञानविवेकादीनां च मध्ये युद्धं सदैव भवति । अस्मदिः सर्वैः ज्ञानविवेकादिभिः कामक्रोधादयः जेतव्याः । मनुष्याणां अहङ्कार-ममकार-राग-क्रोधाः इत्यादयः एव शत्रवः । विषयवैराग्यमेव एतत्युद्धे अस्माभिः साधितव्यम् । यदा परमात्मनि अनुरक्तः भवति तदा विषयेषु वैराग्यं स्वयमेव भवति ।

यदा वयं "श्रीकृष्णार्पणमस्तु" इति वदामः तदा वयं श्रद्धावन्तः भवेम । असूयारहिताः भवेम । असूया नाम एकः व्याधिः । सा सर्वान् ज्ञानिनः, अध्यात्ममार्गिणः अपि क्रीडयति । अतः तत्र अवसरः एव न दातव्यः । एकः अज्ञानिना श्रद्धया साधितं कार्यम् अन्येन विद्यावता ज्ञानिना अपि साधयितुं न शक्यते । यतः श्रद्धायाः कदाचित् जातिः, धर्मः, आश्रमः, वर्णः, लिङ्गम् इत्यादीनां भेदः नास्ति । यः कोऽपि श्रद्धया ध्यायति, परमात्मा धावन् आगच्छति । एवं यः श्रद्धावान् अनसूयः भवति सः शीघ्रं विमुक्तः भवति ।

इन्द्रियनिग्रहः विद्यावद्भ्यः ज्ञानिभ्यः च अतिकष्टकरः । तथापि तदर्थं स्वोचितं प्रयत्नं कुर्यात् । शीघ्रफलं न प्राप्यते चेदपि तीव्रप्रयत्नेन इन्द्रियनिग्रहः निश्चयेन साध्यः भवति । इन्द्रियाणि स्वप्रियवस्तुसमीपं सदैव धावन्ति । अप्रियवस्तूनि द्विषन्ति । एकः रागः चेत् अन्यः द्वेषः । एतौ द्वावपि अस्मान् भवसागरे एव पातयतः । सामान्यतः एतौ रागविरागौ अस्मान् तावत् बध्नीतः परन्तु यदा तौ व्यक्तिगतौ भवतः तदा अस्मान् तीव्रं बध्नीतः । माता, पिता, पत्नी, पुत्रः, गुरवः, तातः, मित्रम् इत्यदीन् वयं बहु प्रीणयामः । तेषां दुःखं वा कष्टं वा अस्माभिः न सह्यते । तेषाम् विरहं तु वयं चिन्तयितुं अपि न शक्नुमः । तथैव द्वेषः अपि अस्मान् तावदेव, वयं शत्रूनपि ज्ञापयामः । एषः द्वेषग्निः मनसि धूमं प्रवहति एव । जन्मजन्मान्तरेऽपि द्वेषेण धनं केचन कुर्वन्ति । रागः मोहिनी चेत् द्वेषः पिशाची। द्वावपि सुलभतया न गच्छतः । एतौ रागद्वेषौ अध्याय्ममार्गानुसरणान् चोराः इव पीडयन्ति । अतः एतयोः वशीकरणं अतिकष्टम् । अर्जुनस्तु इदानीं रागबद्धः अस्ति । सः कर्तव्यभृष्टः न भवेत् इति अर्जुनं वदति । यतः परधर्मः दोषरहितः अपि न श्रेयस्करः । भिक्षावृत्तिः अहिंसापूर्णाऽपि सा सत्यासीनां धर्मः न तु क्षत्रियाणाम् । अस्माकं धर्मः दोषपूर्णः इति विचार्य परधर्मं न आश्रयेत् । कथमिति चेत् वर्णाश्रमाः अस्माभिः न निश्चिताः । अस्माकम् पूर्वजन्मवासनया प्राप्ताः । जन्मदात्री मातरं 'कुरुपी' इति कारणात् त्यक्तुं न शक्यते । कर्मयोगे यदि मरणं भवति चेत् अन्यजन्मनि तस्य सिद्धिः भवति एव । परन्तु स्वधर्मं कर्मयोगं त्यक्त्वा परधर्मः ज्ञानयोगः आश्रितः चेत् फलसिद्धिः दुर्लभा एव ।

कामक्रोधौ रजोगुणयुक्तौ शत्रू स्तः । मानवेन केनाऽपि प्रयत्नेन दूरीकृतौ अपि तेन पापकर्माणि कारयति एव । कामः नाम आशा । सकलप्रपञ्चं प्राप्यापि पुनः आशा वर्धते । एकं प्राप्तं चेत् अन्यस्य आशा । ताः आशाः अस्माकं वशे न आगच्छन्ति परन्तु वयमेव तासां वशीभूताः भवामः । इन्द्रियार्थान् पूरयन्तः न विरमामः । आशापूरणविषये धर्माधर्मान् अपि न विवेचयामः । कार्याकार्यविवेकः अपि न भवति । कष्टसुखानि अपि न गणयामः । एतौ कामक्रोधनामकपिशाची रजोगुणजन्यौ, अतः मानवं सम्यक् बाधयतः । मानवः सर्वं प्राप्याऽपि न तृप्तः भवति । अग्निं काष्टं दत्त्वा तृप्तं कर्तुं शक्येत किं ? सः इतोऽपि अधिकतमः प्रज्वलति । तथैव कामग्निः अपि समग्रं प्राप्याऽपि सदैव अतृप्तः एव । तथैव क्रुद्धः सकलपापकर्माणि करोति। गुरुजनान् पितृजनान् सज्जनान् अपि प्रहरन्ति, घ्नन्ति च । वृद्धजनाः अङ्गानि शिथिलभूतानि अपि काष्टसहायेन गच्छन्तः अपि आशां न मुञ्चन्ति । कामप्राप्तेः मार्गे कोऽपि आगच्छति चेत् सः कामः क्रोधरूपेण परिणमयति । एतौ कामक्रोधौ एकस्य नाण्यस्य द्वे मुखे । मनुष्यमात्रे एषः कामः वर्तते एव । अत्र सात्त्विककामः अग्निसमीपस्थः धूमः इव भवति । धूमेन आवृतोऽपि अग्निः अस्माभिः स्वल्पं दृश्यते । पूर्णरूपेण आवृतः न भवति । राजसकामः स्वप्रयत्नेन ज्ञानप्राप्तिं करोति । सः

दर्पणस्य कल्मषमिव भवति । तावत्सुलभः न चेदपि प्रयत्नं कुर्यात् । तामसकामस्तु जरायुरिव बहुसमयं अस्मान् आवृत्य पीडयति । अनेकसन्दर्भेषु बहुजन्मपर्यन्तं देहिनं न मोचयति । सदा 'देहि देहि' पीडयता कामासुरेण मानवस्य ज्ञानं तमसा आवृतं भवति । ज्ञानिनां नित्यवैरी कामः चेत् कामिनां नित्यवैरि ज्ञानम् । मूर्खस्य कामः मित्रं भवति चेत् अनन्तरं तस्य परिणामं अनुभवन् शत्रुवत् भवति । कष्टेन इन्द्रपदवीं प्राप्नुवन्ति । तदा ब्रह्मपदस्य आशा भवति। तदर्थमेव कामः दुष्पूरः अथवा अनलः इति कथयन्ति । कामस्य आश्रयस्थानं इन्द्रियाणि, मनः, बुद्धिः च । अशुद्धजले मलेरियाक्रिमिः इव इन्द्रिय-मन-बुद्धिषु कामक्रिमयः सञ्जायन्ते ।

विपणौ चक्षुः आम्रफलं पश्यति । रसना तस्य रुचिं स्मृत्वा तत् कामयते । चक्षुरसने मिलित्वा मनः सूचयतः । तदा बुद्धिः अस्मत् समीपे कियत् धनमस्ति इति तर्कयित्वा "क्रीणातु" इति सूचयति। मनः कर्मेन्द्रियाभ्याम् वस्तुतः हस्तपादाभ्याम् तदाम्रफलं क्रेतुम् आदिशति । परन्तु अन्तःकरणं "धनं तु तदर्थं नानीतम्, किञ्चिदन्यकार्यार्थम्" इति ज्ञापयति । परन्तु तस्य तर्कं कोऽपि न गणयति। कर्मेन्द्रियाणां साहाय्येन फलानि क्रीतानि, खादितानि अपि भवन्ति । एवं इन्द्रियाणि, मनः, बुद्धिः च मिलित्वा कामतृप्तं कुर्वन्ति । यस्य कस्यापि कार्यसाधनसमये इन्द्रियस्य, मनसः बुद्धेः व्यवहारः आवश्यकः एव । अतः कामस्य तानि एव वासस्थानानि । आत्मा 'कोऽहम्' इति ज्ञानं विस्मरेत् तथा कुर्वन्ति कामाः । कामस्य आक्रमणेन आत्मा 'देहः एव अहम्' इति भ्रान्तः भवति ।

**उपसंहारः**

अतः अस्य कामाग्नेः दमनं कथं भवेत् इति चेत् प्रथमं एतस्य कामस्य आश्रयस्थानानि वशीकरणीयानि । चोरः न लभते चेत् तस्य आश्रयदातुः बन्धनं कुर्यात् । चोरः स्वयमेव वशम् आगच्छति । अतः कामाश्रयाणि इन्द्रियाणि वशानि नयेयुः । कामस्तु अनङ्गः । तस्य बन्धनं तु असाध्यमेव । ज्ञानविज्ञाननाशनं पापिष्टं कामं इन्द्रियेभ्यः उच्छाटनं कुर्यात् । देहस्य सकलव्यवहाराः इन्द्रियेभ्यः एव प्रचलन्ति । अतः इन्द्रियाणि श्रेष्टानि । मनः तथापि श्रेष्ठम् । यदि मनः नास्ति तर्हि इन्द्रियाणि किमपि कर्तुं न शक्यन्ते । इन्द्रियाणि मनः च एकीभूय एव विषयग्रहणं भवति । बुद्धिः ततोऽपि श्रेष्ठा । परन्तु बुद्धेः अपि श्रेष्ठः आत्मा । सः एव यजमानः । बुद्धिस्तु तस्य सेवकः। अतः आत्मावलम्बनया कामं तस्य अधिष्ठानस्थानेभ्यः इन्द्रियेभ्यः, मनसः बुद्धेः च निवारयेत् । आत्मनस्तु जन्ममरणे इति न स्तः । वयम् एतत् अज्ञात्वा अथवा विस्मृत्य जननमरणयुक्तदेहविषये आत्मभावं अनुभूय तस्य पोषणार्थं अहर्निशं व्यवहारं कुर्मः । "वयं केवलं शरीरिणः न" एतत् प्रथमं ज्ञातव्यम् । अतः बुद्धेः परः, श्रेष्ठः सूक्ष्मः आत्मा इति प्रथमं ज्ञातव्यम्। शुद्धमनसा अशुद्धमनः ज्ञातव्यम् । उत्तमसंस्कारेण अधमसंस्कारः नाशितव्यः । संसारबन्धनस्य, मोक्षस्यापि मनः एव कारणं । मनः अस्मान् उद्धर्तुम् अपि शक्नोति नाशयितुं अपि शक्नोति । दुरासदे मनसि अधिष्ठितं कामरूपं शत्रुं मनसा एव निगृह्णीयात् इति भगवान् वासुदेवः कृष्णः पार्थद्वारा अस्मान् उपदिशति।

**आधारग्रन्थाः**

* गीताभावधारे - स्वामि सोमनाथानन्द, रामकृष्ण आश्रम मैसूरु
* श्रीमन्महाभारत भारतदर्शन मुद्रणालय बेङ्गलूरु
* भगवद्गीता - बन्नन्जे गोविन्दाचार्य, ईशावास्यप्रतिष्ठान उडुपि
* भगवद्गीता यथारूप - श्रीमद् भक्तिवेदान्त स्वामि प्रभुपाद, भक्तिवेदान्तट्रस्ट, बेङ्गलूरु

कन्नड अनुवाद प्रो. एल्.एस्. शेषगिरिराव्

https://doi.org/10.5281/zenodo.7244275

Paper 9

# सुन्दरकाण्डस्य सामान्यदृष्ट्या आध्यात्मिकदृष्ट्या च अध्ययनम्

**KRISHNAMURTI SHANTARAMA HEGDE**

Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru

Email id - kmurti.s@gmail.com

**सार**: (ABSTRACT)

**महत्वपूर्णविषयाः रामायणे सन्ति, तत्रापि सुन्दरकाण्डे सन्ति इति हेतोः वेदानां तुल्यत्वम् अस्य वर्तते । यथा वेदानां साराः उपनिषत्सु वर्तते तथैव रामायणस्य हृदयभागत्वेन सुन्दरकाण्डः स्वीक्रियते । लोके तु यथा वेदः तथा रामायणम् इत्युक्तिः प्रसिद्धा वर्तते । एतादृशमहत्त्वपूर्णस्य सुन्दरकाण्डस्य अध्ययनं द्विधा कर्तुं शक्यते । यथा १. सामान्यदृश्ट्या अध्ययनम् २. आध्यात्मिक-अध्ययनम् सामान्यदृश्ट्या अध्ययनम् (कथादृष्ट्या )**

**आदौ सामान्यदृष्ट्या अध्ययनस्य (कथादृष्ट्या ) चिन्तनं कुर्मः । काण्डेऽस्मिन् हनूमान् एव प्रधानः । रामसुग्रीवयोः सख्यानन्तरं सीतान्वेषणार्थं स्वसैन्यं प्रेषयति सुग्रीवः । ततः जाम्बवता प्रेरेपितः हनूमान् कार्यसाधनम् एकस्यां रात्रौ साधयति इति सुन्दरकाण्डे निरूपितं वर्तते । यदा सीतान्वेषणार्थं शतयोजनं समुद्रोल्लङ्घनं करोति तदा अस्य परीक्षार्थं देवैः प्रेषिताः अनेके विघ्नाः उपस्थिताः । तान् विघ्नान् अत्यन्तविश्वासेन उत्तीर्य लङ्कायाः तीरप्रदेशं प्राप्नोति । लङ्कायाः अधिदेवतया सह द्वन्द्वयुद्धं कृत्वा ताम् पराजित्य लङ्कानगरं प्रविशति । लङ्कानगरस्य अन्तः अन्येषां दृष्टिपथं यथा नागच्छेत् तथा रूपं धृत्वा नगरस्य सञ्चारं करोति । तत्र अनेकान् विशेषान् सः अद्राक्षीत् ।**

**प्रस्तावना**

**वगर्थाविव संप्रक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वती परमेश्वरौ ॥**

लोके तावत् समेषां सुरभारतिजुषां विदुषामविदुषां चातिरोहितमेव यत् विना प्रयोजनं कोऽपि कुत्रापि न प्रवर्तते । तथा च उक्तम् प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति । स्थिते चैवम् प्रयोजनस्य अभावे काव्यनिर्माणम् अध्ययनं वा कथं प्रवर्तेरन् । अतः मम्मटकविः काव्यप्रयोजनमुद्दिशय इदमाह –

**काव्यंयशसोऽर्थकृते व्यवहारविदो शिवेतरक्षतये ।**
**सद्यःपरनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ॥(काव्यप्रकाशः)**

काव्यनिर्माणेन केचन कीर्तिसम्पादनं, व्यवहारकौशलं चालभिषत । पापक्षये झटिति परमानन्दं च प्राप्नुवन् । कान्तासम्मितोपदेशेन सन्मार्गगामिन्यश्च अभवन् । कतिपयैः उत्तमोत्तमकाव्यनिर्माणेन जीवने साफल्यं लब्धं चेत् अपरैः कैश्चित् काव्याध्ययने स्वजीवनस्य सार्थक्यं अन्वभावि । काव्याध्ययनं शास्त्राध्ययनं च अस्माकं भारतीयानां जीवनस्य अविभाज्यमङ्गत्वेन आस्ताम् । अतः प्राचीनाः काव्यं आत्मा सुहृदयानां इत्येव अमन्यन्त । काव्यम् इति शब्दस्मरणेन उच्चारणेन वा रामयण महाभारतस्य स्मरणम् आश्चर्यं न ।

**विषयपरामर्शः**

रामायण – इति शब्दः रामस्य वृत्तान्तं आमूलं विवृणोति । रामायणं पूर्वं अभूत कुतः अत्र उपस्थापनं पुनः इति शङ्कातु उत्पद्यत् एव । परन्तु अनेकासां कृतीनां मूलस्रोतः अयमेवकृति इति नातिशयोक्तिः। रामायणम् अधिकृत्य अनेकानि महाकाव्यानि नाटकानि रचितानि सन्ति । रघुवंशम् जाह्नकीहरणम्, बट्टीकाव्यम्, इत्यादयः अनेके ग्रन्थाः सन्ति । एवम् आवलिं कुर्मश्चेत् शताधिकाः कृतयः उपलभन्ते । सर्वत्रापि सामाजिक मौल्यानि प्रतिपादितानि सन्ति । मूलरामायणस्य कर्ता आदिकविः महर्षिः

वाल्मीकिः । महर्षिः आदिकविः २४००० श्लोकैः सप्त काण्डैः रामस्य जीवनचरितं निबद्धवान् । सप्तकाण्डाः भवन्ति एते –

❖ बालकाण्डः , अयोध्याकाण्डः, अरण्यकाण्डः , किष्किन्धाकाण्डः, सुन्दरकाण्डः◌ः, युद्धकाण्डः , उत्तरकाण्डः

च, प्रमुख घटनाः एव तत्तत्काण्डस्य नाम इति अवगम्यते । एवमेव स्वतः कविं ब्रह्मा वदति यत्

**यावत् स्थास्यन्ति गिरयः सतितश्च महीतले ।**
**तावत् रामायण कथालोकेषु प्रचरिष्यति ।।** ( ब्रह्मा अवदत् )

तावान् प्रसिद्धिः महत्वं विद्यते रामायणस्य । एवं प्रख्यातस्य रामायणस्य सर्वेषु काण्डेषु पूर्वोक्तवत् दृष्यते परन्तु पञ्चमकाण्डे (सुन्दरकाण्डे) तु न तथा । किमर्थं एवं इति जिज्ञासायां सत्यां बहुविधचिन्तनं साध्यम् । अस्मिन् काण्डे घटनानुसारं सक्षात् न स्वीकृतम् इति अवगम्यते । संस्कृतभाषायां एकस्यैव शब्दस्य अनेके अर्थाः सन्ति अत्रापि । सुन्दर- इति शब्दस्य दूतः इति अर्थो स्वीकृतः ।

* सीतां दुःखात् विमोचितवान् अथवा सा कथा वर्तते इत्यतः सुन्दर इति नाम

* रामः दूतमुखेन संन्देशं प्रेषितवान् सीतां प्रति इति काण्डेऽस्मिन् वर्णितं इत्यतः सुन्दरमिति

* नायक नायिक्योः परस्पर संम्बन्धं यः सम्पादयति सोऽपि सुन्दर शब्द वाच्यः भवति ।

* अत्र हनूमान् तत् कार्यं संम्पादयति अतः सुन्दरकाण्ड इति नाम अस्य काण्ड सुन्दर इति

* नष्टस्य पुनः प्राप्तिः अपि सुन्दर शब्देन व्यवर्हीयते अत्र कपिः हनूमान् सीतां अन्विष्टवान् इति हेतोः काण्डस्य सुन्दर इति नाम कृतम् ।

अस्मिन् सुन्दरकाण्डे २८८५ श्लोकैः हनूमान् कथं सागरस्य उल्लङ्घनं कृत्वा कथं लङ्कां प्रविशति । समुद्रोल्लङ्घने के के विघ्नाः आसन् । तान् सर्वान् उत्तीर्य कथं प्रविशति । अपि स्वर्णमयीलङ्का..... कथं पश्यति नगरं, भवनानि, उद्यानम्, पाकशालां इत्यादीनि स्थलानि इति । दूतत्वेन तस्य कार्यसिद्धिं कथं सम्पादयति । कथं सीताम् अमिलत् इत्यादयो प्रमुखाः अंशाः। रामस्य दूतत्वेन लङ्कां हनूमान् प्राप्तवान् अतः महर्षिणा सुन्दरकाण्ड इति नाम कृतम् इति समेषां अभिप्रायः ।

एवं महत्वपूर्णविषयाः रामायणे सन्ति, तत्रापि सुन्दरकाण्डे सन्ति इति हेतोः वेदानां तुल्यत्वम् अस्य वर्तते । यथा वेदानां साराः उपनिषत्सु वर्तते तथैव रामायणस्य हृदयभागत्वेन सुन्दरकाण्डः स्वीक्रियते । लोके तु यथा वेदः तथा रामायणम् इत्युक्तिः प्रसिद्धा वर्तते । एतादृशमहत्त्वपूर्णस्य सुन्दरकाण्डस्य अध्ययनं द्विधा कर्तुं शक्यते । यथा १. सामान्यदृश्ट्या अध्ययनम् (कथादृष्ट्या ) २. आध्यात्मिक-अध्ययनम् (वेदान्त दृष्ट्या ) सामान्यदृश्ट्या अध्ययनम् (कथादृष्ट्या )

आदौ सामान्यदृष्ट्या अध्ययनस्य (कथादृष्ट्या ) चिन्तनं कुर्मः । काण्डेऽस्मिन् हनूमान् एव प्रधानः । रामसुग्रीवयोः सख्यानन्तरं सीतान्वेषणार्थं स्वसैन्यं प्रेषयति सुग्रीवः ।

तदा जाम्बवता प्रेरेपितः हनूमान् कार्यसाधनम् एकस्यां रात्रौ साधयति इति सुन्दरकाण्डे निरूपितं वर्तते । यदा सीतान्वेषणार्थं शतयोजनं समुद्रोल्लङ्घनं करोति तदा अस्य परीक्षार्थं देवैः प्रेषिताः अनेके विघ्नाः उपस्थिताः । तान् विघ्नान् अत्यन्तविश्वासेन उत्तीर्य लङ्कायाः तीरप्रदेशं प्राप्नोति । लङ्कायाः अधिदेवतया सह द्वन्द्वयुद्धं कृत्वा ताम् पराजित्य लङ्कानगरं प्रविशति । लङ्कानगरस्य अन्तः अन्येषां दृष्टिपथं यथा नागच्छेत् तथा रूपं धृत्वा नगरस्य सञ्चारं करोति । तत्र अनेकान् विशेषान् सः अद्राक्षीत् । उक्तं च -

**ता चित्रामाल्याभरणां कपिराज हितंकरः ।**
**राघवार्थं चरन् श्रीमान् ददर्श च ननन्द च ॥** (सु-अ4-श्लो-8)

एवं प्रकारेण लङ्कां दृष्टुं उपाक्रमत । तत्रत्यानि भवनानि स्वर्णमयानि आसन् । भवनानि पश्यन् विस्मितः अभवत् । एवमेव अग्रे गत्वा प्रतिगृहम् भवनम्, प्रतिस्थलं अन्विषति सीतायै । अस्मिन्नवसरे सः

लङ्कायाः सम्पूर्णपरिचयं असुराणां जीवनपद्धतीनां ज्ञानम् अर्जयति । अस्मिन् सन्दर्भे लङ्कायाः वर्णनम् अतिमनोहारित्वेन कृतम् । रामायणे एतादृशवर्णनम् अन्यत्र नस्ति इति वक्तुं शक्यते ।

रावणस्य राजभवनं, तस्य निद्रास्थितिः, वैभोगादिविषयाः च सुन्दररीत्या वर्णिताः वर्तन्त। एवं सर्वत्र पश्यति तथापि सीतादेवीं कुत्रापि न प्राप्नोति न पश्यति च तत् महतः दुःखस्य कारणमासीत् हनूमतः । "मम जीवनमेव व्यर्थम्" इति हताशमनोभावं प्राप्नोति । तथापि स्वकार्यं स्मृत्वा पुनरेकवारं प्रयतते । तदा लङ्कायाः उद्यानमेकं पश्यति तदेव अशोकवनम् । तत्र शोकतप्तां सीतां पश्यति । साक्षात् गन्तुं चिन्तयति तदा लङ्काधीश्वरः वनप्रवेशं करोति । तयोः वचांसि श्रुत्वा मूकः इव भवति ।

तदनन्तरं सीतां दृष्टुं प्रयतते । तदा स्वयमेव संशयं प्राप्नोति यत् राक्षसैः सा नानावेषैः वञ्चिता अतः सा माम् अपि तथा पश्येत् इति । तन्निवारणार्थं रामस्य चरितकीर्तनं प्रारभते । तदा सीता आश्चर्यचकिता भवति । सा कपिं प्रच्छति - को भवान् ? इति तदा हनूमान् दूतत्वं कथयति । रामः सदा भवत्याः विषये चिन्तयति स्मरणे अस्ति इति उक्त्वा रामेण दत्तां मुद्रां दत्वा चुडामणिं च स्वीकृत्य ततः गन्तुम् उद्युक्तो भवति । तदा सीता एकं दिनम् उषित्वा गन्तुं सूचयति ।

तदा लङ्कायाः सैन्यबलं विज्ञातुं पुनः लङ्कानगरं प्रविशति । सम्पूर्नगरं ध्वसं कृत्वा, पुनः सीतां नमस्कृत्य, रामस्य आगमनं निवेद्य प्रदेशादस्मात् निर्गच्छति । समुद्रतीरं प्राप्नोति पुनरागत्य रामाय वार्तां निवेदयितुम्, सीतायाः कुशलवार्तां निवेदयितुम् । एवं प्रकारेण सामान्यानां कथादृष्ट्या चिन्तनं भवितुमर्हति । एवं च ऐतिहासिककथात्वेन काण्डोयं प्रधानः भवति रामायणे ।

**आध्यात्मिक अध्ययनम् (वेदान्त दृष्ट्या )**

काण्डस्य प्रमुखपात्रद्वयेनैव अवगन्तुं शक्नुवन्ति मुमुक्षवः । ते पात्रद्वयमपि आध्यात्मदृष्ट्या चिन्तनं कुर्वन्ति । हनुमतः कार्यनिष्टता, एकाग्रता, दक्षता, कार्यप्रीतिः इत्यादीन् गुणान् लक्ष्यन्ति ते । सीतायाम् अपि अनेकान् उदात्तगुणान् पश्यन्ति यत् मनोस्थैर्यम्, धैर्यम् , एकाग्रता, औदार्यम्, गाम्भीर्यम् इत्यादि । एवं च काण्डे कथारूपेण दृश्यते चेदपि वेदान्तिनः अन्यान् विषयान् पश्यन्ति । यः मानवः संसारसागरे निमग्नः सागरं पारयितुं मार्गान्वेषणं करोति सः तस्य अन्नमयादिपञ्चकोशानां विश्लेषणं कृत्वा स्वस्वरूपज्ञानप्रात्पर्थम् यथा प्रयतते तथा अत्र हनूमतः पात्रम् इति अवगच्छन्ति । मुमुक्षवः हनूमति जाग्रतः आत्मानं सत्वगुण - आधिक्यम् तत्त्वम् इत्यादीन् पश्यन्ति । अपारोयं संसारः सागरः यः पारयितुं इच्छति सः एतान् गुणान् अवलोकयति ।

सागरोल्लङ्घने ये विघ्नाः सन्ति ते विघ्नाः संसारसागरे अपि भवन्ति । यथा हनूमान् इन्द्रियनिग्रहेण तान् परिहरति तथैव मुमुक्षवः । एकस्यां रात्रौ यथा कार्यं एकाग्रचित्तेन साधितवान् तथैव एकाग्रचित्तेनैव मोक्षसाधनं भवति । यः इदं ज्ञात्वा कार्यं करोति सः परमसुखमनुभवितुं समर्थः भवति इत्यत्र नास्ति संशीतिः । लङ्कानगरे यानि वैभोगानि दृष्टानि तानि सर्वाण्यपि जीवने कोशादीनां रूपेण कल्प्यन्ते । स्व- स्वरूप ज्ञानार्थं तेषां सर्वेषां भोगानाम् अवतरणं त्यागो वा अनिवार्यम् । मोक्षसाधनमार्गः सुलभसाध्यन्तु न कदाचित् कष्टसाध्यम् कदाचित् निराशादायकं वा भवति । तथापि हनूमान् यथा अन्वेषणं करोति तथा निरन्तरप्रयत्नेन परमसुखं अनुभवितुं शक्यते इति सूचयति ।

परमपुरुषार्थसिध्यर्थं सदा सर्वदा जाग्रदवस्थायां परब्रह्मणि विश्वस्य स्वकार्यं कुर्यात् तदा एव स्वस्वरूपज्ञानप्रप्तिः भवति इति सीतान्वेषणकथा सूचयति । एवं सुन्दरकाण्डे आध्यात्मिक चिन्तनं कर्तुं शक्यते । चिन्तकाः न केवलं अत्र सम्पूर्णरामायणं ज्ञानदृष्ट्या द्रष्टुं पारयन्ति । भारतीयधार्मिकपवित्रग्रन्थेषु आध्यात्मतत्वं प्रति प्राधान्यं दत्तं न कथा । अयमंशः सर्वैः अङ्गिक्रियते । अतः एतादृश - आध्यत्मिकग्रन्थानां अध्ययनम् अद्यावदि प्रचलति ।

**उपसंहारः**

रामयणादिकाव्येषु आध्यात्मिक - अंशाः यथेष्टं सन्ति । एतादृशविद्याविषयान् साक्षात् कथनेन सामान्याः नाधिगच्छन्ति आसक्तिं न प्राप्नुवन्ति इति कारणतः कथापूर्वकम् उपस्थापनं कुर्वन्ति ज्येष्ठाः ।

एवमुक्ते सति रामायणादयः मिथ्या वा इति चेत् न सामान्यानाम् अवगवमनार्थं इति। विशिष्टार्थाः , मौल्यानि च सन्त्येव। एवं च रामायणस्य अथवा सुन्दरकाण्डस्य अध्ययनं यशोदायकं, कीर्तिदायकं, फलदायकं च इति सर्वैः अङ्गिक्रियते। उक्तं च

**संन्तानार्थी धनार्थी वा साम्राज्यार्थी च मानवः। राजबन्धं विमोक्षार्थि मोक्षार्थी वापि यो भवेत्।।**
**तत्तत्पलमवाप्नोति सीताराम प्रसादतः॥ सु-अ-68**

इत्थं सुन्दरकाण्डस्य उभयात्मकदृष्त्या अध्ययनं साध्यम्। एवं प्रकारेण ज्ञानप्राप्तिमार्गः दर्शितः अस्मत् पूर्वजैः।

**परामृष्टाः ग्रन्थाः**


- काव्यप्रकाशः ,
- वाल्मीकिसुन्दरकाण्डः
- ब्रह्मपुराणम्
- संस्कृतभाषाशास्त्रम्


https://doi.org/10.5281/zenodo.7244404

Paper 10

# प्रतिज्ञायौगन्धरायणनाटके प्रमुखपात्रपरिचयाः

**ANITHA H. C**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - anithatantryherga@gmail.com

**सार**: (ABSTRACT)

**प्रतिज्ञायौगन्धरायणस्य कथा वस्तु ' स्वप्नवसवदत्त' कथायाः पूर्वार्धः । उदयनस्य कथा एव । तथापि अत्र मुख्यपात्रत्वेन स्थीयते यौगन्धरायणः । महासेनस्य योधाः कृत्रिमगजं नीलहस्तिनम् उपन्यस्य, तद्वारा वत्सराजं उदयनं छलयित्वा, बन्धनं कृत्वा उज्जयनीं प्रति नीतवन्तः । तां वार्तां ज्ञात्वा उदयनस्य मन्त्री यौगन्धरायणः "मोचयामि न राजानं नास्मि यौगन्धरायणः" इति प्रतिज्ञां करोति। स्वस्य बुद्धिकौशलम्, शौर्यम्, धैर्यम्, साहसम् च तत् सर्वमपि स्वामिकार्यार्थमेव समर्पितवान् अस्ति। प्रद्योतस्य भटाः वत्सराजम् उदयनं नीलहस्तिना द्वारा वञ्चयित्वा बन्धनं कृतवन्तः इति वार्ता यदा हंसकेन श्रुता तदा यौगन्धरायणः अद्य आरभ्य वत्सरजस्य अमात्यानाम् असामर्थ्यम्, तथा अकीर्तिं च विख्यातम् इति जनाः कथयिष्यन्ति उदयनस्य अमात्याः कौशलरहिताः, विवेकहीनाः च इत्येतत् सर्वमपि मम दोषतः एव अभवत् इति विषादेन वदति । एवं भासः स्वकौशलेन प्रतिज्ञायौगन्धरायणस्य नाटकं चित्रितवान् ।**

**पीठीका -**

'प्रतिज्ञायौघन्धरायणम्' इति नाटकस्य रचयिता सुप्रसिद्धः नाटककारः भासः । महाकविः कालिदासः स्वस्य मालविकाग्निमित्रम् नाटकस्य प्रस्थावनायां सुप्रसिध्दानां कीर्तिशालीनां भासः, सौमिल्लः, कविपुत्रः च एतेषां कृतीः विहाय अर्वाचीनस्य कालिदासस्य कृतेः सभायां कथं गौरवं प्राप्नोति इति आदरेण भासं स्मरति । कालिदास-बाण-राजशेखर-इत्यादिनां कवीनाम् उल्लेखेन भासः अनेकानि रूपकाणि रचितवान् इति ज्ञायते । महामहोपाध्यायः श्री गणपतिशास्त्रिमहोदयेन तिरुवनन्तपुरग्रन्थालये सम्पादितानि रूपकाणि १३, श्री जीवरामकालिदासशास्त्री भासस्य नाम्नि एकं रूपकं प्रकटितवान् । आहत्य भासनाम्नि १४ रूपकणि प्रकटितानि।

**विषयनिरूपणम् -**

प्रतिज्ञायौगन्धरायणस्य कथा वस्तु 'स्वप्नवसवदत्त' कथायाः पूर्वार्धः । उदयनस्य कथा एव । तथापि अत्र मुख्यपात्रत्वेन स्थीयते यौगन्धरायणः । महासेनस्य योधाः कृत्रिमगजं नीलहस्तिनम् उपन्यस्य, तेन द्वारा वत्सराजं उदयनं छलयित्वा, बन्धनं कृत्वा उज्जयनीं प्रति नीतवन्तः। तां वार्तां ज्ञात्वा उदयनस्य मन्त्री यौगन्धरायणः "मोचयामि न राजानं नास्मि यौगन्धरायणः" इति प्रतिज्ञां करोति।

तदनन्तरं यौगन्धरायणः उन्मत्तब्राह्मणवेषेण महासेनस्य राजधानीम् आगत्य वेषपरिवर्तनं कृतवतः वसन्तकस्य द्वारा वत्सराजस्य बन्धमोचनोपायम् उक्त्वा प्रेषितवान् । मन्त्री रुमणवान् अपि श्रमणकावेषेण तत्र आगच्छति। बन्धनकाले उदयनः प्रद्योतस्य इच्छानुसारं तस्य पुत्र्यै वासवदत्तायै वीणां पाठितवान् । तदा एव तस्याः प्रणयजाले अपि पतितः । एतं विषयं ज्ञात्वा यौगन्धरायणः "वत्सराजेन सह वासवदत्तामपि मोचयित्वा

नयामि" इति प्रतिज्ञां करोति। अस्मिन् नाटके यौगन्धरायणस्य प्रतिज्ञा एव मुख्यं कथावस्तु, यौगन्धरायणः एव नायकः इति भासः चित्रितवान् । एवं भासचित्रितेषु पात्रेषु कानिचन एव अत्र निरूप्यन्ते ।

**यौगन्धरायणः**

एष एव नाटकस्य नायकः । एतस्य मुख्या गुणा अस्ति स्वामिनिष्ठा । स्वस्य बुद्धिकौशलम्, शौर्यम्, धैर्यम्, साहसम् च तत् सर्वमपि स्वामिकार्यार्थमेव समर्पितवान् अस्ति । प्रद्योतस्य भटाः वत्सराजम् उदयनं नीलहस्तिना द्वारा वञ्चयित्वा बन्धनं कृतवन्तः इति वार्ता यदा हंसकेन श्रुता तदा यौगन्धरायणः अद्य प्रभृति वत्सराजसचिवानां प्रतिष्ठितमसामर्थ्यमयशश्च" इत्युके अद्य आरभ्य वत्सरजस्य अमात्यानाम् असामर्थ्यम्, तथा अकीर्तिं च विख्यातम् इति जनाः कथयिष्यन्ति उदयनस्य अमात्याः कौशलरहिताः, विवेकहीनाः च । इति एतत् सर्वमपि मम दोषतः एव अभवत् इति विषादेन वदति । वत्सराजः सीमाप्रान्तस्य अरण्यप्रदेशं प्रति गमिष्यति इति वार्तां जानन् अग्रे किम् करणीयम् इति चिन्तयन्नासीत् यौगन्धरायणः, तदन्तरे एव एतत् सर्वम् जातम् ।

उदयनस्य बन्धनविषयः कथं तस्य मातुः समीपे वक्तव्य इति एवं भणति – "स्नेहदुर्बलं मातृहृदयम् रक्षणीयम्, प्रथमं युद्धसम्बध्दाः अनर्थाः कथनीयाः अनन्तरं यदा मनः सन्दिग्धे विनाशं चिन्तयति तदा कार्यतत्त्वं निवेदनीयम्" इति । अत्र यौगन्धरायणस्य मातृभक्तिः दृश्यते । उदयनस्य माता अपि यौगन्धरायणे दृढं विश्वसिति। अत एव "पुत्रमेव मे वत्सस्य पश्चादमात्य आनयतु मे पुत्रकं पुत्रक"इति प्रार्थयति । उदयनः अपि "यौगन्धरायणं प्रेक्षस्व" इत्येव हंसकं प्रति वदति । अत्र यौगन्धरायणस्य स्वामिनिष्ठा कीयती प्रसिद्धा इति द्रष्टुं शक्नुमः । एवं भवति चेदपि अदीनत्मा सन् यौगन्धरयणः "उदयनम् मोचयित्वा आनेष्यामि" इति प्रतिज्ञां करोति।

द्वितिये अङ्के उदयनस्य बन्धनवार्तां कञ्चुकिना शृत्वा अपि महासेनः "आहवेषु यस्य शौर्यं रिपवः कथयन्ति। यौगन्धरायणतन्त्राणि अस्माकं कर्णे गुञ्जन्ति" इति उदयनस्य ग्रहणं न विश्वसिति। अत्र यौगन्धरायणे जीवति उदयनस्य ग्रहणं कष्टसाद्यं इति महासेनस्य मतः । एवं यौगन्धरायणस्य शौर्यं शत्रुषु अपि प्रथितमासीत्।

उदयनं मोचयित्वा आनेतुं मन्त्रिणं रुमण्वन्तं, विदूषकं वसन्तकम्, सैनिकान् च योजयित्वा वेषं परिवर्त्य गुप्तवेषेण महासेनस्य राजधानीं गतवान् । अत्र वयं यौगन्धरायणस्य राजतान्त्रिककौशलां द्रष्टुं शक्नुमः । वत्सराजः उदयनः महासेनस्य पुत्र्यां वासवदत्तायाम् अनुरक्तः सन् स्वदेशप्रत्यागमनविषये मनः एव न करोति तदाऽपि यौगन्धरायणः स्वप्रयत्नं न त्यजति। स्वप्रतीज्ञाम् इतोऽपि दृढीकरोति । "सुभद्रामिव गाण्डीवी, नागः पद्मलतामिव, यदि तां न हरेत् राजा नास्मि यौगन्धरायणः" इति द्वितीयां प्रतिज्ञां करोति।

वासवदत्तया सह वत्सराजः स्थितः हस्तिनं नलगिरिं अनुधावतः महासेनस्य योधान् प्रति स्वयं प्रयुध्य, कार्यं साधयित्वा, आनन्तरमेव शत्रूणां वशः भवति। गृहीते यौगन्धरायणाय महासेनः भृङ्गारं यच्छति, तत् तेन न स्वीक्रियते, तत् अपमाननं इति भावयति । परन्तु वत्सराजः वासवदत्तां गान्धर्वविधिना परिणीतवान् इति वार्तां ज्ञात्वा सन्तोषेण उपायनं स्वीकरोति । एवम् प्रकारेण यौगन्धरायणस्य चरित्रं, तस्य स्वामिनिष्ठां, शौर्यं स्वाभिमानिनं, बुध्दीशालिनं च चित्रितं वर्तते ।

**महासेनः**

महासेनः एष कार्तिकेयः इव सुन्दरः दृढकायः आसीत् इति कञ्चुकी वर्णयति। एतस्य अनेके सामन्तराजानः आसन्। किन्तु वत्सराजः उदयनः एतस्मिन् विषये निर्लक्ष्यः आसीत् । तं स्वाधीनं करणीयमिति एतस्य मनोभिलाषा । स्वप्रियां पुत्रीं वासवदत्तां योग्याय परिणयं करणीयं इति एतस्य अपरा अभिलाषा आसीत्। श्लाघ्यं कुलम्, शीलः, पराक्रमः, मृदुस्वभावः च एते सद्गुणाः वरे भवेयुः इति महासेनस्य अपेक्षा । अनेके राजानः एतस्य पुत्रीं परिणेतुम् इच्छन्तः आगच्छन्ति चेदपि वासवदत्तायाम् अतिस्नेहात् निश्चयं कर्तुं न शक्नोति ।

पत्न्या अङ्गारवत्या सह अस्मिन् विषये समालोचनमपि करोति। यदा सा दोलायमानस्थितौ "यत्र दत्त्वा न सन्तप्यामहे तत्र दीयतम्" इति वदति । तदा महासेनः "अधुना येनकेनपि वरेण कृते परिणये पश्चाद् स सम्यक् नास्ति इति कारणतः तव उपालम्भनं श्रोष्यमि। अत भवती एव निस्चयं करोतु" इति कथनसमये पुत्र्याः विवह विषये मातरः कथं चिन्तयन्ति इति भासः ह्रुदयङ्गमरीत्या चित्रितवान् ।

यदा उदयनस्य बन्धनवर्तां शृणोति तदा तां वार्तां न विश्वसिति। उदयनः शत्रुः अपि तस्य शौर्यं, साहसम् च तथा यौगन्धरायणस्य राजतान्त्रिककौशलम् च प्रशंसति । उदयनं राजकुमारयोग्यसत्कारेण स्वागतम्, अस्य व्रणचिकित्साम् च अपि कुर्वन्तु इति आदिशति। बध्दः उदयनस्य घोषवती नाम वीणां कस्मै दातव्यम् इति प्रश्ने आगते अस्य द्वौ अपि पुत्रौ नार्हौ इति मत्वा पुत्र्यै वसवदत्तायै दातव्यं इति कथने तस्य स्वपरिवारसदस्यानां स्वभावं सम्यक् जानाति इति सूचयति ।

अन्ते यौगन्धरायणस्य बन्धनम् अभवत् तदा तस्मै भृङ्गारम् उपायनरूपेण दत्वा सत्करोति अत्र महासेनस्य उदारगुणं दर्शयति। यदा उदयनः वासवदत्तया सह कौशाम्बीं प्रतै गच्छति, तद् ज्ञात्वा अङ्गारवती देहत्यागं कर्तुं सन्नध्दा भवति, तदा "क्षत्रधर्मेणोद्दिष्टस्ते दुहितुर्विवाहः । किमिदानीं सन्तप्यसे" इति कथने महासेनस्य वास्तवदृष्टिः, सरलस्वभावः च दृश्यते । एवं प्रकारेण महासेनः पराक्रमी, उदारः, गुणग्राही, व्यवहारज्ञः, सरलस्वभवः च इति भासेन चित्रितः।

**वत्सराजः**

वत्सराजः उदयनः प्रत्यक्षरूपेण रङ्गमञ्चे कुत्रापि नागच्छति । किन्तु नाटकस्य सर्वाः घटनाः एतस्य निमित्तमेव प्रचलन्ति। प्रत्येकस्मिन् अङ्के अपि एतस्य विषयाः सन्ति। सुपात्रं मन्त्रिणं प्राप्तः एष सौभाग्यशाली । एष पराक्रमशाली, गजानां वशीकरणे प्रवीणः, वीणावादने चतुरः, सत्कुल प्रसूतः, रूपगुणान्वितः, प्रजानुरागी च आसीत् इति अन्येषां पात्राणां मुखेन वर्णयति ।

अन्ये राजानः वासवदत्तायाः विवाहार्थं दूतान् प्रेषितवन्तः, तथापि उदयनः तु दूतं न प्रेषितवान् । उदयनं स्वाधीनं कर्तुं महसेनस्य मन्त्री प्रयत्नं करोति स्म। यदा शालङ्कायनः कृतिम हस्तिना द्वारा छलयित्वा उदयनं बन्धनं करोति तदा एकाकी भूत्वा युध्वा, अनेकान् सैनिकान् मारयित्वा स्वपराक्रमं दर्श्यति । महासेनः उदयनः गृ हीतः इति विश्वसितुम् अपि न शक्नो ति । एतस्य पराक्रमं श्लाघयति महासेनः । अस्मिन् सन्निवेशे वत्सराजस्य व्यक्तित्त्वं रमणीयतया चित्रितवान् भासः ।

बन्धनस्थः उदयनः महसेनस्य पुत्र्यै वासवदत्तायै वीणां पाठयितुं अङ्गीकरोति। तस्याः प्रेमपाशे अपि बध्नाति। एतस्य वीणापाठनम्, प्रणयः च कलाचातुर्यम्, रसिकतां च दर्शयति। अन्ततोगत्वा सः अत्मविश्वासेन तथा यौगन्धरायणस्य बुध्दिकौशल्येन सह बन्धविमोचने सफलः जातः। उदयनस्य पात्रं प्रत्यक्षरूपेण नास्ति चेदपि भासः अन्येषां सम्भाषणे तस्य व्यक्तिचित्रणं सरलया शैल्या निरूपितवन् अस्ति।

**रुमण्वान्**

एषः अपि उदयनस्य अमात्येषु प्रमुखः। एष सदा अपि यौगन्धरायणं अनुसरति। वत्सराजे निष्ठा आसीत्। एतस्य दूरदृष्टिः अप्रतीमा असीत्। यदा उदयनः क्रुतिमं हस्तिनं वशीकर्तुं एकाकी गच्छति तदा तं सैन्येन सह गच्छतु इति निर्बन्धं करोति। अतएव यौगन्धरायणः एतम् ' अनुत्पन्नकार्यपण्डित' इति प्रशंसति। यौगन्धरायणे साहाय्यां कर्तुं श्रमणकवेशं धृत्वा तेन सह महासेनस्य राजधानीं गच्छति। एतस्य पात्रं लघुः चेदपि सहृदयानां मनसि आनन्दं जनयति।

**उपसंहारः -**

नाटकस्य शैली, कथासंविधानम्, सन्निवेशः च इत्यादः अस्मिन् नाटके सम्यक् चित्रिताः। सम्भाषणाणि तीक्ष्णं तथा हृदयग्राही वर्तते। उदयनः बध्दः इति घटानां हंसकः कथं विवृणोति चेत् सा घटना प्रत्यक्षमेव प्रचलन्ती इव भासते। यौगन्धरायणः भावाविष्टः सन् प्रतिज्ञां करोति। महासेन-अङ्गारवत्योः सम्भाषणे मातृवात्सल्यः हृदयङ्गमरीत्या निरूपयति भासः। यौगन्धरायणस्य राजतान्त्रिककुशलता तथा स्वामिभक्तिः, यदा उदयनः प्रेमपाशे बध्दः तदा सन्धर्बोचित कार्याचरणे तस्य बुध्देः तीक्ष्णता व्यक्ता भवति। अन्तिम अङ्के यौगन्धरायणस्य

स्वाभिमानः, स्वयं युध्दे भागम् आवहन् राज्ञः इच्छानुसारं कार्यं कृत्वा तस्य आनन्दः च भासः लघुनाटकेऽपि चातुर्येण निरूपितवान् अस्ति ।

**परामृष्टग्रन्थाः -**

१. भासनाटकचक्रम् - संस्कृत-हिन्दीव्याख्योपेतम्,
चौखाम्बा कृश्णदास अकादमी, वारणासी।
२. प्रतिज्ञायौगन्धरायणम् प्रकाश संस्कृत-हिन्दीव्याख्योपेतम्,
पण्डित कपिलदेवगिरिः
चौखाम्बा विद्याभवन्, वाराणसी
३. प्रतिज्ञायौगन्धरायणम्
सम्पादकः- प्रो. एम्. पि. एल्. शस्त्री
प्रसारङ्ग, मैसूरुविश्वविद्यानिलय, मैसूरू १९७२

https://doi.org/10.5281/zenodo.7244425

Paper 11

# सुभाषितेषु चारित्र्यविकासः

**DEEKSHA U PRABHU**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - deekshaprabhu@gmail.com

**सार**: (ABSTRACT)

**अनादिकालादेव चराचरविषये अनुस्यूततया विकासः जातः । मनुष्यस्य चारित्र्यविकासे व्यवरज्ञानम् अत्यन्तम् अपेक्षितम् । संस्कृतसुभाषितेषु एतादृशाः बहवः व्यवहाराः सुभाषितकारेण मनोज्ञशैल्या निरूपिताः सन्ति । भर्तृहरेः सुभाषितत्रिशती इत्ययं सुभाषितग्रन्थः लोकेषु सुप्रसिद्धः । ग्रन्थेस्मिन् सः स्वानुभवसिद्धान् बहून् अंशान् स्लोकरूपेण प्रस्तुतवान् । नीतिशतके प्रतिपादितानि जीवनोपयोगीनि नैतिकमौल्यानि उत्कृष्टानि सन्ति । एतानि सुभाषितानि नीतिमार्गम् उपदिशन्ति, व्यवहारकौशलं च बोधयन्ति । तेषाम् अध्ययनेन ज्ञानं वर्धते । तस्मात् अस्माकं चारित्र्यस्य विकास अपि भवति । व्यवहाराय के गुणाः अपेक्षिताः कीदृशी च जीवनशैली आवश्यकी इति समीचीनतया निरूपितानि दृश्यन्ते ।**

प्रस्तावना

काव्यं गद्यं पद्यं चम्पूः इति त्रेधा विभज्यते । तत्र श्लोकमयं पद्यम् । तद्भिन्नं गद्यम् । पद्यगद्यमिश्रितकाव्यमेव चम्पूः इत्यभिधीयते । सामान्यतः प्रादेशिकभाषासु पद्यमेव काव्यमिति व्यवहारः दृश्यते। तत्र पद्यात्मककाव्येषु सुभाषितमपि अन्यतमम् । समग्रे जगति प्राणिषु मानवहः श्रेष्ठः । तत्र कारणं शक्तिः आकारो वा किन्तु असदृशी बुद्धिः विवेकः च । ब्रह्मसृष्टौ श्रेष्ठस्थानं भवति मानवस्य । मानवः पूर्वं कृतकार्यं सञ्चिन्त्य अग्रे कर्तव्यस्य कार्यस्य चिन्तनं करोति । जीवनस्य प्रदिपदं शिक्षणं प्राप्नुवन् आत्मचिन्तनं करोति । नदीजलमिव सदा अग्रे गमनं मानवश सहजः स्वभावः । एतदर्थं यदपेक्षितं तत्सर्वं साधयति । अनादिकालादेव चराचरविषये अनुस्यूततया विकासः जातः । मनुष्यस्य चारित्र्यविकासे व्यवरज्ञानम् अत्यन्तम् अपेक्षितम् । संस्कृतसुभाषितेषु एतादृशाः बहवः व्यवहाराः सुभाषितकारेण मनोज्ञशैल्या निरूपिताः सन्ति । भर्तृहरेः सुभाषितत्रिशती इत्ययं सुभाषितग्रन्थः लोकेषु सुप्रसिद्धः । वाक्यपदीयम् इत्यपि ग्रन्थः अस्य एव । ग्रन्थेस्मिन् सः स्वानुभवसिद्धान् बहून् अंशान् स्लोकरूपेण प्रस्तुतवान् । नीतिशतके प्रतिपादितानि जीवनोपयोगीनि नैतिकमौल्यानि उत्कृष्टानि सन्ति । एतानि सुभाषितानि नीतिमार्गम् उपदिशन्ति, व्यवहारकौशलं च बोधयन्ति । तेषाम् अध्ययनेन ज्ञानं वर्धते । तस्मात् अस्माकं चारित्र्यस्य विकास अपि भवति । व्यवहाराय के गुणाः अपेक्षिताः कीदृशी च जीवनशैली आवश्यकी इति समीचीनतया निरूपितानि दृश्यन्ते ।

विषयपरामर्शः

भर्तृहरेः वैराग्यशतकस्य अयं श्लोकः एवमस्ति –

*यां चिन्तयामि सततं मयि सा विरक्ता*
*साप्यन्यम् इच्छति जनं स जनोऽन्यसक्तः ।*
*अस्मत्कृते च परिशुष्यति काचिद् अन्या*
*धिक् तां च तं च मदनं च इमां च मां च ॥*

अस्य तात्पर्यम् इदमस्ति यत् यस्याः चिन्तनं निरन्तरमहं करोमि सा मयि विरक्तिभावं प्राप्तवती अन्ये सा रक्ता अस्ति । अन्योऽपि जनः अपरस्याम् अनुरक्तः अस्मत्कृते काचित् अन्या एव परिशुष्यति । एवं तस्यै मन्मथाय एतस्मै मह्यं धिक्कारः भवतु इति वदन् राजा भर्तृहरिः समग्रं राज्यं परित्यज्य विरक्तिं प्राप्तवान् इति कथा श्रूयते ।

एषः भर्तृहरेः वैराग्यशतकस्य प्रथमः श्लोकः अस्ति भर्तृहरिः स्वपत्नीं पिङ्गलां नितरां प्रीणाति स्म । परन्तु तस्य पत्नी तस्य मन्त्रिणं कमपि इच्छति स्म । मन्त्री तु काञ्चित् वेश्यां कामयते स्म । विडम्बना एषा सा वेश्या राजानं भर्तृहरिमेव इच्छति स्म । एकदा राज्ञे भर्तृहरये कश्चन महात्मा एकम् अमरं दिव्यं फलं दत्तवान् कथितवान् च – "भवान् एतत् फलम् उपभुङ्क्ते चेत् चिरजीवी भविष्यति । । राजा तत्फलमानीय स्वपत्नै दत्तवान् । सं पत्नीं सुतरां पीणाति स्म । पत्नी तु तत्फलं स्वीकृत्य मन्त्रिणे दत्तवती यतः सा मन्त्रिणं काम्यते स्म । परन्तु मन्त्री तत्फलम् आदाय कस्यैचित् वेश्यायै दत्तवान् यतः सः सः तां प्रीणाति स्म । वेश्यया चितिन्तं यत् अहं चिरजीविनी भूत्वा किं करवाणि ? इति । तस्मात् फलं स्वीकृत्य भर्तृहरये दत्तवती । राजा चिरजीवी भविष्यति चेत् बहुकालपर्यन्तं प्रजापालनं करिष्यति इति तस्याः भावना । राजा तु फलं प्राप्य कथं इदं प्राप्तमिति पृष्टायां सत्यां तया सर्वः वृत्तान्तः उक्तः अभवत् । तत् ज्ञात्वा राजा अतीव खिन्नः अभवत् तदनन्तरं राजा राज्यं सर्वं परित्यज्य संन्यासं स्वीकृतवान् इति किंवदन्ती श्रूयते ।

**सज्जनप्रशंसा**

**वज्रादपि कठोरणि मृदूनि कुसुमादपि ।**
**लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥**

सज्जनाः स्वयं कष्टं सोढ्वापि परेषामुपकारं नैव त्यजन्ति । विपरितदशायामपि सत्पुरुषाणां व्यवहारः संयमितः एव भवति । तेषामाचरणमेव तान् परिचयति । सौजन्यं मानवस्य अलङ्कारः वर्तते, तद्विना चारित्र्यविकासः नैव सम्भवति । तत्रापि ते स्वविषये आचरणादिषु कठोराः भवन्ति । अन्येषां विषये कुसुमानि इव मृदूनि भवन्ति । तेषां चेतांसि सामान्याः ज्ञातुं न अर्हन्ति इति तात्पर्यम् ।

**आत्मार्थं जिवलोकेस्मिन् को न जिवति मानवः ।**
**परं परोपकरार्थं यो जीवन्ति स जीवति ॥**

प्रपञ्चे विद्यमानाः सर्वे अपि मनुष्याः स्वहितं, स्वसुखं च सम्पादयन्ति । अतः आत्मानः निमित्तं सर्वः अपि जनः जीवति एव । परन्तु ये जनाः अन्येषां हितम्, अन्येषां सुखं च कामयमानाः तदर्थं जीवन्ति, तेषां जिवनमेव सार्थकं जीवनम् । धन्यं जीवनम् । परोपकाररहितं जीवनं तु निरर्थकमेव ।

**सज्जनो न याति विकृतिं परहितनिरतओ विनाशकालेपि ।**
**छेदेपि चन्दनतरुः सुरभयति सुखं कुठारस्य ॥**

लोके तावत् मनुष्यस्य एषः स्वभावः यत् यदा सः स्वयं कष्टम् अनुभवति, आपद्ग्रस्तो वा भवति तदा सः कुपितः भवेत्, दुःखितो वा भवेत् । किन्तु सत्पुरुषाणं स्वभावः न तादृशः > ते सर्वदा परोपकारे एव निरताः सन्तः स्वस्य नाशसमये अपि कमपि विकारं न प्राप्नुवन्ति । यथा चन्दनवृक्षः छेदनसमये अपि सजगुणं सुगन्धं न जहाति, अपि च छेदनार्थम् उपयुक्तं कुठारमपि सुगन्धयुक्तं करोति, तथैव सज्जनाः नाशसमये आपि परोपकारबुध्दिं न परित्यजन्ति ।

**साहित्यसङ्गितकलाविहिनः सक्षात्पशुः पुच्छविषाणहिनः ।**
**तृणं न खादन्नपि जीवमानः तद्भागदेयम् परमं पशूनाम् ॥**

गद्यात्मकं पद्यात्मकं च काव्यं, विचारप्रधानं शास्त्रं च सहित्यशब्देन विवक्षितम् । साहित्येन ज्नम् अभिवर्धते, सङ्गीतेन, शिल्पेन (कलया) च आत्मसन्तोषः भवलि । एषु त्रिषु एकस्य वा ज्नानं मानवस्य आवश्यकम् । एकस्मिन् अपि विषये यस्य उत्साहः न भवति सःपशुः एव । पशोः पुच्छं शृङ्गे च भवति, एतस्य मनुष्यस्य तु तानि न सन्ति इत्येव भेदः । अपरोपि भेदः अस्ति यत् एषः तृणं न खादति, पशवः तु खादन्ति । किन्तु एतत् पशूनां परमं भाग्यमेव । अन्यथा पशूनां तृणम् एव दुर्लभं स्यात् ।

**गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्था ।**
**पापं तापं च दैन्यं च घ्नन्तः सन्तो महाशयाः ॥**

गङ्गानद्यां यः स्नानं करोति तस्य पापापरिहारः भवति । गङ्गा तस्य पापं नाशयति । तथैव चन्द्रः अस्माकं तापं परिहत्य शैत्यम् उत्पादयति । एवमेव कल्पवृक्षः अस्माभिः याचितान् सर्वान् अभिलाषान् पूरयति ।

एतत् जगति प्रसिध्दमेव । किन्तु गङ्गायाः, चन्द्रस्य, कल्पवृक्षस्य च एकस्मिन् एव विषये सामर्थ्यम् अस्ति । सज्जनाः महापुरूषाः तु न तथा । तेषां सहवासेन अस्माकं पापं, तापः, दैन्यं – सर्वमपि परिह्रतं भवति । तादृशं सामर्थ्यं तेषु अस्ति ।

**मनसि वचसि काये पुण्यपीयूषपूर्णाः त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**
**परगुणप्रमाणून् पर्वतीकृत्य नित्यं निजह्रदि विकसन्तः सन्ति सन्तः कियन्तः ॥**

सज्जनानां स्वभवं वर्णयलि कविः । सत्पुरुषाणां वचांसि मनांसि श्रिराणि च अमृतेन पूर्णानि भवन्ति । तादृशेन अमृतपूर्णेन वचनेन, चेतसा, श्रीरेण च ते सज्जनाः उपकार सहस्रेण लोके स्थितानां सर्वेषां जीविनामपि हितम् आचरन्ति । अपि च अन्येषु स्थिताः गुणाः अल्पाः चेदपि तन् एव बहु मत्वा, मनसि सन्तोषम् अनुभवन्ति। किन्तु एतादृशाः जनाः जगति कियन्तः सन्ति ? अङ्गुलीगणनीयाः एव इति असय तात्पर्यम् ।

**जानन्ति पशवो गन्धाद्वेदाज्जानन्ति पण्डिताः ।**
**चाराज्जानन्ति राजानश्चक्षुर्भ्यामितरे जनाः ।।**

पशवः गन्धं घ्रात्वा एव स्वकीयं मार्गम् अथवा भोजनं जानन्ति । बुद्धिशीलाः जनाः वेदान् शास्त्राणि वा पठित्वा स्वकीयं कर्तव्यम् अकर्तव्यं वा जानन्ति । राजानः गुप्तचरान् प्रेषयित्वा राज्यस्य वृत्तं जानन्ति । सामान्याः जनाः तु वास्तविकाभ्यां नेत्राभ्यां दृष्ट्वा एव कार्यं साधयन्ति ।

**गते शोको न कर्तव्यो भवितव्यं न चिन्तयेत् ।**
**वर्तमानेन कालेन प्रवर्तन्ते विचक्षणाः ।।**

बुद्धिमन्तः जनाः गतस्य शोकं पश्चात्तापं न कुर्वन्ति । भविष्यस्य चिन्तनम् अपि न कुर्वन्ति । सर्वदा वर्तमानं समयं दृष्ट्वा कार्यं कुर्वन्ति । क्रोधाविष्टस्य मनुष्यस्य चिन्तनशक्तिः क्षीणा भवति । तथा च सद्–असद्–विवेकः नष्टः भवति । तस्यां स्थितौ क्रोधी सम्मानार्हाणां गुरूणां पूज्यानां ज्येष्ठानां च अनादरं करोति, अपशब्दान् च प्रलपति, तान् हन्तुम् अपि उद्युक्तः भवति । अतः क्रोधः सर्वथा त्याज्यः एव ।

**सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः ।**
**अर्धेन कुरुते कार्यं सर्वनाशो न जायते ।।**

यदा सर्वनाशः जायमानः भवति किञ्च अर्धस्य त्यागेन अपरस्य अर्धस्य रक्षणं भवितुमर्हति तदा बुद्धिमान् पुरुषः अर्धं त्यजति । यतः रक्षितेन अर्धेन अपि सः स्वकीयं कार्यं पुनः निरन्तरं विस्तारयति । अतः तस्य सर्वनाशः न भवति ।

**अन्तो नास्ति पिपासायाः संतोषः परमं सुखम् ।**
**तस्मात् संतोषमेवेह परं पश्यन्ति पण्डिताः ।।**

पिपासा नाम लोभरूपितृष्णा अस्ति । लोभरूपितृष्णा धनेन जायते । तस्याः अन्तः कदापि न भवति । यः धनपिपासुः न भवति, सः सदा सन्तुष्टः भवति । तस्य जीवनम् अपि आनन्देन गच्छति । अतः एव सन्तोषः परमं सुखम् उच्यते ।

**विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।**

ज्ञानवतां जनानां तथा च शासकजनानां मध्ये कदापि समानता न भवति, यतः शासकजनस्य राज्ञः सम्मानं तु स्वकीये देशे एव भवति, किन्तु ज्ञानवतः विदुषः सम्मानं तु सम्पूर्णे विश्वे भवति ।

विद्यायाः महत्त्वम्

**जलबिन्दुनिपतेन क्रमशः पूर्यते घटः ।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥**

यथा जलस्य बिन्दूनां क्रमशः स्रवणेन घटः पूर्णः भवति, तथैव सर्वाः विद्याः अपि निरन्तरं पठनेन अध्ययनेन वा अधिगताः भवन्ति । अपि चमनुष्यः धनम् अपि तथैव किञ्चित् किञ्चित् एकत्रीकृत्य एव धनवान् भवति ।

**क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।**

**क्षणत्यगे कुतो विद्या कणत्यागे कुतो धनम् ॥**

मनुष्यः प्रतिक्षणं विद्याग्रहणं कुर्यात् किञ्च एकैकं कणमादाय धनसङ्ग्रहणं कुर्यात् । यदि वयम् एकम् अपि क्षणं त्याजामः तर्हि विद्यार्जनं कर्तुं न शक्नुमः । एवमेव यदि एकम् अपि कणं त्यजामः तर्हि धनसङ्ग्रहणं कर्तुं न शक्नुमः ।

**गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।**
**अथवा विद्यया विद्या चतुर्थी नोपलभ्यते ।।**

विद्या गुरोः सेवया, अत्यधिकेन धनेन अथवा विद्याद्वारा अर्थात् विद्यायाः परस्परम् आदान–प्रदानेन विद्या प्राप्ता भवति । एतत् अतिरिच्य विद्यायाः प्राप्तये अन्यः चतुर्थः मार्गः नास्ति।

**अवृत्तिकं त्यजेद्देशं वृत्तिं सोपद्रवां त्यजेत् ।**
**त्यजेन्मायाविनं मित्रं धनं प्राणहरं त्यजेत् ।।**

यस्मिन् देशे क्षेत्रे वा धनार्जनस्य साधनं नास्ति, नरः तं देशं त्यजेत्, यस्मिन् व्यापारे कार्ये च अनेकाः आपदः सन्ति तत् कार्यमपि जनः त्यजेत्, यत् मित्रं कपटयुक्तम् अस्ति तत् मित्रम् अपि नरः त्यजेत् अपि च यत् धनं प्राणघातकम् अस्ति तत् धनम् अपि नरः त्यजेत् ।

उपसंहारः

संस्कृतसाहित्ये चारित्र्यविकासार्थं मार्गदर्शनस्य प्राचुर्यं विद्यते । काव्येषु विशेषतया नाटकेषु च सदाचारपूर्णानि अनेकानि सूक्तिवाक्यानि समुपलभ्यन्ते। परन्तु भर्तृहरेः नीतिशतके एकत्र मनुस्मृतिसदृशी शिक्षा, महाभारतसदृशोपदेशः, पुराणसदृशरसास्वादनं दर्शन–सदृशतर्कशीलता दृश्यते, अपरत्र कालिदास–बाण–दण्डी–इत्यादीनां पदप्रयोगशैली च समुपलभ्यते । नीतिशतकं मानवस्य कृते मधुरम् औषधं वर्तते । आबालवृद्धाः सर्वेऽपि विना कष्टं आनन्देन अस्य स्वादं कर्तुं प्रभवन्ति । कविना भर्तृहरिणा नीतिशतकमाध्यमेन विशिष्टमेक जीवनदर्शनं प्रदत्तम् । ग्रन्थोऽयं न केवलं संस्कृतज्ञानाम् अपितु सर्वेषां प्रियतमम् आभरणं विद्यते। एतद्द्वारा जनः स्वीयं दायित्वं समर्पकतया निर्वहन् कर्त्तव्यपरायणः भवति । तेन च समाजस्य देशस्य राष्ट्रस्य विश्वस्य च विकासं साधयितुमर्हति।

**आधारग्रन्थाः**


- सुभाषितभाण्डागारम्
- https://thesimplehelp.com/sanskrit-subhashitani
- https://sanskritdocuments.org/sanskrit/bhartrihari/


https://doi.org/10.5281/zenodo.7245365

Paper 12

# ज्योतिश्शास्त्रे राजयोगस्य लक्षणं तत्फलं च

**ABHISHEK BAYARI G**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - abhishekbayarig@gmail.com

**सार**: (ABSTRACT)

**सुविदितमेव एतत् तत्रभवतां निखिलनिगमागमविधूतचेतसां विपश्चिदां यदिह जगति जनिमतां सर्वतः श्रेयोमार्गप्रदर्शको वेद् एव । नात्र कश्चिदपि विषयः अनुपलभ्यो यथातत्त्वेनान्वेषयतां सताम् । इदमेव शासनपद्धतिर्जगन्नियन्तुः सवितुरीश्वरस्यैतदर्थमेव सर्वतः प्रथमं मीनावतारोऽप्यङ्गीकृतो भगवतेति तज्ज्ञानप्रवर्तकानि तानि षडङ्गभूतानि शिक्षा-कल्प-व्याकरण-ज्योतिष-निरुक्त-छन्दःशास्त्राणि प्रवक्ष्यन्ते । तेषु षडङ्गेषु तावत् ज्योतिःशास्त्रं दिक्-देश-काल-व्यञ्जकत्वेन यज्ञतपोदानव्रतोपवासादीनाम् आदिबीजमिति सकलशास्त्रोपेक्षया अस्य अध्ययन-अध्यापनादिकं अतीव आवश्यकम् । तस्मिन् महाशास्त्रे राजयोगमिति विषयमधिकृत्य किञ्चित् लेखितुम् इच्छामि ।**

**प्रस्तावना**

अथ 'न जातु ज्योतिर्ज्योतिरन्तरा द्रष्टुं ज्ञातुं च शक्यत' इति तेजोमयो भगवानव्ययो मुक्तिमार्गो रविरीश्वरः तदंशका ज्योतिष्मन्तो ग्रहा वै वेदाश्च । चक्षुरूपज्योतिःशास्त्रं विना न केनापि शास्त्रेण ज्ञातुं शक्यन्त इति कथने न भवति काचिदपि वाच्यतेति ।

"दैवाधीनं जगत् सर्वम्" इति तथा 'ग्रहास्ते देवदांशकाः" इति वचनात् सकलं जगत्

ग्रहाधेनमेवा वस्तुतो रविकिरणसंयोगवशादेव सकलं जगज्जातं जीवनं स्थैर्यं च वहतीति । यथा नहि नेत्रं विना कश्चिदपि जनो निरापदं स्वीयमाभिलषितं पदं गन्तुं पाश्येत्तथा ज्यौतिषशास्त्रं विना जगतः श्रेयोमार्गः कथमपि न सम्भवतीति । इदं शास्त्रं नान्यशास्त्रवत् सन्देहास्पदमप्रत्यक्षञ्च । नान्यत् किमपि शास्त्रं ज्योतिःशास्त्रवत् इदमेव तत्, इदानीमेव तत्, अत्रैव तत्, एतावदेव तत्, तदित्यादि प्रकटयितुं पारयेत् । इत्युक्तमपि तथा -

अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥

इह जगति सर्वेऽपि प्राणिनः कदाचित् उत्पद्यन्ते, कञ्चित् कालं तिष्ठन्ति, कदाचित् च म्रियन्ते इत्येषः अंशः सर्वेषाम् अनुभवसिद्धः । किमिदं जन्म भवति किमर्थं च मरणमिति ज्ञातुम् अशक्नुवन्तः ते निरुपायाः सन्तः पुनरपि तत्रैव जगति निमज्जन्ति। निमग्नाश्च आध्यात्मिक्यादि दुःखत्रयं यथापूर्वम् अनुभवन्ति । तदेवम् अन्धे तमसि वर्तमानानां तेषाम् उद्धाराय परमकारुणिकैः प्रदीपायमानं तावदिदं शास्त्रम् ज्योतिष्यशास्त्रम् ।

सुविदितमेव एतत् तत्रभवतां निखिलनिगमागमविधूतचेतसां विपश्चिदां यदिह जगति जनिमतां सर्वतः श्रेयोमार्गप्रदर्शको वेद् एव । नात्र कश्चिदपि विषयः अनुपलभ्यो यथातत्त्वेनान्वेषयतां सताम् । इदमेव शासनपद्धतिर्जगन्नियन्तुः सवितुरीश्वरस्यैतदर्थमेव सर्वतः प्रथमं मीनावतारोऽप्यङ्गीकृतो भगवतेति तज्ज्ञानप्रवर्तकानि तानि षडङ्गभूतानि शिक्षा-कल्प-व्याकरण-ज्योतिष-निरुक्त-छन्दःशास्त्राणि प्रवक्ष्यन्ते । तेषु षडङ्गेषु तावत् ज्योतिःशास्त्रं दिक्-देश-काल-व्यञ्जकत्वेन यज्ञतपोदानव्रतोपवासादीनाम् आदिबीजमिति

सकलशास्त्रोपेक्षया अस्य अध्ययन-अध्यापनादिकं अतीव आवश्यकम् । तस्मिन् महाशास्त्रे राजयोगमिति विषयमधिकृत्य किञ्चित् लेखितुम् इच्छामि ।

**विषयविस्तारः**

शास्त्रेऽस्मिन् ज्योतिषे सकलयोगेषु प्रधानतया प्रवर्तते योगोऽयं राजयोगः । कुतः इति चेत् जातके प्रश्ने वा प्रथमतः आयुषः चिन्तनं क्रियते । तथा च आरोग्यविचारः क्रियते । तदन्तन्तरं प्रक्रिया वर्तते अत्रैव योगविचारः च। कारकग्रहयोगवशात्, शुभग्रहस्य दशाभुक्तिवशात् शुभग्रहस्य केन्द्रत्रिकीर्णस्थितिवशात् पूर्णचन्द्रस्य केन्द्रस्थितिवशात्, जन्मपत्रिकायां प्रधानतया सामान्यतया योगोऽयं चिन्तयितुं शक्यते । परन्तु अनेकग्रन्थेषु राजयोगस्य लक्षणं, विभागं, तत्फलं च नानाप्रकारेण क्रियते । तदत्र संग्रहरूपेण एकत्रीकर्तुं प्रयत्नः क्रियते मया ।

जातस्य जन्मकालिकी सलग्नग्रहस्थितिरेव जातकम् इत्युच्यते । तत्र ग्रहाणां स्थितिविशेषः एव योगपदेन व्यवह्रियते । "दृढादृढं योगवशेन चिन्तयेत्" इति नियमानुसारं प्राग्जन्मार्जितानां दृढादृढकर्मणामनुभूतिः जातके स्थितानां शुभाशुभयोगानां फलेन भवति । राजयोगवसुमद्योगादयः शुभफलप्रदाः योगाः, केमद्रुमादयः अशुभयोगाश्च होराशास्त्रे विस्तरेण निरूपिताः सन्ति ।

येषु ग्रहस्थितिविशेषेषु जाताः राजानः भवन्ति ते एव राजयोगाः इति उच्यन्ते । होराशास्त्रे द्विविधाः राजयोगाः कथिताः सन्ति । केषिचित् राजयोगेषु जाताः नीचकुलजाः अपि राजानः भविष्यन्ति । अन्येषु केषुचित् योगेषु जाताः राजवंशोत्पन्नाः एव राजानः भविष्यन्ति, न तु अन्ये । एते च राजयोगाः श्रीमता वराहमिहिराचार्येण स्वरचिते बृहज्जातकाख्ये ग्रन्थे एकादशे अध्याये तथैव संग्रहीताः सन्ति । तत्र आदिमेषु एकादशसु श्लोकेषु कथिताः राजयोगाः यदि जातके भवन्ति तदानीं नीचकुलजाः राजानः भवन्ति राजकुलोत्पनास्तु राजानः भवन्त्येव इत्यर्थः । ते यथा -

**"वृषे सेन्दौ लग्ने अवितृगुरुतीक्ष्णांशुतनयैः ।**
**सुहृज्जायाखस्थैः भवति नियमान्मानवपतिः ॥**

वृषभराशौ चन्द्रयुक्ते लग्ने स्थिते सूर्य-गुरु-शनैश्चरैः यथाक्रमं चतुर्थ-सप्तम-दशमास्थितैः जातः निश्चयेन राजा भवति ।

कर्किणि लग्ने तत्स्थे चन्द्रसितज्ञैरायं प्राप्तैः ।
मेषगतेऽर्के जातं विन्द्याद् विक्रमयुक्तं पृथ्वीनाथम् ॥

कर्काटके लग्ने तत्रस्थे गुरौ शशिशुक्रबुधैः एकादश स्थानस्थैः मेषगते सूर्ये जातं प्रतापसहितं राजानं जानीयात् । एवमेव जातके पञ्च अथवा षड्ग्रहाः उच्चस्थाः भवन्ति । तदानीम् अन्यवंशेषु जाताः अपि राजानः भवन्ति ।

अन्ये केचन राजयोगाः सन्ति ते तु राजवंशोत्पन्नेषु जनेषु एव राजत्वं यच्छन्ति । ते यथा -

सौम्ये वीर्ययुते तनुसंस्थे वीर्यादये च शुभे शुभयाते ।
धर्मार्थोपचयेष्ववशेषैः धर्मात्मा नृपजः पृथिवीशः ॥

बुधे वीर्ययुते लग्नस्थे, शुभग्रहे गुरुशुक्रयोरन्यतरे सबले नवमगते परिशिष्टग्रहैः नवमतृतीय-द्वितीय-षट्-एकादशदशमानामन्यतमस्थानास्थितैः जातः राजपुत्रो धर्मात्मा राजा भवति । अन्ये राजतुल्याः धनिनः भवेयुः ।

स्वर्क्षे शुक्रे पातालस्थे धर्मस्थानं प्राप्ते चन्द्रे ।
दुश्चिक्याङ्गप्राप्तैः शेषैः जातः स्वामी भूमेः ॥

स्वक्षेत्रस्थः शुक्रः लग्नात् चतुर्थगतः स्यात्, चन्द्रः नवमगतः भवेत्, शेषाः ग्रहाः तृतीयलग्न-एकादशस्थानगताः स्युः। तदानीं जातः पाजपुत्रः राजा भवेत् । अन्ये अभूपालपुत्राः नृपतितुल्याः धनिनः भवेयुः ।

एवमेव जातके यदि त्रिचतुराः ग्रहाः उच्चस्थाः भवन्ति तर्हि राजवंशोत्पन्नाः जनाः राजानः भवन्त्येव । अन्यवंशोद्भवास्तु धनिनः भवेयुः न तु साक्षात् राजानः ।

अत्र राजयोगकारकग्रहेषु बहवः महायोगाः ज्योतिःशास्त्रे उपनिबद्धाः सन्ति । ते च जातके भवन्ति चेत् जाताः नराः राजानः राजतुल्याः वा भवन्ति । यथा स्वोच्चस्वक्षेत्रगतैः बलिभिः कुजाद्यैः ग्रहैः केन्द्रिस्थतैः रुचक-भद्र-कंस-मालव-शशाख्याः राजयोगाः क्रमेण सम्भवन्ति । चन्द्रकेन्द्रे बृहस्पतौ गजकेसरीति प्रसिद्धः राजयोगः भवति । इन्दोः स्मरारिनिधनेषु अधियोगः, एवमेव सुनक-अनफादुरुधुरादयः चन्द्रयोगाः अपि पार्थिवत्वकारकाः एव जायन्ते ।

चन्द्रात् द्वितीये द्वादशे केन्द्रे च यदि सूर्यादयः एकोऽपि ग्रहः न भवति तदानीं केमद्रुमो नाम दरिद्रयोगो भवति ।

योगो केमद्रुमे जाते यस्मिन् कस्मिंश्च जातके ।
राजयोगा विनश्यन्ति हरिं दृष्ट्वा यथा द्विपाः ॥

इति शास्त्रवचनानुसारं जातके विद्यमानः केमदुमयोगः राजयोगानां भङ्गं जनयति । अतः राजयोगानां चिन्तने अयमपि अंशः विशेषतः चिन्तनीयः ।

कर्मलग्नगतपाकदशायाम्
राज्यलब्धिरथवा प्रबलस्य ।
शत्रुनीचग्रहयतादशायां
छिद्रसंश्रयदशा परिकल्प्या ॥

राजयोगकर्तृणां ग्रहाणां मध्याद्यो ग्रहः कर्मभावे स्थितः, यश्च लग्नस्थः तस्य दशायाम् अन्तर्दशायां वा राज्यलब्धिः भविष्यति । अथ लग्नदशमयोः द्वयोरपि ग्रहः भवति तदानीं तयोर्मध्ये बलिहः दशविपाके राज्यलब्धिः वाच्या । उभयत्र न भवति तदानीं राजयोगकर्तृषु बलिष्ठस्य दशापाके राज्यप्राप्तिं कथयेत् । जातके शत्रुक्षेत्रगतस्य नीचस्थानं प्राप्तास्य वा दशा छिद्रदशा नाम राज्यनाशादिभिः आपद्भिः युक्ता दशा अथवा संश्रयदशा बलिष्ठस्य अन्यनृपस्य आश्रययुक्ता दशा वाच्या । एवं लब्धराज्यस्यापि राज्ञः आपद्विचिन्त्या इत्यलं पल्लवितेन ।

**आधारग्रन्थाः**


- Jaatakaparijatam daivajna
- Bruhajjataka – varahamihira


https://doi.org/10.5281/zenodo.7253131

Paper 13

# मायामयमिदमखिलम्.....

**T. NARASIMHA SHETTY**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - hitha9613@gmail.com

**सार**: (ABSTRACT)

**माया स्व-आवरणशक्त्या मेघस्य सूर्यावरणमिव ब्रह्म आवृत्य अस्माकं स्वस्वरूपब्रह्मणः अवगमनं यथा न भवेत् तथा करोति । माया स्वविक्षेपशक्त्या रज्जुं दृष्ट्वा सर्पः इति, शुक्तौ रजतमिव निर्गुणे निर्विकारे एकस्मिन् अद्वितीये ब्रह्मणि नामरूपात्मकं इदं जगत् दृश्यते । जगन्मिथ्या नाम इदं शशविषाणमिव सर्वथात्मना असत्यमिति अर्थः नैव । यतः जगतः एतत् रूपं अस्माकं सर्वावस्थासु अबाधितं न भवति । तन्नाम जाग्रदवस्थायाम् अस्माकं अनुभववेद्यमिदं जगत् सुषुप्त्यवस्थायाम् अस्माकं अनुभवः न भवति । तुरीयावस्थायां तु अस्य जगतः अनुभववेद्यं किञ्चिदपि न भवति । परन्तु ब्रह्म अथवा आत्मा तु सर्वासु अवस्थासु एकप्रकारकमेव अबाधितं भवति । तस्मात् ब्रह्म केवलं सत्यम् इति ।**

**प्रस्तावना**

दृष्टिगोचरं माया, अगोचरं अव्यक्तं च सत्यम् । शरीरस्य अङ्गानि सर्वाणि दृष्टिगोचराणि । एतेषाम् अवयवानां सृष्टेः कारणीभूतः आत्मा केवलं सत्यम् । अयमात्मा अस्य कस्यापि इन्द्रियस्य गोचरं न भवति, परं सर्वस्य अपि अधिष्ठानम् अस्ति । तर्हि ज्ञानाधिकरणम् आत्मा इति । ज्ञानम् आत्मनः गुणः, गुणी अपि । अयमात्मा गगनमिव सर्वव्यापी, नित्यश्च । यानि दृष्टिगोचराणि भवन्ति तानि परिवर्तर्तन्ते, षड्विकारान् च प्राप्नुवन्ति । तस्मात् तानि न नित्यानि । यन्न व्येति तद् सत्यम्, स एव आत्मा ।

**विषयप्रस्तुतिः**

**आत्मनः स्वरूपम्**

आत्मा द्विविधः - जीवात्मा परामात्मा चेति । यथा परमात्मा नित्यशुद्धः तथा जीवात्मा अपि । अन्यानि सर्वाणि मिथ्यानि । देहः दृश्यते, परं यथा दृश्यते तथा कदापि नास्ति । नित्यं परिवर्तते । शरीराणि अवस्थान्तराणि प्राप्नुवन्ति । शैशवास्थातः कौमारावस्था, कौमारतः यौवनावस्थां च प्राप्नोति अन्ते नाशं विन्दते । जायते, वर्धते, परिणमते, क्षीयते, अन्ते च नश्यति । एवं षड्विकारान् या प्राप्नोति सा माया । आत्यन्तिकं सत्यं वस्तु केवलम् एकमेव । तत् निर्गुणं,निराकारं, अद्वितीयं च विद्यते । प्रपञ्चे परिदृश्यमानं एतत् नानात्वं केवलं नामरूपैः । एतानि नामरूपाणि एव माया । एतां मिथ्या अथवा भ्रमा इति वदन्ति । यथा अस्माभिः ध्रियमाणानि अग्गुलीयक-हार-कङ्कण-वलय-इत्यादीनि व्यवहारे भिन्नभिन्ननाम्ना युक्तानि परन्तु एतेषां सर्वेषाम् आभरणानाम् अधिष्ठानम् कनकमेकमेव । तथैव ब्रह्म एकमेव सकलात्मकम्, विविधानि वस्तूनि नामरूपात्मकेन भ्रमेण वैविध्यमयानि दृश्यन्ते । अज्ञानेन अस्माकं व्यवहाराः मायोपहितमेव दृश्यन्ते । मायायाः आवरणशक्तिः विक्षेपशक्तिः इति सामर्थ्यम् अस्ति । माया स्व-आवरणशक्त्या मेघस्य सूर्यावरणमिव ब्रह्म आवृत्य अस्माकं स्वस्वरूपब्रह्मणः अवगमनं यथा न भवेत् तथा करोति । माया स्वविक्षेपशक्त्या रज्जुं दृष्ट्वा सर्पः इति, शुक्तौ रजतमिव निर्गुणे निर्विकारे एकस्मिन् अद्वितीये ब्रह्मणि नामरूपात्मकं इदं जगत् दृश्यते । जगन्मिथ्या नाम इदं

शशविषाणमिव सर्वथात्मना असत्यमिति अर्थः नैव । यतः जगतः एतत् रूपं अस्माकं सर्वावस्थासु अबाधितं न भवति । तन्नाम जाग्रदवस्थायाम् अस्माकं अनुभववेद्यमिदं जगत् सुषुप्त्यवस्थायाम् अस्माकं अनुभवः न भवति । तुरीयावस्थायां तु अस्य जगतः अनुभववेद्यं किञ्चिदपि न भवति । परन्तु ब्रह्म अथवा आत्मा तु सर्वासु अवस्थासु एकप्रकारकमेव अबाधितं भवति । तस्मात् ब्रह्म केवलं सत्यम् इति ।

**मायायाः स्वरूपम्**

आदिशङ्कराचार्याः मोहमुद्गरः इति स्तोत्रगन्थे "**मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् । मायामयमिदमखिल हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा**" *मोहमुद्गरः - ११* इति अवदन् । सम्पद् आयाति याति च, जनमित्राणि च जीवने आयान्ति यान्ति च । तथैव यौवनमपि प्राप्यते नश्यति च । एतत् किमपि शाश्वतं नैव। यथा काल अतिक्रान्तः भवति तथैव नेत्राभ्यां दृष्टं सर्वं अदृष्टं भवति । तस्मात् एतत् प्राप्तमिति गर्वं मा कुरु इति अस्मान् जागरयति । धनजनयौवनानि सर्वाणि उत्मद्यन्ते। उत्पन्नस्य नाशः ध्रुवम् । तस्मात् अस्मिन् जगति चराचरवस्तूनि उत्पद्य षड्विकारान् प्राप्य नष्टाः भवन्ति । जगत् अपि गमनार्थे जातमिति अर्थः । ततः गतिशीलं जगत् परिवर्तनं प्राप्नोति एव । एतदेव मायामयमिदमखिलम् इति उक्तम् ।

एवमेव श्री दक्षिणामूर्तिस्तोत्रे अपि मायायाः स्वरूपः एवमस्ति - "**विश्वं दर्पणदृश्यमाननगरीतुल्यम् निजान्तर्गतं पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया**" विश्वं स्वस्मिन् अन्तर्गतं चेदपि मायया दर्पणे दृश्यमानं नगरमिव, स्वप्ने तु अन्यदिव दृश्यमानं जगदिव अन्यदेव उद्भूय भ्रमं जनयति । स्वप्नप्रपञ्चे सर्वाः घटनाः मानसिकानुभवाः केवलमिति जानीमश्चेदपि यावत् स्वप्नः तावत् स्वप्नप्रपञ्चः निस्सङ्गत्वमिति बहिः दृश्यते । यदा जागरितः भवति तदैव स्वप्नघटनाः कल्पितकथाः इति आत्मनि केवलं तस्य अस्तित्वमिति, स्वमनः एव सर्वस्य कारणीभूतमिति स्पष्टतां प्राप्नोति स्वप्नदर्शकः । एतत् भ्रमकारणेनैव भवति । ज्ञाने प्रमा भ्रमः चेति द्वौ प्रकारौ भवतः । वस्तुनः यथार्थज्ञानं प्रमा इति, विद्यमानस्य वस्तुनः अन्यथा दर्शनं नाम अयथार्थज्ञानं भ्रमः इति वदन्ति । यथार्थज्ञानं शुद्धम्, नित्यसत्यम्, ज्ञानम् कदापि परिवर्तितं न भवति । अयतार्थज्ञानम् अशुद्धम्, अनित्यम्, अविद्या इति च वदन्ति । एतत् भ्रमाज्ञानमेव माया इति उच्यते ।

**दक्षिणामूर्तिस्तोत्रम्**

अपि च श्री दक्षिणामूर्तिस्तोत्रे - "बीजस्यान्तिरिवाङ्कुरो जगदिदं प्राङ्निर्वकल्पं पुनर्मायाकल्पित-देशकालकलनावैचित्र्यचित्रीकृतम् । मायावीव विजृम्भयत्यपि महायोगेव यः स्वेच्छया ॥ इदं जगत् सृष्टेः पूर्वं बीजे अङ्कुरमिव परमात्मनि अव्यक्तस्थितौ आसीत् । मायायाः कारणतः इदानीं चित्रविचित्रं बहिः दृश्यते मायावीव महायोगीव वा स्वेच्छया वैविध्यमयं इदं जगत् यः कल्पितवान् व्यक्ताव्यक्तनामरूपैः युक्तः प्रपञ्चः अव्यक्ते यथा बीजे वृक्षः निगूढः भवति तथा सुप्तः आसीत् । बीजं सूक्ते वातावरणे स्थाप्यते चेत् भ्रूणं वृक्षरूपेण व्यक्तं भवति । बीजावस्थायां काण्ड-शाखा-पल्लव-पर्ण-पुष्प-फल-इत्यादीनि पृथक् गोचरम् अप्राप्य भ्रूणे एव अन्तस्थानि भवन्ति । यदा व्याक्तानि नयनगोचराणि भवन्ति तदा मायालीला उद्भवति । अत्र बीजं ब्रह्मरूपम्, अङ्कुरादिकं व्यक्तरूपम् । एवं दृष्टिगोचरमेव माया इत्युच्यते ।

बसवण्णः अपि स्वस्य वचनसाहित्ये एवं वदति - "जगतः स्तुतिः तव माया भगवन् ! तव स्तुतिः एव मम मनः पश्य । त्वं जगतः ज्ञाता अहं तव ज्ञाता । महागजः लघुदर्पणे यथा निगूढं स्थितः तथैव त्वं मयि निगूढः कूडलसङ्गमदेव" इति वदन् जगत् माया इति वदति । भगवद्भक्तः शिवशरणः परमात्मानं स्वहृदयमन्दिरे बन्धीकृतवान्। तन्नाम भक्तस्य मनसि माया जगत् मया सुज्ञानेन जितवान् इति तात्पर्यम् ।

शैवदर्शनपाशपदार्थः कथ्यते शक्तिभेदात् । ननु पाशश्चतुर्विधः मलकर्ममायारोध, शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात्त्रितयम्। तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशाः ।। - इति पाशः पञ्चविधः

कथ्यते । बिन्दोर्मायात्मनः शिवतत्त्वपदवेदनीयस्य शिवपदप्राप्तिलक्षणपरमुक्त्यपेक्षया पाशत्वेऽपि तद्योगस्य विद्येश्वरादिपदप्राप्तिहेतुत्मात्यस्यां शक्त्यात्मना प्रलये सर्वं जगत्सृष्टौ व्यक्तिमायातीति माया । यथोक्तं श्रीमत्सौरभेये शक्तिरूपेण कार्याणि तल्लीनानि महाक्षये । जेनाः - विकृतौ व्यक्तिमायाति सा कार्येण कलादिना । इति।। यद्यप्यत्र बहुवक्तव्यमस्ति । तथापि ग्रन्थभूयस्त्वभयादुपरम्यते ।

**उपसंहारः**

इत्थं माया सर्वं जगत् आवृत्य स्थिता, तस्याः बलेन सत्यं आच्छादितम् अस्ति । सत्यं कदापि न आवरणीयम् । यथा सूर्यः मेघावृत इव माया वर्तते । मेघस्य अपाकरणेन सूर्यः दृश्यते । एवं सत्यमपि । मायायाः आवर्तनशक्तिः विवर्तनशक्तिः च दुर्बलीकरणीया । ज्ञानाग्निना एताः दुष्टशक्तयः निर्मलीकरणीया । सङ्कल्पविकल्प-शक्तियुतमनः परमात्मनि सदा निक्षिपति चेत् नित्यः शुद्धः निर्विकारः आत्मा सदा अनुभवसिद्धः भवति । यदि ज्ञानेन आत्मनः अनुभवः ज्ञातः तर्हि परमात्मनः विषये यथार्थज्ञानं सिद्ध्यति । समुद्रस्य बिन्दुमात्रजलसेवनेन समग्रस्य समुद्रस्य जलं लवणयुक्तं इति यथा ज्ञानं तथा आत्मानं आवृतां मायां तस्याः क्रियां च यदा वयं जानीमः तदा सत्यांशः ज्ञायते । मायां विना सत्यं न, सत्यं विना माया न इति द्वेपि परस्परं निहितम् इति ज्ञायते । एवं सृष्टिः दृष्टिः च न भिन्ने चेदपि मायोपहिते स्तः ।


- Adishankaracharya prakaran grantha bhajagovinda viveka – Svami Chinmayananda
- Chudamani – Svami Chinmayananda
- Atmabodha – Svami Chinmayananda


https://doi.org/10.5281/zenodo.7244607

Paper 14

# विवेकानन्दस्य तत्त्वचिन्तनम्

**SRILAXMI ADIGA**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id -sriltantry@gmail.com

**सार**: (ABSTRACT)

**स्वामी विवेकानन्दः विश्वधर्मसम्मेलने भारतीय संस्कृतेः उपादेयतां श्रेष्ठतां च प्रादर्शयत् । विविधानि पुस्तकानि ग्रन्थालयतः आनीय तृष्णायाः निवारणाय पठति स्म सः । विशेषतया भगवतः सृष्टिरहस्यानि तं सम्मोहयन्ति स्म । न केवलम् इतिहासं, विज्ञानशास्त्रं प्राश्चात्यतत्त्वशास्त्रमपि सम्यगधीतवान् सः । अध्ययनेन तस्य मेधाशक्तिः विकसिता भवति स्म । सन्देहसन्दोहाः तं परितः भवन्ति स्म, सः अन्धविश्वासान् मनसः तिरस्कर्तुं शक्तवान् , तत्त्वस्य साक्षात्कारन्तु न प्राप्तवान् । प्रसिद्धपण्डितान् संदृश्य, स्वसन्देहान् तेषु निवेद्य तेषां मार्गदर्शनं प्रार्थयते स्म । तर्कवितर्केषु पण्डिताः एकमन्यो विशिष्यन्ते स्म, किन्तु तेषां तर्काः नरेन्द्रस्य तृप्तिकराः नासन्। तेषां विचारशैली शिथिला, पुरातनी आसीत् । तेषु कस्यचन वा देवस्य साक्षात्कारानुभूते अविद्यमानत्वान् तद्विचारधारा नरेन्द्रस्य अतृप्तिकरी आसीत् । तादृशस्य महापुरुषस्य जीवनमौल्यानि, तेन बोधिताः तात्त्विकविचाराः अस्मान् सर्वसमस्यासागरतः दूरीकुर्वन्ति इत्यत्र नास्ति संशीतिः ।**

## प्रास्ताविकम्

सन्ति बहवो भारतस्य वरपुत्राः येषु अविस्मरणीयः स्वामी विवेकानन्दः । सः विश्वधर्मसम्मेलने भारतीय संस्कृतेः उपादेयतां श्रेष्ठतां च प्रादर्शयत् । बङ्गप्रान्तस्य कोलकातानगरे त्रिषष्ट्याधिक-अष्टादशशततमे (१८६३) वर्षे जनवरी मासस्य द्वादशे दिने एतस्य जन्म अभवत् । तस्य पिता श्री विश्वनाथदत्तमहोदयः । पूर्वं तस्य नाम नरेन्द्रनाथदत्तः इति आसीत् । एषः उत्साही, हास्यप्रियः, करुणापरः च आसीत् । अध्ययनपटुरयं, नरेन्द्रः शास्त्रीयसङ्गीतस्य अभ्यासं करोति स्म । प्रतिदिनं व्यायामं करोति स्म । ध्यानसिद्धः अयं भ्रूमध्ये ज्योतिरेकं पश्यति स्म । ईश्वर- जिज्ञासुः अयं सर्वान् पृच्छति स्म यत् किं भवान् ईश्वरं दृष्टवान् ? इति । ईश्वरं ज्ञातुं पाश्चात्यदर्शनस्य भारतीयदर्शनस्य च गम्भीरम् अध्ययनं कुर्वन् अयं नरेन्द्रः विश्वविद्यालयस्य स्नातकपदवीम् अधिगतवान् । अस्मिन्नेव समये दैवयोगात् दक्षिणेश्वरस्थै कालीममन्दिरे परमहंसस्य रामकृष्णदेवस्य दर्शनं तेन प्राप्तम् । रामकृष्णमुद्धिश्य नरेन्द्रः पृष्टवान् । 'किं भवान् ईश्वरं दृष्टवान् ?' इति। 'आम् । त्वामिव ईश्वरमपि पश्यामि ' इति श्रीरामकृष्ण देवः स्मयमानः अवदत् । एष एव महापुरुषः नरेन्द्रस्य अध्यात्म-गुरुः अभवत् ।

## विषयप्रस्तुतिः

सन्यासदीक्षानन्तरं नरेन्द्रस्य नाम विवेकानन्दः इति अभवत् । अयं च नरेन्द्रः भारतभ्रमणं योगसाधनां च कृत्वा त्रिनवत्यधिकाष्टादशत (१८९३) तमे वर्षे अमेरिकादेशस्य शिकागोनगरे विश्वधर्मस्य भायां भारतस्य गौरवं प्रतिष्ठापितवान् । तत्र सम्भास्थले विविध धर्मग्रन्थाः एकस्य उपरि एकः इति क्रमेण स्थापिताः आसन् । संयोगवशात् श्रीमद्भगवद्गीता सर्वेषां पुस्तकानाम् अधः आसीत् । एकः अमेरिकावासी उपहासपूर्वकम् अवदत् – 'स्वामिन् । भवतां गीता सर्वेषां धर्मग्रन्थानाम् अधः वर्तते' इति । प्रत्युत्पन्नमतिः स्वामी विवेकानन्दः हसन्नेव प्रत्यवदत् – 'आम् , सत्यम् । आधारशिला तु अध एव भवति । सा यदि बहिः स्वीक्रियेत तर्हि समग्रम् अधः

पतिष्यति' इति हसन् एव उत्तरं प्रदत्तवान् । एतेने सर्वेऽपि चमत्कृताः अभवन् । ततः विदेशेषु वेदान्तधर्मस्य प्रचारं कृत्वा भारतं प्रत्यागतः सः देशोद्धाराय युवकान् प्रेरितवान् । जनसेवा, स्वास्थ्यरक्षा, स्त्रीशिक्षा आधुनिकप्रौद्योगिकी प्रभृतिषु क्षेत्रेषु असाधारणं कार्यं कर्तुं 'रामकृष्णमिशन्' इति संस्था संस्थाप्य जनेषु शक्तिजागरणं कृतवान् । स्वामिविवेकानन्दस्य अयं सन्देशः अद्यापि भारतीयान् प्रेरयति – "उत्तिष्ठत, जाग्रत, प्राप्य वरान्तिबोधत" इति ।

बाल्यम् – नरेन्द्रस्य जनकः न्यायवादी आसीत् । प्रतिदिनं विविधकुलजाः न्यायार्थिनः बहवः तदगृहमायान्ति स्म । तदगृहं धर्मशाला इव भवति स्म । ते सर्वेऽपि तत्रैव अल्पाहारं भोजनं च कुर्वन्ति स्म । भोजननन्तरं धूमपानार्थं हुक्कानां प्रदानं तत्र सम्प्रदायः आसीत् । तत्र एकैककुलजानां प्रत्येकतया हुक्का भवति स्म । इतरकुलजानां हुक्काम् अहं पिबामि चेत् किं भवतीति ज्ञातव्यम् इति नरेन्द्रस्य उत्सुकता आसीत् । एकस्मिन् दिने तादृशप्रयोगं कृतवानपि । अनर्थं न किञ्चित् जातम् । कुन्तभेदाः निरर्थकाः इति सः तदानीमेव निर्णीतवान्।

**जीवनलक्ष्यम्**

"वार्धक्यलक्षणानि बाल्ये एव द्रष्टुं शक्यते" इति सूक्तिः करुणार्द्रहृदयस्य नरेन्द्रस्य विषये सम्पूर्णतया सत्यार्था अभवत् । एकदा तत्रत्य व्यायामशालायां व्यायामविन्यासानां प्रदर्शनम् आसीत् । अनूह्यतया एका भारयुक्ता अयश्शलाका सन्दर्शकेषु कस्यचन नाविकस्योपरि पतिता । स च मूर्च्छितः । आरक्षकाः प्रश्नं करिष्यन्तीति सन्दर्शकाः सर्वे भयेन पलापिताः । नरेन्द्रः द्वयोः मित्रयोः साहाय्येन व्रणितस्य नाविकस्य प्रथमचिकित्सां कृतवान् । अन्यस्मिन् सन्दर्भे अश्वशकटस्य चक्रयोरधः पतितं किञ्चन मित्रं नरेन्द्रः चक्रयोर्मध्यतः बहिरानीय रक्षितवान् । अपि च अज्ञातं बालकं कञ्चन रक्षितवान् । तीव्रज्वरेण माध्येमार्गं नष्टप्रज्ञं तं बालकं स्वगृहं नीत्वा तस्य सेवामकरोत् ।

नरेन्द्रः न केवलं क्रीडासु निपुणः, विद्यास्वपि सः निपुणः एव । यं कञ्चन पाठम् एकवारं पठित्वा अक्षरशः सर्वं स्मरति स्म सः । तस्य स्मरणशक्तिः अपूर्वा आसीत् ।अध्ययने विजयप्राप्तेः मूलकारणं तस्य एकाग्रता एव । विश्वनाथदत्तः यदा यदा समयः लभ्यते तदा तदा नरेन्द्रमेव बोधयति स्म " सत्यधर्मयुतं मार्गं यावदनुसरति भवान् तावत् कस्मादपि भयं अनुभोक्तव्यं नास्ति । दुष्टानां वशः मा भवतु । आत्मगौरवं सर्वदा रक्षतु भवान् । स्वमते प्रेम इत्यस्य अर्थः परमते द्वेषः न । देशभक्तिरस्ति चेत् एव मानवः सुखेन जीवति । परदेशीयाः शत्रवः अस्माकं देशस्य उपरि आक्रमणं कृतवन्तः चेदपि अस्माकं देशस्य प्राचीनां महिमान्वितां संस्कृतिं ते हर्तुं न शक्नुवन्ति " इति ।

स्वकुमारस्य नरेन्द्रस्य मधुरं कण्ठस्वरं श्रोतुम् इच्छति स्म पिता । भक्तिगीतानाम् आलापनसमये नरेन्द्रस्य मुखमु उज्ज्वलं प्रकाशते स्म । नरेन्द्रः जननीं प्राणसमं प्रीणाति स्म । तां साक्षात् देवतां मनुते स्म । तस्य चिन्तनानुसारं त्यागे मातृसमः जनः अन्यः कोऽपि न भवति । न केवलं गृहे किन्तु समाजेऽपि तस्याः कृते अत्युन्नतस्थानं दातव्यम् इति च तस्य चिन्तनम् । जनकेऽपि नरेन्द्रे अपारं प्रीत्यादरवान् आसीत् । सर्वमिदं तस्य स्वेच्छायाः, स्वतन्त्रविहाराणां वा प्रतिबन्धकं नासीत् । पितरमुद्दिश्यापि स्वाभिप्रायान् स्पष्टतया प्रकटयामास सः । "आतिथ्यमिति सत्यमेव सुगुणः, किन्तु अलसानां कृते भोजनदानं किमुचितम् ? धूमपानाय तेषाम् कृते धूमवर्तिकानां, हुक्कानां प्रदानं न्याय्यं वा ?" इति । पितरं दृढं पृच्छति स्म । तस्य पिता तु 'पुत्र ! तेषां कष्टानि भवान् न जानाति, धूमपानावसरे वा ते स्वजीवनस्य कष्टं विस्मरेयुः इति वदति स्म । तादृशानां सामान्यजनानां कष्टं ज्ञात्वा तेषां परिहारोपायं सदा चिन्तयति स्म ।

**अन्धविश्वासानां दूरीकरणम्**

१८८० तमे वर्षे नरेन्द्रः माध्यमिकपरिक्षां समाप्य मेट्रिक्युलेषन्, कलाशाला-प्रवेशपरीक्षाञ्चोत्तीर्णवान् । सः काञ्चन कलाशालां प्राविशत् । तस्यं ज्ञानतृष्णः दिने दिने वर्धते स्म । विविधानि पुस्तकानि ग्रन्थालयतः आनीय तृष्णायाः निवारणाय पठति स्म सः । विशेषतया भगवतः सृष्टिरहस्यानि तं सम्मोहयन्ति स्म । न केवलम् इतिहासं, विज्ञानशास्त्रं प्राश्चात्यतत्त्वशास्त्रमपि सम्यगधीतवान् सः । अध्ययनेन

तस्य मेधाशक्तिः विकसिता भवति स्म । सन्देहसन्दोहाः तं परितः भवन्ति स्म, अन्धविश्वासान् मनसः सः तिरस्कर्तुं शक्तवान् , तत्त्वस्य साक्षात्कारन्तु न प्राप्तवान् ।

प्रसिद्धपण्डितान् सदृश्य, स्वसन्देहान् तेषु निवेद्य तेषां मार्गदर्शनं प्रार्थयते स्म । तर्कवितर्केषु पण्डिताः एकमन्यो विशिष्यन्ते स्म, किन्तु तेषां तर्काः नरेन्द्रस्य तृप्तिकराः नासन्। तेषां विचारशैली शिथिला, पुरातनी आसीत् । तेषु कस्यचन वा देवस्य साक्षात्कारानुभूते अविद्यमानत्वान् तद्विचारधारा नरेन्द्रस्य अतृप्तिकरी आसीत् ।

आशयसाफल्यम् –

भारतदेशे पदन्यासात् पूर्वमेवस्वामिनः कीर्तिः दिगन्तव्याप्ता अभवत् । २८९७ संवत्सरे जनवरी १५ दिनाङ्के सः कोलम्बो नगरे यदा पादं स्थापिवान् तदा तस्य चक्रवर्तिनः इव स्वागतोपचारा अभवन् । सः यदा मद्रास् नगररेलस्थानं प्राप्तवान् तदा असंख्याकाः अभिमानिनः स्वागतं चक्रुः । अभिमानिनः तेन उपविष्टं शकटं स्वयं कर्षन्तः शोभां कल्पितवन्तः, तदा प्रशंसावाक्यानां पुष्पमालानां वा मितिरेव नासीत् । स्वामी यत्र यत्र गतवान् तत्र सर्वत्र स्वगुरुदेवस्य सन्देशं श्रावितवान् । अभ्यर्थितवातां सर्वेषां कृते आध्यात्मिकतायाः साधने मार्गदर्शनं कृतवान् सः । सोदरसंन्यासिनः मानवसेवायै अङ्कितजीवनाः अभवन् । स्वीयमोक्षाय इच्छाऽपि स्वार्थपूर्णा एव इति वारं वारं स वदति स्म । 'भारतदेशे बाधाग्रस्तः एकः अपि न भवेत् । तावदवधि अहं मोक्षं न इच्छामि' इति वदति स्म स्वामी । संस्थारूपेण सेवाकार्यं भवेत् । तदैव सानाजिकसेवा साध्या भवतीति सः चिन्तितवान् । १८९७ संवत्सरे 'श्रीरामकृष्णमिवन्' इति संस्थां प्रारभ्य तस्याः सिद्धान्तानां , लक्ष्यस्य च रूपकल्पनां कृतवान् । वर्षद्वयानन्तरं गङ्गानदीतीरे बेलूरुसमीपे किञ्चित् स्थलं क्रीत्वा भवनानि निर्माय श्रीरामकृष्णमठं स्थापितवान् स्वामी ।

विरामरहित कार्यैः स्वामिनः स्वास्थ्यं क्षीणम् अभवत् । विश्रान्तये हिमालयेषु अनुकूलपर्वतप्रदेशात् अकेकान् आश्रितवान् । तत्रापि स्वसेवाकार्यम् अनुवर्तयति स्म, जनानाम् अभ्यर्थनानुसारम् उत्तरभारते बहुनि पट्टणानि सः दृष्टवान्, अमेरिकाशिष्याणाम् आह्वानम् अङ्गीकृत्य पुनरेकवारं अमेरिकादेशपर्यटनं कृतवान् । प्यारिस् नगरे प्रचलितासु धर्मसभासु भागं गृहीत्वा भारतं प्रत्यागतवान् । शिष्यैः बहुधा अनुतीतोऽपि विश्रान्तिं न स्वीकरोति स्म सः । सः अन्तर्मुखी जातः । शरीरं दुर्बलं जातम् । मनः जागरितम् , आत्मा उत्तेजितः च आसीत्।

१९०२ संवत्सरे जुलै ४ दिनाङ्के सः यथापूर्वं शिष्यान् पाठान् बोधितवान् । भोजनानन्तरं किञ्चिदिव विश्रान्तिं स्वीकृतवान् । किञ्चित्कालानन्तरं कोऽपि परिणामः जातः इव । अनुचरैः सह वार्तालापं कुर्वन्, हास्योक्तीः वदन् आनन्देन किञ्चित् कालं यापितवान् । रात्रौ नववादनसमये श्रान्तः इव दृष्टः । तस्य हस्तौ कम्पमानौ आस्ताम्, दीर्घं निश्वस्य निद्रां कृतवान् । अचिरात् सः महासमाधिं प्राप्तवान् । तस्य शिष्याः, सोदरसन्यासिनः अनाथा वयमिति शिशवः इव रोदनम् अकुर्वन् । स्वामी इदानीं नास्ति । तस्य वचांसि तु शाश्वतानि सति । लक्षराः जनानां कृते स्फूर्तिं यच्छन्ति । एतत् पुनरेकवारं स्मरन्तु – "महापुरुषाणां, महर्षीणां च औरसाः अपत्यानि वयमिति भवन्तः आनन्दम् अनुभवन्तः जीवन्तु, अकिञ्चनानां भाग्यहीनानां समुद्धरणाय सम्पन्नाः यावदग्रे नायान्ति, लुण्ठनतत्त्वस्य नाशः यावत् न भवति तावत् भारतदेशः श्मशानवाटिका एव भवति । निर्धनकृषिकस्य कुटीरात् भारतमातृदेवी नूतनाशक्त्या उदयं प्राप्नुयात् । धीवरगृहेषु सा अवतरतु । पादरक्षानिर्मातुः विथीसम्मार्जकस्य पर्णशालाभ्यः सा बहिरायातु, धान्यागारेषु, कर्मागारेषु सा प्रतिष्ठिता भवतु । सर्वत्र पर्वतेषु, उपत्यकासु, कन्दरेषु नवभारतोदयगीतं प्रतिध्वनिभिः नर्तयतु विश्वम्" इति ।

**उपसंहारः**

विवेकानन्दः स्वजीवितस्य अल्पकालेनैव सर्वेषां अत्यन्तम् अनुशासनबद्धस्फूर्तिदायकः, श्रेष्ठज्ञानी च सन् जीवनं यापितवान् । सः सर्वान् भारतीयान् उद्दिश्य "अस्माभिः केवलं इन्द्रियभोगैः जीवनयापनं न करणीयम्। परमपवित्रायाः जगन्मातुः मङ्गलाय, परमश्रेष्ठताप्राप्त्यै च सदा अस्मज्जीवनपुष्पं समर्पितं स्यात् ।

तस्य जीवनतत्त्वानि अस्माकं जीवने अपि सन्मार्गदर्शकानि भवन्तु । वयं मौढ्यसम्प्रदायान् अनुसरन्तः केवलं स्वार्थचिन्तनं न कुर्याम् । सदा परहिताय, सतां मार्गम् अनुसरन्तः ध्येयं स्मरेम, सुन्दरं सुखमयं जीवनं कुर्याम् ।

## परामृष्टग्रन्थाः

* https://asakthi.com/swami-vivekananda-bagge-prabandha
* https://kannadapdf.com/swami-vivekananda-information-in-kannada/
* https://www.applicationformpdf.com/swami-vivekananda-biography-pdf/

https://doi.org/10.5281/zenodo.7245390

Paper 15

# महाभारते स्त्री-उपदेशः

**SUMANA H.C.**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id- nandodisumana81@gmail.com

**सार**: (ABSTRACT)

**महनीयोऽयं ग्रन्थः महाभारतं यथा वपुषा विशालः तथैव भावगाम्भीर्येण अर्थगौरवेण च अतैव उच्यते - महत्वाद् भारवत्वाच्च महाभारतमुच्यते । महाभारतं विरचय्य श्रीव्यासः 'शिष्येभ्यः कथम् अध्यापयामि' इति यथा चिन्तामग्नः आसीत् तदा तस्य व्यथां ज्ञात्वा स्वयं लोकगुरुः भगवान् ब्रह्मा तस्य प्रीत्यर्थं लोकानां हितकाम्यया च तत्र आगच्छत् । यथाविधि तस्योपचारं कृत्वा स्वयं श्रीव्यासः स्वग्रन्थविषयेऽवदत् - 'भगवान्! मया इदं परमपूज्यं काव्यं कर्तुम् इष्यते । अस्मिन् काव्ये वेदरहस्यं साङ्गोपनिषदां विषयः च विस्तारेण वर्णितः । तेन सह तीर्थानां पुण्यक्षेत्राणां च कीर्तनं, नदी-वन-पर्वत-सागरादीनां वर्णनं, सर्वमपि प्रतिपादितं विद्यते अस्मिन् ग्रन्थे । परन्तु एतस्य ग्रन्थस्य कोऽपि लेखकः भुवि न विद्यते। ब्रह्मा अपि प्रत्युत्तरे - 'अन्य कोऽपि अस्मात् श्रेष्ठतरं काव्यं लेखितुं न समर्थो भवति । लेखनार्थं श्रीगणेशं स्मर' इति उक्त्वा स्वधाम अगच्छत् । एवं महाभारतं श्रीव्यासेन प्रणीतं, श्रीगणेशेन लिखितम् । सनातनसंस्कृत्याः धार्मिक-सामाजिक-राजकीयव्यवहाराणां आदर्शभूते महाभारते अन्विष्टं सर्वम् उपलभ्यते इति विश्वासेन अधुना अन्विष्यमाणः अस्ति स्त्रीणाम् उपदेशः ।**

## प्रास्ताविकम्

महाभारतं महर्षिणा वेदव्यासेन विरचितः बहुप्रसिद्धः इतिहासः विद्यते । अस्मिन् ग्रन्थे कौरवपाण्डवानां महायुद्धं मुख्यविषयरूपेण वर्णितमस्ति । मानवजीवनस्य धर्म-अर्थ-काम-मोक्ष-रूपाः समस्तपुरुषार्थाः अत्र विशालग्रन्थे सन्निवेशिताः । अस्य महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता विद्यते । भगवता कृष्णेन मोहग्रस्तम् अर्जुनं प्रति ज्ञान-कर्म-भक्ति-विषयकः उपदेशः गीतायां प्रदत्तः । मानव-जीवनस्य विविधविषयाः अत्र समीचीनतया प्रतिपादिताः सन्ति । इयं विश्वजनीन-कृतिः कालजयिनी चिरन्तनी एव । प्रथमं महाभारतम् इतिहासः पुराणम् आख्यानकञ्चेति नामभिः आख्यायते स्म । साम्प्रतिकास्तु महाभारतम् आचारशास्त्रम् नीतिशास्त्रं धर्मार्थकाममोक्षाख्यचतुर्वर्गसाधनं चामनन्ति ।

## विषयप्रस्तुतिः

व्यासस्य कृतिरियं सर्वैरितिहास इत्युच्यते यतोऽत्र वीराणां पुण्या गाथा वर्णिता। अयं ग्रन्थो धार्मिकग्रन्थः येन लोकः स्वकल्याणं गवेषयति । अत्रैव ग्रन्थे गीतारत्नं विद्यते या दुग्धेव प्रतीयतेऽनवरतं दुह्यमानाऽपि । गीताग्रन्थस्यादरो महाभारतस्यैव विशिष्टतां प्रमाणयति । स्वयमेव व्यासेन महाभारतस्य प्रशंसायां यदुक्तं तदक्षरशः सत्यम् –

**यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।**
**न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः॥**
**श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यत्र रोचते ।**

**पुंस्कोकिलागरं श्रुत्वा रुक्षा ध्वंक्षस्य वागिव ॥**

श्रीवेदव्यासस्य महत्वाकाङ्क्षेयं यद् धर्मार्थ-काम-मोक्ष-विषयकम् अखिलमपि जिज्ञासितं तथ्यम् अत्रैव लभेत, न च किञ्चिद् उच्छिष्येत इति । अतैव उच्यते - संस्कृतवाङ्मयलोकस्य सर्वविषयस्य सारसंग्रहः इति प्रख्यातः महाभारतकाव्यं सर्वगुणसागरः इति मन्यते । बहुभिः जिज्ञासुभिः विमृश्य महाभारतकाव्यम् इतिहासः इत्यपि कथितः । महाभारतविषयिका उक्तिस्तु -

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥

महनीयोऽयं ग्रन्थः यथा वपुषा विशालः तथैव भावगाम्भीर्येण अर्थगौरवेण च अतैव उच्यते - **महत्वाद् भारवत्वाच्च महाभारतमुच्यते** । महाभारतं विरचय्य श्रीव्यासः 'शिष्येभ्यः कथम् अध्यापयामि' इति यथा चिन्तामग्नः आसीत् तदा तस्य व्यथां ज्ञात्वा स्वयं लोकगुरुः भगवान् ब्रह्मा तस्य प्रीत्यर्थं लोकानां हितकाम्यया च तत्र आगच्छत् । यथाविधि तस्योपचारं कृत्वा स्वयं श्रीव्यासः स्वग्रन्थविषयेऽवदत् - 'भगवान्! मया इदं परमपूज्यं काव्यं कर्तुम् इष्यते । अस्मिन् काव्ये वेदरहस्यं साङ्गोपनिषदां विषयः च विस्तारेण वर्णितः । तेन सह तीर्थानां पुण्यक्षेत्राणां च कीर्तनं, नदी-वन-पर्वत-सागरादीनां वर्णनं, सर्वमपि प्रतिपादितं विद्यते अस्मिन् ग्रन्थे । परन्तु एतस्य ग्रन्थस्य कोऽपि लेखकः भुवि न विद्यते। ब्रह्मा अपि प्रत्युत्तरे - 'अन्य कोऽपि अस्मात् श्रेष्ठतरं काव्यं लेखितुं न समर्थो भवति । लेखनार्थं श्रीगणेशं स्मर' इति उक्त्वा स्वधाम अगच्छत् । एवं महाभारतं श्रीव्यासेन प्रणीतं, श्रीगणेशेन लिखितम् ।

**अन्वेषणम्**

सनातनसंस्कृत्याः धार्मिक-सामाजिक-राजकीयव्यवहाराणां आदर्शभूते महाभारते अन्विष्टं सर्वम् उपलभ्यते इति विश्वासेन अधुना अन्विष्यमाणः अस्ति स्त्रीणाम् उपदेशः । अनुकरणीयस्य सनातनधार्मिकचिन्तनानां जीवनपद्धतेश्च मूर्तरूपाणि काव्यपात्राणि । एतानि मौल्यानां राजदूता इव कर्तव्यं निर्वहन्ति । अनया पृष्ठभूमिकया काव्यपात्राणाम् अवलोकनं पुरातनमौल्यानां दर्शनाय मार्गदर्शकाः सन्ति ।

सन्दर्भोचितरूपेण मौल्यपाठः एव उपदेशः कथ्यते । केवलं बोधनया मौल्यानाम् अर्थः न ज्ञायेत, परम् आचरणेन व्यवहारेण, अनुभवैः व मौल्यानाम् महत्त्वज्ञापने प्रमुखं पात्रम् आवहन्ति । एवं कुरुत इति कथनस्य अपेक्षया अहम् एवं करिष्यामि इति कथनम् अधिकम् अर्थपूर्णम् भवति । मौल्यानाम् उपदेशं यः आचरति तस्य एव अन्वेषणं वरमिति मत्वा तादृशव्यक्तित्वपात्राणाम् अन्वेषणाय महाभारतसागरस्य दीपं गृहीत्वा प्रस्थितम् अस्ति मया ।

**अवलोकनस्य मुख्यः उद्देशः**

अत्र अयमुद्देशः यत् पतिव्रतादधर्मस्य उपदेशं पतिव्रताभिः महिलाभिः एव ज्ञातव्यम् इति । स्त्री-उपदेशस्य पृष्ठभूमिकायां पतिव्रतायाः द्रौपद्याः स्वानुभववाण्याः अवलोकनम् - साक्षाद्यज्ञाग्नेः समुद्भूता द्रौपदी अयोनिजा । प्रपञ्चे एव सा अनुपमसुन्दरी कृष्णवर्णत्वात् कृष्णा जाता । पूर्वजन्मनि शङ्करेण प्राप्तवरेण पञ्च पतीन् प्राप्तवती । पतिव्रतासु अग्रगण्या सा कृष्णभक्ता च आसीत् ।

कौरवाणां कुतन्त्रैः नानासन्दिग्धप्रसङ्गान् सम्मुखीकृत्य आगतया द्रौपद्या वनवासस्य अनुभवाः अपि प्राप्तव्याः अभवन् । सर्वेषु वनवासेषु सत्सु कदाचित् सत्यभामया सह श्रीकृष्णः पाण्डवान् द्रष्टुम् आगतः । तदा द्रौपद्या सह आत्मीयतया भाषमाणा सत्यभामा "त्वं कथं पञ्च पतीन् वशीकरोषि ?

भवत्याःवीराः शूराः पतयःसर्वदा भवत्याःअधीनःएव् तिष्टति।किम् कारणं वदतु।

तव वश्याहि सततं पाण्डवाःप्रियदर्शने।
मुखप्रेक्षाश्च ते सर्वेतत्वमेतद्ब्रवीहिमे॥6॥

भवति किमपि यन्त्र मन्त्र औषधं च जानाति वा? किमपि उपायम् अस्ति चेत् अहं अपि जानामि कृपया माम् अपि पाटयतु । तव विषये ते न कोपितवन्तः।सदा तेन मुखभावान् पश्य एवकार्यं कृतवन्तःस्यात् इति सत्य भामा वदति।

ममाद्याचक्ष्व पांचालि यशस्यं भगदैवतम्।
येन कृश्णो भवेन्नित्यं मम कृश्णो वशानुगः॥8॥

ते तुभ्यं तावतीं प्रीतिं दातुं, तव इच्छानुसारं वर्तयितुं च किं मायाजालं प्रसारितवती ? मन्त्रतन्त्रवशीकरणादि-विषयान् सर्वं वद । श्रीकृष्णः स्वामपि यथा अनुसरेत् तथा करिष्यामि" इति अवदत् ।

असत्स्त्रीणां समाचारंसत्ये मामनुप्रुच्छसि।
असदाचरिते माअर्गे कथं स्यादुकीर्तनम्॥10॥

**सत्यभामा नेतिनियमान् परित्यज्य कुकार्यं कुर्वन् स्त्रीजनस्य कुमार्गस्य विषये अहम् न आसक्ता भवति।पति विषये इत्येव संशयम् न करोतु।**

उद्विग्नस्य कुतः शान्तिरशान्तस्य कुतः सुखम् ।
न जातु वशगोभर्ता स्त्रीयाः स्यान् मन्त्र कर्मणा ॥13॥

**मन्त्र प्रक्रियात् पति निश्चयेन वशवर्ति न अभवत्।यदा पति पत्न्याःयत्नमम् जानाति तदा सह इतोपि दुःखं भवति ऐव।इति उक्त्वा ग्रौपदि स्वस्य पतीनां सन्तोषार्थंसा किं किं करोति इति विवरणं दत्तवति।**

एवं वशीकर्तुं इष्टविषयः पत्या ज्ञातः चेत् सम्बन्धः एव नश्यति, शान्तिभङ्गश्च भवति इति वदन्ती मया क्रिअयमाणेन एकैकेन प्रयोगोणापि जायमनस्य दुष्परिणामान् सविवरं निरूपितवती द्रौपदी ।

**अहंकारं विहायाहं कामक्रोधौ च सर्वदा ।**
**सदारान्पाडवान्नित्यं प्रयतोपचराम्यहम्**

अहंकारस्य कामक्रोधस्य परित्यज्य जागरूकतया सर्वेशांपांडवानां तेषां पत्नीनांच सेवा करोमि।असूयता सर्वदा दूरे तिष्ठामि।
असत्यम् कठोर वचनं न वदामि । असभ्यतां न दर्शयामि । अनुचितम् आचरणाम् न आचरामि।

**देवो मनुष्यो गंधर्वो युवा चापि स्वलंकृतः।**
**द्रव्यवानभिरूपो वा न मेऽन्यःपुरुषो मतः॥23॥**

देवः मनुश्यः गन्धर्वः युवकः रूपवान् कोपि पुरुषः भवति चेतपि पाण्डवान् विहाय अन्यत्र न गच्छति ।

**नाभुक्तवति नास्नाते ना संविष्टे च भ्रुरि।**
**न संविश्नामि सदा कर्मकरेष्वपि॥24॥**

पतीनां भोजनेन विना न भोजनं स्नानेन विना न स्नानं तर्हि तेषाम् उपवेशनम् विना न उपविशामि । क्षेत्रात् ग्रामत् भर्तारः यदा आगच्छन्ति तदा स्थित्वा आसन्दं जलं च दत्वा अभिनन्दनं करोमि ।

**प्रमृष्टभाण्डा म्रष्टान्नाकामे भोजनदायिनी**
**संयता गुप्तधान्या च सुसंम्रष्टनिवेशना ॥25॥**

पात्राणि प्रक्षाल्य स्वच्छं स्थापयित्वा रुचिकरपाकं कृत्वा समये भोजनं ददामि , गृहे धान्यानि रक्षयित्वा सर्वदा जागरूकतया गृहकार्यम् करोमि । व्यभिचारिस्त्रीणां स्नेहं न करोमि, आलस्यं न करोमि । यं यं पदार्थान् पतिः न खादति न पिबति, तं तं अहमपि त्यजामि । शास्त्रेण उक्तान् स्त्रीनियमान् सर्वं पालयति । सर्वद जागरूका भूत्वा पत्युः प्रीतिं करोमि । अत्यन्तं उत्साहेन अलङ्कारं कृत्वा शरीरं सुन्दरेण अलङ्करोमि । पतिशुश्रूषापरायणा स्त्री

जितेन्द्रिया भवेत् । कोपतापैः अपीडिता सती मनसः निग्रहं कुर्यात् । पतिः एव परदैवम् इति चिन्तयन्तीनां पतिव्रतानां स्त्रीणां महिम्नः श्रवणं पापहरं भवति । एवं विवृण्वती द्रौपदी नीतियुक्तानि वचनानि उक्तवती ।

**ये च धर्माः कुतुम्बेषु श्वश्र्वा मे कथिताः पुरा ।**
**भिक्षाबलिश्रद्धामितिस्थालीपकाश्च पर्वसु॥ 33॥**

कुटुम्बसम्बन्धे कुन्ती यं धर्मं सूचितवती अस्ति, सर्वं तदेव पालयामि । भिक्षादानं पूजा श्रद्धा पर्वसु खाद्यनिर्माणं अतिथिसत्कारं यथा योग्यरीतया करोमि । कदापि पतिं न उपेक्ष्ये । तेषाम् उपेक्षया उत्तमं भोजनं उत्तमवस्त्रधारणं न करोमि । कदापि श्वश्रवा सह वादविवादं न करोमि । ज्येष्टानां सेवां करोमि।

**नैतामतिशये जातु वस्त्रभूषणभोजनैः।**
**नापि परिवदे चाहं तां प्रुथां प्रथिवीसमनम्॥ 41॥**

वस्त्रभूषणे वा भूजने वा कदापि मम निमित्तं किमपि विशेषम् न स्थापयामि । महाराजयुधिष्टिरस्य समीपे विद्यमानाः सर्वे सेवकाः मम परिचिता आसन् । द्रौपदीसत्यभामयोः प्रसङ्गे स्त्रीधर्मस्य सामान्यविवरणानि विवृतानि सन्ति । अपि च मार्कण्डेयधर्मराजयोः सम्भाषणे अपि स्त्रीधर्मविवरणानि उपलभ्यन्ते ।

महभारते विद्यमानं प्रत्येकं स्त्रीजीवनं एकैकः उपदेशः इव अस्ति । गन्धारी, कुन्ती, हिडिम्बा, चित्राङ्गदा इत्यादीनां जीवनरीतिः एव भाविनीनां स्त्रीणां जीवनस्य उपदेशः । न केवलं सः तात्त्विकः उपदेशः अपि च क्रियात्मकः उपदेशः । सः जीवनस्य अनुभवान् यच्छन् सार्थकतायाः मार्गे अग्रे गन्तुं मार्गदीपाः सन्ति । कुन्त्याः जीवनरीतिः एव काचित् उपदेशमालिका ।

स्वकीयकष्टमानसिकक्लेशानां मध्ये अपि धर्मरक्षणे कुन्त्याः छलं श्लाघनीयम् । स्वयं बहूनि अपमानानि प्राप्य अपि सर्वान् क्षान्त्वा मानवधर्मविजृम्भणसन्निवेशाः महाभारतस्य पात्रेषु तत्र तत्र दृश्यन्ते । तासां स्त्रीणां सहना, पतिधर्मः, शुश्रूषा, मातृवात्सल्यम्, धर्मत्यागः इत्यादीनां सनातनधर्मस्य सात्त्विकगुणाः प्रतीपाः इव, स्त्रीपात्राणां जीवनमेव उपदेशात्मकं, प्रत्येकं जीवनमपि अवलोकनाय योग्यम् च ।

**उपसंहार**

बहून् विमर्शात्मांशान्, अभिप्रायान्, लेखान् पश्यामः चेत् महाभारतस्य स्त्रीपात्राणि आधुनिकस्त्रीपरर्थान् विमृष्टवन्तः । सनातनतत्त्वस्य आधारेण रूपितानां पात्राणां विमर्शः आधुनुकपाश्चात्यस्त्रीपरार्थम् विमर्षितवन्ति । सनातनतत्वस्य दृष्ट्या एव भवति, तदेव समीचीनम् इति मन्ये । यदि तथा न क्रियते तर्हि पात्राणाम् अन्याय्यं कृतमिव, तदा अन्यतत्त्वानाम् आरोपणं भवति । मल्येभ्यः व्यतिरिक्तभावानाम् आरोपणेन अपप्रचारः अपार्थः च सिद्ध्यति । तदा मूलतत्त्वस्य चिन्तनप्रकारः परिवर्तते ।

**परामृष्टाः ग्रन्थाः**

1) Panchakanya - the five pillars of chaste feminine divinity - Swati
2) Stree dharma : voice of the Indian women's right movement 1928-1936 - Sarah K Broone
3) States of women in india - Mr. Abdul Aziz Rajput
4) ಶ್ರೀಮನ್ಮಹಾಭರತ - ಭರತ ದರ್ಶನ

https://doi.org/10.5281/zenodo.7245416

Paper16

# वरणीयगुरुगुणाः

**DR. K.V.SHANKARANARAYANA BHAT**
Research Professor, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id- kvsnbhat666@gmail.com

**सार**: (ABSTRACT)

तत्फलं गळितं [पतितं] कल्पवृक्षात् । स च कल्पवृक्षस्तु निगमः । चिन्तितं फलं प्रदिशतीति हेतोः कल्पवृक्षस्य कल्पवृक्ष इति नाम । निगमस्तु कल्पवृक्ष इव सर्वैरपेक्षितं फलं सुखं वा दत्ते इति कारणतः कल्पतरोः दृष्टान्तोऽत्र । निगमानामध्ययनेन, अभ्यासेन, नियततया पठनेन च सर्वे नराः स्वाभीष्टं प्राप्नुवन्ति । मोक्षादिशाश्वतसुखप्राप्त्यर्थञ्च निगमाः अवश्यमध्येतव्याः । यथा निगमाध्ययनं मोक्षादिफलदानसमर्थं तथा तस्य निगमस्य साररूपं, फलरूपञ्च श्रीमद्भागवतम् अधेतॄणां सर्वाभीष्टदायि । भगवतोऽतिशयानुग्रहकारणीभूतञ्च । तस्मादेव तत्फलरूपं श्रीमद्भागवतं पीयूषरससम्भृतञ्चेति पुराणज्ञानां मतम् । तत्फलं पीयूषरससम्भृतं , मरणपर्यन्तमपि, सर्वैः सुध्येयमिति तु तज्ज्ञानामभिप्रायः ।

**पीठिका -**

श्रीमद्भागवतं पुराणगणेषु प्रथमं स्थानमलङ्करोतीति तु सर्वविदितमेवेदम् । पुराणानि त्वष्टादशात्यन्तं प्रसिद्धानि । तानि तु चेतराणि पुराणानि नानाविषयोपनिबद्धानि च सन्ति । श्रीमद्भागवतन्तु भगवत्परकमेवास्ति ,भगवतः कथाभिर्भगवद्भक्तमाहात्म्येन च । तस्मादेवोक्तं पुराणान्तरेषु ,

कालव्यालमुखालीढजगत्त्राणविधायकम् ।
श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥ इति

समयः सर्पवत् ।स्वस्य मुखेन जगदालीढमामग्नं वा करिष्यति । एतेन क्रमेण समयसर्पमुखेन दंशितं लोकं रक्षतीदं पुराणम् । कालस्तु नित्यं चलति । गमनशीलोऽयं कालः, स्वविषोल्बणं अन्यशरीरं यथा विधास्यति , तथायं स्वचङ्क्रमणेन जगदेव निगरति । तेन त्राणार्थं श्रीमद्भागवतं भगवता वेदव्यासेन विरचितम् । तस्माद्भागवतम् अमृतद्रवसंयुतं फलमिव । तत्फलं गळितं [पतितं] कल्पवृक्षात् । स च कल्पवृक्षस्तु निगमः । चिन्तितं फलं प्रदिशतीति हेतोः कल्पवृक्षस्य कल्पवृक्ष इति नाम । निगमस्तु कल्पवृक्ष इव सर्वैरपेक्षितं फलं सुखं वा दत्ते इति कारणतः कल्पतरोः दृष्टान्तोऽत्र । निगमानामध्ययनेन, अभ्यासेन, नियततया पठनेन च सर्वे नराः स्वाभीष्टं प्राप्नुवन्ति । मोक्षादिशाश्वतसुखप्राप्त्यर्थञ्च निगमाः अवश्यमध्येतव्याः । यथा निगमाध्ययनं मोक्षादिफलदानसमर्थं तथा तस्य निगमस्य साररूपं, फलरूपञ्च श्रीमद्भागवतम् अधेतॄणां सर्वाभीष्टदायि । भगवतोऽतिशयानुग्रह-कारणीभूतञ्च । तस्मादेव तत्फलरूपं श्रीमद्भागवतं पीयूषरससम्भृतञ्चेति पुराणज्ञानां मतम् । तत्फलं पीयूषरससम्भृतं , मरणपर्यन्तमपि, सर्वैः सुध्येयमिति तु तज्ज्ञानामभिप्रायः । तत्पानयोग्या रसिकाः, भावुकाश्च । तैश्च क्रियासमभिहारेण तत्राध्ययने प्रयत्नः करणीय इति तु सिद्धमिदम् ॥

**विवरणम् –**

श्रीमद्भागवते तु आख्याता गीतास्तु बह्व्यः । तासु च अतीव चार्वी अवधूतगीता । एकादशस्कन्धे तु निविष्टेयं यदुद्विजयोरन्तरे संवादरूपेण । प्रायेण लोके मानवाः लोकतत्वविचक्षणा भवन्ति । स्वेनैव स्वममङ्गलाशयात् समुद्धरन्ति । आत्मोद्धारार्थं यदा आत्मान एव प्रयतन्ते , तदैव ते श्रेयोऽनुविन्दन्ते । भगवतोऽपि स्वसृष्टौ मानवा एव प्रभूतं प्रियाः । एकपदाः द्विपदाः त्रिपदाः चतुष्पदा बहुपदाश्च सन्ति जन्तवः । तेषु च नरा एव अतिमतिमन्तः । ते च विविधैः कारणैर्भगवन्तं मार्गयन्ति । तत्र च सहस्राधिकहायनात् पूर्वं प्रचलितेयं घटना यदोरवधूतस्य च संवादरूपेण ।

एकदा यदुः अकुतोभयं, तत्रैवारण्ये सञ्चरन्तं, कञ्चन निष्णातं द्विजमवधूतं धर्मविषये पप्रच्छ । "प्रायः मनुष्याः धर्मार्थकामेषु विवित्सायां , यशसः , श्रिय, आयुषश्च हेतुनैव समीहन्ते । त्वन्तु पीयूषभाषी, समर्थः पण्डितश्च । इत्थन्तु जडोन्मत्तपिशाचवत् किमर्थं किञ्चिदपि नरलोकाभीष्टं प्राप्तुं नेहसे ? जनास्तु कामलोभदवाग्निना, दह्यमानाः सन्ति ।त्वन्तु तेन ज्वलनेन मुक्तो गङ्गाजलस्थ इव न तप्यसे " । इति यदुना पृष्टः सभाजितश्चावधूतः प्रश्रयावनतं तं प्राह – "मम मत्याश्रिता गुरवोऽनेके सन्ति । तेन प्रेरितोऽहं कामादिदवाग्निमुक्तोऽस्मीह भूमाविति । तेनोक्ता गुरवश्चतुर्विंशतिसङ्ख्याकाः । ते चैते । **१. पृथिवी २. वायुः ३.आकाशः ४. आपः ५. अग्निः ६. चन्द्रमाः ७. रविः ८. कपोतः ९. अजगरः १०. सिन्धुः ११. पतङ्गः १२. मधुकृत् १३. गजः १४. मधुहा १५. हरिणः १६. मीनः १७. पिङ्गळा १८. कुररः १९. अर्भकः २०. कुमारी २१. शरकृत् २२. सर्पः २३. ऊर्णनाभिः २४. सुपेशस्करश्च** । एतैः चतुर्विंशतिसङ्ख्याकैर्गुरुभिरेव अवधूतोऽन्वशिक्षदिति तु अवधूतस्यैव वचनमिदम् । कथं ते तस्य गुरवः ? तेषं गुरुत्वं कथमिति तु किञ्चिद्विमृशामः ॥

**१. पृथिवी -** यथा जन्तुभिराक्रम्यमाणापि धात्री धीरा स्वमार्गात् न चलेत्, यथा च शश्वत् परार्थसर्वेष्टदात्री, यथा परार्थमेव स्वजीवनं गमयित्री भूमिस्तथाखिलैः दैववशानुगैर्जीवैराक्रम्यमाणोऽपि धीरो नरः क्षितेर्व्रतमनुशिक्षन् स्वमार्गान्न चलेत् । सर्वत्र परार्थमेव जीवेत् ।

**२. वायुः -** वायुः यथा नानाविधधर्मेषु सर्वत्र प्रविशन्नपि गुणदोषान्वयेन न तत्रानुषज्जते । तथा च पृथिव्यादिभूतात्मकेषु शरीरेषु प्रविष्टोऽपि तज्जीवगुणाश्रयोऽपि न तत्सत्वादिगुणैर्युज्यते । तथा जीवो देहं विशन्, नानाधर्मेषु वर्तमानोऽपि गुणदोषान्वयेन न विषज्जेत ।पृथिव्यादिपञ्चभूतात्मकेषु कायेषु प्रविश्य सर्वदा सत्वादिगुणैरेव न युज्येत ।

३. **आकाशः -** यथाकाशस्तेजोजलान्नरूपैर्वारिदैर्वातेरितैः युतोऽपि न स्पृश्यते तैः । तद्वत् समयसृज्य-माणैस्सत्वादिगुणैः पुमानपि न स्पृष्टो भवेत् ।

**४. आपः -** यथा जलं स्वच्छं, प्रकृतितः स्निग्धं, स्वगुणैः नृणां हर्षदं सुखदञ्च, तथा दर्शनस्पर्शनसङ्कीर्तनैः मनुजः पापात् विमोचयेन्मित्रम् ।

५. **अग्निः -** वह्निः तेजस्वी । तापयुतः । परैर्दुर्धर्षः । सर्वभक्षः । दूरभाजनश्च । तथा जीवस्तेजोदीप्तोऽग्निरिव, तपसा, तेजसा संयुतो भूत्वा, परैः शत्रुभिश्च दुर्धर्ष इव भूयात् । पापपुण्यकर्मकर्तापि तत्पापं शमयेत्स्वतेजसा । स्वजीवनं सत्पात्रमिव यापयेत् ।भगवांस्तु क्वचन छन्न इव, क्वचित्प्रदेशे जाग्रत इव [स्पष्ट इव] उपासिभिः उपास्यः । तस्मादेव भगवता सृष्टे वह्नावपि तद्गुणो दृश्यते ।

**६. चन्द्रमाः -** देहा अशाश्वताः । जनन्याद्याः मरणान्ताः । यथा चन्द्रस्य कलाः अनभिव्यक्तमार्गेण कालनामकभगवता वृद्धिक्षययुताः तथेदं जीवशरीरं । यदपि जन्म प्राप्तमनेन जीवेन तत्सकलं मरणेतमेव । न तु शाश्वतम् ।

**७. रविः -** यथा रविर्जलं पीत्वा, वृष्टिरूपेण यथाकालं विमुञ्चति , तथैव योगी जनः गुणैर्गुणान् [गुणिभिस्सद्गुणान्] स्वीकरोति । कालमनुसृत्य सर्वेषामुपदेशरूपेण प्रदिशति च । यथा रविः प्रातरधःस्थितो मध्याह्ने उपरि गच्छति । पुनस्सायमध एव आगत्य स्वास्तमयते । तथा स्वमधोऽधः पश्यतः महिमा उपचीयते । उपर्युपरि पश्यन्तोऽखिला दरिद्रत्येव ।

**८. कपोतः** - कश्चन कपोतः स्वपत्न्यां, पुत्रेषु चातिस्नेहमतनोत् । जातु सहातिप्रसङ्गेन कपोतोऽपि पतति लुब्धकजाले । कुडुम्बी चाशान्तमनाः, द्वन्द्वारामः कपोतपक्षिवत् । स्वकुडुम्बं पुष्णन् अतीव सानुबन्धोऽवसीदति । मानुषलोकस्तु मुक्तिद्वारम् । तत्प्राप्य साधयेन्न तु व्यर्थं कुर्यात्खगवत् ।

**९. अजगरः** - दुःखं कोऽपि नेच्छति । सुखमैहिकन्तु केवलमैन्द्रियकम् । सुखश्च दुःखञ्च चक्रवत् परिवर्तते । तस्माद्यदृच्छयैवापतितं ग्रसेद्भगवता । यथाऽजगरोऽक्रियो यदृच्छयैवापतितं भुङ्क्ते । निराहारोऽपि अनुपक्रमो दिष्टभुक् । तथा देही च भवेत्सदा ।

**१०. सिन्धुः** - समुद्रः सदा प्रसन्नगम्भीरः । परैर्दुर्विगाह्यः । दुरत्ययः । अनन्तपारः । अक्षोभ्यः । स्तिमितोदः । तथैव देही च सदा सन्तुष्टः, गम्भीरः, अगाधः,क्षोभरहितः,जीवने ऋजुपन्थाः स्यात् । यथा सरिद्भिर्युतो वायुतो वा सागरः नोत्सर्पेत, न शुष्येत, तथा जीवः समृद्धाशो विहीनो वा नारयणपरो भवेत्।

**११. पतङ्गः** - नरो जितेन्द्रियो भवेत् । यदि स प्रलोभितस्तदा पतङ्गवदग्नौ तमसि पतति । अधोगतिमाप्नोति।

**१२. मधुकृत्** - अणुभ्यः महद्भ्यश्च पुष्पेभ्यः षट्पदः सर्वतः सारमादद्यात्तथा, निपुणो मानवोऽणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः सारमादाय भगवन्तं सञ्चिन्तयेत् । यथा मक्षिका सङ्ग्रहिणी तथा नरः सायन्तनं श्वस्तनं भिक्षितं, पाणिपत्रोदरामत्रो न सङ्गृह्णीत ।

**१३. गजः** - यथा गजः करिण्या अङ्गसंबन्धतः बध्येत, तथा स्त्रीसङ्गतः केवलं नरो न बध्यते । यदि बध्येत तर्हि बलाधिकैर्गजान्तरैर्यथा यथा गजो विहन्यते, नरोऽप्यन्यैर्विहन्येत ।

**१४. मधुहा** - यथा मधुपैः सञ्चितं मधु न तेनोपभुज्यते, न दीयते च । तदा यथा मधुहा भुङ्क्ते तत्सङ्ग्रहं, तथास्माभिरपि लब्धं द्रव्यं जीवने उपभुज्येत । अथवा दीयते वा । न सङ्ग्रहः कार्यः ।

**१५. हरिणः** - भगवत्परङ्गीतं श्रुणुयात् । न ग्राम्यगीतं विरागिभिः । यथा हरिणो लुब्धकगीतमोहितो बध्यते, तथा ग्राम्यगीतैर्नरो मोहयुतो बद्धो भवति । ततो श्रोत्रचापलन्त्यजेत्सर्वदा ।

**१६. मीनः** - यथा बळिशैर्मत्स्यः रसचापल्यान्मृत्युमाप्नोति , तथातिप्रमाथिन्या रसनया रसविमोहितो जनोऽतद्बुद्धिर्मृतिमृच्छति । तस्माद्रसनाचापल्यन्त्यजेत्सदा ।

**१७. पिङ्गळा -** पुरा विदेहनगरे स्थिता पिङ्गळा नाम वेश्या । तस्याभिप्रायोऽयमस्ति ->संसारकूपे पतितं, विषयभोगैर्मुषितेक्षणं, कालाहिना ग्रस्तं सर्वमात्मानमिव सन्तं जनं भगवानेव त्रायेत् । नत्वन्यो दक्षोऽस्ति त्रातुम् । आशा हि परमं दुःखकारणम् । नैराश्यं परमसुखबीजम् , इति ।

**१८. कुररः** - यथा सामिषं कुररं [वान्यपक्षिणं वा नरं] अन्ये ये निरामिषा बलिनो हन्तुं प्रयतन्ते । तदामिषं परित्यज्य स पक्षी सुखं समविन्दत । तथा परिग्रहो दुःखाय भवेत् । त्यागः सुखाय च ।

**१९. अर्भकः** - यथार्भकश्चिन्तामुक्तः परमानन्दाप्लुतो भवति, तथा जनोऽपि चिन्तया मुक्तो भूत्वा सदानन्देन जीवननिर्वहणं कुर्यात् । निर्जीवं दहते चिता, चिन्ता तु सजीवं दहते ।

**२०. कुमारी** - कुमारीकथात्र स्वीकृता । यथा कुमारी आत्मवृण्वानान् गृहमागतान् स्वयं कङ्कणशब्दघोषं विनार्हयामास, यथा च तेषामभ्यवहारार्थं सा शालीन् दृषदि अवघ्नन्ती सती, स्वस्याः पाण्योः कङ्कणान् [शङ्खान्] निष्कास्य, एकैकमवशिष्य घोषध्वनिमवारुणत् तथा, बहूनां, द्वयोरपि वार्ता, वासो वा कलहायैव । एक एव चरेत्तस्मात्कुमार्या इव कङ्कणः । जन्तुरेक एव प्रजायते, प्रलीयते च ॥

**२१. शरकृत्** - यथा शरकृदेक एकाग्रतावान्, कमपि स्वान्तिके व्रजन्तं नेक्षते, तथैकसञ्चारी भूत्वा समाधिं तपसः सम्पाद्य, भगवन्तं प्रीणयेत् । समाधिमास्थाय केवलं भगवन्तं प्राप्तुं शक्यते ॥

**२२. सर्पः** - गृहारम्भो यथा दुःखायैव, कस्येति चेद्योऽध्रुवात्मा तस्य । गृहारम्भान्तरं यथा सुखमाप्नोति तथा दुःखमपि । तस्मात्पूर्वमेव सिद्धो भवेत्सुखदुःखानुभवार्थम् । योऽध्रुवात्मास्ति स सर्प इव भवेत् । यथा सर्पः परकृतं सद्म प्रविश्य सुखं स्वपिति तथा । सर्वेषां प्राणाः प्राघूर्णिका इवावश्यमेव यास्यन्ति ॥

**२३. ऊर्णनाभिः** - यथा ऊर्णनाभिः हृदयादूर्णं सन्तत्य वक्त्रतः, तया विहत्य च भूयस्तां ग्रसत्येवं भगवानपि सृजते , संहरति चेदं विश्वं पुनः पुनः । तेन च कर्मणा भगवतः शक्तिस्तु न नश्यति, पुनः पूर्यते च । भगवच्छक्तिस्तु सर्वदैकथैव भविष्यति । इति तु प्रमोपदेशः प्राप्तोऽनेन कर्मदर्शनेन ॥

**२४. पेशस्करः** - शरीरी यत्र यत्र, प्रज्ञया चित्तं, सकलञ्च धारयेत् । तत्र तत्सरूपतां मुक्तौ याति । तत्स्नेहाद्वा, भयाद्वा, द्वेषाद्वा । यथा कीटः कुड्यां प्रवेशितः पेशस्करं ध्यायन् तत्समतां याति तथा ।

**उपसंहारः –**

एवञ्चतुर्विंशतिसङ्ख्याका गुरवः अवधूतेन स्वीकृता गुरुत्वेन । तेषाञ्च कांश्चन गुणान् गृहीत्वावधूतस्तु पराङ्गतिमवाप्नोत् । गुरवः केवलं न मार्गदर्शकाः , ते नेतारश्च पारं संसारस्य । पारङ्गता गुरवः परं पुरुषं दृष्ट्वा अस्मानपि तत्समीपं नयन्ति च । तस्मादवधूतो मुनिः प्रकृतिसंबन्धितानेतान् गुरून् वृत्वा जीवनेऽपारं सन्तोषं

प्राप्तवानिति तु न संशीतिः । अस्माभिरपि अपारमिदं चिन्तनं, कारयित्वा तुष्टो भवेद्भगवानिति तु गरीयस्याशा नः । अल्पकृतश्चिन्तनमिदमल्पमनल्पज्ञस्य प्रीतिहेतुर्भूत्वा, अनल्पचिन्तनभूमिका भवेदिति सम्प्रार्थना ॥

**अवधूतचिन्तनमिदमवन्यामवने च नः ।**
**सुदक्षः पवनेनस्य, प्रीत्यै भक्त्यै च नित्यशः ॥**

https://doi.org/10.5281/zenodo.7248482

Paper17

# दानेतिहासः

AKSHAY.K.R
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id- akshay.puru@gmail.com

## सार: (ABSTRACT)

दानस्य विषये अस्माकं प्राचीनेषु ग्रन्थेषु रामायण-महाभारत-भागवतादिपुराणाद्येषु बहुत्र अनेकवारं वाचः प्रस्ताविता भवन्ति । विशेषतः भारते भगवद्गीतायां दानं सात्विक-राजस-तामसभेदेन विभज्यते । " दानमिदं मम अवश्यं कर्तव्यम्" इति प्रज्ञापूर्वकं सद्देशे सत्काले सत्पात्राय प्रतिफलापेक्षां विना यादृशं दानकर्म भवति तत् सात्विकम् इति परिगण्यते । ऐहिकस्य आमुष्मिकस्य वा फलस्य उद्देशेन प्रतिग्रहीतुः प्रत्युपकारापेक्षया वा अन्यायमार्गेण संपादितं धनं वस्तु वा दीयते चेत् तदा तद्राजसं परिकीर्त्यते । यदि पुनः असद्देशे असत्काले असत्पात्राय, सत्पात्राय अवमानपूर्वकं वा दीयते, तादृशं दानं तामसमित्युपनिबध्यते ॥

**प्रास्ताविकम्–**

"भव्येऽस्मिन् भारतवर्षे यो यो जन्म प्राप्नोति तस्य सर्वस्यापि भवति अधिकारः पूर्वतनानां परिचयसम्पादने", इति वक्ति प्राचीना प्रसिद्धा चेयं भणितिः –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः** इति।।

तदनुसारेण अस्माकं सनातनसंस्कृतेः यन्मूलं महाभारतं, तस्य अध्ययनम्, अधीतस्य योग्यं प्रति बोधनं च अवश्यकर्तव्यताकं भवति । एवं हि प्राचीनपरम्परायाः प्रवर्तनं शक्यते कर्तुम्। इतरानेकग्रन्थापेक्षया अर्थतः तात्विकविषयदृष्ट्या च नितरां श्रीमत् भवति महाभारतम् ॥

पुरा ब्रह्मादयो देवाः, सकलाश्च ऋषयः महाभारतमहत्वस्य जिज्ञासवः, भगवतो व्यासस्यैव आज्ञया तुलायाम् एकत्र महाभारतम् अपरत्र सर्वशास्त्राणि च निक्षिप्य पर्यैक्षन्त । तदा सर्वेभ्योऽपि शास्त्रेभ्यो भारतस्यैव अधिकभारवत्तां निरीक्ष्य महाभारतमेव परं शास्त्रं निश्चिक्युः इति वक्ति मध्वाचार्यः **महत्वात् भारवत्वाच्च महाभारतमुच्यते** इत्यादिना ॥

महाभारतस्य पञ्चमो वेदः इत्यप्यस्ति प्रथितिः। तदुक्तं "**वेदादपि परं चक्रे पञ्चमं वेदमुत्तमम्**" इति। अपि चेदं शास्त्रम् इतरस्मिन् शास्त्रे यत्र क्वचित् सन्देहो विरोधो वा भवति चेत् तत्र निर्णायकस्थानम् अधिरोहति इति वक्ति ब्रह्माण्डपुराणं – **निर्णयस्सर्वशास्त्राणां सदृष्टान्तो हि भारते कृतः ङ्ग.।** इति । मार्कण्डेयपुराणे अपि दृश्यते अस्य प्रशंसा –

**देवतानां यथा व्यासो द्विपदां ब्राह्मणो वरः।**
**आयुधानां यथा वज्रमोषधीनां यथा यवाः।**
**तथैव सर्वशास्त्राणां महाभारतमुत्तमम्।।** इति ॥

**पीठिका–**

लक्षश्लोकात्मके महाभारते अनेकानि तत्वानि निरूपितानि । अनेकासां समस्यानां शास्त्रीयाणां समाधानम् उपाख्यानरूपेण सुष्ठु प्रदत्तानि भवन्ति । अहिंसा-अस्तेय-शौचादि-अनेकधा भिन्नस्य धर्मस्य

अनुष्ठानार्थं, तस्य सर्वस्यापि स्वरूपज्ञानं, पश्चात् तेषां विशेषज्ञाञ्चापेक्षितम् । सर्वेषां तेषां लक्षणेन स्वरुपज्ञानं श्रोतुः संपद्यते, तथापि उपाख्यानरूपेण तेषां कथनेन यादृशी स्पष्टता धर्मसूक्ष्मपरिचयपूर्विका भवति, न तादृशस्पष्टता लक्षणादिकथनमात्रेण संपद्यते । बालान् आरभ्य वृद्धपर्यन्तस्यापि प्रपञ्चस्य कथारुपेण प्रस्ताविते एव विषये गाढं तत्वस्थैर्यं मनसि भवति ॥

**विषयपरामर्शः –**

प्रस्तुतप्रबन्धे दानस्य विषये महाभारतोक्तरीत्या यथामति विचार्यते । दानम् इति शब्दःखलु दाधातोः ल्युटा मेलनस्य फलम् । वर्णभेदम् अतिरिच्य सर्वेषां कृते अवश्यं कर्तव्यं कर्म भवति दानम् । मनुजः स्वजीवितावधौ यथेष्टं धनं संपद्वा संपादयति चेदपि मरणानन्तरं तस्य संपादितं भौतिकं धनं न तेन सह लोकान्तरम् अनुचरति । तर्हि मरणान्तरमपि यत् सम्पत् अनुसरत्यस्मान् तदेव अस्माभिः बहुप्रमाणं संपाद्यं भवति । तच्च भवति दानादिजनितं पुण्यम् । तदुक्तं –

**पतितस्यास्य देहस्य काष्ठविष्ठासमस्य च ।**
**फालानि त्रीणि शिष्यन्ते विद्या-कर्म-सुता इति ।।**

अत्र 'कर्म' इति पदेन दानादिसत्कर्मजनितं पुण्यमेव विवक्षितम् । यथा लोकेऽस्मिन् ईप्सितेषु स्थानेषु ईप्सिताः भोगाः अनुभोग्याश्चेत् तत्र साधनं भवति वित्तम् । तथा उपर्युपरि लोकम् इष्टस्य भोगस्य साधनं भवति पुण्यं यत् दानादिसत्कर्मणा जायते ॥

यद्यपि दानमत्र प्रकृतं तथापि दानादिकं खलु येन केनापि मानवेन धर्मार्थं, तज्जन्यभोगार्थं, हरितोषार्थं वा क्रियते इति प्रायिकं तत्फलं पुण्यमेव इति पुण्यविषयः अत्र प्रस्तूयते ॥

दानस्य विषये सुभाषितकारः कश्चित्, इदं वचः वक्ति यत् –

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।**
**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।। इति**

तथा च निष्पादितस्य वित्तस्य भोगमतिरिच्य यत्किमपि कार्यं भवति चेत् तद्दानमेव भवेत् । अन्यथा यदि तत् तूष्णीं संगृह्यते बहुप्रमाणं, तदा तस्य नाश एव भवति, यथा मधुकरेण अतिकष्टार्जितं मधु संग्रहनिमित्तमेव परकीयं भवति तथा इति । अपि च परस्य वशीकरणार्थं परेण आत्माकार्यसाधनार्थमपि वा यः उपायः चतुर्विधः [साम-दान-भेद-दण्ड ] प्रसिद्धः तेषु अन्यतरत् दानम् इति ॥

**विषयप्रस्तुतिः-**

दानस्य विषये अस्माकं प्राचीनेषु ग्रन्थेषु रामायण-महाभारत-भागवतादिपुराणाद्येषु बहुत्र अनेकवारं वाचः प्रस्ताविता भवन्ति । विशेषतः भारते भगवद्गीतायां दानं सात्विक-राजस-तामसभेदेन विभज्यते । " दानमिदं मम अवश्यं कर्तव्यम्" इति प्रज्ञापूर्वकं सद्देशे सत्काले सत्पात्राय प्रतिफलापेक्षां विना यादृशं दानकर्म भवति तत् सात्विकम् इति परिगण्यते । ऐहिकस्य आमुष्मिकस्य वा फलस्य उद्देशेन प्रतिग्रहीतुः प्रत्युपकारापेक्षया वा अन्यायमार्गेण संपादितं धनं वस्तु वा दीयते चेत् तदा तद्राजसं परिकीर्त्यते । यदि पुनः असद्देशे असत्काले असत्पात्राय, सत्पात्राय अवमानपूर्वकं वा दीयते, तादृशं दानं तामसमित्युपनिबध्यते ॥

महाभारते पाण्डवानां वनवाससन्दर्भे मार्कण्डेयसमास्यापर्वणि दानस्य महत्वम् अनुवर्ण्यते । मार्कण्डेयमहर्षौ युधिष्ठिरप्रभृतयः "मनुष्यस्य जीवनं कथं भवेत्" इति परिपप्रच्छुः। तदा तस्य उत्तरत्वेन शिबिचक्रवर्तेः उपाख्यानकथनपुरस्सरं दानमहत्वम् उपवर्णयति महर्षिः ॥

विश्वामित्रर्षिसुतः अष्टकः बृहद्यज्ञमेकं चकार । तदा तस्य सोदरौ प्रतर्दनः वसुमनाश्च तत्र समागतौ । एवम् उशीनरपुत्रः शिबिश्च तत्र समाययौ । यागान्ते चत्वारोपि विहारार्थं रथारूढाः सन्तः बाह्यप्रदेशं ययुः । तदा मध्येमार्गं नारदं दृष्ट्वा, सत्कृत्य च तं स्वीयरथे उपावेशयन् । प्रयाणसमये देवर्षिं - "अस्मासु स्वर्गङ्गतेषु, स्वर्गात् कः आदौ निर्गच्छति ? इति जिज्ञासवः स्मः , तदद्य शंसन्तु भवन्तः" इति अप्राक्षुः । तदाह नारदः । अष्टकः आदौ स्वर्गात् निवर्तते, यतः सः यद्यपि सहस्राधिकसङ्ख्याकं गोदानम् अकरोत्, तथापि एकदा

सम्भाषणसमये यदा अनेकाः गाः दृष्ट्वा , मया कस्यैतत् गोधनम् इति पृष्टे सः "मयैव विप्रेभ्यः प्रदताः गावः" इत्यभाषत । एवं सः बहुदाय्यपि यतः अहङ्कारवान् तस्मात् स आदौ स्वर्गान्निवर्तते इति ॥

तर्हि पश्चान्निर्गन्ता कः ? इति पृष्टे नारदः – 'प्रतर्दनः पश्चान्निष्क्रामति , यतः सः कदाचिद्देशान्तरात् स्वारामं हयचतुष्टयभृतं रथमधिष्ठाय प्रस्थितः , तदा मार्गे ब्राह्मणेनैकेन स्वस्तिवाचनपूर्वकं हयार्थं याचितः । कालान्तरे(स्वारामगमनोत्तरकाले) दास्यामीत्युक्तोपि "त्वरितकार्यान्तरार्थं सत्वरं देहि" इति पृष्टः तस्मै हयमेकम् अदात् । पुनः पथि गम्यमाने राज्ञि, द्विजाभ्यां यथापूर्वं स्वस्तिवाचनपूर्वकम् अश्वार्थं याचितः । तेषामनिवार्यतां पश्यन् अश्वयुग्मं ताभ्यां प्रादात् सः पार्थिवः । एवमग्रे गच्छति भूधरे, पुनरेकेन ब्राह्मणेन अवशिष्टाश्वाय प्रयाचितः भूधरः तमपि दत्वा स्वयं रथधुरं गृहीत्वा "यदि इतः परं कोप्यागच्छति तदा नास्ति मम सकाशे किमपि दातुम्" इति व्याजहार । एवं ब्राह्मणेभ्यो ददानोपि प्रतर्दनः यस्मात् कारणात् असूयति तस्मात् सः अष्टकम् अनुसरति इति।

सर्वमेतच्छ्रुत्वा पुनस्ते पृच्छन्ति "कस्ततो निस्सरति स्वर्गात्" इति । "ततः परं वसुमनाः स्वर्गात् प्रच्यवते" इत्याह नारदः । यतो हि जातु मया तस्य गृहं गतम् ; तदा वसुमनसः यागान्त्यसमये देवैः यद्दत्तं पुष्परथं, तस्य स्वस्तिवाचने द्विजा निरता आसन् । तदाहं तस्य पुरतो गत्वा रथस्य सौन्दर्यम् अस्तवम् । तदानीं राजा बुद्ध्वा च ममाशयं मह्यं तद्रथं प्रादात् । अहं तत्स्वीकृत्य निरगाम् । पुनः द्वितीयवारं यदा यागावसाने तादृशमेव रथं देवाः अदुः । अहं पुनः तत्र गत्वा रथं प्रस्तूय रथदानं परिगृहीतवान् । ततो देवाः पुनस्तृतीयवारं तथैव रथं यदा अदुः तदा पुनर्मया गत्वास्तोष्ट स रथः । अस्मिन्नवसरे ममाशयं ज्ञात्वापि राजा 'भवतापि रथं सम्यगस्तोष्ट' इति शंसित्वा तूष्णीमभवत् । परन्तु रथं न मेऽददात् । एवं तृतीयवारं प्रतिग्रहाशां ज्ञात्वापि यस्मात् स रथं न प्रदिदेश तस्मात् सः प्रतर्दनानन्तरं स्वर्गान्निस्सरति ॥

भवत्वेवम् । अवशिष्टयोः युवयोः [शिबि-नारदयोः] कः आदौ प्रच्यवते इति पृष्टो नारदः – "अहमेवादौ प्रच्यवे, शिबिस्तु चिरं स्वर्गे निवसति, तदीयं पुण्यं बहुतरमस्ति इत्यूचिवान्। यतो ह्येकदा कश्चन ब्राह्मणः एनम् अन्नार्थी समेत्य तस्य पुत्रस्य बृहद्भर्भस्यैव मांसेन आहारं सज्जीकृत्य परिवेषय" इत्युवाच। तदा सः तदादेशानुसारं निर्विकारस्सन् पुत्रं हत्वा तन्मांसेन भोजनं संपाद्य आगतवान् । परन्तु तत्र अदृशमाने याचकब्राह्मणे सः अपरमपृच्छत् | स तु "प्रभो! सः याचकब्राह्मणः क्रोधतप्तः सन् इतो भवतो नगरं प्रविश्य, भवतः आरामं, कोशम्, अन्तःपुरं, गजशालाम्, अश्वशालाश्च वह्निना समयोजयत् | एवं दह्यमानं भवतः आरामादिकं पश्यन् सः तत्रैव अस्ति" । इत्युक्ते सः राजा शिबिः पुनर्निर्विकार एव याचकब्राह्मणं प्रेत्य 'भवतः अन्नं भवदुक्तरीत्या सज्जीकृतं , अस्य यातयामतायाः पूर्वं स्वीकुर्वन्तु' इत्यवदत् | तं नृपं दृष्ट्वा स ब्राह्मणः पुनः कोपेन "त्वमेव भुङ्क्ष्व" इत्यादिदेश । स तु राजा विप्रादेशं सम्मानयित्वा तदन्नं भोक्तुम् उदयुङ्क्त | तदा सः ब्राह्मणस्तं निरुध्य , 'राजन्, त्वं जितरुट् | ब्राह्मणेभ्यः सर्वं दातुं शक्यते | त्वमपि तव राज्यं, गृहं, संपत्, स्त्रियः इति सर्वस्वं मेऽदाः' इत्युक्त्वा तस्य सम्मानयामास | तत उपरि पश्यति नृपे तत्र तस्य पुत्रः स्मिताननोऽदृश्यत | ब्राह्मणस्तु वेषमपहाय स्वीयेन चतुर्मुखब्रह्मरूपेण दर्शनं दत्वा सपुत्रं सबान्धवं शिबिं अनुगृहीत्वा तिरोहितोऽभवत् ॥

तदा तस्य अमात्याः सर्वे, कथमेतत् सर्वं त्वङ्करोषि इत्युक्ते राजा – 'अहं कीर्तिकामनया, भोगाशया, संपदाशया वा किमपि नाकरवम् | यत् सत्पुरुषैः प्राचीनैः अनुष्ठितं तमवबुध्य तन्मार्ग एव अचरम् | तेन मेऽद्यैतत् फलं लभ्यते' इत्यवादीत् ।।

**कथा-संदेशाः-**

वेदोक्तेन दानादिसत्कर्मणा अस्माकं बहुतरं श्रेयः संपद्यते | तादृशसामर्थ्यं दानादिष्वस्तीत्यत्र मास्तु संदेहः | तथापि तत्कर्माचरणावसरे अस्माकं मनसि यादृशी भावना, नूनं सिद्धिरपि तादृशी एव | कथयानया अस्माकम् अनेकाः संदेशाः प्रतिपाद्यन्ते |

- सहस्राधिकगोदानं कृत्वाप्यष्टकः अहङ्कारेण यावत्पुण्यभाक् नाभवत् | दानस्य लक्षणमेतत् स्वत्वपरित्यागपूर्वकपरस्वत्वापादनम् | स्वत्वम् = अभिमानः, दानानन्तरमपि दत्ते वस्तुनि "मया दत्तमिदम्" इति वारं वारं स्मर्यते चेत् पुण्यह्रास एव भवति |
- प्रतर्दनविषये तु , दानं स्वीकर्तुं द्विजे आगते सः कालान्तरे ददानीति पृष्टवान् | एवं सर्वम् अश्वं दत्वापि 'विप्राणां दातुम् इदानीं किमपि नावशिष्टं, तस्मादितो मे कोऽपि अन्य आगत्य याचेत' इति चिन्ता नास्ति इत्यचिन्तयत् | अनया प्रतिदानं तादृशभावनासद्भावात् नाश्वदानस्य नैजं[पूर्णं] पुण्यं, तस्य॥
- वसुमनास्तु अपूर्वं रथम् द्विवारं ददौ परन्तु तृतीयावधौ दातुं न मनश्चकार | "कतिवारम् अस्मा एव दद्याम्" इति तिरस्कारभावं मनसि स्वीकृतवान् | तत्र प्रथमद्वितीयदानं निमित्तम् अभवत् , एवं याच्यते इति ज्ञात्वापि अदत्वा अधिकपुण्यं न लेभे ॥
- शिबिश्च ब्राह्मणोऽयं स्वपुत्रजीवमेव अन्नदानरूपेण याचते इति ज्ञात्वापि, मनसि खेदलेशाभावेन प्रवृत्तः। परं स्वीयसर्वस्वे हृतेपि ब्राह्मणविषये असहनां वा प्रतीकारभावं वा अकृत्वा विनीत एव अभूत्। कृद्धब्राह्मणस्य स्वपुत्रमांसभक्षणादेशमपि विधेयभावेनैव चरित्वा, सर्वस्मिन् प्रसङ्गे मनोनिग्रहं सुष्ठु कृत्वा नितरां श्रेय अवाप्तवान् ॥
- शिबेः चरितं दृष्ट्वा चकितैः ब्राह्मणैः कथमेतत्सर्वं ते साध्यमभूत् इति पृष्टे शिबिना दत्तं समधानम् अस्माकं मार्गदर्शकं भवति । सामान्यतः प्राचीनाः, तेषाम् उपदेशाः इत्युक्तौ अधुनातनानाम् अनादरो भवति । परन्तु यः आत्मनः श्रेयोऽर्थयते स अवश्यं प्राक्तनानाम् उपरि गौरवं सम्पादयेत् इति शिबिः अस्मान् पाठयति ॥
- शिबिमहत्वकथनवेलायां नारदेन स्वीकृतस्य आत्मविमर्शकभावस्यापि अभिव्यक्तिः अत्र जायते । सर्वोऽपि पुरुषः परात्मविमर्शात् पूर्वं स्वात्मविमर्शार्थं प्रवर्तेत इति सन्देशः अनेन उपाख्यानेन स्फुटीभविष्यति॥

**उपसंहारः-**

भगवद्गीतायां कृष्णः "यज्ञो दानं तपश्चैव पावनानि मनिषिणाम्" इति दानस्य विशिष्टं महत्वम् अस्तीत्याशयम् उद्धरति। यज्ञतपसोः सह दानप्रवृत्तिर्भवति चेत् तेन नितरां हरितोषः भवतीति अनुसन्धेयो विषयः । यद्यपि दानविषये अनेकाः कथाः पुराणादिप्रसिद्धाः अधुनातनकालप्रसिद्धाश्च सन्ति । तथापि विषयसङ्क्षेपार्थम् एतावता विरम्यते ॥ इति शम्॥

**परामृष्टग्रन्थाः**


| | |
|---|---|
| १ महाभारतम् | श्रीवेदव्यासः |
| २ विष्णुपुराणम् | श्रीवेदव्यासः |
| ३ श्रीमन्महाभारततात्पर्यनिर्णयः | श्रीमध्वाचार्याः |
| ४ गरुडपुराणम् | श्रीवेदव्यासः |


https://doi.org/10.5281/zenodo.7248493

Paper 18

# मनुष्यजन्मसाफल्यं धर्मसेवनात्

**SHIVARAJ**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id- shivaraj.upadhyaya8@gmail.com

## सार: (ABSTRACT)

**मनुष्यः यथा जीर्णभूतानि वासांसि त्यक्त्वा नवीनानि वासांशि गृह्णाति तथा, जीवः जरारोगादिभिः युक्तं जीर्णदेहं विहाय कायान्तरं प्रविशति । देहस्य नाशः अस्ति किन्तु जीवस्य नाशः नास्ति । "न जायते म्रियते वा कदाचित्" इति भगवतः वचनानुसारोऽयं जीवः स्वरूपेण न जायते । मरणमपि न प्राप्नोति । अयं जीवः एकं शरीरं विहाय देहान्तरं प्राप्नोति । देहे हन्यमानेऽपि जीवो न हन्यते । अयं जीवः अनादिर्नित्यः । देहं त्यक्तुम् इच्छा नास्ति चेदपि पुराणं देहं त्यक्त्वा नूतनशरीरं प्राप्नोति एव । एनं जीवं शस्त्राणि न छिन्दन्ति, पावको न दहति । एनम् आपः न क्लेदयन्ति, मारुतः न शोषयति च । अनेकजन्मानतरपुणयवशात् जीवः मनुष्यशरीरं प्राप्नोति**

## प्रस्तावना

मनुष्यजन्म अतीव श्रेष्ठम् । किमर्थं चेत् लोके आहत्य चतुरशीतिलक्षप्रभेदाः सन्ति । तेषु मनुष्यं विहाय शरीरान्तरस्य प्राणिनो वक्तुं सामर्थ्यं नास्ति । बुद्धिशक्तिः, कर्मसु कौशलं च मनुष्य एव प्रभवतः । अतो मानवशरीरं श्रेष्ठं भवति । कृष्णः गीतायां वदति-

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि ।**
**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥** इति ।

मनुष्यः यथा जीर्णीभूतानि वासांसि त्यक्त्वा, नवीन वासांसि गृह्णाति । तथा जीवः जरारोगादिभिः जीर्णदेहं विहाय कायान्तरं प्रविशति । देहस्य नाशः अस्ति, किन्तु जीवस्य नास्ति । '**न जायते म्रियते वा कदाचित्**' इति भगवतः वचनानुसारतोऽयं जीवः स्वरूपेण न जायते । मरणमपि न प्राप्नोति । अयं जीव एकं शरीरं विहाय, देहान्तरं प्राप्नोति । देहे हन्यमानेऽपि जीवो न हन्यते। अयं जीवः अनादिर्नित्यः । देहं त्यक्तुम् इच्छा नास्ति चेदपि पुराणं देहं त्यक्त्वा, नूतन शरीरं प्राप्नोति एव । एनं जीवं शस्त्राणि न छिन्दन्ति, पाठको न दहति । एनम् आपः न क्लेदयति, मारुतः न शोषयति च । अनेक जन्मान्तरपुण्यवशात् जीवः मनुष्यशरीरं प्राप्नोति । '**मनुष्यजन्मसाफल्यं केवलं धर्मसेवनात् ।**' इति गरुडपुराणवचनात्, मनुष्यस्य धर्मपरिपालनम् अत्यवश्यं भवति ।

**जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥**

भगवतो वचनानुसारात् जीवस्य जननमरणे पूर्वनिर्णीत एव । एतस्मिन् लोके अस्माभिः दृश्यते च । अतो मरणविषये दुःखं न करणीयम् । कुरङ्गः शब्देन, मातङ्गः स्पर्शेन, पतङ्गो दीपस्य रूपेण, मीनः गन्धेन, मरणं प्राप्नुवन्ति हि । एकैकमेव गुणमनुभूय

पञ्चप्राणिनः मरणं प्राप्नुवन्ति । मनुष्यः पञ्चगुणानपि एकदैवानुभवति अतो मनुष्यस्य मरणविषये किमाश्चर्यम्? 'मनुष्यशरीरं साधनशरीरं धर्मसाधनम्' इति वचनमपि प्रसिद्धम्। 'धर्मो रक्षति रक्षितः' । अस्माभिः धर्मः पाल्यते चेत् तदा धर्म एव अस्मान् रक्षति ।

**अस्थिराणि शरीराणि विभवो नैव शाश्वतः ।**
**नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसञ्चयः ॥**

इति पुराणवाक्यानुसारात्, अस्माकं शरीरमशाश्वतं, सम्पदपि न शाश्वतं तिष्ठति । मृत्युः अस्माकं अन्तिके एव वर्तते । अतो धर्मसञ्चयोऽस्माभिः कर्तव्यः । अत्र धर्मो नाम कः? इत्यस्य पद्मपुराणे 'धारणात् धर्म' उच्यते इत्युक्तम् । तथैव तत्र,

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैतत्प्रधार्यताम् ।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥**

एवं सूचयति । धर्मस्य सारं सम्यक् श्रुत्वा, तस्य धारणम् अवश्यं कार्यम् । अस्माकं प्रतिकूलं तथा चान्येषां प्रतिकूलमपि कार्यं न करणीयम् । परपीडनम् अनर्थाय भवति । सः अधर्म अस्मानधः पातयति । अतः सर्वथा अधर्मं त्यक्त्वा धर्ममार्गे गन्तुं अस्माभिः प्रयत्नोऽवश्यं करणीयः । यागः, तपः, दानम्, दया, परोपकारः एते सर्वे धर्माः भवन्ति । मनुष्यः स्वविहितसम्पादितधर्माणां मार्गात् स्वर्गं याति । "**स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ।**" इति । तथा-

**धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत ।**
**पापं भवति धर्मोऽपि यो न भक्तैः कृतो हरे ॥** इति ।

इति च भगवद्वाक्येन अधर्मो भक्तैः कृतोऽपि स धर्मो भवति । अभक्तेन धर्मे कृतेऽपि सोऽधर्मो भवति । अतो धर्मं कर्तुं भगवद्भक्तिरावश्यकं भवति इति प्रमाणमस्ति । देवताभिः वृत्रहत्यादि पापकर्म कृतञ्चेदपि लोकरक्षणार्थं, परमात्मनः प्रीत्यर्थञ्च भक्त्या कृतम् । अतः पापकर्मापि पुण्यप्रदमभूत् । मानवाः फलापेक्षेणैव कर्ममाचरन्ति, तस्मात् पापकर्मणाः पापभाग्भवति, पुण्यकर्मणा पुण्यभाक्च । असुराः भगवद्द्वेषेणैव सर्वं कर्म कुर्वन्ति, अतस्तैः कृतपुण्यकर्माण्यपि पापकर्माण्येव जायन्ते । साल्वराजः श्रीकृष्णस्य निग्रहार्थं राजसूययागे प्रवृत्तः, अतस्तस्मै अधोगमनं प्राप्तम् इति दृष्टान्त अस्ति । तस्माद्भगवद्भक्तिः आवश्यकम् । '**भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन**' इति स्वतः भगवान् श्रीकृष्णोऽर्जुनं प्रति वदति। अतो भक्तिर्मोक्षार्थं परमसाधनं भवति । मनुष्यैरनेकपुण्यकर्माणि चीयन्ते चेत्, तदा नूनं स्वर्गफलमवाप्यते । पापात् नरकादि भवन्ति, पापं दारिद्र्यसम्भवं, दारिद्र्यम् अप्रदानेन भवति ।

तस्मात् दानं परं भवति । तद्दानमपि धर्मकार्यमेव । अतस्तद्दानं भगवतः प्रीत्यर्थं भक्त्या क्रियते चेत्, भगवततोऽनुग्रहः प्राप्यते एव । नामुत्र हि सहायार्थं पिता, माता, पुत्री, दाराः, ज्ञानिनश्च तिष्ठन्ति । किन्तु सहायार्थं केवलो धर्मस्तिष्ठति । यथेक्षुहेतोः सलिलं निषेचितं, तृणानि वल्लीरपि च स्वीकुर्वन्ति । एवं नरो धर्मपथे यशः, कामान्, वसूनि च सोऽश्नुते । मानवः स्वजीवितसमये सम्पादितानि यानि धनानि सन्ति, तानि भूमौ प्रहाय परलोकं गच्छति । अस्माभिः पोषिताः पशव अपि मरणसमये अस्माभिः सह नायान्ति, गोष्ठे एव वसन्ति । मरणानन्तरं भार्यादयो गृहस्य द्वारपर्यन्तम् आगच्छन्ति । बन्धुजनाः श्मशानपर्यन्तम् आव्रजन्ति। अस्माकं देहोऽपि चितापर्यन्तमेव । किन्तु परलोकमार्गे

कर्मानुगो गच्छति जीव एक एव । '**परोपकारः पुण्याय, पापाय परपीडनम्**' इति प्रसिद्धोक्तिः । अतः परोपकारोऽपि धर्मो भवति । महापुण्यप्रभावेण मानुष्यं जन्म लभ्यते । यो मानुषं जन्म प्राप्य धर्मञ्चरेत्, स याति परमां गतिम् । अवज्ञाय नरो धर्मं दुःखमायाति याति च। अतो मनुष्यैः धर्मसेवनं कर्तव्यम् अवश्यम्। कस्य पुत्राश्च? पौत्राश्च? कस्य भार्या धनं च वा? कः कस्योपकारः? तस्मात् स्वयं हस्तेन दानादिकं प्रदीयताम्? इत्युक्तिवत् पूर्वजन्मकृतात् दानादत्र बहुधनं लब्धम् ।

तस्मादेवं परिज्ञाय धर्मार्थं दीयतां धनम् । धर्मात् सात्विकोऽर्थः सञ्जायते । धर्मात् सत्कार्योऽभिजायते । धर्मात् मोक्षञ्च प्राप्नोति नरः । तस्माद् धर्मं समाचरेत्। भक्त्या श्रद्धया च धार्यते धर्मः । न बहुभिः अर्थराशिभिः धर्मः धार्यते । अतो धनहीना ऋषयः श्रद्धया धर्मं धृत्वा स्वर्गं गताः। विद्या विनयं ददाति । विनयात् पात्रतां याति । पात्रत्वाद् धनमाप्नोति। धनाद् धर्मं ततः सुखं प्राप्नोति मानवः । भिक्षुकः, कश्चन वदन्निव तिष्ठति, '**अहं जन्मान्तरे दानं धर्मञ्चाकृत्वा, इह जन्मनि दरिद्रोऽभवमिति याचनेऽस्मि, त्वं जन्मान्तरे उदारं धर्मं कृत्वा इह जन्मनि सम्पदा युक्तो गृही सन्तोषेण अस्ति । अधुनाऽपि दानं धर्मञ्चाकृत्वा मादृशो मा भूः, दानं धर्मञ्च कृत्वा, त्वं धर्मज्ञो भव**' इति । पात्रपाणयः भिक्षुकाः लोके दृश्यन्ते एव । धर्मेण हन्यते व्याधिः । धर्मेण आयुः प्रवर्धते । '**यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।**' यज्ञो दानं तपश्चैव मनीषिणां शरीराणि, जन्मानि च पावनानि कुर्वन्ति । धर्मो विश्वस्य जगतः प्रतिष्ठा। येन धर्मस्य नाशो भवति, तं पुरुषं धर्म एव हन्ति । '**स्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमो धर्मः तद्विरुद्धः सर्वोऽपि अधर्मः**' इति गीतातात्पर्यग्रन्थे श्रीमन्मध्वाचार्योक्तिः । जनाः पुण्यक्षेत्रे भारतदेशेजननं प्राप्य, अत्र शुभानामशुभानां च कर्मणां फलं भुञ्जते । अत अस्माकं भारतदेशः कर्मभूमिः, धर्माणां साधनभूमिश्च अस्ति । समस्तजीवराशयः सर्वयोनिषु कर्म भुञ्जते, विशेषतः मानवाः सर्वयोनिषु भ्रमन्ति । जीवः कुकर्मणा भवादिरोगी, शुभकर्मणा अरोगी च भवति । जीवः धर्मकर्मणा दीर्घजीवी, सुखी च भवति । जीव अधर्मकर्मणा क्षीणायुः, दुःखी, अन्धः, अङ्गहीनश्च भवेत् । मनुष्यः सर्वोत्कृष्टेन धर्मकर्मणा सकलेष्टसिद्ध्यादिकम् अवाप्तुं शक्यते । भारतं सर्वजातिषु दुर्लभा मानवी जातिः, अतः मनुष्यं जन्म अतीव श्रेष्ठम्। जीवेन कृतं शुभाऽशुभं कर्म अवश्यमेव भोक्तव्यम् । इदं मनुष्यशरीरं धर्मस्याऽयतनम्, तस्मात् यत्नादिदं शरीरं परिपालयेत् । धर्मे सीदन्नपि हि, न तु अधर्मं समाचरेत् । सर्वेषु जन्तुषु धर्मो हि भगवान्, स एव गतिश्च । दानस्य धर्मस्य च पात्रमासाद्य शक्तितः निषेवेत । यत् उपास्यते तु तत्पात्रं सर्वतस्तारयति । परमापद्गतेनापि स्तेयं न कार्यम् । स्तेयादप्यधिक अधर्मः कश्चिन्नास्ति इति स्मृतिगीतिः । मतिमान् मनुष्यः, कः धर्मः? कः अधर्मः? एतद्विचार्य धर्म सङ्ग्रहमाचरेत् । नानाविधनरकसम्पाताद् उत्थितः पुरुषः स्थावरादितनुं लभते । जीवो भाग्यवशात् पुनः मानुषजन्म लभते । तत्र गर्भवास अतिदुःखदः। ततः कर्मवशात् जन्तुः यदि वा जायते भुवि बाल्यादिबहुदोषेण पीडितो वर्तते । पुनः यौवनमासाद्य तत्रापि दारिद्र्येण, रोगेण, अनावृष्ट्यादिना वाऽपि प्रपीड्यते । पुनः वार्धक्येन अनिर्वाच्यां लभेत्पीडाम् । ततो मनुष्यो नूनं मरणमवाप्नुयात् । तस्मान्मनुष्य अधिकं दुःखं संसारे अनुभूयते । ततः कर्मवशात् जन्तुः पुनरेव प्रजायते ।

**जायते म्रियते जन्तुः जायते म्रियते पुनः ।**
**धनं यदि भवेद् गेहे रक्षणात् तस्य किं फलम् ॥**

धर्मात् परं किमपि नास्ति अतो धर्मकार्येषु धनस्य उपयोगः करणीयः । दानं स्वर्गस्य सोपानम् । दानं किल्बिषनाशनञ्च । सत्यं, शौचं, क्षमा, शान्तिः, तीर्थपुण्यादिकैः धर्मश्च, पालितो येन, तस्य देहे रोगो न जायते । कलेवरे पीडा च न जायते । न श्रमः । न च वै ग्लानिः। न च स्वेदो, भ्रमश्च तस्य जायते । मनुष्यः रात्रौ कामाग्निपरिपीडितो निद्रां न कुरुते। दिवावापि अर्थोपार्जनचिन्तया । ततः कुतः सौख्यम्? मनुष्यो जराभिभूतोऽपि पत्नी पुत्रादिबान्धवैरशक्तत्वाद्दुराचारैः भृत्यैः दुःखं परिभूयते । धर्मं, अर्थं, कामं, मोक्षं च जरया न साधितुं शक्यते । तस्मात् युवा शक्तः साधयितुं धर्मं समाचरेत् । वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते । वातादीनां समूहेन अयं देहः परिकीर्तितः । तस्मादात्मन इदं शरीरं व्याधिमयं ज्ञेयम् । मृत्युना पीडितं नरं परित्रातुं नौषधं, न तपः, न दानं, न मन्त्राः बान्धवाश्च न शक्नुवन्ति। कर्मसङ्क्षयात्, अर्थात् कर्मानुसारात् जीवः, फलमनुभूय देहभेदेन वियोगं प्राप्नोति । मरणं तु तस्य निर्दिष्टं भवति, न नाशः परमार्थतः । मनुष्यो मरणकाले बान्धवैः परित्यक्तः, प्रियैश्च परिवारितो दीर्घेण निःश्वसन् मृत्युमाप्नोति । मरणकाले सः शय्यान्तः परिवृतश्च मुह्यते च मुहुर्मुहुः । याचमानश्च सलिलं शुष्ककण्ठौष्ठतालुकः, चिन्तयति च, वित्तानि "**कस्यैतानि मृते मयि**" इति । अर्थस्य उपार्जने दुःखं, आर्जितस्य रक्षणे दुःखं, नाशे दुःखं, व्यये दुःखं, तस्मात् अर्थस्यैव कुतः सुखम्? इति पद्मपुराणं विवृणोति । तथा च अनाथं विकलं, दीनं, बालं, वृद्धं, क्षुधातुरं नानुकम्पन्ति ये मूढाः, ते नरकं यान्ति । यो नरः स्वयं धर्ममधर्मं वा कर्म करोति, सः तत्फलं भुङ्क्ते । नृभिः शुभाशुभफलं च अत्र भुज्यते । आहार, निद्रा, भय, मैथुनानि सामान्यमेतानि पशुभिर्नराणाम् । विवेक एकोऽधिको मनुष्येऽस्ति। विवेकहीनो मनुष्यः पशुभिः समानो भवति। अतः विवेकपूर्वकं सम्यक् धर्मं विदित्वा अवश्यं करणीयः ।

**ऊर्ध्वबाहुर्विरौम्येषः न च कश्चित् श्रुणोति माम् ।**
**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥** इति ।

इदन्तु भगवतो वेदव्यासस्य वचनम् । '**मन एव मनुष्याणां कारणं बन्धमोक्षयोः**', अतो मनःपूर्वकं यद्दानधर्मादिकं क्रियते, तेन मुक्तिः प्राप्यते । यो न करोति स संसारे तप्तमानोऽतीव दुःखमनुभवति । तस्मान्मनुष्यजन्म अतीव घोरं दुःखात्मकञ्चास्ति । यद्यस्माभिर्धर्मो न क्रियते चेत्, तदा आगामिनि जन्मनि दुःखमनुभूयते पापवशात् । भक्त्या यदा धर्ममिह जन्मनि आचर्यते, तदा आगामिनि जन्मन्यपि सुखमनुभूयतेऽस्माभिः अतो 'मनुष्यजन्मसाफल्यं केवलं धर्मसेवनेनैव । तस्मात् धर्माचरणम् अवश्यं कर्तव्यम् । सर्वेऽप्येवं धर्ममार्गेण गन्तुं भगवानस्माकं मनः प्रेर्यताम् इति प्रार्थनां करोमि ॥

**आकरग्रन्थाः**


| **ग्रन्थनामः** | **रचयितारः** | **प्रकाशकाः** |
|---|---|---|
| १. श्रीमहाभारततात्पर्यनिर्णयः | श्रीमध्वाचार्यः | पूर्णप्रज्ञविद्यापीठम्, बेङ्गळूरु । |
| २. गरुडपुराणम् | श्रीवेदव्यासः | चतुर्वेदिसेवा ट्रस्ट्, बेङ्गळूरु । |

| | | |
|---|---|---|
| ३. श्रीमद्भगवद्गीता | श्रीवेदव्यासः | ईशावास्यप्रतिष्ठानम्, उडुपि । |
| ४. पद्मपुराणम् | श्रीवेदव्यासः | जयचामरेन्द्र ग्रन्थरत्नमाला, मैसूरु । |
| ५. ब्रह्मवैवर्तपुराणम् | श्रीवेदव्यासः | जयचामरेन्द्र ग्रन्थरत्नमाला, मैसूरु । |
| ६. भागवतपुराणम् | श्रीवेदव्यासः | श्रीपेजावर अधोक्षजमठः, उडुपि । |


https://doi.org/10.5281/zenodo.7248539

Paper 19

# आर्षविज्ञानम्

**LAKSHMISHA M**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id- lakshmeeshabhat92@gmail.com

## सार: (ABSTRACT)

**अद्यतनानां कृते गणकयन्त्रमेव सर्वं ज्ञापयति । मनुष्यः यन्त्राधीनः । यन्त्राकारेण वस्तुनः परिचयं भवति । तस्य प्रामाण्यं च स्वीक्रियते । गणकयन्त्रमपि मानवसृष्टित्वात् तस्य प्रामाणयमङ्गीकर्तुं स्पष्टतया न शक्यते । उत दुष्टपरमाणु (वैरस्) प्रवेशेन अज्ञापज्ञविअपरीतज्ञकृतकारितगणकयन्त्रादिकमपि अयथार्थं वदेत् । किन्तु ऋषीणां तु प्रत्यक्षसिद्धत्वात् प्रमाणमेव । ऋषयः वेदार्थविज्ञानेन वस्तुस्वरूपं तस्य गुणधर्माणि तस्य देशकालपरिमाणं च जानन्ति स्म । ते तु वेदस्यार्थं वेदान्तग्रन्थैः विमर्शं कुर्वन्ति स्म ।**

**पीठिका**

लोके तु ज्ञानिनो बहवः सन्ति । किन्तु विज्ञानिनोऽल्पा एव । ज्ञानं नाम सामान्यज्ञानम् । वस्तुनः नामरूपादिज्ञानं सामान्यज्ञानम् । तद्वस्तुनः कारणादिवेदनम् उपादानीभूतपरमाणूनां वेदनं सृष्ट्यादिकालव्याप्तिज्ञानमेव विज्ञानम् । अतस्तु विशेषज्ञानं विज्ञानम् । इति विज्ञानस्य सामान्यपरिचयः ।

प्राचीनकाले ऋषय एव विज्ञानिन आसन् । ते न केवलं वस्तुनां किन्तु वस्तुप्रेरकाभिमानिदेवतायाः चिन्तनमपि कुर्वन्ति स्म । तेन देवतानुग्रहेण वस्तुनः समग्रज्ञानं प्राप्नुवन्ति स्म । तदन्तर्गतभगवज्ज्ञानेन वस्तुनः सम्पूर्णविशेषज्ञानमपि प्राप्नुवन्ति स्म ।

**"तत्र तत्र स्थितो विष्णुस्ततच्छक्तीः प्रबोधयन् ।"**

–इत्युक्तदिशा "**भगवतः का शक्तिरत्र अभिव्यक्ता?**" इत्यादिकं ज्ञानदृष्ट्या विदित्वा वस्तुनः विशेषज्ञानं सम्पूर्णतया प्राप्नुवन्ति स्म । तस्मात् त एव विज्ञानिनः न केवलं ज्ञानिनः। इदानीं तु विज्ञानिशब्दः केवलं रूढार्थकः, न यौगिकः ।

**विवरणम्**

अद्यतनविज्ञानिनः गणकयन्त्रसहायेन वस्तुनः रूपं परिमाणं, विस्तीर्णं गुरुत्वं च जानन्ति। एवम् अनुमानेन तस्य प्रामाण्यम् अङ्गीकुर्वन्ति । प्राचीनकाले ऋषयस्तु स्वयोगशक्त्यैव वस्तुदृष्ट्या स्पर्शेन वा तत्कारणीभूतपञ्चभूतानां परिमाणं जानन्ति स्म । दृष्टान्तार्थं घटपदार्थं स्वीकुर्मः । घटस्य उद्धरणमात्रेण अभ्यासबलेनैव अत्र कति प्रमाणतया जलांशमस्ति इति शीतस्पर्शज्ञानेन जलस्य प्रमाणम् अनुभवन्ति स्म । उष्णस्पर्शानुभवेन तैजसांशं वदन्ति स्म । "**सञ्ज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्**" इति ब्रह्मसूत्रानुसारेण सर्ववस्तुषु पृथिवीजलतेजसां प्रमाणभावात् जानन्ति स्म । तथा तस्य गुरुत्वलघुत्वगुणज्ञानेन अनिलांशं जानन्ति स्म । तस्य शब्दं श्रुत्वाऽऽकाशंशं मन्वते स्म ।

ऋषीणां कृते तु वेदमन्त्रा एव गणकयन्त्रस्थानीया आसन् । यथा अद्य गणकयन्त्रसाह्येन वस्तुनः गुणधर्मादिकं जानन्ति तथा ऋषयः वेदमन्त्रार्थबोधेन वस्तुस्थितभगवद्रूपापरोक्ष्येण जानन्ति स्म । यथेदानीं दूरदर्शनसहायेन देशान्तरस्थितवस्तु पश्यन्ति तथा योगस्थर्षयः हृदि विद्यमानभगवद्योगेन सर्वं पश्यन्ति स्म । अथवा योगमार्गेण यत्र वस्तु वर्तते तत्र मनः प्रेषयन्ति स्म । तत्र मनः स्वचक्षुषा वस्तु दृष्ट्वा प्रतिनिवर्तते । इत्येवं प्रत्यक्षेण दूरस्थवस्तु पश्यन्ति स्म । यथाऽद्य दूरवाणीसहायेन दूरस्थशब्दं श्रोतुं शक्यते तथा योगस्थं मनः श्रवणसहायेन श्रोतुं समर्थं भवति स्म ।

अद्यतनानां कृते गणकयन्त्रमेव सर्वं ज्ञापयति । मनुष्यः यन्त्राधीनः । यन्त्राकारेण वस्तुनः परिचयं भवति तस्य प्रामाण्यं च स्वीक्रियते । गणकयन्त्रमपि मानवसृष्टित्वात् तस्य प्रामाण्यं अङ्गीकर्तुं स्पष्टतया न शक्यते । उत दुष्टपरमाणु(वैरस्)प्रवेशेन अज्ञाल्पज्ञविपरीतज्ञकृतकारित गणकयन्त्रादिकमपि अयथार्थं वदेत् । किन्तु ऋषीणां तु प्रत्यक्षसिद्धत्वात् प्रमाणमेव ।

ऋषयः वेदार्थविज्ञानेन वस्तुस्वरूपं तस्य गुणधर्माणि तस्य देशकालपरिमाणं च जानन्ति स्म । ते तु वेदस्यार्थं वेदान्तग्रन्थैः विमर्शं कुर्वन्ति स्म । ब्रह्ममीमांसाशास्त्रेण वेदमन्त्राणामर्थं निर्णीय यथार्थज्ञा अभवन् ।

वेदान् सहायतया स्वीकुर्वतामृषीणां तदवलम्बनात् तस्याप्रामाण्येन वस्तुनः अयथार्थप्रतीतौ अवकाशो नास्ति । वेदानामपौरुषेयत्वात् स्वतः प्रामाण्यमङ्गीकृतम् ।

"**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा**" इति श्रुत्यैव अपौरुषेयत्वं सिद्ध्यति । प्रामाण्यस्य स्वतस्त्वाङ्गीकारात् तदुक्तदिशाचरणेन फलादिकं स्वानुभवसिद्धत्वात् न पुनः आत्माश्रयादिदोषप्रसक्तिः ।

वेदे तु सर्ववस्तुविषयकविशेषपरिचयो वर्तते । परममुख्यतया भगवान् विष्णुः सर्ववेदप्रतिपाद्यः । अमुख्यतया देवताः प्रतिपाद्याः । चराचरात्मकं जगत् सर्वं देवताभिमन्यम् । भगवदन्तर्भूतञ्च । तदेव उपनिषदि स्पष्टतया उक्तम् ।

"**एकविज्ञानेन सर्वविज्ञानं भवति**" इति ।

सर्वप्रधानः विष्णुः वर्तते इति ज्ञानेनैव सर्ववस्तूनां विशेषज्ञानं भवति ।

"**यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञानं स्यात् । यथा सौम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् । यथा सौम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात्**" इति ।

यथैकेन मृत्पिण्डज्ञानेन तत्सदृशं सर्वं मृद्विकारं विज्ञातं भवति तथा भगवज्ज्ञानमात्रेण ज्ञानानन्दरूपत्वेन तत्सदृशाः सर्वजीवा विज्ञाता भवन्ति ।

यथैकेन प्रधानीभूतमुक्तामणिज्ञानेन सर्वे अप्रधानाः लोहा विज्ञाता भवन्ति । तथा प्रधानपुरुषोत्तमभगवज्ज्ञानेन अप्रधानं चराचरात्मकं जगत् विज्ञातं भवति ।

"**सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।**" इत्यादि श्रुत्या भगवज्ज्ञानोत्सुकानां निष्कामकर्मिणां तु अन्यज्ञानेन किं प्रयोजनमिति चेत् सर्वविषयकज्ञानं भगवदपरोक्षकारणमिति वक्ति । '**ॐ अभिव्यक्तेरिति आश्मरथ्यः ॐ**' इति ब्रह्मसूत्रेण स्पष्टीभूतम् ।

यथैकेन अल्पीभूतेन कार्यभूतेन नखनिकृन्तनेन तज्ज्ञानेन सर्वस्य प्रधानीभूतस्य बहुस्थानगतस्य कारणभूतस्य कार्ष्णायसस्य ज्ञानं भवति, तथा अल्पशक्तियुतस्य अल्पस्थानगतस्य कार्यभूतस्य जीवजडज्ञानेन सर्वशक्तियुतं प्राधान्येन वर्तमानं सर्वगतं सर्वकारणभूतं ब्रह्मविज्ञातं भवति । इत्येतावता ऋषीणां सर्वविषयकविज्ञानमासीदिति बुध्यते । तत्कथमित्यत्र किञ्चित् पश्याम । सर्वविषयकविज्ञानं वेदाद्भवति वेति पश्याम तावत् ।

"**प्राक्तनाः स्थावरेषु जीवभावं न मन्यन्ते स्म । तान् जडा इति मन्यन्ते स्म ।**" इत्येवं अद्यतनाः पुराणकालं दूषयन्ति । स्थावरेषु जीवस्य अस्तित्वं कश्चित् '**जगदीशचन्द्र बोसनामैकः**' साधितवान् इति अद्यतना मन्यन्ते । तन्न युक्तम् । अनादिसिद्धश्रुतौ तु जङ्गमवत् स्थावराणामपि जीवभावः सिद्धः । सा च श्रुतिस्तु–

**ॐ ओषधयः सं वदन्ते सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥**

यदि गृहस्थः यजमानः स्ववर्धयित वृक्षान् हत्पूर्वकं स्पृशेत् तर्हि वृक्षा अपि प्रीत्या स्पन्दनं कुर्वन्त्येव । संवदन्ति च इत्येवं स्पष्टम् ।

त्रयोदशशतके तु "**आचार्यमध्वाः प्रायोगिकरीत्या हस्ततले बीजेन वृक्षम् उत्पादितवन्तः**" इति इतिहासपुटे स्पष्टमुक्तञ्च । अद्यतनास्तु विज्ञानिनः इतिहासमदृष्ट्वैव प्रावदन्निति तु स्पष्टम् । तेनास्माकमपि नो हानिः । किन्तु इतिहासस्तु विस्मृतस्तैः । तेषां सिद्धसाधनतादोषश्च ।

"**जगतः सृष्टिः कदाऽभूत्?**" इति अद्यतना विज्ञानिनः भूतलस्य परमाणूनवेक्ष्य द्विशतकोटिवर्षपूर्वं जगत् सृष्टमिति वदन्ति । तथा नाशोऽपि द्विशतकोटिवर्षानन्तरं भविष्यति इति भणन्ति च । प्राचीनर्षयस्तु भागवतपुराणमाश्रित्य तत्रोक्त जगतः आयुरित्थं व्याहरन्ति ब्रह्मण एकदिनं (रात्रिकालं विहाय) ४३२ कोटिवर्षाः । इदानीं तु द्विशतकोटिवर्षाः अभवन् । २३२ कोटिवर्षा भवेयुरिति तदनन्तरमेव प्रळयमिति सिद्ध्यति । तथाऽपि आधुनिकाः तदजानन्त इदानीमेव प्रळयभीत्या त्रस्ता भवन्ति इत्याश्चर्यम् ।

सामान्यतो लोकास्तु त्रयः । भूः, भुवः, स्वः इति भेदेन । भूर्नाम भूमिः । अस्माकं निवासस्थानम् । भुवो नाम अन्तरिक्षम् । स्वर्नाम स्वर्गलोकम् । अन्तरिक्षलोकेऽपि बहुप्रभेदाः सन्ति । तत्रापि जीवस्य गमनागमने भवतः । आम्, अद्यतना विज्ञानिनः जडभूतपरमाण्वादिविषये किञ्चित् जानन्ति न चैतन्यविषये । देहाद्भिन्नः मरणानन्तरं जीवः कुत्र गच्छति? इति स्त्रीगर्भं कथं प्रविशतीत्यद्यतनविज्ञानिनः स्वसूक्ष्मदर्शकसहायेनापि न पश्यन्ति । परन्तु श्रुतिस्तं बोधयति । जीवः स्वकृतदुष्टकर्मानुसारेण, तत्फलरूपेण नरकं गत्वा दुःखमनुभूय तत्र स्वकृतसत्कर्मानुसारं स्वर्गं गत्वा, सुखमनुभूय भुवि जायते ।

स्वर्गं तु चन्द्रलोकमार्गेण गच्छति ।

"**धूमादभ्रमभ्रादाकाशमाकाशाच्चन्द्रलोकं यथेतमाकाशम्, आकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति**" इति कार्षायणश्रुतेः सूक्तानि आचार्यैः सूत्रभाष्ये सङ्गृहीतानि ।

**ॐ यथेतमनेवं च ॐ** इति व्यासोक्तिश्च ।

जीवः सत्कर्मणः फलं भोक्तुं धूमलोकं प्रविशति । धूमलोकादभ्रं प्रविशति । अभ्रादाकाशम्, आकाशाच्चन्द्रलोकं प्रविशति । चन्द्रलोकमार्गेण स्वर्गं गत्वा सुखमनुभवति । इत्येवं, यथा गच्छति तथा जीवः पुनरावर्तते वा इत्यपि विचार्यते । वेदान्तशास्त्रे यथा गच्छति तन्मार्गेणैव पुनर्भुवि आगच्छति अथवा चन्द्रलोकादाकाशम्, आकाशाद्वायुं, ततः धूमलोकं गत्वा, अभ्रे प्रविश्य अभ्रात् मेघे सम्पद्यते । घनीभूतमेघे यदा सूर्यप्रकाशेन द्रवीभूय वृष्टिरागच्छति तदा जलेन साकं प्रवर्षति । तदनन्तरं स्थावरेषु प्रविशति । स्थावरस्थे फले तिष्ठति । यदा पिता तत्फलं, धान्यं वा खादति तदुदरं प्रविश्य रेतो भवति । तद्रेतो मातरं प्रविशति ।

"**ततो रेतसिञ्चमेवानुप्रविशत्यथ मातरमथ प्रसूयते**" इति कौण्ठव्यश्रुतेः ॐ रेतः सिग्योगोऽथ ॐ इति सूत्रेण च मरणानन्तरं जीवस्य गमनागमने निश्चीयेते । इत्येवं प्राचीनकालस्थमुन्यवगतं श्रुत्यनुसारि जीवविज्ञानम् ।

न जीवः स्वत एवङ्करोति । किन्तु जीवनियामकत्वेन कोऽप्यन्यः करोतीत्येतत्सिद्धमेव । कः सः? इति प्रश्ने प्राप्ते, नारायण एव तं तेषु तेषु लोकेषु नयति । तदेव श्रुत्यर्थः सूत्रार्थश्च। विस्तृततया आदिगुरुणा वेदव्यासेन सङ्गृहीतः व्याहृतश्च ॥

यदुच्यते श्रुतिषु, तत्तथैव वेदव्यासेन ब्रह्मसूत्रेषु तत्सर्वं प्रायोगिकः, युक्तिसिद्धान्तया प्रमाणीकृतश्च । इदानीन्तन वैज्ञानिकतन्त्रजालेषु सूक्ष्मदर्शकादिना दृश्यते चेत् प्रत्यक्षसिद्धश्च भवेद्भविष्यति । वर्तमाने च सन्ति केचन दृष्टान्ताः। आगमः प्रत्यक्षात् प्रबलतरप्रमाणम् । प्रत्यक्षेण असिद्धोऽपि आगमप्रामाण्यात् देहभिन्नजीवस्य अस्तित्वं सर्वेऽपि अङ्गीकुर्युरेव ।

जीवाः कति सन्ति? तेषां सङ्ख्याशास्त्रे उक्ता वा इति चेत् आम् ।

"**परमाणुप्रदेशेऽपि ह्यनन्ता जीवराशयः**" इति स्मर्यते । तस्माज्जीवा अणव इत्येवमवगम्यते ।

जीवाः के? तेषामस्तित्वं किम्? स्वरूपं कथं वर्तते ? तेषां प्रवृत्तेः कारणं किम्? तेषां विभागः कथं क्रियते? इत्यादि प्रश्नाः मनसि उत्पद्यन्ते । वेदे तु सर्वप्रश्नानामपि समग्रतया उत्तराः प्रदत्ताः ।

ये भगवदधीनप्रवृत्तिमन्तः ते जीवाः । तेऽनन्ताः । ते वस्तुतः सूक्ष्माः । शरीरादिसम्बन्धेन तेषां स्वशारीरे गन्धवत् व्याप्तिः युज्यते । स्थूलशरीरसम्बद्धजीवा अनन्तो विद्यन्ते । शरीरमपि लिङ्गसूक्ष्मस्थूलभेदेन प्रायस्त्रिविधम्।

जीवस्वरूपे शरीरे च इन्द्रियाणि भवन्ति । तैः जीवः ज्ञानं सम्पादयति । कर्म कुरुते च । "**सप्त प्राणाः प्रभवन्ति तस्मात्**" इति श्रुतेः चक्षुश्श्रोत्रजिह्वाऽघ्राणत्वङ्मनोबुद्धयः सप्तेन्द्रियाणि जीवस्य ज्ञानवर्धने उपाकुर्वन्ति । इत्ययं "**सप्तगतेः विशेषितत्वाच्च**" इति सूत्रेऽपि स्पष्टम् ।

पञ्चकर्मेन्द्रियाणि । वाक्पाणिपादपायूपस्था इति । तैः जीवः वचनग्रहणगमन विसर्जनादि कर्म करोति । "**द्वादश वा एते प्राणाः**" इति कौण्डिन्यश्रुतौ द्वादशेन्द्रियाणि सन्तीति प्रबुद्ध्यते ।

जीवानामन्यदज्ञरूढिनाम आत्मेति । आत्मनियामकः परमात्मा । परमात्मा ज्ञानानन्दस्वरूपकः । तस्य प्राकृतिकशरीरादीनि न विद्यन्ते । सः सर्वजीवविलक्षणः सर्वजीवान्तर्यामी च ।

"**तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ।**" इत्येवं तैत्तिरीयोपनिषदि ब्रह्मणो ज्ञानानन्दस्वरूपं वक्ति । तस्य ज्ञानानन्दस्वरूपस्य प्रतिबिम्बाः जीवा अपि ज्ञानानन्दस्वरूपवन्तः । यथाऽस्माकं देहस्य प्रतिबिम्बः दर्पणे देहवत् दृश्यते । प्रतिबिम्बस्य जडत्वेऽपि जीवाधीनत्वं यथा विद्यते तथा जीव अल्पः भगवत्सदृशः तदधीनत्वाद्भगवत्प्रतिबिम्बः, ज्ञानानन्दस्वरूपत्वे एव सादृश्यम् । परमात्मा सर्वज्ञः सम्पूर्णानन्दवान् । जीवस्तु तत्प्रतिबिम्बत्वादल्पज्ञोऽल्पसुखी च । दोषयुक्तश्च ।

**रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ॥** (ऋ.सं. ६-५७-१८) इति श्रुतेः, जीवस्य भगवत्प्रतिबिम्बत्वं सिद्ध्यति ।

भगवतः प्रत्येकस्वरूपं प्रति प्रतिरूपः जीवः प्रतिबिम्बो बभूव । सः जीवस्तु अस्य रूपं भगवत्स्वरूपं, '**प्रतिचक्षणाय**' द्रष्टुमुत्सुको भवेत् । अपरोक्षज्ञानाय यतेतेत्यर्थः । जीवस्वरूपं प्रति भगवत्स्वरूपं नियामकतया बिम्बत्वे नास्ति इत्यर्थश्च । तदस्य रूपं जीवस्य अपरोक्षज्ञानाय इति बोधयति । नान्यस्य भगवद्रूपं अन्यस्मै अपरोक्षीकर्तुं शक्यते इत्यपि बुध्यते ।

सात्त्विकराजसतामसभेदेन त्रिविधचेतनाः भवन्ति । सत्त्वगुणप्रचुराः सद्गुणवन्तः सत्कर्मकर्तारः सद्बुद्धिमन्तो जीवाः सात्त्विकाः । देवतादिमनुष्योत्तमपर्यन्ताः । राजसाः मिश्रबुद्धिमन्तः सदसत्कर्मकर्तारः । तामसा दुष्टा उग्रगामिनः विपरीतज्ञानवन्तश्चासुरादयः ।

**आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।**
**हिरण्ययेन सविता रथेनाऽदेवोयाति भुवनानि पश्यन् ॥**

सूर्यः भुवि स्थितान् सत्कर्मकर्तॄन् जीवान् स्वर्गं प्रति नयति । स्वर्गस्थान् जीवान् भूमौ जीवयति च इति मन्त्रार्थः ।

सूर्यः स्वतैजसशक्त्या स्वकिरणेनैवं करोति ।

सात्त्विकचेतनाः, धनात्मकशक्तिमन्तः (Positive energy) । तामसजीवाः ऋणात्मकशक्तियुताः (Negative energy) । अस्माकं परिसरे धनात्मकशक्तियुता देवता भवेयुस्तदा सत्कर्म कर्तुं आशा उद्बुद्ध्यते । तदा सः शास्त्रचिन्तनादिकर्मयुतो भवति । तदर्थमेव श्रुतिस्मृतिषु देवालये जपादिकरण आदेशो दत्तः । तत्रैव मनसः स्थैर्यं

जायते । यदा ऋणात्मकशक्तियुताः दैत्यादयः परिसरे भवेयुस्तदा जीवः दुष्टकर्मणि प्रयुङ्क्ते । तस्य दुष्टकाम उद्बुध्यते क्रोधादिकं जायते ।

न केवलं देवदैत्यादीनां प्रभावः परिसरे । अस्माकं देहेऽपि देवता असुराश्च भवन्ति । सज्जीवेन देवतावेशेन, तेषां मनःप्रेरणेन बहुसत्कर्म क्रियते । तस्मै सज्ज्ञानमाविर्भवति । यदा दैत्यः मनःप्रेरयेत् तदा दुष्टः सन् दुष्कर्म करोति । अन्यान् पीडयति । तेनाधोगच्छति सः । तस्मात् देवतानामेव सत्प्रेरणार्थं श्रुतिषु देवतास्तुतिः व्यवस्थिता । जीवेन कृतया देवतास्तुत्या तेषामनुग्रहो भवेदिति प्रथमतः '**अग्निमीळे**' इति प्रारब्धः । सोऽग्निदेवो वागिन्द्रियप्रेरकः, तेनैव जीवः सन्मार्गे याति । असुरावेशात् दुर्मार्गे यास्यति । "**असुरा अशुभेष्वेव कामादेरभिमानिनः। तत्र कामः कालनेमिः.....** ।" इत्यादि ब्रह्मतर्कवचनात् दुष्टकामस्य कालनेमिप्रेरणात् दुष्टः दुष्कर्मणि नियुङ्क्ते ।

**उपसंहारः**

एवं प्राचीनकाले सर्वे सामान्यतः एतत्सर्वं जानन्ति स्म । सज्जनसङ्गं कुर्वन्ति स्म । दुर्जनदूरीकरणं च । तस्मात्तेषां मनः, हृदयं देवगर्भगृहमिवासीत् । त्यक्तकामादिना, अनुत्पादितक्रोधादिना ते निर्धूतकल्मषा आसन् । तेन ते नित्यनैमित्तिककर्माणि सदाऽविहाय कुर्वन्ति स्म । कर्म भगवदाराधनरूपेण निर्वहन्ति स्म । तेन भगवदनुग्रहं प्राप्नुवन् । "किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने? तेषां कृते सर्वं सुलभतमम् । अखिलास्ते अनिद्राः, अनलसाः, शुद्धा अमत्सरा आसन् । तेन भगवदनुग्रहेण भगवद्दर्शनात् भगवन्तमेव प्राप्नुवन् । स्वरूपानन्दप्राप्तिर्निरन्तरा निरवधिका लब्धा तेषाम् ।

वयं तु तान् निन्दामः । ऋषयः मानवाः, अनागरिका इति । ते सहस्राधिकवर्षपर्यन्तं नीरोगा जीवन्ति स्म । वयं शतायुष्मन्तोऽपि रोगभूयिष्ठाः, जराबाधिता एव । आयुर्नष्टेऽपि, इन्द्रियक्षयेऽपि, दन्तपातेऽपि, अस्माकं जिह्वाचापल्यं न नश्यति शक्तिह्रसितचक्षुष्मन्तोऽपि विषयदर्शनलालसा न ह्रसिता । युवानो ज्ञानिनोऽपि विज्ञानिनः कदा भवन्ति? यदा ऋषिं मार्गदर्शकं मत्वा तेनैव मार्गेण वयमपि गन्तुं प्रयत्नादिकं करवामश्चेत् तदा ।

अस्तु प्रयत्नः । प्रयत्नस्तु जीवनिष्ठः तेनैव करवाम । विलम्बो मास्तु । "**प्रयत्नमेकमग्रतो विधाय भूतिमाप्नुयुः**" इति । भगवद्वाणी अस्माकं कर्णे प्रविश्य हृदये सदा व्यनुनदेत् । ज्ञानार्थं शास्त्राध्ययनं कुर्याम । अध्ययनं न केवलं बाल्यपर्यन्तं, तत्तु जीवनपर्यन्तं, जीवपर्यन्तं च । "**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । तद्धि तपस्तद्धि तपः** ।" इत्यार्षवाणी स्मारयति । शास्त्राध्ययनमेव तपः । तेन तपसैव मानवा मुनयोऽभवन् । ऋषयो विश्वामित्रादय लोकमित्रादयोऽभूवन्तेषां साधनेन ।

वयमपि तेषां मार्गे सञ्चराम । दान्ताः शान्ताश्च भूत्वा वेदान्तमतयः शास्त्रश्रवणं सन्तः, सन्ततमनन्तचिन्तकाः श्रुतार्थं मनसा स्मरन्तः स्याम । कालान्तरे सम्पूर्णो भवेत् । ध्यानसौधार्थं प्रथमशिलान्यासः, इन्द्रियनिग्रहः कामादिदोषदूरीकरणञ्च । वयं तत्कर्तुं शक्ताः यदि चेतो नो वशे नो वा वयं तद्वशे वेति वयमेव पृच्छेम ।

https://doi.org/10.5281/zenodo.7251462

Paper 20

# कालिदासस्य कवितावैशिष्ट्यम्

**RAJENDRA PRASAD**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - prasadrajendra944@gmail.com

## सार: (ABSTRACT)

**महाकवीनां समालोचकानां संस्कृतसाहित्याध्ययनेषु इयं सूक्तिः प्रख्याता ;उपमा कालिदासस्य' इति । यद्यपि महाकवेः कालिदासस्य काव्येषु अनेकेषां शब्दालङ्काराणामर्थालङ्काराणां च प्रयोगे दृश्यते । तथापि महाकविः कालिदास्ः उपमानालङ्कारास्य स्वेतराणखिलान् कवीनतिशेते । अत एव अयं कविः 'उअपमा सम्राट' इत्यभिधीयते । कालिदासस्य उपमासु पूर्णता, रम्यता, विविधता च उपलभ्यते । तादृशकवेः काव्यवैशिष्ट्यमधुना अत्र विचार्यते**

**प्रस्तावना**

**धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः ।**
**ख्यातो वराहमिहिरो नृपतेस्सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥**

इति । अस्य कवेः जन्मस्थानं काश्मीरः, वङ्गभूमिः, राजस्थानं, उज्जयिनी इति विभिन्नतया उल्लेखयन्ति । तत्र निदानं तु सः स्वीय काव्ये उज्जयिनीं बहुधा वर्णितवान् इति । अतः केचन एषः उज्जयिनीजातोऽयमिति । अपरे काश्मीरप्रदेशे एव विद्यमानानां केसरपुष्पानां वर्णनं सम्यक् कृतवान् इति एतं काश्मीरजं मन्यन्ते । एवमेव माळवदेशीयानां वर्णनेन प्रभाविताः जनाः एतं माळवदेशिनं मन्यन्ते । तथैव विदर्भस्य वर्णनादपि ततोऽस्य महानुभाविनः जीवनकालविषये इत्थमिति कश्चित् निर्णयः नास्ति । वस्तुतः विक्रमादित्यस्य कालादर्वाचीनः भोजः, अत एतस्य कालेऽपि कालिदासः आसीदिति उक्तेः विनिगमकं नास्ति । अतः अस्य विषये बहवः कथा कपोलकल्पिता एव । किन्तु तत् काव्यविषये कस्यापि विप्रतिपत्तिः नास्ति । संस्कृत इतिहासे तत्तुल्यः कोऽपि कविः नासीत् । अतः केनचित् कविना उक्तम्–

**पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः ।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥**

इति । कालिदासेन अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम् च इति त्रीणि रूपकाणि, रघुवंशम्, कुमारसम्भवम् इति च द्वे महाकाव्ये, ऋतुसंहारम्, मेघदूतम् इति द्वे खण्डकाव्ये च विरचितानि । तस्य कौशलम् यथा पद्यरचनायां तथैव नाटकेषु वर्तते । कालिदासस्य काव्ये किञ्चिदलौकिकम् अपूर्वम् असाधारणञ्च चारुता दृश्यते । तस्य काव्ये आकाश्मीरात्, आकन्याकुमारी, आद्वारकायाः आप्राग्जोतिषमपूर्वं स्वाभाविकञ्च सौन्दर्यवर्णनम् उपलभ्यते ।

महाकवीनां समालोचकानां संस्कृतसाहित्याध्येतृषु इयं सूक्तिः प्रख्याततमा विद्यते । तथहि– "**उपमा कालिदासस्य**" इति । यद्यपि महाकवेः कालिदासस्य काव्येषु अनेकेषां शब्दालङ्काराणामर्थालङ्काराणाञ्च प्रयोगो दृश्यते । तथापि महाकविः कालिदासः उपमानामकस्यार्थालङ्कारस्य स्वेतराणखिलान् कवीनतिशेते । अत एव अयं कविः 'उपमासम्राट् इत्यभिधीयते । उपमायाः स्वरूपं निरूपयन् साहित्यदर्पणकारः विश्वनाथः प्राह–

**साम्यं वाच्यमवैधर्म्यवाक्यैक्य उपमाद्वयोः ।**

अयमाशयः यद्यस्मिन् वाक्ये वैषम्यं विहाय उपमानोपमेययोः साधर्म्यमात्रं वर्णितं भवति । सेयमुपमा महाकविकालिदासस्य सम्पूर्णे साहित्ये विद्युदिव विद्योततेतमाम् । कालिदासो महाकवि उपमायाः प्रयोगे अपूर्वं वैशारद्यं बिभर्ति । कालिदासस्य उपमासु पूर्णता, रम्यता, विविधता च सर्वत्र उपलभ्यते । यद्यपि महाकवेः कालिदासस्य काव्येषु सर्वत्र उपमायाः प्रयोगः दृश्यते । तथापि रघुवंशे प्रयुक्ता उपमा सर्वातिशयिनी वर्तते । कालिदासस्य रघुवंशीयोपमायाः प्रयोगप्रसिद्धौ महाकविः "**दीपशिखाकालिदासः**" इति नाम्ना प्रख्यातो बभूव । इन्दुमत्याः स्वयंवरे समागताः समे राजानः आशान्विताः सन्ति यद् इन्दुमती ममैव कण्ठे जयमालां स्थापयिष्यतीति । इन्दुमतीहस्ते वरमालामादाय यदा वरं वृणीतुम् अग्रे चचाल तदा समे राजानः सोत्कण्ठिता अभूवन् । इन्दुमती स्वयं सञ्चारिणी दीपशिख्येव वर्तते । यस्याः समक्ष राजानः सप्रकाशा भवन्ति । किन्तु यं यं राजानं सा व्यतीयाय स स राजा तेनैव प्रकारेण नैराश्यमग्ना अभूवन् येन प्रकरेण दिपशिखायां निर्गतायां सत्यां मार्गाहाः विभार्या अन्धकारे निमग्नाः भवन्ति । तथा चाह महाकविकालिदासः–

**सञ्चरिणी दीपशिख्येवरात्रौ यं यं व्यतीयाय पतिवरा सा ।**
**नरेन्द्रमार्गाह इव प्रपेदे विवर्णभावं स स भूमिपालः ॥**

इति । रससिद्धस्यास्य कवीश्वरस्य महिमा तदीय काव्यैरेव ज्ञायते । तस्य काव्यस्य स्वल्पसमासाः स्वभावसरला च शैली सर्वानेव सदा आकर्षयति । तस्य कव्यस्य परिशीलनेन वेद–शास्त्र–पुराणेषु तस्य आगाधं पाण्डित्यम् आसीदिति ज्ञायते । कल्पनाचातुर्यं, पदानां माधुर्यं, पात्रसंविधाननैपुण्यं, रसोल्लासः, ललितानि मनोहराणि वचनानि इत्यादिभिः सुगुणैरस्य कवेः काव्यानि सर्वजनादरणीयानि । तथा हि– "**श्रुतिरिवार्थं स्मृतिरन्वगच्छत्**" इति अत्र महाकवेः वेदविषयिकाज्ञान् स्पष्टं भवति । येन प्रकारेण स्मृतिः श्रुतेरर्थानाम् अनुसरणं करोति तेनैव प्रकारेण सुदक्षिणा नन्दिन्या अनुसरणं चकार । एषः कुमारसम्भवे पार्वत्याः वर्णने श्रमं न पश्यति इव भाति । यतः–

**अन्योन्यमुत्पीडयदुत्पलाक्षाः स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।**
**मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ॥**

इत्यत्र तथैव ॥

**नागेन्द्रहस्तात्वयिकर्कशत्वादेकान्तशैत्यात् कदलीविशेषः ।**
**लब्ध्वा हि लोके परिणाहिरूपं जातास्तदूर्वोरुपमान बाह्याः ॥**

इत्येवं निरायासेन वर्णयन् । अन्ते–

**सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।**
**सा निर्मिता विश्वसृजा प्रयत्नादेकत्र सौन्दर्यदिदृक्षयेव ॥**

एवं वर्णयन्नुपसंहरति । अस्य कवेः वर्णनाशैली अपि उत्कृष्टा वर्तते । वैदर्भीरीतिः कालिदासादेव प्रसिद्धा इव भाति । दण्डी काव्यादर्शे–

**श्लेषः प्रसादसमता माधुर्यं सुकुमारता ।**
**अर्त्थव्यक्ति उदारत्वं ओजः कान्तिसमाधयः ॥**

इति वैदर्भमार्गस्य प्राणाः दशगुणाः स्मृताः ।

एतादृशो दशगुणा अपि कालिदासीयकाव्येषु द्रष्टुं शक्यते नान्यत्र इति तस्याभिप्रायः । अत एव–

**अपि क्रियार्थं समित्कुशं [?] जलान्यपि स्नानविधिक्षमाणिते ।**
**अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥**

अस्मिन् श्लोके तथैव–

**त्वमेव तावत् परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः ।**
**वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि [?] च ॥**

एवमादिषु सर्वेषु श्लोकेष्वपि सहृदयाः दशगुणानपि आस्वादयन्ति । एषः स्व ऋतुसंहारे–

**काशांशुका विकचपद्ममनोजवक्त्रा सोन्मादहंस स्वनूपुरनादरम्या ।**
**आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या ॥**

शरदृतुवर्णनमेवं सुरूपिणं कृतवान् । तथैव मेघदूतेऽपि–

**आलोके ते निपतति पुरा सा बलिव्याकुला वा**
**मत्सादृशं विरहतनु वा भावगम्यं लिखन्ती ।**
**पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां**
**कश्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥**

इत्यस्मिन् श्लोके विरहिणीं यक्षपत्नीमक्षिसाच्चित्रितवान् । प्रिया विरहितस्य यक्षस्यापि विरहोद्योगं हृदयविद्रावकं द्रष्टुं शक्यते । यथा–

**त्वामालिख्यप्रणयकुपितां धातुरागैः शिलायाम्**
**आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।**
**अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ (नः?) कृतान्तः ॥**

इति । एतादृशान् विशिष्टान् श्लोकान् दृष्ट्वा कृष्णकविरपि–

**अस्पृष्टदोषा नलिनीव दृष्ट्वा हारावलीव ग्रथिता गुणौघैः ।**
**प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी ॥**

इति स्वाभिप्रायं मण्डयन्ति । किं बहुना अद्यतनेषु दिवसेष्वपि विवाहादि महोत्सवेषु कन्यादानसमये वा विवाहान्ते वा पुरोहिताः वधूं प्रति कालिदासस्य–

**शुश्रूषस्व गुरून् कुरु प्रियसखी वृत्तिं सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपङ्गमः ।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥**

इत्यादीन् श्लोकानुक्त्वा श्रवणमधुरानुपदेशान् यथा कण्वः शकुन्तलां बोधितवान् तथा बोधयन्तो दृश्यन्ते । शकुन्तलायाः वर्णनसमये कविः–

**मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।**
**न प्रभातरलं ज्योतिस्त्रेति वसुधातलात् ॥**

असाधारणं निरूपयति । अतः मल्लिनाथः–

**कालिदासगिरांसारं कालिदासः सरस्वती ।**
**चतुर्मुखोऽथवा साक्षाद् विदुर्नान्ये तु मादृशाः ॥**

इति कालिदासवाणिषु विद्यमानं स्वाभिप्रायं निर्भयं प्रकटयति ।

संस्कृतवाङ्मये कश्चन कविः चक्र इति सोऽपि कालिदासं बहु मनुते स इत्थम्–

प्राचेतसे या जगति प्ररूढा या पुष्पिता सत्यवतीकुमारे ।
या कालिदासे फलिता कवीनामेकोपमाने कवितालताभूत् ॥
अन्येऽपि सन्ति भवभूतिमुरारिमाघश्रीहर्षभारविमुखाः प्रथिताः कवीन्द्राः ।
तेषां प्रशांसनविधौ पटुता कुतः स्यात्तत्ता न मे यदुत यन्न च तादृशत्वम् ॥ इति नवरसरुचिरां कालिदासवाचं सदुक्तिभिर्वर्णने सार्थकतामपि इति चक्रकवेः वाक्ष्वेव ज्ञायते । कालिदासस्य काव्ये यज्ञविषयिका उपमा अस्ति । तथा हि–

**श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम् ।**

येन प्रकारेण यज्ञे श्रद्धायाः, वित्तस्य, विधेश्च समाहारो भवति, तेनैव प्रकारेण नृपो दुष्यन्तः शकुन्तला भरतश्चेति त्रय इमे तत्र एकत्रिता अभूवन् । तथा च– "**अध्वरस्येव दक्षिणा**" दिलीपस्य पत्नी सुदक्षिणा यज्ञस्य दक्षिणा इव राज्ञा सहासीत् । तथा हि– "**स्वाहयेव हविर्भुजम् ।**" स्वाहानाम्न्या पत्न्या समन्वितं अग्निमिव अरुन्धतीविशिष्टं वसिष्ठं ददर्श राजा दिलीपः । कालिदासेन प्रकृतिः मानवसहचारीरूपेण वर्णिता । यदा तस्य पात्राणि हृष्यन्ति तदा प्रकृतिरपि प्रफुल्ला भवति । यदा तस्य पात्राणि दुःखितानि भवन्ति तदा प्रकृतिरपि रोदतीव । अभिज्ञानशाकुन्तले चतुर्थेऽङ्के शकुन्तला यदा कण्वाश्रमं त्यक्त्वा पतिगृहं प्रयाति तदा तस्याः वियोगेन मृगाः घासचर्वणं विस्मरन्ति, मयूराः तस्याः शोकेन नृत्यं त्यजन्ति । किमन्यत् वृक्षाः लताश्चापि रुदन्ति पत्ररूपाणि अश्रूणि च पातयन्ति ।

**उद्गलितदर्भकवलाः मृगाः परित्यक्तनर्तनाः मयूराः ।**
**अपसृतपाण्डुपत्राः मुञ्चन्त्यश्रूणीव लताः ॥**

इति । तथा च वल्कलेनाप्यावृता शाकुन्तला तेनैव प्रकारेण रमणीया आसीत् येन प्रकारेण शैवलेनापि परिवृता कमलिनी स्वलावण्यं न विजहाति । तथा हि– "**सरसिजमनुविद्धं शैवलेनापि रम्यम्**" इति । कठोरगर्भा शकुन्तला अग्निगर्भा शमीवासीत् । "**अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥**" शकुन्तलायाः शरीरं कुसुममिवातिमनोज्ञमासीत् ।

**वपुरभिनवमस्याः पुष्यति स्वां न शोभां**
**कुसुममिव पिनद्धं पाण्डुपत्रोदरेण ।**

युवा रघुः प्रजासु अतीव प्रख्यातो बभूव । "**फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ।**"

महाकवेः कालिदासस्यासु उपमासु एवं वैशिष्ट्यं सर्वत्र दृग्गोचरी भवति यदुपमानोपमेययोः सर्वत्र लिङ्गवचनयोः साम्यं दृश्यते । यथा–

"**सञ्चारिणी दीपशिखेव रात्रौ**" इत्यादि वाक्ये उपमानोपमेययोः दीपशिखा– इन्दुमत्योः लिङ्गवचनयोः साम्यं वर्तते । "**आसीन् महीक्षितामाद्यः प्रणवश्छन्दसामिव**" येन प्रकारेण मन्त्रपाठस्यादौ प्रणवस्योच्चारणं क्रियते तथैव सर्वेषु राजसु आद्यो महाराजो मनुरासीत् । इत्यत्रापि मनु–प्रणवयोः महीक्षित–छन्दसोः लिङ्गवचनयोः साम्यं वर्तते । इयं महाकवेः महती सूक्ष्मेक्षिका वर्तते ।

भारतवर्षस्य रत्नगर्भेऽयं वसुन्धरा धन्यास्ति यत्र विश्वकविश्रेष्ठः कालिदासो जातः । वयं तमेव '**प्रियकविः**' कविकुलगुरुर्वा कथयामः । काव्यकलारश्मिभिर्भासमानोऽयं महाकविः न केवलं संस्कृतजगति अपि तु विश्वसाहित्येऽपि भास्करोऽस्ति । सर्वे जनाः तत्कृतकाव्यामृतरसस्वादेन आप्लाविताः सन्ति । अस्य महानुभावस्य वैदुष्यपूर्णप्रतिभाप्रभावं सर्वेऽपि जानन्ति । काव्यमर्मज्ञैरपि तत्काव्यसौष्टवं मुक्तकण्ठेन प्रशंसितमस्ति । तथाहि– "**भासो हासः कविकुलगुरुः कालिदासो विलासः**" इति एतदृक् वाग्विलासवतः कवेः काव्यानि पठित्वा आसादयित्वा अस्माभिः सर्वे "महिषं दधि सशर्करं पयः कालिदासकविता नवं वयः शारदेन्दुरबला च कोमला स्वर्गशेषमुपभुञ्जते जनः इति । एवञ्च–

**निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।**
**प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥**

एवमुच्येत । अत एतादृशं कविमेवम्–

**सविश्ववन्द्यो महतां कवीनां गुरुर्मनीषी कविकालिदासः ।**
**यस्य काव्यपीयूष रसप्रवाहस्वादामितानन्दमयो हि लोकः ॥**

इति स्तुवन्तः कवेः कौशल्येनास्माकं ज्ञानमप्यम्भसि तैलबिन्दुरिव विकासं प्राप्नोत्विति भावनया विरमामि ॥

https://doi.org/10.5281/zenodo.7253366

Paper 21

# संस्कृतवाङ्मये आश्रमचतुष्टयम्

**RAVISHANKAR SHAMBHULINGA HEGDE**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id- ravishankarhegdedodnalli@gmail.com

## सार: (ABSTRACT)

भारतीयसंस्कृतसाहित्ये बहवोंऽशाः प्रतिपादिताः । तेषु विषयेष्वाश्रमचतुष्टयमप्यन्यतमम् । भारतीयानां जीवनशैली तु विशिष्टा श्रेष्ठा च । वैज्ञानिकीप्येषा जीवनशैली। अस्यां जीवनशैल्यां वयोनुगुणं काचिद्व्यवस्था कृता ज्येष्ठैः स्मृतिकारैः । तां व्यवस्थाम् **'आश्रम'** इति पदेन व्यवहरन्ति । **"शतायुर्वै पुरुषः"** इति श्रुतिवाक्यत्वेन मानवस्य आयुः शतवर्षाणीति निर्णङ्कृतं बुधैः। किन्तु शतवर्षपर्यन्तं सर्वेऽपि न जीवन्ति । परन्तु सर्वेऽपि शतवर्षपर्यन्तं जिजीविशेयुरित्याशास्तत्र । अतैवैतच्छतवर्षात्मकमानवजीवञ्चतुर्धाविभक्तम् । ते चत्वारो विभागा आश्रमपदत्वेन प्रसिद्धाः।

**प्रस्तावना-**

भारतमाता शताधिकभाषाणां जन्मदात्री अस्ति । अत्र शताधिकभाषाः मातृभाषात्वेन विराजन्ते । तेषु संस्कृतभाषा अपि श्रेष्ठं स्थानमावहति । प्रपञ्चस्य प्राचीनसाहित्यं संस्कृतसाहित्यमिति तु लोकविदितमेव । अस्मिन् संस्कृतसाहित्ये बहुविधकृतयस्सन्ति । वेदसाहित्यादारभ्य अद्यतनीय नूतनकाव्यपर्यन्तं अनेककृतयो विराजमानस्सन्ति । काव्ये एव द्वैविध्यं द्रष्टुं शक्नुमः । ते श्रव्यं-दृश्यञ्चेति । श्रव्यकाव्ये विभागत्रयं गद्यं-पद्यं-चम्पूरिति । दृश्यकव्ये तु दशविधरूपकाणि । तथा वेदाः, उपनिषदः, स्मृतिः, इतिहासः, पुराणानि, इत्यादिबहुविधसाहित्यप्रकाराः दृश्यन्ते । एते सर्वेऽपि सहित्यप्रकारा भारतीयसंस्कृतिमेव प्रतिपादयन्तीति तु नास्ति संशयलेशोऽपि ।

भारतीयसंस्कृतसाहित्ये बहवोंऽशाः प्रतिपादिताः । तेषु विषयेष्वाश्रमचतुष्टयमप्यन्यतमम् । भारतीयानां जीवनशैली तु विशिष्टा श्रेष्ठा च । वैज्ञानिकीप्येषा जीवनशैली। अस्यां जीवनशैल्यां वयोनुगुणं काचिद्व्यवस्था कृता ज्येष्ठैः स्मृतिकारैः । तां व्यवस्थाम् '**आश्रम**' इति पदेन व्यवहरन्ति । **"शतायुर्वै पुरुषः"** इति श्रुतिवाक्यत्वेन मानवस्य आयुः शतवर्षाणीति निर्णङ्कृतं बुधैः। किन्तु शतवर्षपर्यन्तं सर्वेऽपि न जीवन्ति । परन्तु सर्वेऽपि शतवर्षपर्यन्तं जिजीविशेयुरित्याशास्तत्र । अतैवैतच्छतवर्षात्मकमानवजीवञ्चतुर्धाविभक्तम् । ते चत्वारो विभागा आश्रमपदत्वेन प्रसिद्धाः।

ते ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसन्यासा इति ।अत्र को नाम **आश्रम** इति चिन्तयामश्चेत् "**श्रम्यन्ति स्वं स्वं तपः चरन्ति अत्र**" इति वक्तुं शक्यते अत्र, **आङ्** उपसर्गपूर्वक **श्रम** धातोः **घञ्** प्रत्यययोगे **आश्राम** शब्दस्य निष्पत्तिर्भवति । "**श्रम्यन्ति तपः कुर्वन्ति इति आश्रमः**" इत्यप्यस्ति व्याख्या । आश्रमचतुष्टयविषयो निरूपितो महाकविना कालिदासेन रघुवंशे महाकाव्ये । तत्र रघुकुलसञ्जातानां नृपतीनां जीवनविवरणसम्दर्भे उक्तं इदम् –

**शैशवेभ्यस्तविद्यानां, यौवने विषयैशिणाम् ।**

**वार्धके मुनिवृत्तीनां, योगेनान्ते तनुत्यजाम् ॥(रघु. १.८)**

अस्यार्थः एवम् - रघुवंशस्य नृपाः सर्वदा आश्रमानुसारं जीवनयापनं कृतवन्तः। शैशवे विद्याभ्यासं कृत्वा , यौवने विषयानुरागिणो भूत्वा, वार्धक्ये वननिवासिनो भूत्वा, योगसाधनद्वारा जीवनं समापयन्ति स्म ।

तत्र कलिदासेन उल्लिखिताः वयःप्रतिपदकाश्शब्दा एवाश्रमचतुष्टयं प्रतिपादयन्ति । एवं स्मृतिषु, वेदेष्वप्याश्रमचतुष्टयविषये उल्लिखितमस्ति ।

**-विषयविवरणम्-**

**१. ब्रह्मचर्याश्रमः-**

तेषु चतुराश्रमेषु प्रथमोऽस्ति **'ब्रह्मचर्याश्रमः'**। अस्याश्रमस्य अधिकारी तु ब्रह्मचारी । के ब्रह्मचारिणो भवन्ति ? इतत्युक्तौ, उपनीता बाला ब्रह्मचारिण इति शक्यते वक्तुम् । इदानीं पुनःप्रश्न उदेति , को वा उपनयनकालः ? इति । तत्र उच्यते – **'गर्भाष्टमेष्टमे वाब्दे ब्राह्मणस्योपनायम्'** । इति। सप्तमे वयसि अथवा अष्टमे वयसि उपनयनङ्कर्तव्यमिति वाक्यस्यार्थः । तत्र क्षत्रियाणामेकादशे, वैश्यानां द्वादशे इति वयोभेदोऽपि दृश्यते वर्णानुगुण्येन । एवमुपनयनानन्तरं स वटुः गुरोर्गृहं प्रविश्य ब्रह्मचर्यव्रतं स्वीकृत्य सकलशास्त्राणां विद्यानाञ्चाध्ययनञ्चिकीर्षति। सर्वेष्वपि शास्त्रेषु योग्यतासम्पादनार्थमयन्तु प्रशस्तकालः । तत्तद्वर्णेभ्यस्तत्तदाश्रमेभ्यश्च विहितानां कार्याणामथवा कर्तव्यानां ज्ञानं प्रसुमयमेव युक्तःकालः । सर्वेष्वपि कार्येषु कुशलता तु अत्रैव प्राप्यते । ब्रह्मचर्यन्तु, अग्रे भविष्यमणस्य समग्रजीवनस्य पूर्वसिद्धतेवास्ति।

*** ब्रह्मचर्याश्रमे संस्काराः –**

धर्मशास्त्रग्रन्थैः, स्मृतिग्रन्थैःप्रतिपादितेषु षोडशसंस्कारेषु उपनयनवेदारम्भसमावर्तनरूपसंस्कारा अप्यत्रान्तर्भवन्ति । अत्र द्विजत्वसिद्ध्यये तथा वेदाध्ययनाधिकारसिद्ध्यर्थं करिष्यमनोपनयनमेवास्याश्रमस्यारम्भः।

*** ब्रह्मचर्यशब्दार्थः –**

वेदाध्ययनं ब्रह्मचर्यनियमस्य सम्पालनपूर्वकं कुर्यादिति विधिः श्रूयते । य एवङ्करोति स ब्रह्मचारी । तत्र ब्रह्मशब्दस्य वेद इत्यर्थः । वेदाध्ययनव्रतमाचरतीति ब्रह्मचारी । **"ब्रह्म चरितुं शीलमस्य"** तथा **"ब्रह्म तपोज्ञानं वा अर्जयतीति"** व्याख्याद्वयमप्युपलभ्यते । महाभारतस्य आश्वमेधिकपर्वणि लक्षणमाह –

**" ब्रह्मचारी सदैवेष य इद्रियजये रतः ।**
**अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः ।**
**ब्रह्मभूतश्चरल्लोके ब्रह्मचारी भवत्ययम् "** इति । अत्र ब्रह्मशब्दस्य अर्थोऽपि प्रकट्यते महाभारते – **"आपो ब्रह्म गुरुर्ब्रह्म स ब्रह्मणि समाहितः ।**
**एतदेवेदृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः॥**

तथा – **"ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्मसम्भवः"** इत्यप्युच्यते । अतो यो ब्रह्मणि चरति स ब्रह्मचारी इति तुशब्दार्थः ।

*** ब्रह्मचर्यनियमाः –**

ब्रह्मचर्यनियमाः गरुडपुराणे एवं उक्ताः-

**"भिक्षाचर्याश्च शुश्रूषा गुरोस्स्वाध्याय एव च ।**
**सन्ध्याकर्माग्निकार्यं च धर्मोऽयं ब्रह्मचारिणः ॥"(१.४९५) इति ।**

तथैव मनुस्मृतौ उक्तं – **सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन् ।**
**सन्नियम्येन्द्रियग्रामस्तपो वृध्यर्थमात्मनः ॥**
**वर्जयेतन्मधुमांसञ्च गन्धमाल्यं रसान्स्त्रियः ।**
**शुक्तादि यानि सर्वाणि प्राणिनाञ्चैव हिंसनम् ।**
**अभ्यङ्गमञ्जनञ्चक्ष्णो उपानच्छत्रधारणम् ।**
**काङ्क्रोधं च लोभञ्च नर्तनङ्गीतवादनम् ।**
**द्यूतञ्च जनवादञ्च परीवन्तथानृतम् ।**
**स्त्रीणाञ्च प्रेक्षणाल्लाभमुपघातं परस्य च ॥ इति**

**(मनु. २/ १७५,१७७,१७८,१७९)**

एवं ब्रह्मचारी सकलभोगान्विवर्ज्य भिक्षाटनरतो भूत्वा गुरुशुश्रूषानिरतो अध्ययङ्कुर्यादिति नियमः। आश्रमेस्मिन् नैष्ठिकमुपकुर्वाणमिति द्विविधम् । नैष्ठिकब्रह्मचारी ग्रहस्थाश्रमङ्गन्तुं नार्हति । उपकुर्वाणो ग्रहस्थाश्रङ्गन्तुमर्हति । किन्तु वैखानसधर्मसुत्रे चतुर्विधमुक्तङ्गायत्रब्राह्मप्राजापत्यनैष्ठिकश्चेति । कूर्मपुराणेऽप्युक्तमस्ति ब्रह्मचर्याश्रमनियमाः –

**" नित्यमुद्धृतपाणिस्यात् सन्ध्याचारसमन्वितः ।**
**आस्यतामितिचोक्तस्सन् आसीताभिमुखं गुरोः ॥**
**प्रतिश्रवणसम्भाषो शयने न समाचरेत् ।**
**आसीनो न च तिष्ठन् वा उत्तिष्ठन् वा पराङ्मुखः ॥**
**न च शय्यासनञ्चास्य सर्वदा गुरुसन्निधौ ।**
**गुरोश्च चक्षुषोर्विषये न यथेष्टासनो भवेत् ॥ "**

एवं कूर्मपुराणस्य ६७ तमे अध्याये व्यासमहर्षिणा ब्रह्मचर्याश्रमस्य कर्तव्यन्युल्लिखितानि।

**२.गृहस्थाश्रमः –**

द्वितीयाश्रमोऽस्ति गृहस्थाश्रमः । सर्वेष्वाश्रमेषु गार्हस्थ्यमेव श्रेष्ठमिति प्रतिपादितं शास्त्रकारैः। किमर्थमित्युक्ते, धनानर्जयित्वा अन्यान्त्रीनाश्रमान्पालयितुमपि ते एव अधिकारिण इत्युक्तत्वात् । जनाः ब्रह्मचर्यव्रतसमाप्त्यनन्तरं विवाहितो भूत्वा वैवाहं व्रतं स्वीकुर्वन्ति । यावन्तश्च सुखोपभोगा अभिलषिता मनुष्यस्य तावन्तं यथावदनुभोक्तुमनुमत अस्मिन् आश्रमे । किन्तु सुखोपभोगास्तु समाजहितस्य अविरोधेन साधनीया इति तु नियमः ।अत समाजहितजनकान्येव कार्याणि विहितानि।

*** गृहस्थपदार्थः –**

यो गृह्याग्नौ गार्ह्याणि कर्माणि ,श्रौताग्नौ श्रौतकर्माणि करोति स गृहस्थः । पाणिग्रहणानन्तरं गृहस्थो गृहस्थधर्माननुसरति । ग्रहे तिष्ठतीति ग्रहस्थः ।

*** गृहस्थनियमाः –**

गृहस्थाश्रमविषये बहवो नियमा उल्लिखिताः बुधैः ।

यथा **" गृहस्थः करोति गृह्याग्नौ गार्ह्याणि कर्माणि । ऋतुरात्रिषु स्वभार्यामुपगच्छति । भार्यया सह नाश्नाति । असत्यवादं वर्जयेच्च। गृहस्थस्तावत्सर्वप्राणिहितस्सन्नाद्रोहेणैव जीवति ।"** इति वैखानसधर्मसूत्रे उल्लिखितम्।

**"धर्मागतं प्राप्य धनं यजेच्च, दद्यात्सदैवातिथीन्भोजयेच्च ।**
**अनाददानश्च परैरदत्तं, सैषा गृहस्थोपनिषत्पुराणी । (आदि ९१३) "**

इति वर्णिता आदिपुराणे गृहस्थाश्रमनियमाः।

*** समाजधारकः गृहस्थाश्रमः –**

चतुर्षु अश्रमेषु गृहस्थाश्रमः श्रेष्ठेति वदन्ति शास्त्रकाराः । धर्मस्य उद्देशस्तु समाजहित एव । अत यो समाजहिताय जीवति सः श्रेष्ठो भविष्यति समाजे । अस्मिन् गृहस्थाश्रमे कर्तव्यत्वेनैव समाजहितसाधनानि कर्माणि विहितानि । अस्समाजहिताय समाजधारणाय च गृहस्थ एव अत्यंन्तम्परिश्रमङ्करोति । कालिदासमहाकविना विरचिते रघुवंशमहाकाव्ये कथानयको रघुः कौत्सं कुशलम्पृच्छन्ब्रूते – **कालो ह्ययं संक्रमितुं द्वितियं सर्वोपकारक्षममाश्रमन्ते ॥ (५.१०)** इति । तेन ज्ञायते यत्सर्वोपकारत्वन्तु गृहस्थाश्रमस्य प्रधानलक्ष्यमिति । अत आश्रमोयमन्यानामाश्रमत्रयाणामाश्रयदाता इति तु सुस्पष्टमेव ।

*** ऋणमोचनानुकूलोयमाश्रमः –**

मानवनञ्जन्म ऋणत्रययुक्तमेव भवतीत्युक्तन्तैत्तिरीयसंहितायां, **"याजमनो वै ब्राह्मणस्त्रिभिः ऋणैः ऋणवान् जायते"** इति । तथैव ऋणमोचनमार्गोऽपि सूचितो वर्तते अग्रिमपङ्क्तावेव **"ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यो प्रजया पितृभ्यः"** इति । अत्र त्रय ऋणा उक्ता ऋषिदेवपितृणश्चेति । तत्र प्रथमेन ऋणेन विमुच्यते

ब्रह्मचर्यव्रतपरिपालनेन । ब्रह्मचर्य इत्युक्ते इन्द्रियजय इत्यपि वक्तुं शक्यते । द्वितीयो देवऋणः। देवऋणस्तु यज्ञानुष्ठनेन विमुच्यते । तृतीयः पितृऋणः। पितृऋणस्तु धर्मप्रजासम्पत्तिद्वारा विमुच्यते । एषु ऋणत्रयेषु देवऋणस्य तथा पितृऋणस्य विमुक्त्यर्थं गृहस्थाश्रमे एव अवकाशो दत्तः । कर्मठैर्मिमासाशास्त्रकारैः प्रतिपाद्यते यत् **'श्रौतस्मार्तकर्मसु दम्पत्योस्सहधिकारः'** इति । तेन ज्ञायते यो यज्धातुना प्रोच्यमणदान-देवतापूजन-सङ्गतीकरणादिकर्मसु गृहस्थानामेवाधिकारेति । यज्ञानुष्ठानस्तु गृहस्थेनैव भवेत् । अत देवऋणस्य मोचनन्तु गृहस्थाश्रमे एव । विवाहकाले देवाग्निद्विजसन्निधावेव वदति कन्यापिता **"धर्मप्रजासिध्यर्थमिमाङ्कन्याम्प्रदास्यामि "** इति । अतो धर्मप्रजासिद्धिरपि गृहस्थाश्रमस्य कर्तव्यः । एवम्पितृणमोचनानुकूलोयङ्गृहस्थाश्रमः ।

*** पञ्चमहायज्ञाः –**

गृहस्थाश्रमस्य क्रुते पञ्चमहायज्ञास्तु नित्यकर्मत्वेन विहिताः। तेषाम्विवरणन्तु तैत्तिरीयारण्यके द्वितीये अध्यये उल्लिखितं यत् – **"पञ्च वा एते महायज्ञास्सतति प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति ।"**

तथा चोक्तं याज्ञवल्क्यस्मृतौ – **"बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः।**
**भूतपित्रमरब्रह्ममनुष्याणां महायज्ञाः ॥"** इति ।

मनुना कथितं यत् - **"अध्यापनम्ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणः ।**
**होमो दैवो बलिर्भौती नृयज्ञोतिथिपूजनम् ॥"** एवं च देवयज्ञपितृयज्ञमनुष्ययज्ञब्रह्मयज्ञभूतयज्ञेति पञ्चमहायज्ञानां कर्तव्यं विहितमस्ति गृहस्थाश्रमे ।

*** वैश्वदेवः –**

एतदपि गृह्याग्नावेव सम्भविष्यमाणं कर्मास्ति । पञ्चसूनादोषपरिहारार्थं वैश्वदेवहोमो विहितः । एतदपि गृहस्थाश्रमस्य कर्तव्येष्वन्यतमः।

एवङ्गृहस्थाश्रमस्सर्वेष्वप्याश्रमेषु प्रधानमिति तु नास्ति संशयः । अस्मिन्प्रधाने आश्रमे बहव स्सन्ति कर्तव्याः। अन्यानामानां नाम ब्रह्मचर्वानप्रस्थसन्यासाश्रमानां रक्षणं पोषणं तु गृहस्थानामेव कर्तव्यः । किमर्थमित्युक्ते अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहेषु षट्स्वपि कर्मसु गृहस्थानामेवाधिकारः नतु अन्येषाम् ।

*** गृहस्थानां नित्यकर्म –**

गृहस्थानां प्रधानतया गृह्याग्निपरिचर्या एव नित्यकर्मत्वेन विधीयते । तत्र प्रतिदिनमपिप्यौपासनहोम उक्तः वेदे, शास्त्रे च । प्रातस्तथा सायमौपासनमुक्तं नित्यकर्मत्वेन। वैश्वदेवहोमोऽपि नित्यकर्मत्वेनेव विहितः।

*** गृहस्थाश्रमे तु ब्रह्मचर्यपालनम् –**

**"षष्ट्यष्टमीम्पञ्चदशीन्द्वादशीञ्च चतुर्दशीम् ।**
**ब्रह्मचारी भवेन्नित्यं ब्रह्मणस्संयतेन्द्रियः ॥"**

इति कूर्मपुराणे ६८ तमे अध्याये १२ श्लोके उल्लिखितमस्ति । अतो ग्रहस्थाश्रमेऽपि नियमाः बहवस्सन्ति। ऐहिकसुखप्राप्त्यर्थमवकशो दत्तेत्यनेनैव कारणेन यथा कथञ्चिज्जीवितुन्नशक्यते।

एवङ्गृहस्थाश्रमस्सर्वोपकारस्सनियस्सर्वश्रेष्ठेति निश्चितम् ।

**३.वानप्रस्थाश्रमः –**

गृहस्थाश्रमे सर्वानुपभोगान्भुक्त्वा यदा शरीरस्य बलह्रासो भविष्यति तदा गार्हस्थ्यभारम्पुत्रेषु निक्षिप्य यो योगसाधनार्थं वनम्प्रविशति सो वानप्रस्थः। स एव वानप्रथाश्रमः । अयमेव तृतीयाश्रमः । अत्र वनं समाश्रित्य स्वकर्तव्यपरो भूत्वा चतुर्थाश्रमस्य पूर्वसिद्धता कर्तव्या अथवा पुण्यार्जनार्थन्तीर्थक्षेत्रसन्दर्शनङ्कर्तव्यमथवा समाजसेवामेव नारायणसेवेति मत्वा प्रपञ्चहिताय कार्यंङ्करणीयमिति कर्तव्यान्युक्तन्यस्मिन्नाश्रमे । तथैव अष्टादशसु पुराणेषु एकस्मन्नग्निपुराणे उक्तं यत् –

**"देवातिथिपूजा च धर्मोऽयं वनवासिनाम् ।"** इति । नाम वानप्रस्थाश्रमे तु य आश्रमी भवति तेन देवातिथिपूजनङ्कर्तव्यमित्यर्थः।

*** वानप्रस्थपदव्युत्पत्तिः-**

मानवजीवनस्य तृतीयस्तरमस्ति वानप्रस्थः। प्राचीनकाले वानप्रस्थशब्दस्य स्थले **'वैखानस'** इति पदस्य व्यवहारमासीदिति ज्ञायते । **'वने प्रकर्षेण नियमेन च तिष्ठति चरतीति वनप्रस्थः' 'वनप्रस्थ एव वानप्रस्थः'** इति याज्ञवल्क्यस्मृतेः मिताक्षरव्याख्याने उल्लिखितमस्ति । तत्रैवं व्याख्यातं **' नियमपूर्वकं वने चरणं हि वानप्रस्थाश्रमः'** इति । अस्मिन्नाश्रमे संयमपालनं योगादिकर्मसु विशिष्टप्रवृत्तिश्च प्रमुखं कर्म ।

*** वानप्रस्थाश्रमस्य कर्तव्याः –**

वार्धक्ये समागते पुत्रेषु गार्हस्थ्यधर्मन्निधाय पत्नीसहितमथवा पत्नीरहितश्च ब्रह्मसाक्षात्कारार्थं वनङ्गच्छेत् । तत्र भगवतः निजस्वरूपचिन्तनमकुर्वन् संसारबन्धनाद्विषण्णो भवेत् । ऐहिकविषयानां परित्यागोयमाश्रमस्यास्य प्रथमङ्कर्म । मोक्षस्याथवा भगवत्साक्षात्कारस्य सिद्धतास्मिन्नाश्रमे एव भविष्यति। गृहस्थाश्रमे विद्यमानानाङ्क्रोधाभिमानईर्षातृष्णादिदोषाणां त्यागः कर्तव्य अस्मिन्नाश्रमे । वानप्रस्थ अस्मिन्नाश्रमे वेदशास्त्रादिषु विहितङ्कर्म आचरन्ति । वानप्रस्थः गृहात्प्रस्थाय वने विद्यमानमाश्रमम्प्राप्य श्रमणाग्निकुण्डे वेदोक्त होमश्च करोति । रात्रौ नाश्नाति । जितेन्द्रियस्सन्नुत्तरोत्तरे अधिकन्तपस्संयोगश्च साधयति । दर्शपूर्णमासौ चातुर्म्मास्यन्नक्षत्रेष्टिमग्रयणेष्टिश्च करोति वने वनौषधिभिः । अयन्नित्यस्वाध्यायी भवति । होमसंभारन्स्वयमेव आहरति । कृष्टां भूमिश्च नाक्रामति । धनधान्यसंचयनाधिकारो नस्ति । षट्सु कर्मसु प्रतिग्रहन्नतु करोत्यत्र । सर्वभूतेषु दयालू भवति । सकलमाङ्गल्यगुणवान्भवति । ईर्षादिदोषवर्जितो भवति । जटाश्मश्रुरोमनखानि धारयति । त्रिकालस्नान्तु विहितो वर्ततेऽस्मिन्नाश्रमे । धराशायी भवेदस्मिन्नाश्रमे।

***श्रमणकाग्निकुण्डः –**

श्रमणां तपसामेतन्मूलं श्रमणकम्भवेत् । अनेन विधानेन एनमग्निं संसाद्य विशेषहोमन्निर्वहति। श्रमणकाग्निकुण्डं वेदित्रयसहितम्भवति । उर्ध्वावेदिस्तावतद्वात्रिंशदङ्गुलायता चतुरङ्गुलविस्तारोन्नता च भवति । मध्यमावेदिः पञ्चाङ्गुलिविस्तारोन्नता भवति । अस्मिग्निकुण्डे वानप्रस्थो नित्यमौपासनहोमं हुत्वा महाव्याहृतिभिश्च अग्निं साधयति । श्रामणकाग्निकुण्डमेतद्वानप्रस्थधर्मे विशेषतया परिदृश्यते वैखानसधर्मसूत्रे ।

*** विविधग्रन्थेषु वानप्रस्थधर्मनिरूपणम् –**

मुण्डकोपनिषदि भैक्षाचर्याञ्चरन्ति ते क्षीणपुण्यपापकर्मणस्सन्तो बाह्यलोके महीयन्त इति उल्लिखितो वर्तते । वाक्यं तु एवं अस्ति ।

**तपश्श्रद्धे ये ह्युपसन्त्यरण्ये**
**शान्ता विद्वांसो भैक्षचर्याञ्चरन्तः ।**
**सूर्यद्वारेन ते विरजाः प्रयान्ति ।**
**यत्रामृतस्स पुरुषो ह्यव्ययात्मा ॥ (मु.उ. ११)**

एवमेव **"वार्धके मुनिवृत्तीनां"** इति कालिदासवाक्यन्तु रघुवंशे प्रसिद्धमेव । अनेन वाक्येनैव ज्ञायते वानप्रस्थाश्रमे मुनीनामिव जटावल्कलधारीणो भूत्वारण्ये जीवेदिति । तथैव विश्वकोषैव विराजमानेतिहासग्रन्थे महाभारतेऽपि वानप्रस्थाश्रमलक्षणं सुस्पष्ठतया निरूपितं वर्तते । महाभारतो वदति - **तृतीयमायुषो भागं वानप्रस्थाश्रामे वसेत् ।**

**तानेवाग्नीन्परिचरेद्यजमानो दिवौकसः ॥(महा. वन)**
**सदारो वाप्यदारोऽपि आत्मवान् संयतेन्द्रियः ।**
**वानप्रस्थाश्रङ्गच्छेत्कृतकृत्यो गृहस्थतात् ॥(महा.वन)** इति ।

ग्रहस्थाश्रमकर्ताव्यानि समाप्य तदनन्तरं पत्नीसहितं वा पत्नीरहितं वा वनङ्गच्छेदिति । वार्धक्ये समागते इन्द्रियशैथिल्यान्मनसि विषयेषु वैराग्यं स्वभावत आगमिष्यति । तथापि गृहस्थाश्रमान्ते वैराग्यसंपादने क्लेशाः भवितुं शक्यत इतित्येवमुपवर्णितं महाभारते ।

**इदं तु दुष्करं कर्म कुटुम्बमभिसंज्ञितम् ।**
**दानमध्ययनं यज्ञः प्रज्ञा संतानमार्जवम् ॥**
**यद्येतदेव कृत्वापि न विमोक्षोस्ति कस्यचित् ।**
**धिक्कर्तारश्च कार्यश्च श्रमश्चायन्निरर्थकः ॥**

एवमेव कालिदासस्याभिज्ञानशाकुन्तलनाटके चतुर्थेऽङ्के शकुन्तलायाः पतिग्रहगमनं वर्णयन् कण्वमुखादस्याश्रमस्य वैशिष्ट्यं समुपस्थापयति । तथा –

**भूत्वा चिराय चतुरन्तमहीसपत्नी**
**दौष्यन्तिनप्रतिरथं तनयं निवेश्य ।**
**भर्ता तदर्पितकुटुम्बभरेण सार्धं**
**शान्ते करिश्यति पदं पुनराश्रमेस्मिन् ॥(अ.शा.चतु.२०)**

एवं वानप्रस्थाश्रमे गृहस्थाश्रमे कृतदोषान्परिमार्जयित्वा, गृहस्थाश्रमे नैसर्गिकतया विद्यमानान्सर्वान्मोहान्विवर्ज्य, जीवनस्य तृतीयभागे चरमाय सन्यासाय सिद्धता करणीया। तस्मान्गृहस्थधर्मानुसृत्यैव सन्यासधर्मान्तर्गतजीवनक्रमानामनुसरणन्तु विहितमस्मिन् तृतीये वानप्रस्थाश्रमे ।

**४.सन्यासाश्रमः –**

अयन्तु चतुर्थाश्रमस्तावद्भगवत्साक्षात्कारसाधनीभूतोऽस्ति । अस्मिन्नाश्रमे लौकिकजीवनस्य सर्वान्पाशाञ्छित्वेहलोकगतान्सर्वान्विचारान्परित्यज्य मोक्षसाधनार्थम्प्रयत्नो विधीयते । अथवा चित्तशुद्धिद्वारा ज्ञानदानादिना लोककयाणार्थमेव शरीरश्रमो भवेत् । बहवस्स्मृतिकाराः, शास्त्रकाराः
कवयः, विद्वांसः, ज्ञानिनश्च अस्मिन्सन्यासाश्रमविषये स्वाभिप्रायम्प्राकटयन्। तत्र मनुरेवमाह –

**अनाग्निरनिकेतस्स्यान्ग्राममन्नार्थमाश्रयेत् ।**
**उपेक्षकोऽसाञ्चयिको मुनिर्भावसमाहितः ॥(म.स्मृ,६.४३)**

कालिदासस्य **"योगेनान्ते तनुत्यजाम्"** इति रघुवंशस्य वाक्यन्तु सन्यासधर्ममेव प्रतिपादयति । लोके कर्म द्विविधम्भवति । काम्यनिष्काम्यकर्म चेति । पशुपुत्राराज्यस्वर्गादिकामनापूरणार्थं यत्कर्म क्रियते तत्काम्यं कर्म । ज्योतिष्टोमाश्वमेधवाजपेयेत्यादीनि काम्यकर्मसु अन्तर्भवन्ति । फलनिरपेक्षया यत्कर्म क्रियते तन्निष्काम्यकर्म । स्वेच्छा तथा स्वलाभत्यागैव सन्यासः । ततैव उक्तम्भगवद्गीतायाम्भगवता श्रीकृष्णेन – **"काम्यानाङ्कर्मणां न्यासं संन्यासङ्कर्मणो विदुः"** इति । लोके फलभोगेन विषयानुरागो जायते । तस्य विषयानुरागस्य त्यागैव प्रमुखो भवति । अत यः कर्मकृत्वापि फलत्यागेन निर्दोषो भवति सस्साधकः । सन्यासत्यागयोर्मध्ये महान्व्यत्यासोऽस्ति । संन्यासी काम्यकर्मणां विषये भयम्प्राप्नोति। कम्यकर्मभिर्दोषाः भविष्यन्तीति कारणेन संन्यासिनः काम्यकर्मैव न कुर्वन्ति । किन्तु , त्यागी कर्म करोति फलन्नेच्छति । अत एव फलागमनभिया कर्मणां त्यागो न कर्तव्येति गीतायामुच्यते – **"यज्ञदानतपः कर्म न त्याज्यं"** इति । भगवद्गीतायां सन्यासलक्षणमुक्तं-

**"अनाश्रितं कर्मफलं कार्यं कर्म करोति यः ।**
**स सन्यासी च योगी च न निरग्निर्नचाऽक्रियः ॥ "**

यः कर्मफलं नेच्छति ,स्वकर्तव्यङ्कर्म करोति स सन्यासी भवति ।

***सन्यासपदव्युत्पत्तिः-**

कर्माणां न्यासं यस्सम्यक्करोति स सन्यासीति वक्तुं शक्यते । न्यासेति शब्दस्य त्यागेत्यर्थः । अतस्त्यग एव सन्यासः नतु अन्यः ।

*** सन्यासाश्रमस्य कर्तव्याः –**

**यदैव वैराग्यभाव आगच्छति तदैव संन्यासाश्रम आश्रयणिय** इति वचसा ज्ञायते –वैराग्य एव प्रथमसोपानं सन्यासाश्रमस्य । एवं लोकव्यवहारेषु, भोगादिषु च वैराग्यं सम्पाद्य सन्यासाश्रमप्रवेशङ्कर्तव्यम् । सन्यासीकर्तव्याः उक्ताः। तेन अग्निपरिचर्या न कार्या ।

गृहे वासो न कर्तव्यः । केवलमन्नार्थमेव ग्राम आश्रयणीयः । सः धनधान्यसञ्चयनन्नकुर्यात् । मुनिभावेन सर्वदात्मज्ञानसम्पादनायान्तर्मुखी भूत्वा साधनापथे भवितव्यम् ।

**उपसंहारः-**

एवमाश्रमचतुष्टयम् भारतीयजीवनवपद्धतौ निरूपितम् । शतवर्षपरिमितस्य मानवजीवनस्य विभागचतुष्टयङ्कृत्वा वयोसहजमानसिकस्थित्यनुसारेण कस्मिन्काले कीदृशः कार्यः करणीय इति निर्देशयितुमेवाश्रमचतुष्टयानां निरूपणङ्कृतं शिष्टैरित्यत्र नास्ति सन्देहः । तथैव समाजे बाल्ययौवनवार्धक्येषु कथं जीवितव्यमित्याश्रमव्यवस्था एव निर्दिशति । अस्मिन्तन्त्रज्ञानयुगे सामान्यतस्सञ्जनिष्यमाणस्समस्यायाः परिहार अत्यन्तसूक्ष्मतयात्र निरूपितः । यो बाल्यावस्थायां विद्याभ्यासं सम्यक् न करोति स यौवने उद्योगादिविषये समस्यामनुभवति । अतस्सर्वैर्बाल्यावस्थायां सुखोपभोगं वर्जयित्वा सम्यगध्ययनन्तथा जीवननिर्वहणकौशलं ज्ञातव्यमिति ब्रह्मचर्याश्रमस्याशयः । यदा शरिरे बलं भवति तदा यथासाध्यं धर्मार्थकामेति पुरुषार्थत्रयं साधनीयन्तथा च ऋणत्रयाद्विमोचको भवितुं प्रयत्नः करणीय इति गृहस्थधर्मस्याशयः । सांसारिकबन्धानन्मुक्तो भूत्वा अग्रिमे सन्यासाश्रमे अर्हताम्प्राप्तुं वैराग्यं संपादयितुम्प्रयतितव्य इति वानप्रस्थाश्रमस्योद्देशः । मानवजीवनस्य चरमलक्ष्यस्य मोक्ष्यस्य साधनार्थन्निष्कामकर्म कृत्वा मानवजीवनस्य सार्थक्यम्प्रापणीयमिति तु सन्यसाश्रमस्योद्देशः । एवं मानवजीवनस्य सार्थक्यार्थमेव एते आश्रमचतुष्टयाः निरूपिताः शास्त्रेषु ।

आधारग्रन्थाः -

https://doi.org/10.5281/zenodo.7248639

Paper 22

# श्रीमद्भागवतम्

**PRASAD DATTATREYA DESHPANDE**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - prasad251998dd@gmail.com

## सार: (ABSTRACT)

**यथा विश्वामित्रेण ब्रह्मज्ञानार्थं सूर्यनारायण उपासितः । तदा तपश्चर्यान्ते तस्य गायत्रीमन्त्रस्य सम्यग्ज्ञानम् अभवत् तस्य । तस्मात् गायत्रीमन्त्रस्य द्रष्टा विश्वामित्रः, गायत्री छन्दः, सूर्यनारायणो देवता इति वयं वदामः । अनेन प्रकारेण वेदचतुष्टयस्य उत्पत्तिः अभवत् । तत्र ऋग्वेदे दश मण्डलानि- १०२८ सूक्तानि- १०,६०० मन्त्राः विद्यन्ते । एवं यजुर्वेदे ऋग्वेदस्य ६६३ मन्त्राः विद्यन्ते, तथापि गद्यात्मकत्वात् भिन्नतया निरूप्यन्ते । एवं सामवेदे गानात्मकरीत्या मन्त्राः निरूपिताः । परन्तु एतेषां मन्त्राणां पठने कण्ठस्थीकरणे च असमर्थाः अधिकाररहिताः स्वमोक्षार्थं किं कुर्युः इति विचारे- वेदतुल्यानां पुराणानां श्रवणेन तथा पठनेन मोक्षः तेषां विद्यते इति व्यासमहर्षिणा उच्यते । तस्मात् एव व्यासमहर्षिणा वेदानाम् अपि सम्यग्रीत्या संग्रहः कृतः । तथैव अष्टादश पुराणानि च कृतानि। तुरीयवर्णीयानां येषां पुराणानां श्रवणे सति मोक्षः लप्सीरन् इति । परन्तु मोक्षविषयेऽपि भिन्नमतयः विद्यन्ते । यथा अद्वैते भगवतः ब्रह्मस्य ( अत्र ब्रह्मपदेन भगवन्तं स्वीकर्तव्यम् ) ज्ञाने सति मोक्षः लभते "अहं ब्रह्मास्मि" इति ज्ञानस्य सद्भावे सति । परन्तु द्वैतमते तु भगवतः नारायणस्य चित्ते यदि मोक्षः अस्य दातव्यम् इति यदा आगच्छति तदा तस्य मोक्षः लभ्यते । अस्तु... कथमपि मोक्षः लभेत तदेव सर्वेषां मतस्थापनाचार्याणामभिमतम् ।**

**प्रस्तावना-**

इह जगति अस्माकं जन्मभूमिः भारतम् अत्यन्तं श्रेष्ठतमम् । किमर्थमिति चेत् अत्र मोक्षार्थिनः देवा अपि अवतरन्ति ।अवतारे सत्यपि काम-क्रोध-लोभ-मोह-मद-मत्सरादिसत्त्वात् मोक्षमार्गे तेषां मनः विचलति । यतः आ प्राचीनकालात् नारदादयः महर्षयः मानवानां क्षेमार्थं तथा मोक्षप्रदानार्थं देवं नारायणमुपसृत्य तत्र-तत्र उद्भावितस्य अरिषड्वर्गस्य निर्मूलनाय परिहारान् यच्छन्ति स्म । तस्मात् भारतीयेषु अस्मासु मोक्षार्थं बहवः साधकाः विषयाः सन्ति ।

परन्तु तत्सर्वं ज्ञातम् अशक्ताः कलिकल्मषप्राणिनोऽपि तत्र मनः निवेशयितुं भूमिस्थाः ब्राम्हणाः जनैः पूजाः कारयित्वा तेभ्योऽपि उत्तमजन्मप्रापणे कार्यं कुर्वन्तः सन्ति । तस्मात् अस्माकम् ऋषयः वेदद्रष्टारः, तैः अस्मभ्यं परमात्मनः पूजासाहाय्यार्थम् उपयुज्यमानाः मन्त्रा दत्ताः । तेन अस्माकं जन्मापि सफलीभवति । अत्र ऋषयः वेदद्रष्टार इति उक्तं मया- तेन वेदाः पूर्वमेव आसन्, परन्तु ते ऋषयः तपः कृत्वा तन्मन्त्रान् दृष्टवन्तः, तस्मात् ते मन्त्रद्रष्टारः ।

यथा विश्वामित्रेण ब्रह्मज्ञानार्थं सूर्यनारायण उपासितः ।तदा तपश्चर्यान्ते तस्य गायत्रीमन्त्रस्य सम्यग्ज्ञानम् अभवत् तस्य । तस्मात् गायत्रीमन्त्रस्य द्रष्टा विश्वामित्रः, गायत्री छन्दः, सूर्यनारायणो देवता इति वयं वदामः । अनेन प्रकारेण वेदचतुष्टयस्य उत्पत्तिः अभवत् । तत्र ऋग्वेदे दश मण्डलानि- १०२८ सूक्तानि- १०,६०० मन्त्राः विद्यन्ते । एवं यजुर्वेदे ऋग्वेदस्य ६६३ मन्त्राः विद्यन्ते, तथापि गद्यात्मकत्वात् भिन्नतया निरूप्यन्ते । एवं सामवेदे गानात्मकरीत्या मन्त्राः निरूपिताः । परन्तु एतेषां मन्त्राणां पठने कण्ठस्थीकरणे च

असमर्थाः अधिकाररहिताः स्वमोक्षार्थं किं कुर्युः इति विचारे- वेदतुल्यानां पुराणानां श्रवणेन तथा पठनेन मोक्षः तेषां विद्यते इति व्यासमहर्षिणा उच्यते । तस्मात् एव व्यासमहर्षिणा वेदानाम् अपि सम्यग्रीत्या संग्रहः कृतः । तथैव अष्टादश पुराणानि च कृतानि। तुरीयवर्णीयानां येषां पुराणानां श्रवणे सति मोक्षः लप्सीरन् इति । परन्तु मोक्षविषयेऽपि भिन्नमतयः विद्यन्ते । यथा अद्वैते भगवतः ब्रह्मस्य ( अत्र ब्रह्मपदेन भगवन्तं स्वीकर्तव्यम् ) ज्ञाने सति मोक्षः लभते "अहं ब्रह्मास्मि" इति ज्ञानस्य सद्भावे सति । परन्तु द्वैतमते तु भगवतः नारायणस्य चित्ते यदि मोक्षः अस्य दातव्यम् इति यदा आगच्छति तदा तस्य मोक्षः लभ्यते । अस्तु... कथमपि मोक्षः लभेत तदेव सर्वेषां मतस्थापनाचार्याणामभिमतम् ।

तत्र पुराणं नाम पुरा नीयते यत् तत् इति निरुक्तिः । अष्टादशपुराणानि लिखितानि व्यासमहर्षिणा।तत्र पुराणस्य लक्षणं तावदिदम्–

*सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।*
*वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥*

इति पुराणं पञ्चलक्षणयुक्तं भवति इति प्रतिपादितम् । तत्र प्रतिसर्गो नाम ब्रह्मादीनं सृष्टिः । वंशो नाम देवाऽसुरादि भेदोत्पत्तिः । कालक्रमेण पुराणेतिहासौ प्रायः तुल्यलक्षणलक्षितौ दृष्येते । पुराणानां धार्मिकदृष्ट्या महत्वमधिकम् । वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि विरचितानि।

*इतिहासपुराणाभ्यां वेदं समुपबृंहते ।*
*बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥*

यदा वेदार्थः लोकानां मध्ये नारोढुं प्रवृत्तः तदा वेदार्थस्य विवरणरूपेण दृष्यन्तेतिहासाद्यलङ्कार-सहितानि पुराणानि विरचितानि इति अभिप्रयन्ति । परन्तु वेदेभ्यः पूर्वमेव ब्रह्ममुखान्निसृतानि इति साम्प्रदायिकास्तिकानाम् मतम् । तस्मादेव तन्नामान्वर्थकञ्च समाजस्य तात्कालिकस्वरूपबोधनायां अपि पुराणानां महानुपयोगः । पुराणेषु प्राचीनभारतस्येतिहासो निहितः । पुराणोक्तानाम्,इतिवृत्तानां च प्रामाणिकत्वं शिलालेखास्वपि कर्त्तुमारब्धम् ।अतो विदशीया अपि विद्वांसः पुराणे धृतादराः प्रतिभान्ति । इतिहासः यथा राज्ञां वृत्तं प्राध्यान्येन बोधयन्ति, तथा पुराणानि राज्ञां वृत्तैः सह ऋषीणामपि वृत्तं बोधयन्ति इति परमोपयोगित्वं पुराणानाम् ।

पुराणानि भौगोलिकसामग्रीमपि प्रस्तुवन्ति । काशीखण्डे काशीपुर्यास्तादृशं विस्तृतं वर्णनं विद्यते, येन तस्या मानचित्रमिव पुरत उपविष्ठति । अन्येष्वपि पुराणेषु तेषां-तेषां तीर्थानां तादृशां स्पष्टं वर्णनमुपलभ्यते । येन तत्परिचये सौकर्यमाधीयते । पुराणेषु अतिशयोक्तिपूर्णाशैली समावृता येन लोकास्तानि अविश्वसनीयानि काल्पनिकनि च प्रतियान्ति स्म । तत्र बोद्धव्यमिदं यत् त्रिधा वर्णनं क्रियते वस्तुतत्वम्- कथारूपेण, रूपकद्वारा, अतिशयोक्तिद्वारा च । वस्तुतत्वकथा वैज्ञानिकानाम्, तेहि वस्तुं यथावद्वर्णयन्ति । न किमपि रञ्जनं तत्राचरन्ति । रूपकद्वारा वस्तुतत्वकथनप्रणालि वेदेषु व्यवह्रियन्ते । तत्र उषः सुन्दरीकृता, वृत्रश्च राजाकृतः । अतिशयोक्तिप्रणाली पुराणेष्वादृता । अस्यां प्रणाल्यां वर्णिता अर्थाः यथामतिः विविच्य ग्रहितव्या भवन्ति । पुराणानां तुलनात्मकं अध्ययनं सामाजिकवर्णनारहस्यं च स्पष्टमवभासते इति विदुषां विचारः ।

अत्र वेदाः प्रभुसम्मिता (राज्ञाशासनवत्)

उदाहरणार्थं: "सत्यान्नप्रमदितव्यम्", "कुशलान्नप्रमदितव्यम्", "स्वाध्यायान्नप्रमदितव्यम्" ।

"अन्नं न निन्द्यात्, तद्ब्रह्मस्वरूपम्", "गातुं वित्त्वा गातुवित्"- ( अथर्वः. ७.९७.७ )

पुराणेतिहासादयः मित्रसम्मिता (मित्रसलहारूपेण)

काव्यादयः कान्तासम्मिता (भार्येवाभिरमयन्ति बोधयन्तः )

1. पुराणानां रचना कदा जातेति प्रश्ने निम्नलिखितविषयाः पूर्वं ध्यातव्यम् ।
2. अथर्ववेदे पुराणस्य उल्लेखो दृश्यते-

3. "ऋचः सामानिच्छन्दांसि पुराणं यजुषा सह
4. अच्छिष्टाञ्जज्ञिरे सर्वे दिवि देवा दिवि श्रिताः (११.७.२५)
5. गोपथब्राह्मणे पुराणानि स्मर्यन्ते-
6. " एवमिमे सर्वे वेदाः निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वयव्याख्याताः सपुराणाः सस्वराः ।" (प्रथमे, पा.२)
7. शतपथब्राह्मणे – सोऽयमिति किञ्चित् पुराणमाचक्षते (१३.४.३.१३)
8. बृहदारण्यके – "इतिहासः पुराणं विद्या उपनिषदः। (२.४.११)
9. छान्दोग्ये – ऋग्वेदः भगवोऽध्येमि....इतिहासपुराणं पञ्चमं वेदानां वेदम् ।
10. आपस्तम्भधर्मसूत्रे - पुराणस्योल्लेखएव न केवलोऽपि तु श्लोकसंख्याप्युक्ता ।
11. "अथ पुराणे श्लोकानुदाहरन्ति अष्टाशीतिसहस्राणि इति" (२.२२.३५)
12. शङ्कराचार्याः कुमारिलभट्टाश्च पुराणान्युद्धृतवन्तौ । बाणभट्टश्च हर्षचरिते –"पुराणेषु वायुप्रलपितम्" इत्याह ।

पद्मपुराणे ऋष्यशृङ्गस्य यद्वृत्तं वर्ण्यते तन्महाभारतेऽपि प्राप्यते ।

तदिमानि सर्वाणि तत्वानि पुराणानां वैदिककाले अपि अस्तित्वं समर्थयन्ते । ईसवीयशतकात् षट् शतकपूर्वतनकाले पूराणानाम् अस्तित्वं आसीदिति कल्पनाऽपि सत्यानुमोहिता । इदं तु सत्यं यत् पुराणस्यादिमं रूपं सम्प्रति नालभ्यते । पुराणं कदाचित् एकत्र समये नारच्यत । समये समये तत्राध्यायाः योजिताः । गुप्तकालपर्यन्तं तेषां वर्तमानरूपमुपपन्नमासीत् । संख्याविषये मतभेदो नास्ति, सर्ववादिसिद्धं तेषां अष्टादशत्वम्, तद्यथा-

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥

- मद्वयम् – मकारादिपुराणद्वयम् – " मत्स्यपुराणम्, मार्कण्डेयपुराणम्" ।
- भद्वयम् – भकारादिपुराणद्वयम् – " भविष्यत्पुराणम्, भागवतपुराणम्"(देवीभागवतम्, श्रीमद्भागवतम् इत्यपि नामान्तरम्) ।
- ब्रत्रयम् – ब्रकारादिपुराणत्रयम् – " ब्रह्माण्डपुराणम्, ब्रह्मपुराणम्, ब्रह्मवैवर्तपुराणम्" ।
- वचतुष्टयम् – वकारादिपुराणाचतुष्टयम् – वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, वायुपुराणम्" ।
- अ – अग्निपुराणम्,
- ना – नारदपुराणम् ।
- प – पद्मपुराणम् ।
- लि – लिङ्गपुराणम् ।
- ग – गरुडपुराणम् ।
- कू – कूर्मपुराणम् ।
- स्क – स्कन्धपुरणम् ।

एतत्पुराणातिरिक्तानि अष्टादशोपपुराणानि अपि आख्यायन्ते –

| | |
|---|---|
| • आदिपुराणम् । (सनत्कुमारः) | • ब्रह्माण्डपुराणम् । |
| • नरसिंहपुराणम् । (नृसिंहः) | • वारुणपुराणम् । (वरुणः) |
| • नन्दिपुराणम् ।(कुमारः) | • कालिकापुराणम् । (सती) |
| • शिवधर्मपुराणम् । | • माहेश्वरपुराणम् । (वासिष्ठः) |
| • आश्चर्यपुराणम् । (दुर्वासः) | • साम्बपुराणम् । (आदित्यः) |
| • नारदीयपुराणम् । (नारदः) | • सौरपुराणम् । (सूर्यः) |
| • कपिलपुराणम् । (कपिलः) | • पाराशरपुराणम् । (पराशरोक्तम्) |
| • मानवपुराणम् (मनुः) | • मारीचपुराणम् । (भागवतः) |
| • औशनापुराणम् ।(उशना) | • भार्गवपुराणम् । (वासिष्ठः) |

*अत्र सम्पुटचिह्ने नियुक्तानि नामानि तैर्भिः प्रवोक्तानि इत्यर्थः । एवमन्ये शताधिकानि पुराणानि सन्ति। तत्र भागवतस्य विषयं जानामः । भगवतः इदं भागवतम् इति, यत्शास्त्रं साक्षाद्भवतः रूपमेव भवति तद्भागवतम् । पद्मपुराणे भागवतस्य द्वादशस्कन्धाः भगवतस्य नारायणस्य द्वादशाङ्गानि भवन्तीति प्रतिपादितम् । परन्तु कैशकीसंहितायां एवम् उच्यन्ते-

पादादिजानुपर्यन्तं प्रथमस्कन्ध ईरितः । तदूर्ध्वं कटिपर्यन्तं द्वितीयस्कन्ध उच्यते ॥
तृतीयो नाभिरित्युक्तश्चतुर्थ उदरं मतम् । पञ्चमो हृदयं प्रोक्तं षष्ठः कण्ठस्सवाहुकम् ॥
सर्वलक्षणसंयुक्तं सप्तमं मुखमुच्यते । अष्टमो चक्षुषी विष्णोः कपोलौ भृकुटिः परः ॥
दशमो ब्रह्मरन्ध्रञ्च मन एकादशः स्मृतः । आत्मा तु द्वादशस्कन्धः श्रीकृष्णस्य प्रकीर्तितः ॥

श्रीकृष्णस्य आबाल्यलीलाखेला अस्य प्रमुखविषया भवन्ति । वैष्णवानामुपजीव्यम्, पवित्रतमं पुराणम्, परब्रह्मप्रतिपादकम्, ज्ञानवैराग्यभक्तिसमन्वितम्, निष्कामकर्मसंपादितम्, भक्तिरसस्य अमूल्यशेवधिः अस्ति "श्रीमद्भागवतम्" ।तदुक्तम्-

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियम् ।
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गयते ॥
तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतम् ।
तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥(श्रीमद्भागवतम्- १२.१३.१८)

महाराजाय परिक्षिताय शुकदेवेन श्रावितः व्यासविरचितोऽयं ग्रन्थः साधनाज्ञानम्- सिद्धज्ञानम्- साधनभक्तिः-सिद्धभक्तिः-मर्यादामार्गम्-अनुग्रहमार्गम्-द्वैत-अद्वैत-विशिष्टाद्वैतदर्शनानामपूर्वसमन्वय आत्मकोऽध्यात्मज्ञानं पोषयति । अयं सकलविद्या सारभूतोऽस्ति । हयग्रीवविद्या-वृत्तवधकथा-गायत्रीरहस्यं च यत्र तात्त्विकदृष्ट्या वर्णितमस्ति भागवतं स्कन्धपुराणे उच्यते-

ग्रन्थोऽष्टादशसहस्रो द्वादशस्कन्धसम्मितः ।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः ॥ (स्कन्धपुराणे)

श्रीमद्भागवतं ब्रह्मसूत्राणां सारभूतम्, महाभारतविषयप्रतिपादकम्, गायत्रीभाष्यरूपम्, पुराणानाम् सारभूतं इति गरुडपुराणे कथ्यन्ते-

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ।गायत्रीभाष्यरूपोऽसौ वेदार्थप्रतिबृहितः ॥
पुराणानां साररूपो साक्षाद्भागवतोदितः ॥(गरुडपुराणे)

भागवतस्य रचनाकालः – सांख्यकारिकायाः माठरवृत्तौ (५५७.५६९ ए.डि)श्रीमद्भागवतस्य श्लोकद्वयमुद्धृतमस्ति (१/६/३५; १/८/५२) । उत्तरगीतायाः टीकायामपि भागवतस्य दशमस्कन्धात् श्लोकमेकमुद्धरति(१०/१४/४) । अतः प्रायः पञ्चमशतकात् षष्ठशतकाद्वा प्रागेव श्रीमद्भागवतस्य रचनाऽभूदिति वक्तुं शक्यते । दयानन्दानुसारेण त्रयोदशशतके वोपदेवेन एतद्रचितमिति यदुच्यते तदपरैस्समालोचकैः नाङ्गीकुर्वन्ति । भागवतस्य विषयवस्तु- श्रीमद्भागवते महापुराणे समुदायरूपेण १८००० श्लोकाः विद्यन्ते । अतोऽस्य नाम "अष्टादशसाहस्री संहिता" इति । अत्र द्वादशस्कन्धाः, ३३५ अध्यायाश्च सन्ति । एवमत्र द्वादशस्कन्धे स्थिताः अध्यायाः-

| स्कन्धाः | अध्यायाः | स्कन्धाः | अध्यायाः |
|---|---|---|---|
| प्रथमस्कन्धे | १९अध्यायाः | अष्टमस्कन्धे | २४ अध्यायाः |
| द्वितीयस्कन्धे | १० अध्यायाः | नवमस्कन्धे | २४ अध्यायाः |
| तृतीयस्कन्धे | ३३ अध्यायाः | दशमस्कन्धे | पू.४९ उ.४१ |
| चतुर्थस्कन्धे | ३१ अध्यायाः | एकादशस्कन्धे | ३१ अध्यायाः |
| पञ्चमस्कन्धे | २६ अध्यायाः | द्वादशस्कन्धे | १३ अध्यायाः |
| षष्टस्कन्धे | १९ अध्यायाः | | |
| सप्तमस्कन्धे | १५ अध्यायाः | | |

एतेषु **प्रथमे स्कन्धे** सूतस्य शौनकादिभिः ऋषीणां च समागमो नैमिषारण्ये भवति । ततः भगवद्वर्णनम्, अवतारकथाप्रसङ्गः, भगवच्चरितम्, व्यासपाण्डवानां चरित्रम्, परीक्षिताख्यानम्, अश्वत्थानः दण्डवर्णनम्, कुन्तीस्तवः, युधिष्ठिरस्य भीष्मेण धर्मोपदेशः, भीष्मस्य कृष्णस्तुतिः, भीष्मस्य मुक्तिः, कृष्णस्य द्वारिकागमनम्, कृष्णातिरोधानम्, युधिष्ठिरादीनां स्वर्गारोहणम्, परीक्षितकृतकलिनिग्रहः, परीक्षता शापः, गङ्गातटे निवासः, तस्य समीपे शुकदेवस्यागमनम् इत्यादयो विषयाः क्रमशः प्राप्यन्ते । **द्वितीयस्कन्धे** महापुरुषसंस्थानम्, विष्णुधारणकथा, ब्रह्मनारदसंवादः, परीक्षितशुकसंवादः, अवतारचरित्रम्, पुराणलक्षणम्, सृष्टिकार्यादिकञ्च विषयाः लभ्यन्ते । **तृतीयस्कन्धे** विदुरोद्धवसंवादः, उद्धवेन श्रीकृष्णस्य बाल्यलीलावर्णनम्, द्वारिकावर्णनम्, कंससंहारः, विदुरमैत्रेयसमागमः, सांख्ययोगः इत्यादकं विषयाणां प्रस्तावो विद्यते । **चतुर्थस्कन्धे** सतीचरित्रम्, ध्रुवचरित्रम्, पृथुचरित्रं च पुण्याख्यानि लभ्यन्ते । **पञ्चमस्कन्धे** प्रियव्रतस्य तद्वंशगतानां च वर्णनम्, भुवनकोषस्य अद्भुतं वर्णनमत्र विद्यते। **षष्ठस्कन्धे** अजामिलचरितम्, दक्षसृष्टिनिरूपणम्, वृत्राख्यानम्, मरुद्गणजन्मवृत्तान्तश्च कीर्त्यते । **सप्तमस्कन्धे** प्रह्लादचरितम्, मनुष्यधर्मः, वर्णाश्रमधर्मः, अवधूतेतिहासः, गृहस्थधर्मः, मोक्षलक्षणं च प्रतिपादितम् । **अष्टमस्कन्धे** स्वायम्भुव-स्वारोचिष-उत्तम-तामसानां चतुर्णां मनुष्याणां निरूपणम्, गजेन्द्रमोक्षः, समुद्रमन्थनम्, बलिबन्धनम्, मत्स्यावतारश्च अत्र आकर्षकाणि । **नवमस्कन्धे** सूर्य-सोमवंशाख्यानम्, इलोपाख्यानम्, सुकन्याख्यानम्, रेवताख्यानम्, शर्य्यातिकथा, मनुपुत्रनाभागकथा, नाभागपुत्राम्बरीषकथा,

मान्धातृ-तनयापति-सौभर्युपाख्यानम्, पुरुकुत्सवृत्तान्तः, हरिश्चन्द्रोपाख्यानम्, परशुरामकथा, नहुषपुत्रययात्युपाख्यानम्, भरतवंशकथा च वर्ण्यन्ते ।**दशमस्कन्धः** तु अतीवलोकप्रियो भवति । अत्र कृष्णस्य बाल्य-कुमार-किशोरलीलाः वर्ण्यन्ते । कृष्णस्य व्रज-मथुरा-द्वारिकासु निवासावसरलीलाः मधुराः आश्चर्यकराः सन्ति । कंस-वत्सासुर-बकासुर-अघासुर-प्रलम्बासुर-कालीय-धेनुकासुर-केशी-व्योमासुर-शम्बर-काशीराज-पूतना-शकटासुरादिदुष्टादीनां संहारवृत्तान्तः अस्मिन् स्कन्धे लभ्यते । **एकादशस्कन्धे** वासुदेवनारदसंवादः वर्तते । अत्र दत्तात्रयेण सह युद्धम्, उद्धवश्रीकृष्णस्य संवादः, यदुवंशनाशः विद्यते । **द्वादशस्कन्धे** भविष्यकलिनिर्देशः, प्रलयः, परीक्षितमोक्षः, वेदशाखाप्रणयनम्, मार्कण्डेयतपस्या, गौरी-सात्वती-विभूति-पुराणसंख्यावर्णनञ्च कृतम् ।

एवमत्र भागवतस्य संक्षिप्तविषयवस्तु श्लोकेनोच्यते-

*आदौ देवकीदेवगर्भजननं गपीगृहे वर्धनं*
*मायापूतनजीवितापहरणं गोवर्धनोद्धारणम् ।*
*कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनं*
*एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥*

**आकरग्रन्थाः**

| ग्रन्थनाम | रचयितारः | प्रकाशकाः |
|---|---|---|
| भागवतपुराणम् | श्रीवेदव्यासः | श्रीपेजावर अधोक्षजमठः, उडुपि । |
| श्रीमद्भागवतमहापुराणम् | श्रीवेदव्यासः | गीताप्रेस, गोरखपुर । |
| भागवततात्पर्यनिर्णयः | श्रीमदानन्दतीर्थाः | dwaita vedAnta studies and - research foundation |

https://doi.org/10.5281/zenodo.7248656

Paper 23

# सुरवाणीसागरे सूरिरत्नानि

**RAGHAVENDRA B.J.**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - raghavendra@gmail.com

**सार**: (ABSTRACT)

**सन्ति लोके बहवः कवयः । सन्ति भूयांसि काव्यानि च । सन्ति भूयिष्ठा नायकाः । किन्तु वाल्मीकिसमः कविर्नास्ति जगतीतले । रामायणसमानं काव्यं न विद्यते कस्यामपि भाषायाम् । रामतुल्यो नायकोऽपरो न वर्तते इतिहासे । अतो वाल्मीकिरेवादिकविः । रामायणमेवादिकाव्यम् । राम एव आदर्शनायको मनुष्यकुलस्य । कथासंविधाने प्रकृतिवर्णनायां व्यक्तित्वचित्रणे च वाल्मीकिः सर्वेषां गुरुः । दशरथनन्दनस्य रामस्य कथां कस्माच्चिज्ज्ञातवान् वाल्मीकिरिति चेत् स रामः सर्वेषां सद्गुणानाम् खनिः ।**

## प्रस्तावना

जगत्यस्मिन् देशस्यास्य गरिमां सर्वे जानन्त्येव । तत्र निदानद्वयं वर्तते, यतोहि- भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा इति । यथास्य संस्कृतिरुत्कृष्टा वर्तते तथा संस्कृतमपि । "भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती" इत्युक्तदिशैषा देवानां भाषा अपि । एतादृग्वैशिष्ट्ये सुरवाणी साहित्यसागरे सूरिरत्नानि दृश्यन्ते । ते च-

जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत् ।
कवीति च ततो व्यासे कवयस्त्विति दण्डिनि ॥

इत्युक्तरीत्या आदौ आदिकविं पश्याम-

## विषयप्रस्तुतिः

सन्ति लोके बहवः कवयः । सन्ति भूयांसि काव्यानि च । सन्ति भूयिष्ठा नायकाः । किन्तु वाल्मीकिसमः कविर्नास्ति जगतीतले । रामायणसमानं काव्यं न विद्यते कस्यामपि भाषायाम् । रामतुल्यो नायकोऽपरो न वर्तते इतिहासे । अतो वाल्मीकिरेवादिकविः । रामायणमेवादिकाव्यम् । राम एव आदर्शनायको मनुष्यकुलस्य । कथासंविधाने प्रकृतिवर्णनायां व्यक्तित्वचित्रणे च वाल्मीकिः सर्वेषां गुरुः । दशरथनन्दनस्य रामस्य कथां कस्माच्चिज्ज्ञातवान् वाल्मीकिरिति चेत् स रामः सर्वेषां सद्गुणानां खनिः । रामायणस्यारम्भ एव वाल्मीकिर्नारदं सर्वलोकसञ्चारिणं पृच्छति-

कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥
चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥
आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति लोकाश्च जातरोषस्य संयुगे ॥

अत्र कथिताः षोडशगुणाः पुरुषेषु पृथक् पृथक् उपलभ्यन्ते । सर्वेषां गुणानां समवाय एकत्र न दृश्यते । अत एव प्रश्नं श्रुत्वा नारदो बभाण-

बह्वो दुर्लभाश्चैव ये त्वया कथिता गुणाः ।
मुने ब्रवीम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥

इति । एतादृशसकलसद्गुणयुक्त इक्ष्वाकुवंशप्रभवः राम एव नान्य इति नारदेन सत्यमेवोक्तम् । पुरुषोत्तमाय रामाय नतिततयः ॥

वाल्मीकिना लोकोत्तरा रामकथा प्रस्तुता । कथासंविधाने वाल्मीकिः अद्वितीयः । अत एव शतशः सहस्रशो लक्षशः । कथितापीयं कथा नवत्वं न त्यजति । दशरथस्य चतुर्षु पुत्रेषु ज्येष्ठः श्रेष्ठश्च रामः । तं सदानुगतवान् भ्राता लक्ष्मणः । परमवीरौ ज्येष्ठभ्रातरि भक्तिमन्तौ भरतशत्रुघ्नौ । रामस्योदात्तत्वं बाल्य एव व्यज्यते । यज्ञरक्षायै विश्वामित्रो महर्षिः ऊनषोडशवर्षमपि रामं प्रेषयितुं दशरथं ययाचे । संशयानं राजानं दशरथं विश्वामित्र उवाच-

अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् ।
वसिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः ।

एवं राममाहात्म्यं नाटकायाः वधे, अहल्याया उद्धारे, शिवधनुर्भङ्गे च व्यक्तं भवति । सीताकल्याणं मनोहरं वस्तु । ततः पुनः परशुरामगर्वभङ्गः श्रीरामस्य पराक्रमातिशयं व्यञ्जयति । अयोध्याकाण्डं रमायणस्य हृदयम् । तत्र करुणरसस्य परां काष्ठां पश्यामः । दशरथेन रामपट्टाभिषेकप्रयत्नः, कैकेय्याः वरयाचना, सीतारामलक्ष्मणानां वनप्रयाणं, गुहसमागमः, दशरथस्य रामवियोगतप्तस्य निधनं, भरतेन राज्याशारहितेन अयोध्यामागत्य राज्यं शाधीति रामसन्निधौ याचना- इति एकैकोऽपि विषयो हृदयङ्गमः । रामस्तु पितृवाक्यपरिपालको नाङ्गीकरोति । चतुर्दश वर्षाणि वने वत्स्यामीति स वदति । रामपादुकयोः पट्टाभिषेकः क्रियते भरतेनेति सर्वं लोकक्षेमाय । अरण्यकाण्डे मायामृगप्रसङ्गः, सीतापहरणं जटायुषो मरणं च दुःखम् उन्मीलयतीति वाल्मीकिकृतं कथासंविधानं रमणीयम् ॥

किष्किन्धाकाण्डे सीतामन्वेषमाणयो रामलक्ष्मणयोः किष्किन्धायामागमनं, हनुमता तयोर्दर्शनं, सुग्रीवसख्यं, वालिवधः, सीतान्वेषणाय वानराणां सर्वासु दिक्षु प्रेषणं च वर्ण्यन्ते । सुन्दरकाण्डे हनूमतः समुद्रोल्लङ्घनं, लङ्कायां तेन सीतादर्शनं, अशोकवनतरुणां ध्वंसः, अक्षकुमारवधः, रावणस्थानदर्शनं, लङ्कादहनञ्च रोचकतया वर्णितानि । ततो युद्धकाण्डे सेतुबन्धः, विभीषणशरणागतिः, युद्धे कुम्भकर्णादीनां मरणं, रामरावणयोः समरविशेषः, रामेण रावणस्य वधः, सीतायाः अग्निपरीक्षा, विभीषणस्य पट्टाभिषेकः, पुष्पकविमाने सीतारामलक्ष्मणानाम् अयोध्यागमनं, श्रीरामपट्टाभिषेकः, प्रजानामानन्दः इत्येतद्वर्ण्यते । उत्तरकाण्डे सीतापरित्यागः, वाल्मीकिमहर्ष्याश्रमे लवकुशयोर्जन्म, ताभ्यामयोध्यायां रामायणगानं, रामाश्वमेधः, सीतायाः भूप्रवेशः, रामनिर्वाणञ्च वर्ण्यन्ते । एषा कथा अद्यापि जनानां प्रिया । कथासंविधानं सुन्दरतमम् । कथायाः एकैकं भागमाश्रित्य कविभिः महाकाव्यानि नाटकानि च रचितानि । अत एव चिरन्तनं श्रीमद्रामायणम् ।

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।

तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥

प्रकृतिचित्रणे वाल्मीकिरप्रतिमः । प्रकृतिसौन्दर्यं यथास्माकं चक्षुषः पुरस्तात् मूर्तिमद् भवेत् तथा सः शब्दैः चित्रयति । श्रेष्ठाः विमर्शकाः वाल्मीकेः श्लोकान् स्वग्रन्थेषु उदाहरन्ति ।

रविसङ्क्रान्तसौभाग्यः तुषारावृतमण्डलः ।
निःश्वासान्ध इवादर्शः चन्द्रमा न प्रकाशते ॥ इति ।

श्लोक आनन्दवर्धनाचार्येण ध्वन्यालोके उदाहृतः । अत्रान्धशब्दस्य ध्वनिमत्त्वं ज्ञायत एव सकलैः सहृदयैः । ऋतूनां वर्णनापि रामायणे मनोज्ञा वर्तते । किष्किन्धाकाण्डे अष्टाविंशे सर्गे वर्षर्तोर्वर्णनं हृदयङ्गमम् ।

शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः ।
कुटजार्जुनमालाभिरलङ्कर्तुं दिवाकरम् ॥

इत्यत्र वाल्मीकेः प्रतिभा प्रचकाशीति ।

विनीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः ।
विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः ॥

इत्यत्र वल्मीकेः प्रकृतिवीक्षणं कियत्सूक्ष्ममिति ज्ञायते । किष्किन्धाकाण्डे शरद्वर्णनं चातीव हृद्यं विद्योतते ।

शाखासु सप्तच्छदपादपानां प्रभासु तारार्कनिशाकराणाम् ।
लीलासु चैवोत्तमवारणानां श्रियं विभज्याद्य शरत्प्रवृत्ता ॥

इत्यस्य पद्यस्य चारुता अन्यत्र क्व लभ्येत? वाल्मीकेः समो वाल्मीकिरेव प्रकृतिवर्णने इति निश्शङ्कं ब्रूमः ॥

पात्रचित्रणं वाल्मीकेः पश्चामश्चेत् तत्र स सिद्धहस्त इति निश्चप्रचम् । रामस्य, सीतायाः, लक्ष्मणस्य भरतस्य, हनूमतः, रावणस्य, विभीषणस्येति बहूनां पात्राणि अस्माकं हृदये स्थिराणि तिष्ठन्ति । श्रीरामस्य व्यक्तित्वम् असाधारणम् । तत्सदृशो नायको विश्वसाहित्येऽन्यत्र दुर्लभः ।

बुद्धिमान् मधुराभाषो पूर्वभाषी प्रियंवदः ।
वीर्यवान् न च वीर्येण महता स्वेन विस्मितः ॥
न चानृतकथो विद्वान् वृद्धानां प्रतिपूजकः ।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्यते ॥

इत्यादयो गुणाः सर्वेऽत्यत्र कस्मिन् नरे लभ्यन्ते? भ्रातृषु तस्य पेम स्थिरोऽचलश्च । कैकेय्यादेशानुसारेण चतुर्दश वर्षाणि अरण्यं गन्तुं प्रस्थितस्य रामस्य मुखे विक्रिया न दृष्टा । महापुरुषः स इत्यस्य तदेव लक्षणम् । भार्यावचसा पितां मां काननं प्रेषितवानिति न चक्रोध रामः ।

सत्यः सत्याभिसन्धश्च नित्यं सत्यपराक्रमः ।
परलोकभयाद् भीतो निर्भयोऽस्तु पिता मम ॥

इत्यादि वचनं रामस्य महासत्त्वतां व्यनक्ति । शत्रौ रावणेऽपि तस्य वर्तना श्लाघनीया । मृतस्य रावणस्य संस्कारः मया कर्तव्यो वा न वेति शङ्कमानं विभीषणं प्रति रामो वदति-

मरणान्तानि वैराणि निर्वृत्तं न प्रयोजनम् ।

क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥

भरतसमानो भ्राता लोके दुर्लभः । रामः स्वयं वदति-

न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः ।
मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः ॥

भरतेन राज्यं लब्धं, किन्तु स तन्न ववाञ्छा । रामाय प्रत्यर्पयत् । रामो वनवासविषये स्थिरमतिरासीदिति रामपादुके सिंहासने स्थापयित्वा तयोर्नाम्नि राज्यं शशास । रामे चतुर्दशवर्षानन्तरं प्रत्यागते तस्मै पूर्णं राज्यं भरतः समर्पयामास । एतादृशो भ्राता विश्वेतिहसे क्वान्यत्र दृश्येत?

हनूमत्सदृषो भक्तोऽप्यन्यत्र दुर्लभः । तेन रामस्य बहव उपकाराः कृताः । किन्तु रामात् किमपि स नाप्यपैक्षत । रामस्तं वदति-

एकैकस्योपकारस्य सर्वं दास्यामि ते हरे ।
शेषणामुपकाराणां भवाम ऋणिनो वयम् ॥
मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे ।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ॥ इति ।

एतादृशं भक्तम्, एतादृशं देवञ्च वयं रामायणे पश्याम इति वयमेव धन्याः । रामायणस्य विविधानां पात्राणां चित्रणं दीर्घं पुस्तकमेवापेक्षते इति ।

**महाभारतम्**

संस्कृतसाहित्यप्रपञ्चस्य हिमालयायमानं महाभारतं देवभाषायां वा देशभाषायां वा को न पठितवान्? महाभारतस्य प्रणेता मुनिः व्यासः कस्य न पूज्यः?

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयप्रदीपः ॥ इति ।

सर्वे ज्ञानिनस्त नमस्यन्ति । बहवः कवयस्तं स्तुवन्ति । बाणभट्टो बभाण-

नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सारस्वत्या यो वर्षमिव भारतम् ॥ इति ।

वेणीसंहारनाटकस्यादौ भट्टनारायण उवाच-

श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः ।
तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे ॥ इति ।

'भारतं पञ्चमो वेद' इति महात्मानो मन्यन्ते । शतसहस्रश्लोकात्मके महाभारते पुरुषार्थचतुष्टयसाधकाः सर्वे विषयाः कथिताः । अत एव ग्रन्थे प्रोक्तम्-

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥ इति ।
महाभारते महत्त्वं च ग्रन्थभूयस्त्वं च विद्यते ।
महत्वाद् भारवत्त्वाच्च महाभारतमुच्यते ॥ इति ॥

साधु कथितम् । महाभारतसमानो ग्रन्थो विश्वस्मिन्नन्यो नास्तीति न केवलमभिमानप्रेरितं वचनः । तस्य पठनेनाध्ययनेन च बहवो धन्या अभवन् भवन्ति भाविष्यन्ति च । महाकविः क्षेमेन्द्रः आत्मानं व्यासदासं घोषयति । कन्नडकविः नाराणप्पः आत्मानं कुमारव्याससञ्ज्ञकं कृतवान् । एवं भारतदेशस्य सर्वासु भाषासु भारतस्य कथा

शताधिकैः कविभिः पुनरुन्मीलिता । महाभारतगतानि उपाख्यानानि बहूनां महाकाव्यानां नाटकानां प्रबन्धानां चोत्पत्तौ कारणानि । अक्षय्यो भारतद्रुम इति य्दुच्यते तत्सत्यस्य सत्यम् । तत्र प्रतिदिनं नावीन्यमवलोक्यते विपश्चिद्भिः । अत एवोक्तम्-

आदित्यस्योदयस्तात ताम्बूलं भारती कथा ।
इष्टा भार्या सुमित्रं च अपूर्वाणि दिने दिने ॥ इति ।

भारतस्य कथा नानाजन्मसम्बद्धा । शन्तनुः, भीष्मः, विचित्रवीर्यचित्राङ्गदौ, पाण्डुधृतराष्ट्रौ, पाण्डवाः कौरवाश्चेति वंशपरम्परा । तेषां सर्वेषां जन्म, वैभवं, स्वर्गगमनमिति महती कथा। कति नायका अत्र शोभन्ते । एको नान्यसदृशः । सर्वे भिन्नप्रतिभावन्तः । भिन्नगुणाः । चित्रशालायां यथा नानावर्णानि ननाभावद्योतकानि चित्राणि पश्यामस्तथा महाभारते नानापात्राणि पश्यामः । अतो भारतपठनं वेदपठनसमानमिति शम् ॥

संस्कृतसाहित्ये 'दशकुमारचरित'स्य विशिष्टं स्थानमस्ति । तस्य काव्यस्य कथा नामत एव ज्ञायते यथा दशराजपुत्राणां विभिन्नानां विचित्राणां चरित्राणां सङ्ग्रह इति तत्काव्यस्य स्थूलपरिचय एवं त्रिषु भागेषु ज्ञातुं शक्यते ।

१. पूर्वपीठिका - अत्र द्वयो राजपुत्रयोः कथा तावदुछ्वासपञ्चके निबद्धा दृश्यते ।
२. दशकुमारचरितम् - अष्ट राजपुत्राणां कथा उछ्वासाष्टके निबद्धास्ति । अथ विश्रुत कथा अपूर्णा दृश्यते ।
३. उत्तरपीठिका - अत्र विश्रुतकथापि अतिसङ्क्षिप्तरूपेण दृश्यते चेदपि पूर्वोक्त स्थलत्रयोऽपि दण्डिनः वर्णना चातुर्यं पदानां लालित्यम् अत्यन्तं मनोहरञ्च भाति ।

एवमेव दण्डिनः कृत्यन्तरम् अवन्तिसुन्दरीकथापि सहृदयानां हृदयानन्दं जनयति तथैव काव्यादर्शस्य स्थानमपि सहृदयानां हृदयस्थानमित्यतो दण्डिनविषये इयमुक्तिः प्रसिद्धा दृश्यते । यथा -

त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥

इति । एतेषामजरामराणां कवीनां काव्यानामध्ययनेन वयं सर्वे धन्या भवाम । यतो हि-

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति तेषां यशः काये जरामरणजं भयम् ॥

https://doi.org/10.5281/zenodo.7253546

Paper 24

# ज्यौतिषम्

VISHNUMURTHY B. BORKAR
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - vishnumiyar@gmail.com

## सार: (ABSTRACT)

"अथ ज्योतिः शास्त्रफलं पुरणगणकैरादेश इत्युच्यते" इति भास्करवचनात् । "यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् । व्यञ्जयति शास्त्रमेतत् तमसिद्रव्याणि दीप इव, इति वराहवचनह्य एतत् शास्त्रस्य फलोदेश करणमेव मुख्यप्रयोजम् । परञ्च फलादेशस्य – लग्न – ग्रहाआश्रितत्व लग्न – ग्रहादि साधनार्धमादौ सिद्दान्द गाणित ज्ञानं आवश्यकम् । होरास्कन्धे पौरुषग्रन्थेषु सर्वप्रथमं बृहज्जातकस्य आविर्भावः । अन्यञ्च ग्रन्थाः प्राचीनार्षहोरग्रन्थ सारभूतस्तसम्मतश्च आधुनिक सकल पौरुष ग्रन्थानां मूलभूतो गव्यते ।

**प्रास्ताविकम् –**

अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम् ।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्को यत्र साक्षिणौ ॥

इति वचनानुसारम् ज्यौतिषशास्त्रं प्रत्यक्षरूपेण दृश्यते ।

इदं शास्त्रं वेदस्य चक्षुः इति अभिधीयते । यतः चक्षुः विना मानवाः किमपि दृष्टुं अशक्नोति तथैव ज्यौतिषं विना अन्यत् शास्त्राणि अवगन्तुं कष्टं भवति । एतत् शास्त्रं त्रिस्कन्धामकं भवति । सिद्धान्त – संहिता – होरा इति । तत्र संहिता तथा सिद्धान्त विषये लीलावती – सिद्धान्त-शिरोमणि ग्रन्थादिषु उल्लियतमस्ति – तत्र होरा अत्यन्तम् प्राधान्यम् स्कन्धः अस्ति । तत्र एकं श्लोकं भवति ।

पूर्वजन्मार्जितं पुण्यं शुभंवा यदिवाशुभं ।
तस्य पक्तिं ग्रहाः सर्वे व्यञ्जयन्ति इह जन्मनि ॥

इति श्लोकानुसारम् मानवाः पूर्वजन्मस्य शुभाशुभ कर्मवशात् एतत् जन्मं प्राप्य सुखासुखादिकं अनुभवति ।
अत्र जन्मलग्नादारभ्य द्वादश भावाः भवन्ति ।
ग्रहाणां स्थितिवशात् मनुष्यस्य शुभाशुभ फलानि वक्तुं शक्यते ।
तेषु संहिताग्रन्थेषु केवलं तावदेवस्थैव वराहमिहिर कृतस्य बृहत्संहिता एव इदानीं उपलब्धी वर्तते ।
तत्र स्कन्धे सूर्यसिद्धान्त – सिद्धान्तशिरोमणिः –सिद्धान्त तत्वविवेकेति सिद्धान्तग्रन्थत्रयस्य, करणग्रन्थस्य । लीलावती – बीजगणितेति गणितग्रन्थद्वयस्य, अद्यत्वे प्रचारो वर्तते ।

"अथ ज्योतिः शास्त्रफलं पुरणगणकैरादेश इत्युच्यते" इति भास्करवचनात् । "यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् । व्यञ्जयति शास्त्रमेतत् तमसिद्रव्याणि दीप इव, इति वराहवचनह्य एतत् शास्त्रस्य फलोदेश करणमेव मुख्यप्रयोजम् । परञ्च फलादेशस्य – लग्न – ग्रहाआश्रितत्व लग्न – ग्रहादि साधनार्धमादौ सिद्दान्द गाणित ज्ञानं आवश्यकम् ।
होरास्कन्धे पौरुषग्रन्थेषु सर्वप्रथमं बृहज्जातकस्य आविर्भावः । अन्यञ्च ग्रन्थाः प्राचीनार्षहोरग्रन्थ सारभूतस्तसम्मतश्च आधुनिक सकल पौरुष ग्रन्थानां मूलभूतो गव्यते ।

तत्र होरा विषये किञ्चित् लेलिख्यते । भाव्यते एभिः शुभशुभानिफलानि इति भावाः । ज्योतिष्ये भावाः नाम लग्नादि द्वादशभावाः फलनिर्देशे उपयुक्ता । जनन काले पूर्वक्षितिजे योराशिः समुदेति च एव तनु भावः । तदेव उक्तं भास्करेण "यत्रलग्नमपमण्डलं कुजे तद् ग्रहाद्यमामिहलग्नमुच्यते " इति । एतेन तनुभावेन देहस्य प्रष्टतां, गात्रं, रूपं, वर्णं ज्ञानस्वभावादीन् चिन्तयन्ति । द्वादश भावेषु लग्नभावः एव प्रधानः कथमितिचेत् लग्नलग्नाधिवौ आत्मकारकरविश्च बलिष्ठश्चेत् जातकः दीर्घायुरारोग्यं सुखं च अनुभवति । जन्मकालीन लग्ने यो नवांशः तस्य यः अधिपतिः तस्मात् वा जातके सकल ग्रहा प्रेक्षयाः यो बलीयात् तस्मात् वा जातस्य शरीराकृतिलक्षणानि वाच्यानि । शुभग्रहेण युक्तो दृष्टो वा लग्नेशः त्रिकोणे केन्द्रेवा गतः स्यात् एवं शुभग्रहाणां राशिगतो बलादयो वा भवेत् तदा जातो नरः चटः समुद्रान्तं यशः प्राप्नोति । एतत् विरुद्धस्थितिः कीर्तिनाशाय भवति । लग्ने चरभेसति लग्नेशे चरराशौ विद्यमाने सति तस्मिन् वरखेवेददृष्टे सति जातस्य विदेशे भाग्योदयम् ब्रूयात् । सामान्यतः अत्र सर्वत्रापि एकस्य भावस्य पुष्टत्वं हीनत्वंच ज्ञातुं एको न्यायः मुनिभिः अनुसृतः इति निश्चेतुं शक्यते । स एकन्यायः ।

यो यो भावः स्वामिदृष्टोयुतोवा
सौम्यैर्वास्यात् तस्य तस्याभिवृद्धिः ।
पापैरेवं तस्य भावस्य हानिः
निर्दिष्टव्या जन्मतः प्रश्नतो वा ॥ इति सकलभावापेक्षया लग्नभावस्यैव प्राधान्यत। किमर्थं अस्ति इति किंञ्चित् विचारयामः । लग्नभावः इत्युक्ते स्वयमेव प्रष्टा भवति।

लग्नभावः इत्युक्ते जातकः एव । लग्नात् द्वितीयभावः इत्युक्ते जातकस्य धनं, लग्नात् तृतीयभावः इत्युक्ते जातकस्य सहोदरः, लग्नात् चतुर्थभावः इत्युक्ते जातकस्य माता एवमेव सर्वभावानां लग्नभावस्य एव सम्बन्धः वर्तते । अतः एव लग्नस्य, लग्नाधिपस्य च सम्बन्धेन सर्वभावानां साक्षात् फलानुभवः भवति । अतः एव उक्तं " लग्नलग्नेश संबन्धात् तत्तद् भावानुभवः स्मृतः" इति ।

पूर्वा चार्यैः तावत् निसर्गायुः, पिण्डायुः, अंशकायुः रश्मिजायुः, चक्रायुः, विंशोत्तरि दशायुः इति नानाप्रकारतया आयुर्दशानयनं उक्तम् । तत्र ज्योतिश्शात्रस्य आद्यप्रकारकत्वेन पराशरमुनिना प्रोक्तत्वात् कलियुगे अनुभववेद्यत्वक्य विंशोत्तरीदशा एव विद्वद्भिः विशेषेण गृह्यते ।

तेन प्रकारेणैव सर्वैः दशानयनं क्रियते च । अतः पराशरोक्तप्रकारेणैव दशानयनं कृत्वा फलविमर्शार्थं उपक्रमः कर्तव्यः ।

स्थाननदिक्काल चेष्टाबलसहितस्य तथा निजपरमोच्च राशिस्थितस्य च दशासम्पूर्णसंज्ञा भवति । स्थानादि बलवर्जितस्य नीचांशगतस्य च दशा रिक्तसंज्ञा भवति । वरमतुङ्गात् भ्रष्टस्य दशा अवरोहिसंज्ञा भवति । सा सुहृदुच्चभांशे मध्य संज्ञा भवेत् । परमनीच भ्रष्टस्य दशा आरोहि संज्ञा भवति । सा नीचारिभांशेषु अधमसंज्ञा भवेत्। मूलत्रिकोणे स्वक्षेत्रेवा नीचारिभांशेषु समवास्थितस्य दशा मिश्रसंज्ञा भवति ।

"संज्ञानुरूपाणि फलानि चैषाम्" इत्युक्तवात्
सम्पूर्णदशायां आरोग्यधनयोः समृद्धिः
रिक्तदशायाम् तयोः अभावश्च भवति ।
अवरोहिण्याफलावरोहणम् आरोहिण्यां
फलोत्कर्षश्च भवति । मिश्रदशायाम्
कलस्य मिश्रत्वं च सम्भवति ।

दशापतौ अन्तर्दशापतौ वा स्वामिनक्षत्रे लग्ने स्वषड्वर्गाणामेकतमे सति तथा शुभग्रहे दशारम्भकालीन लग्ने स्थिते सति प्रारब्ध । मूलदशा अन्तर्दशाव । निस्तर शुभव्रदा भवति । पाकाधिपतौ त्रिदशषड्लाभेषु च स्थिते सति प्रारब्धा दशा शुभदा भवति । दशापतेः मित्रराशौ उच्चराशौ उपचयराशिषु पञ्चमनवमयोः सप्तमेच स्थितः चन्द्रः शुभफलानि बोधयति । अतोऽन्यथा पापानि बोधयति । यस्य कस्य च ग्रहस्य दशा शुभदापि अशुभदापि

चन्द्रे कर्कटस्थे प्रारब्धा दशा शुभदा भवति । चन्द्रे कुजराशिस्थिते प्रारब्धा दशा स्त्रीदोषं कुरुते। चन्द्रे बुधग्रहे सति प्रारब्धा दशा विद्यां सुहृदः वित्तं च ददाति ।

चन्द्रे सिंहस्थिते सति प्रारब्धा दशा
दुर्गारण्यपथेषु स्थितिं कृषिं च करोति ।
चन्द्रे शुक्रराशिस्थितौ सति प्रारब्धा दशा
मनुष्याणां आनन्दं करोति ॥ चन्द्रे शनि राशिस्थे सति प्रारब्धा दशा कुत्सितस्त्रीप्रदा भवति ।

चन्द्रे गुरुगृहे सति प्रारब्धा दशा अभिमानमर्थं सौख्यं च आवहति । शनेः चतुर्थी दशा, गुरोः षष्ठी दशा तथा कुजराहोः पञ्चमी दशा तथा राश्यवसाने स्थितस्य तथा दुस्थानधिपतेः दशा च अनिष्टफलप्रदा भवति । संज्ञाध्याये यस्य ग्रहस्य "ताम्रं स्यात्" इत्यादि प्रकारेण यद् यद् द्रव्यम् उक्तम् कर्मजीवाहयाये यद्वत् च उपदिष्टं तत्सर्वं अपि तस्य ग्रहस्य दशायाम् योज्यम् । तत्र योगवशादपि अनेके योगाः सम्भवन्ति । चन्द्रात् द्वितीये सूर्यं हित्वा यः कोऽपि ग्रहः भवति चेत् सुनका योगः भवति । चन्द्रात् द्वादशे ग्रहः भवति चेत् अनका योगः भवति । यदि चन्द्रात् द्विद्वादशे यः कोऽपि ग्रहः न भवति तदा केमद्नुम योगः भवति ।

यदि सुनफायोगे जातः भवति सः धनिकः, राजतुल्यः, सुखी ख्यातः च भवति । अनफा योगे यः जातः सः निरोगी, शीलवान्, सुन्दरः च भवति । एवं चन्द्रस्य स्थितिवशात्, लग्नात् च अनेके योगाः सम्भवन्ति । अतः लग्नभावः, लग्नभावस्य लग्नेश लग्नभाव दृष्टा लग्नभावकारकादिभिः सम्यक् कालं निर्णीय फलप्रवचनं क्रीयते चेत् सत्यमेव भवति नानृतम् इत्यकत्वा विरमामि हस्तव्यापारोऽयम् ।

https://doi.org/10.5281/zenodo.7248686

Paper 25

# संस्कृतं, संस्कृतिः, सामरस्यं च

**CHITRA HEGDE**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - chitra.menasi@gmail.com

## सार: (ABSTRACT)

**प्राचीनकवयः यथा सुरभारत्याः सेवां कृत्वा जन्मसार्थक्यं प्राप्नुवन् तथा अर्वाचीनाः कवयः अपि । संस्कृतभाषायां न केवलम् आध्यात्मिकज्ञानम् अपि तु उद्योगकला इत्यादिविद्याः मानवजीवननिर्वहणाय उपयुक्ताः सन्ति । तासु आयुर्वेदे चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयम् इत्यादयः प्रसिद्धाः ग्रन्थाः । एतेषु रोगनिदानम्, कायचिकित्सादयः अंशाः स्पष्टरूपेण उल्लिखितम् अस्ति । वेदकालादारभ्य संस्कृतेन विरचितेषु स्मृत्यादिग्रन्थेषु राजनैतिकं, वैज्ञानिकं, भौतरसायनगणितशास्त्रसम्बद्धाः अनेके विशिष्टाः अंशाः तत्र तत्र दरीदृश्यते । अत एव संस्कृतभाषा इहपरकल्याणसाधिका । भाषासु मुख्या मधुरा दिव्या गीर्वाणवाणी ।**

## प्रस्तावना

व्यवहारस्य प्रमुखं साधनं भाषा । भाषां विना कोऽपि स्वाभिप्रायं प्रकटयितुं, ज्ञापयितुं वा समर्थः न भवति । भाषारहितं जगत् गाढान्धकारे पतितं भवति । भाषया ज्ञानं वर्धते । यथा -

पुरे ग्रामे गृहे कुड्यां बालो वृद्धो युवापि वा ।
करोतु संस्कृताभ्यासं प्राप्नोतु ज्ञानसम्पदम् ॥(सुरसरस्वतीसभायाः प्रथमापुस्तकम्)

विश्वे अनेकाः भाषाः सन्ति । तासु संस्कृतभाषा अन्यतमा । महाकविः दण्डी उक्तवान् - "संस्कृतं नाम दैवीवाक् अन्वाख्याता महर्षिभिः" इति । संस्कृतं नाम देवानां भाषा । महर्षिणः तस्याः भाषायाः साक्षात्कारम् अकुर्वन् ।

प्राचीनकवयः यथा सुरभारत्याः सेवां कृत्वा जन्मसार्थक्यं प्राप्नुवन् तथा अर्वाचीनाः कवयः अपि । संस्कृतभाषायां न केवलम् आध्यात्मिकज्ञानम् अपि तु उद्योगकला इत्यादिविद्याः मानवजीवननिर्वहणाय उपयुक्ताः सन्ति । तासु आयुर्वेदे चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयम् इत्यादयः प्रसिद्धाः ग्रन्थाः । एतेषु रोगनिदानम्, कायचिकित्सादयः अंशाः स्पष्टरूपेण उल्लिखितम् अस्ति । वेदकालादारभ्य संस्कृतेन विरचितेषु स्मृत्यादिग्रन्थेषु राजनैतिकं, वैज्ञानिकं, भौतरसायनगणितशास्त्रसम्बद्धाः अनेके विशिष्टाः अंशाः तत्र तत्र दरीदृश्यते ।
अत एव संस्कृतभाषा इहपरकल्याणसाधिका । भाषासु मुख्या मधुरा दिव्या गीर्वाणवाणी ।

**सर्वाङ्गसुन्दर्याः संस्कृतभाषायाः जननम्**

संस्कृतं नाम सम्यक् कृतम् । वयं 'संस्कृत'शब्दः कुतः आगतः इति किञ्चित् अवलोकनं कुर्याम ।-

संस्कृतम् इति पदं कस्याश्चित् एकस्याः भाषायाः अवगमनार्थं, वेदानां भाषां परिचाययितुं वा कुत्रापि पाणिनेः अपेक्षया पूर्वं न दृश्यते । एवं तर्हि 'संस्कृतं' इति पदम् एकस्याः भाषायाः नाम कथं जातं स्यात् ? इति प्रश्नः

अस्मासु उद्भवति । तस्मात् तस्याः अध्ययनेन अध्यापनेन च बहवः अंशाः दृष्टिगोचराः भवन्ति । संस्कृतस्य एतादृशी शक्ति अस्ति यत् सा मानवजीवनं सुखमयं आनन्दमयं प्रेममयं च कर्तुं समर्था विद्यते ।

**अध्ययेन ज्ञाता: अंशा:**

रामायणस्य सुन्दरकाण्डे सीताम् अन्वेष्टुं हनुमान् लङ्कां प्रति गच्छति । तदा अशोकवने कस्यचित् वृक्षस्य अध: सीतां पश्यति । तत: स: सीतां पश्यन् स्वगतं किञ्चित् वदति । तस्य भाषासन्दर्यम् अत्र अवलोकयामः । तत् इत्थम् -

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥
अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत् ।
मया सान्त्वयितुं शक्या नान्यथेयमनिन्दिता ॥ - ( रामायणम् – सुन्दरकाण्डम्)

अहं द्विज: इव शुद्धभाषया संस्कृतेन वदामि चेत् वेषपरिवर्तनं कृत्वा आगत: रावण: इति सीता मनुते । तदा सा मत्त: भीता भवेत् । अत: शुद्धचारित्र्यवतीं सीतां सान्त्वयितुं, रामस्य सन्देशं च ज्ञापयितुं सामान्येन मनुष्यवाचा मया वक्तव्यम् । अन्यथा सीतां सान्त्वयितुं न शक्नोमि इति स्वगतं वदति ।अत्र तु सामान्यः कश्चन कपिः अपि एवं चिन्तयति इति वाल्मीकिः वर्णयति । अत्र वयं 'संस्कृतम्' इति पदं हनुमत: मुखात् श्रुतवन्तः ।

किष्किन्धाकाण्डे हनुमान् रामेण मिलति । तदा स: रामेण सह संस्कृतेन एव सम्भाषते । संस्कृतेन सम्भाषमाणं हनूमन्तं दृष्ट्वा राम: इत्थं चिन्तयति -

नूनं व्याकरणं कृस्त्नम् अनेन बहुधाश्रुतम् ।
बहुसंवदता अनेन न किञ्चित् अपभाषितम् ॥ - ( रामायणम् – किष्किन्धाकाण्डम्)

एतावत्पर्यन्तं संस्कृतभाषया सम्भाषितवता हनुमता एकोऽपि दोष: न कृत: । अत: हनुमता संस्कृतव्याकरणम् अनेकवारम् अधीतम् स्यात् इति । इत: अस्माभि: ज्ञायते यत् संस्कृतभाषया सम्यक् वार्तालाप: करणीय: चेत् संस्कृतव्याकरणं सामान्यतः वा अध्येतव्यम् इति । एवं रूपेण 'संस्कृत'शब्दस्य उपयोग: रामायणे दृष्टुं शक्यते । गच्छता कालेन 'पाणिनीयव्यवस्था' संस्कृतस्य दृष्टे: पुष्टीकरणं कथम् अकरोत् ? पाणिनि: केन आधारेण एतां भाषां पवित्रीकृतवान् इति अवलोकाम: ।

पाणिने: व्यवस्थाया: वक्ता पतञ्जले: उक्त्या ज्ञायते । पतञ्जलि: (क्रि.श.150 एडि) महाभाष्ये अदौ इत्थं वदति - अथ शब्दानुशासनम् - व्याकरणम् इति अर्थ: । अत्र 'शब्द+अनुशासनम्' इति द्विधा विभक्तम् अस्ति । ' भाषाबोधनम्' इत्यपि अस्य शब्दष्य अर्थ: अपि अस्ति । शब्द: पुन: द्विधा विभक्त: अस्ति । लौकिकम् अलौकिकं चेति । **लौकिकशब्दा: -** अश्व:, पुरुष:, गौ: इत्यादय: । **अलौकिकशब्दा: -** वेदा: प्रमाणम् इति । वेदान् उदाहरति ' शं नो देवीरभिष्टये' इत्यादि ।

द्वितीयभागे अनुशासनम् इति पदस्य उपदेश: इति विवरणं ददाति - 'गुरुणा उपदिष्टा: शब्दा: वाक्यानि च विद्यार्थी अवगत्य कण्ठपाठपर्यन्तं पौन:पुन्येन उच्चारयेत्' इति । परम्परानुगतस्य भाषाबोधनस्य पद्धति: (Practice and traditional method) इत्थं वदति - 'गुरूच्चारणानूच्चारणा' इति । गुरुणा उक्तं शिष्या: पौन:पुन्येन उच्चारयेयु: । एवंरीत्या संस्कृतशब्द: एकस्या शिष्टीकृतवैज्ञानिकभाषाया: उगमस्य कारणीभूत: अभवत् । शिष्टीकृतभाषा इति साधयितुं पाणिने: वृद्धिरादैच् इति सूत्रं पतञ्जलि: महाभाष्ये व्याकरणविश्लेषणसमये वदति- 'संस्कृत्य संस्कृत्य पदानि उत्स्रज्यन्ते तेषां यथेष्टमपि सम्बन्धोभवति । अत्र शब्द:

शुद्धीकृत्य, पवित्रीकृत्य सृष्ट: अस्ति । एतेषां शब्दानां मध्ये परस्परं सम्बन्ध: वक्तॄन् आधारीकृत्य तिष्ठति । एवं प्रकारेण सर्वाङ्गसुन्दरी संस्कृतभाषा भूमिं प्रति अवातरत् ।

**संस्कृति:**

भारतस्य आत्मप्राणस्वरूपरूपेण धर्म: संस्कृति: च अस्ति । अनादिकालत: संस्कृतं संस्कृते: वाहकम् अस्ति । प्रत्येकं भारतीयस्य समानसांस्कृतिकस्रोतरूपेण, समानसांस्कृतिकभाषारूपेण च संस्कृतगङ्गा अविच्छिन्नतया प्रवहन्ती अस्ति । धर्म:, संस्कृति: इति नाम्न: श्रवणात् एव वेदा: 'विद् ज्ञाने' इति धातुत: उद्भूय ज्ञानम् इति अर्थं ददाति । वेदा: दैवीसत्यस्य प्रतिनिधिरूपेण तिष्ठन्ति इति निश्चप्रचं सत्यम् । केनापि तस्य रचनं न कृतम् । अत: अपौरुषेया: ते । भारतस्य सकलकाव्येतिहासादि परम्पराया:, धर्मादि चतुर्विधपुरुषार्थानां च मूलोगमस्थानं वेदा: एव । वेदवाक्येषु भारतीयानाम् अचलश्रद्धा गौरवं च । शास्त्रकाराणां श्रुतिप्रमाणे ऐक्यमत्यम् अस्ति ।

भारतदेशे प्राचीनऋषीभि: तप:शक्त्या प्राप्ता ज्ञानराशि: एषा । विश्वस्य इतिहास: इतोऽपि कालगर्भे एव यदा आसीत् तदा एव परमोत्कृष्टा अपरिमिता ज्ञानराशि: इति प्रख्यातिं गता वैदिकवाङ्मयस्य परमोत्कृष्टं प्रभावयुतं च जाता: वेदमन्त्रा: मन्त्रदृष्टार: इति कथ्यमानै: ऋषिमुनिभि: साक्षात्कृता: आसन् । आदौ वेदराशि: एका एव आसीत् । यज्ञस्य कृते आनुकूल्यं भवेत् इति धिया व्यासमहर्षिणा चतुर्धा विभज्य स्थापितम् । 'व्यस्यते वेदान् इति व्यास:' इति व्युत्पत्ति: एव व्यासपदस्य अर्थम् अवगमयति । इत: ऋग्वेद:, यजुर्वेद:, सामवेद:, अथर्ववेद: चेति चतुर्वेदा: प्रसिद्धा: जाता: ।

सोऽयमेको यथा वेदतरुस्तेन प्रकाशित: ।
चतुर्धाथ ततो जातं वेदपादपकाननम् ॥

सङ्कीर्णं वेद: इति वृक्षं व्यासमहर्षि: चतुर्धा विभाजत् । तदनन्तरं वेदवृक्षाणाम् अरण्यमेव वृद्धम् । वेदा: यावती: संस्कृती: प्रतिबिम्बयन्ति तावदेव उपनिषद: अपि मानवस्य व्यक्तित्वविकसने बहुमुख्यपात्राताम् आवहति ।

**उपनिषद:**

वेदानाम् अन्तिमभाग: एव उपनिषद: । वेदान्त: इत्यपि अन्वर्थनाम अस्ति । प्रस्तानत्रयेषु श्रुतिप्रस्तानम् इति अग्रस्थानं प्राप्नोति । भारतीयधर्म:, दर्शनानि, तत्त्वानि एतेषां सर्वेषां मूलम् अस्ति उपनिषत् । उपनिषत् इति शब्द: उप+नि इति उपसर्गद्वयपूर्वकात् विशरणगत्यवसाधनार्थक: सद् धातो: क्विप्प्रत्यययोगेन निष्पन्न: । ब्रह्मविद्यां प्रतिपाद्यमाना: उपनिषद: गद्यरूपेण, पद्यरूपेण, गद्यपद्यात्मकरूपेण च सन्ति । शिष्य: गुरो: समीपम् उपविश्य रहस्यतमाया: विद्याया: प्राप्ति: एव उपनिषत् । उपनिषद: भारतीयदर्शनशास्त्रस्य दैवीप्रमाणभूतानि रत्नानि । भारतीयधर्मस्य, धर्मसिद्धान्तानां च मूलमेव उपनिषत् । परमात्मतत्त्वम् एव उपनिषद: प्रमुखा: विषया:। उपनिषदां केचन भागा: विश्ववाङ्मये अत्युत्तमभागा: इति प्रख्यातिं गता: सन्ति ।

**संस्कृत-संस्कृति-सामरस्यम् इति दिव्यसेतु:**

परस्परं संस्कृतिं सामरस्यं च साधयितुम् उपनिषद: प्रमुखं पात्रम् आवहन्ति । मानवेन अवश्यम् अनुसरणीयानि जीवनमौल्यानि विशिष्टरूपेषु प्रतिपादितानि सन्ति । यज्ञ-तप-दानादीनां महत्त्वस्य उपदेशेन सह

इन्द्रियनिग्रह:, अहिंसा, सत्यवचनं, धर्मश्रद्धा, ज्ञानदाह: इत्यादिषु मनुष्य: कथम् आचरेत् इति आदर्शम् उपनिषत् प्रतिपादयति । उपनिषत्सु भगवदुपासनं, भगवति भक्ति: इत्येतेषां द्वारा मोक्षोपाय: कथम् इति वदति ।

अत: संस्कृतं 'सांस्कृतिकभाषा' इति कथने नास्ति संशीति: । संस्कृतभाषया मानवानाम् अज्ञानेन समस्या: अभिमुखीक्रियमाणा अस्ति । तत् यथा -

1. संस्कृतभाषा कठिना । 2. संस्कृतभाषा मृतभाषा । 3. कस्यचित् वर्गस्य भाषा ।

**विश्लेषणम्**

संस्कृतं कठिनं किम् ? कठिनं भवितुं कारणं किम् ? सरलीकरणं शक्यते उत न ?

या कापि भाषा भवतु न हि सरला न हि कठिना । सामान्यत: भाषायां स्तरद्वयम् अस्ति । वाचिकभाषा सरला भवति । साहित्यिकभाषा प्रौढा भवति तथापि संस्कृतभाषा कठिना इति भाव: जनानां मनसि यत् प्रविष्टम् अस्ति तस्य अनेकानि कारणानि सन्ति । तेषु प्रमुखकारणं नाम -

**संस्कृतभाषाया: अध्यापनम्**

ब्रिटिषजना: भारतस्य आगमनात् पूर्वं भारते शिक्षणसंस्था: सर्वा: 'संस्कृतपाठशाला:' एव आसन् । तत्र सर्वे विषया: संस्कृतेन एव बोधयन्ति स्म । गुरुशिष्याणां मध्ये संस्कृतेन एव व्यवहार: भवति स्म । संस्कृतभाषा व्यावहारिकीभाषा आसीत् । अत: संस्कृतं सर्वे सुलभतया वदन्ति स्म । किन्तु ब्रिटिषजना: अस्माकं श्रद्धाया: स्वाभिमानस्य च मूलस्य संस्कृतस्य उपरि कुठारप्रहारम् अकुर्वन् । अत: ते क्रमद्वयम् अश्रितवन्त: । आदौ संस्कृतपाठशाला: तै: पिहिता: । तथैव मेकालेप्रणीतां नूतनशिक्षानीतिं घोषितवन्त: । द्वितीयं नाम संस्कृताध्ययने व्याकरणपद्धतिम् आरोपितवन्त: । तत: संस्कृतं कठिनम् इति भानं जनानां मनसि स्थितम् । गच्छता कालेन आङ्ग्लेया: भारतात् निर्गता: चेदपि संस्कृतक्षेत्रे परिवर्तनं न जातम् । विशेषतया विद्याक्षेत्रेषु ।

यथा पूर्वम् उक्तम् पाणिने: गुरूच्चारणानूच्चारणा इति । आदौ गुरु: वदेत् । तदनन्तरं शिष्य मनसा वचसा च दृढीकरणं कुर्यात् । तदनन्तरमेव तेन लेखनीयम् आसीत् । व्यवस्थिततया संस्कृतस्य पिधानस्य सङ्कल्प: कृत: आङ्ग्लै: । प्रत्येकं भारतीयस्य रक्ते संस्कृतम् अस्ति । अत: सङ्कल्प: समुद्रे वृष्टि: यथा तथा निरस्त्रीकृत: जात: । संस्कृतं न पिहितम् अपि तु नेपथ्ये स्वकार्यं मन्दं कुर्वत् एव आसीत् । भारतस्य चतुर्षु दिक्षु शङ्कराचार्या: सनातनधर्मस्य रक्षणाय मठानां स्थापनं कृतवन्त: । ते मठा: अधुना अपि गुरुशिष्यपरम्परां रक्षन्त: भारताय संस्कृतिं ज्ञानं च यच्छन्त: सन्ति ।

भगवद्गीतायां भगवान् श्रीकृष्ण: कर्मण्ये वाधिकारस्ते मा फलेषु कदाचन इति उक्तवान् अस्ति । फलाफलस्य अपेक्षा न करणीया इति । तेषां परिश्रमस्य फलरूपेण संस्कृतस्य श्रीगन्ध: सर्वत्र प्रसृत: अस्ति । 2022तमस्य जून्मासस्य 21तमे दिनाङ्के संस्कृतविश्वविद्यालयस्य उद्घाटनार्थम् आगत: प्रधानमन्त्री श्री मोदिवर्य: स्वामिभि: संस्कृतेन स्वागतीकृत: । तस्मिन् समये सर्वत्र निरन्तरं करताडनं प्राचलत् । एन्.इ.पि शिक्षणनीतिं सूक्ष्मतया अवलोकयाम: चेत् तत्र विद्यमाना: अंशा: अस्माकं गुरुकुलशिक्षणपद्धतिम् आश्रयन्ति इति भासते ।

**राष्ट्रियशिक्षानीति: 2020 संस्कृतं च**

शिक्षानीतिं समग्रतया पश्याम: चेत् दृश्यमाना: केचनप्रमुखा सामान्यांशा: च एवं सन्ति ।

राष्ट्रियशिक्षानीतिविषये बहुधा चर्चा प्रचलति । बहुधा चर्चिता अपि जनै: स्वल्पा एव अवगता नीति: एषा । शिक्षाक्षेत्रे बहुविधानि परिवर्तनानि एषा करिष्यति इति सर्वै: ऊह्यते अपेक्ष्यते च । एतस्या: नीते: परिणामकारिरूपेण क्रियान्वयने संस्कृतज्ञानाम् अस्माकम् अपि कार्यं भविष्यति । अत: अस्माभि: सर्वै: नीतौ संस्कृतविषये किम् उक्तम् इति, किमर्थम् उक्तम् इति च ज्ञातव्यम् इत्यत: अत्र किञ्चित् लिख्यते ।

शिक्षानीते: अनन्तरम् इत: परं राष्ट्रियपाठ्यचर्यालेखनं, राज्यपाठ्यचर्यालेखनं, पाठ्यपुस्तकलेखनं, शिक्षकप्रशिक्षणम् चेति चत्वारि कार्याणि अग्रिमवर्षद्वये भविष्यन्ति । तेषु चतुर्षु अपि संस्कृतस्य हितरक्षणाय अपेक्षितरूपेण संस्कृतकार्यसाधनाय च संस्कृतानुरागिभि: सतर्कै: सक्रियै: च भूत्वा कार्यं करणीयं भविष्यति इति लेखनादौ एव निवेदयामि ।

शिक्षानीतिं समग्रतया पश्याम: चेत् दृश्यमाना: केचन प्रमुखा: सामान्यांशा: एवं सन्ति -

1. पाठनपद्धतिविषये प्राधान्यं भवेत् ।
2. किं चिन्तनीयम् इत्यपेक्षया अपि कथं चिन्तनीयम् इति विषये प्रशिक्षणं भवेत् ।
3. सम्प्रेषणकौशलं, सङ्गणकीयकौशलं, विश्लेषणकौशलं, भाषाकौशलम् इत्यादीनां विविधानां कौशलानां प्रशिक्षणं भवेत् ।
4. छात्रकेन्द्रितं शिक्षणं भवेत् ।
5. शैक्षिकगुणवत्ताया: विषये सर्वाधिका आस्था भवेत् ।
6. पाठ्यक्रमा: आजीविकापरा: भवेयु: ।
7. छात्राणां ज्ञानम् एकविषयकम् अभूत्वा बहुविषयकं भवेत् ।
8. शोधकार्यम् अन्तर्विषयकं भवेत् ।
9. आरम्भस्तरत: एव छात्रेषु शोधप्रवृत्ति: वर्धनीया।
10. अत्याधुनिकतन्त्रज्ञानस्य (टेक्नालजी इत्यस्य) पूर्णत: उपयोग: शिक्षणीय: ।

एते दश अंशा: प्राय: सर्वेषां शिक्षाया: सम्बद्धा: इति कारणेन ते संस्कृतशिक्षाया: अपि सम्बद्धा: भवन्ति एव ।

शिक्षाव्यवस्थायां यानि परिवर्तनानि सूचितानि येषां सम्बन्ध: संस्कृतस्य अपि सन्ति । तानि प्रमुखाणि कतिचन एतानि सन्ति -

1. विद्यालयीयशिक्षणे 5 + 3 + 3 + 4 इति संरचना भवेत् ।
2. स्नातकपाठ्यक्रम: त्रिवर्षात्मक: चतुर्वर्षात्मक: वा भवेत् । तदनन्तरं छात्र: साक्षात् शोधकार्यं कर्तुं शक्नुयात् अथवा एकवर्षस्य स्नातकोत्तरपाठ्यक्रमं पठेत् ।
3. शिक्षशास्त्रपाठ्यक्रम: चतुर्वर्षात्मक: संयुक्तपाठ्यक्रम:, विषयद्वये पाठनाभ्यासयुक्त: च भवेत् ।
4. छात्र: नियतच्छात्ररूपेण कस्यचन पाठ्यक्रमस्य पठनसमकाले एव 'आन्लायिन् डिस्टेन्स् लर्निंग्'माध्यमेन द्वितीयं पाठ्यक्रमं पठितुं शक्नुयात् ।
5. 'चायिस बेस्ड् क्रेडिट् सिस्टम्'माध्यमेन विविधान् अतिरिक्तविषयान् सर्व: अपि पठितुं शक्नुयात् ।
6. एकविषयका: महाविद्यालया: विश्वविद्यालया: च बहुविषयका: भवेयु: । तदर्थं मानविकशास्त्रविषया:, समाजविज्ञानविषया: कलाविषया: च व्यावसायिकतया सर्वत्र ऐच्छिकविषयत्वेन पाठनीया: ।
7. युजिसि, एऐसिटिई. एन्सिटिई इत्यादीनां मेलनेन काचित् उच्चशिक्षाया: नियामक: आयोग: रचयिष्यते ।

8. राष्ट्रियशोधप्रतिष्ठानं राष्ट्रियानुवादसंस्थानम् इत्यादीनां नूतनसंस्थानानां स्थापनं भविष्यति ।

9. भारतं डिजिटल्व्यवस्थाम् आत्मसात्कर्तुम् इच्छति इति कारणेन तदनुगुणं शिक्षाव्यवस्था सज्जीकर्तव्या ।

10. आन्लायिन् डिस्ट्न्स् लर्निंग् व्यवस्था प्रबलीकर्तव्या ।

उपरि यानि 20 परिवर्तनानि सूचितानि तानि सर्वाणि अपि अवश्यं भवेयु: । तेषु संस्कृतज्ञानां कृते कोऽपि विकल्प: नास्ति । अर्थात् विद्यालयीयशिक्षायां धाराद्वये (सामान्यविद्यालयेषु, तत्समपारम्परिकपाठशालासु च) उच्चशिक्षायां धाराद्वये (बि,ए, एम्.ए. इति, शास्त्रि-आचार्य-विद्वन्मध्यमोत्तमादय: इति) उपरि उक्तनाम् अंशानां क्रियान्वयनम् अनिवार्यतया करणीयानि भविष्यन्ति । यदि परिवर्तनानि न क्रियेरन् तर्हि कालान्तरे संस्कृतशिक्षा स्थानच्युता परिवर्तनझञ्झावोतोत्क्षिप्ता च भवेत् इति निश्चितम् । सामान्यशिक्षायां अग्रिमदशवर्षाभ्यन्तरे (2030) परिवर्तनानि सम्पादनीयानि । 2040 पर्यन्तं भारतस्य शिक्षाव्यवस्था गुणस्तरदृष्ट्या विश्वस्तरीया भवेत् इत्यपि लक्ष्यं दत्तम् अस्ति शिक्षानीतौ । अत: संस्कृतज्ञानाम् अस्माकम् इदानीं परिवर्त्यताम् अथवा विनश्यताम् इति एक: एव कल्प: अवशिष्ट: ।

किं किं परिवर्तनं स्यात् इति एतावता उक्तम् । इदानीं किमर्थं तानि उक्तानि इति परिशीलयाम । भारतं ज्ञानक्षेत्रे कौशलक्षेत्रे प्रौद्योगिकीक्षेत्रे विज्ञानक्षेत्रे आर्थिकक्षेत्रे च विश्वे अग्रेसर: भवेत् इति राष्ट्रस्य आकाङ्क्षा: शिक्षानीतौ दर्शिता: । तदनुगुणं शिक्षाव्यवस्था कल्पनीया इति अपेक्षा । अत: संस्कृतशिक्षा अपि तदनुसारिणी भवेत् । समृद्धस्य आत्मनिर्भरस्य जगद्गुरो: भारतस्य निर्माणाय यादृशानां जनानाम् आवश्यकता अस्ति तादृशस्य जनबलस्य निर्माणाय खलु एषा शिक्षाव्यवस्था अस्ति । किञ्च अधीतसंस्कृत: कश्चन न केवलं शिक्षाक्षेत्रे, अपि तु वाणिज्यक्षेत्रे व्यावसायिकक्षेत्रे प्रशासनक्षेत्रे उद्योगक्षेत्रे आर्थिकक्षेत्रे विधिक्षेत्रे प्रौद्योगिकीक्षेत्रे इत्येवं सर्वेषु क्षेत्रेषु आजीविकां यथा प्राप्तुं शक्नुयात् तथा तस्य शिक्षणं भवेत् इति अस्माभि: द्रष्टव्यम् । तादृशा: पाठ्यक्रमा: निर्मातव्या: । तदा एव संस्कृतपठनाय छात्रा: आगच्छेयु:, अन्यथा नैव आगच्छेयु: । तस्मात् संस्कृतशिक्षाया: पुनारचना अनिवार्या एव ।

किञ्च अस्माभि: एतदपि चिन्तनीयं यत् यदा जगति सर्वे बाला: सङ्गणकं जानन्ति, व्यावहारिककौशलानि प्राप्नुवन्ति तदा यदि अस्माकं संस्कृतच्छात्र: तेषु विषयेषु अनभिज्ञ: तिष्ठेत् तर्हि स: अस्यां जगति इतरै: सह कथं साभिमानं ससम्मानं च जीवेत् ? कथं वा आजीविकां प्राप्नुयात् ? संस्कृतस्य भविष्यभूता: ये अस्माकं प्रियसंस्कृतच्छात्रा: सन्ति तान् मनसि निधाय तेषाम् उज्ज्वलभविष्यं मनसि निधाय अस्माभि: संस्कृतशिक्षाया: नवा संरचना चिन्तनीया ।

एतावत्पर्यन्तं राजाश्रयेण, सर्वकाराश्रयेण, मठमन्दिराणाम् आश्रयेण, छात्रावासादिकारणेन अङ्कप्राप्ते: सुलभोपाय: इति कारणेन वा संस्कृतस्य छात्रसंख्या आसीत् । इत: परं तानि तादृशानि वा कारणानि संस्कृतस्य साहाय्याय न भवेयु: । इत: परं संस्कृतस्य अग्रे गमने त्रीणि एव कारणानि मुख्यभूतानि निर्णायकानि च भविष्यन्ति - सरलमानकसंस्कृतेन विनूतनप्रविधिभि: च पाठनस्य आकर्षकता, आजीविकाप्राप्तौ पाठ्यक्रमस्य उपयोगिता, संस्कृतज्ञानां कोलोचितपरिवर्तनक्षमता चेति । एवंप्रकारेण संस्कृतं प्रवर्धमानं प्रति आगन्तुम् अग्रस्थाने अस्ति ।

**मृतभाषा**

संस्कृतभाषा मृतभाषा इति विषय: कश्चन रोग: । वयमेव संस्कृतभाषा मृतभाषा इति पुन: पुन: वदन्त: संरक्षणात्मकवादम् आश्रीय प्रचारं कृतवन्त: । एष: श्रम: एव यदि सम्भाषणमाध्यमेन दर्शित: स्यात् जनमानसि विद्यमान: मृतभाषा इति रोग: अपगत: स्यात् । मृतभाषा इति प्रयोगस्य अपेक्षया आवृत: श्रीगन्ध: इति प्रयुञ्ज्महे। संस्कृतभाषा कस्यचित् एकस्य वर्गस्य भाषा इति अभिप्राय: सम्यक् न । पुरा एषा सर्वेषां भाषा जातिमतभेदं विना आसीत् । उदाहरणं पश्याम: । संस्कृते रामायणं लिखितवान् वाल्मीकि: व्याध: आसीत् । कालिदास: अजपालक: आसीत् । महर्षि: व्यास: धीवरकुलीन: आसीत् । श्रीहर्ष:, राजा भोज: च क्षत्रिया: आसन्। अनेके अन्यजातीया: जना: संस्कृतपण्डिता: आसन् । अत: संस्कृतभाषा सर्वेषां भाषा आसीत् इति सन्देहलेश: अपि नास्ति । जातिमतवर्गप्रदेशादीनां भेदं विना अग्रे अपि संस्कृतभाषा सर्वेषां भाषा भवत्येव निश्चयेन । अस्माकं भारतस्य आकरग्रन्था: रामायणं, महाभारतं, भगवद्गीता इत्यादय: । "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।" महाभारते उक्ता: विषया: एव सर्वत्र अस्ति । यत् अत्र न उक्तं तत् कुत्रापि नास्ति । एतां प्रशंसाम् एव संस्कृतभाषां प्रति दर्शयमा: चेत् अतिशयोक्ति: नास्ति क्वचित् । अत: एव एषा भाषा सर्वाङ्गसुन्दरीभाषा । अद्यतनपरिस्थितौ 'संस्कृतस्य स्थानमानम्' अधिकतया वर्धितम् अस्ति ।

संस्कृतभाषाया: अभिवृद्धि: बहुत्र दृश्यते। गतेभ्य अष्टवर्षेभ्य: पूर्वं जून् 21 दिनाङ्कम् अन्ताराष्ट्रीययोगदिनम् इति उद्घोषितम् । तस्य फलरूपेण देशविदेशेषु सर्वत्र ओङ्कारस्य पठनं श्रूयते । पतञ्जलिं संस्कृतश्लोकद्वारा प्रार्थयेम वयम् । संस्कृते विद्यमानानि आसनानि अपि विवृत्य पाठयाम: वयम् । अधुना सर्वे अपि पठित्वा पाठयन्त: सन्ति । एषा एव ननु अस्माकं संस्कृतत: आगता गुरुपरम्परा ।

**उपसंहार:**

संस्कृते: ज्ञानस्य च राजधानीत्वेन परिगण्यते वाराणसी । प्राक्तनकाले संस्कृताध्ययनस्य प्रमुखं केन्द्रम् आसीत् तत्। अधुना अपि शास्त्राध्ययनार्थं नैके युवान: काश्यां परिश्राम्यन्ति । अस्यां नगर्यां संस्कृतदृष्ट्या कश्चन मोदप्रद: विषय: सद्य:काले सर्वत्र प्रसृत: । स च संस्कृतेन उद्घोषणरूप: । वाराणस्या: विमानपत्तने कोरोनासुरक्षानिर्देशानां घोषणा संस्कृतभाषया आरब्धा । भारतीयविमानपत्तनप्राधिकारेण क्रियमाणा एषा घोषणा सर्वादौ संस्कृतेन तदनु हिन्द्या, आङ्ग्लभाषया च क्रियते । "सम्मर्दे प्रवाससमये च मुखावरणं (मास्क्) धरणीयं, सुरक्षितं दूरं रक्षणीयम्" इत्यादय: सुरक्षानिर्देशा: ध्वनिवर्धकेन प्रसार्यन्ते । अत्यन्तं स्तुत्य: अनुकरणीय: च एष: प्रयत्न: नितरां श्लाघ्य: अभिनन्दनीय: च । ईदृश्य: घोषणा:, सूचना: भारतस्य नाना कोणेषु श्रूयन्तां यथाशीघ्रम् । विश्वमान्यतां प्राप्यमाणा इयं भाषा अस्माकं संस्कृते: प्रतीकम् अस्ति ।

'एकचक्रम्' इति संस्कृतचलनचित्रं सद्य:काले एव लोकाय अर्पितम् अस्ति । संस्कृतभाषये अनेकानि चलनचित्राणि कृतानि सन्ति । कथयन्त: गच्छाम: चेत् तस्य आवलि: सुदीर्घा स्यात् । अत: तस्य विषये नात्र अधिकं कथ्यते ।

संस्कृतं पठित्वा श्लोकान् अवगत्य तत: प्राप्यमाणान् सुखान् अस्माकं जीवने यदि योजयाम: तर्हि जीवनं सार्थकं स्यात् । संस्कृते शोधकार्यं कुर्वन्त:, प्रामाणिकतया अध्ययनम् अध्यापनं च कुर्वन्त: भारतमातु: सेवायां कृतकृत्या: भवेम । एतदेव प्रत्येकं भारतीयस्य जीवनस्य श्रेष्ठं कार्यं इति मन्ये । एतानि सम्मानानि एव संस्कृतं, संस्कृति, सामरस्यं च ।

**आकरग्रन्थाः**

१. सुरसरस्वतीसभाया: प्रथमापुस्तकम्
२. रामायणम् – सुन्दरकाण्डम्
३. रामायणम् – किष्किन्धाकाण्डम्
४. कर्णाटकमुक्तविश्वविद्यालयस्य एम्.ए.२वर्षस्य भाषाशास्त्रपुस्तकम्
५. **सं.भा.प्रवेशपुस्तकात् उद्धृतम्**
६. सम्भाषणसन्देशपत्रिका अक्टोबर् 2020 श्री चमू कृष्णशास्त्रिवर्यस्य लेख:

https://doi.org/10.5281/zenodo.7248816

Paper 26

# बालादपि शुकादपि

**Dr. Kadandale Ganapathy Bhat**
Research Professor, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - ganapathy.av@gmail.com

## सारः(ABSTRACT)

गुरुः कस्य नापेक्षितम्? सर्वसाधकानामपि स्वस्वक्षेत्रेषु समीचीनगुरुरपेक्ष्यत एव। सूक्ष्मदृष्ट्याऽवलोकने सर्वत्र मार्गदर्शकगुरवः लभ्यन्ते खन्लु। तदृशैकः प्रसङ्गः श्रीमद्भागवते भगवता वेदव्यासेण संयोजितः। अस्य प्रसङ्गस्य प्रस्तुतता इदानीन्तनकालेऽपि अवश्यं भवेदिति मनीषया अस्मिन् लेखने सः विवृयते। प्रातिनिधिकतया कतिपयगुरवः तेषां तत्त्वोपदेशश्चात्र वर्ण्यते। अधिकांशः श्रीमद्भागवत एवावलोकनीयः।

गुरुः कस्य नापेक्षितम्? सर्वसाधकानामपि स्वस्वक्षेत्रेषु समीचीनगुरुरपेक्ष्यत एव। सूक्ष्मदृष्ट्याऽवलोकने सर्वत्र मार्गदर्शकगुरवः लभ्यन्ते खन्लु। तदृशैकः प्रसङ्गः श्रीमद्भागवते भगवता वेदव्यासेण संयोजितः। अस्य प्रसङ्गस्य प्रस्तुतता इदानीन्तनकालेऽपि अवश्यं भवेदिति मनीषया अस्मिन् लेखने सः विवृयते। प्रातिनिधिकतया कतिपयगुरवः तेषां तत्त्वोपदेशश्चात्र वर्ण्यते। अधिकांशः श्रीमद्भागवत एवावलोकनीयः।

## पूर्वपीठिका

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

मनुष्याणां व्यक्तित्वविकसने गुरुः बहून्नतं स्थानमलङ्करोतीति सार्वकालिकं सार्वदैशिकं चाभिमतं सत्यं च । न केवलं मनुष्या एव गुरवः किन्तु मनुष्येतराः जडचेतनपदार्था अपि मार्गदर्शनं कुर्वन्त्येव। ज्ञानेच्छा वर्तते चेत् सर्वत्र गुरवः लभ्यन्ते एव। तादृश एकः प्रसङ्गः पुराणराजे श्रीमद्भागवते दृश्यते। शास्त्रीयनाम्ना अवधूतगीता इति प्रसिद्धोऽयं प्रसङ्गः।

## विषयप्रस्तावः

एकदा यदुमहाराजः स्वप्रयाणकाले मुनिमेकमवधूतं ददर्श। तन्वा पीवा कर्मणा अलसः मनसा सन्तुष्टश्चासीत् स मुनिः। तं दृष्ट्वा विस्मितः राजा पप्रच्छ। "लोके सर्वे इष्टानिष्टप्राप्तिपरिहारायैव अहोरात्रं प्रयतन्ते। किन्तु नाप्नुवन्ति स्वभीष्टम्। कथमिदं साध्यं यद् भवता किमपि नाचरितं कर्म। तथापि भवन्मुखे प्रतिफलति स्वान्तस्थानन्दम्। अपि च भवान् महाज्ञानीत्यत्र न सन्देहः। अध्ययनं विना नेदं सुखमासुं शक्यम्। कथं तत्रभवता सम्पादितमेतादृशमगाधपाण्डित्यम्। कः गुरुः भवतः ज्ञानोपदेशकः। कृपयोच्यताम्" इति।

अवधूतमुनिः प्रतिवदति – "राजन्! दृढज्ञानमेव स्वान्तान्दस्य निदानम्। नैतत् ज्ञानं मया केवलं महामुनिभ्यः प्राप्तम्।

"सन्ति मे गुरवो राजन् बहवो बुद्धुपाश्रिताः।" – श्रीमद्भागवतपुराणम् – ११.७.३२

अहं तावत् मत्पार्श्वस्थितेभ्य एव जीवनमौल्यान्यधीतवान्। ते च गुरवः -

पृथिवी वायुराकाश आपोऽग्निश्चन्द्रमा रविः
कपोतोऽजगरः सिन्धुः पतङ्गः मधुकृत् गजः॥
मधुहा हरिणः मीनः पिङ्गला कुररोऽर्भकः।
कुमारी शरकृत् सर्पः ऊर्णनाभिः सुपेशकृत्॥

एते मे गुरवो राजन् चतुर्विंशतिराश्रिताः॥-श्रीमद्भागवतपुराणम् – ११.७.३३-३४

राजन् ! बह्वो मे गुरवः । तेष्वपि चतुर्विंशतिगुरवः उल्लेखनीयाः । ते च

१.पृथिवी २.वायुः ३.आकाशः ४.आपः ५.अग्निः ६.चन्द्रः ७.रविः ८.कपोतः ९.अजगरः १०.सिन्धुः ११.पतङ्गः १२.मधुकरः १३.गजः १४.मधुहा १५.हरिणः १६.मीनः १७.पिङ्गला वेश्या १८.कुररः १९.अर्भकः २०.कुमारी २१.शारकृत् २२.सर्पः २३.ऊर्णनाभिः २४.सुपेशकृत्

कथं एते अवधूतस्य गुरवः, किं वा एतेभ्यः शिक्षितमिति अवधूतमुनिनाभिहितं नाहुषाय यदुमहाराजाय।

## १. पृथिवी

तितिक्षा न केवलं योगिनां किन्तु समेषामपि अपेक्षितः गुणः।

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तान्तितिक्षिस्व भारत ।** (भगवद्गीता – २.१४)

सुखं वा दुःखं वा न कस्यापि शाश्वतम्। गच्छति अपगच्छति च यथा अहोरात्राणि। तस्मात् ऐन्द्रियिकपदार्थेषु तितिक्षा कर्तव्या एवेति श्रीकृष्णेनाभिहितम्। तादृशतितिक्षायाः निदर्शनं पृथिवी। सर्वंसहेति तस्या अपरं नाम। मातुरुत्सङ्गे शिशुः किं किं न करोति। तत्रैव मूत्रपुरीषविसर्जनं करोति। पद्भ्यां मातुरुरः ताडयति। तथापि दयामूर्तिः माता सर्वमपि सन्तोषेण स्वीकृत्य शिशुं पालयति। पृथिव्यपि सज्जनैः दुर्जनैरपि नानाप्रकारेण आक्रम्यते। वातातपावघातं सहते। समेषां पादप्रहारमनुभवति। सर्वजीवानां सकलकशमलविसर्जनं तत्रैव। स्वार्थचिन्तकः मनुष्यः स्वभोगार्थं पृथिवी पाताळपर्यन्तं खनति। तथापि कदापि पृथिवी कमपि न गिरति। अयमेव मयाधीतः पाठः पृथिवीसकाशात्।

**भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः।**
**तद्विद्वान् न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतम्।**

यः धीरः स अन्यैः नानाप्रकारेण पीडितोऽपि स्वकार्यं न त्यजति। यतो हि स जानाति सर्वं दैवाधीनमिति। अत एव सर्वत्र क्षमाविषये धरित्री एव उपमा। दुर्बलस्य क्षमा स्वरक्षणार्थमुपयुज्यमानं रक्षाकवचम् । सबलस्य क्षमा महान् गुणः। अपि चान्यो गुणः पृथिव्याम्।

**शश्वत् परार्थसर्वेहां परार्थैकान्तसम्भवम्।**
**साधुः शिक्षेत भूमाश्च अन्वशिक्षं व्रतान्तरम्॥** – श्रीमद्भागवतपुराणम् – ११.७.३८

परोपकारः महान् गुणः। एतच्छरीरं वा धनकनकादिसम्पद्वा न केवलं स्वस्य भोगार्थम्। किन्तु अन्येषामपि क्षेमाय उपयोक्तव्यम्। पृथिवी सर्वं ददाति परेषामेव।

**परोपकाराय फलन्ति वृक्षाः**
**परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः**
**परोपकारार्थमिदं शरीरम्॥** - प्रसिद्धसुभाषितम्

वृक्षाः न खादन्ति स्वफलानि। नद्यः न पिबन्ति स्वजलम्। गावः पयः परेभ्य एव ददति। तस्मात् अस्माकं शरीरमपि परोपकारार्थं विनियोक्तव्यम्।

**धर्माय यशसेऽर्थाय कामाय स्वजनाय च।**
**पञ्चधा विभजन् वित्तमिहामुत्र च मोदते॥ -** श्रीमद्भागवतम् – ८.१८.३७

स्वप्रयत्नेन दैवाद्वा प्राप्तं वित्तं न केवलं स्वभोगार्थम्। किन्तु तत् पञ्चधा विभज्योपयुज्यते चेत् अवश्यं अस्मिन् लोके परलोके च सुखं प्राप्यते। भुञ्जते ते त्वघं पापाः ये पचन्त्यात्मकारणात्। - भगवद्गीता – ३.१३ ये परचिन्तां विहाय केवलं स्वपोषणार्थमश्नाति स पापी एव । परोपकारः तितिक्षा – एतादृशगुणविषये पृथिवी मम गुरुः इति अवधूतमुनिरब्रवीत् यदुराजं प्रति।

## २. वायुः

योगी कथं जिजीविषेदिति विषये वायुः मम गुरुः।

**विषयेष्वाविशन् योगी नानाधर्मेषु सर्वतः।**
**गुणदोषान्वयेनात्मा न विषज्जेत वायुवत्॥**- श्रीमद्भागवतम् – ११.७.४०

वायुः सर्वत्र चलति। सुगन्धसुमनसामुपरि चलति वायुः। दुर्गन्धवस्तुन उपर्यपि गच्छति। परन्तु न सौगन्ध्यं वा दौर्गन्ध्यं वा वहति । न वायोः तेषु सङ्गः। एवमेव योगी अपि सुखे व दुःखे वा अत्यासक्तिं न कुर्यात्।

३. **आकाशः**

मम तृतीयो गुरुः आकाशः। आकाशः सर्वं अन्तः बहिश्च व्याप्नोति। एवमेव परमात्मापि सर्वत्र व्याप्तो वर्तते। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः – नारायणपन्नम् आकाशः नास्माकं दृष्टिगोचरः। किन्तु साक्षीन्द्रियसिद्धः। परमात्मापि न बाह्यदृष्टिलभ्यः। किन्तु विभुः सः सर्वत्र वर्तते एव।

४. **आपः**

मम चतुर्थो गुरुः आपः। जलं सर्वत्र विद्यमानं पञ्चभूतेष्वन्यतमं न केवलं 'जीवनं' किन्तु मम सन्मार्गदर्शको गुरुः। स्वयं स्नेहः जलस्यासाधारणो गुणः। परस्परं दूरे स्थितान् पिष्टकणान्नेकत्र योजयति इदं जलम्। हस्तलग्नं पङ्कं प्रक्षालयति इदं जलम्। शुद्धं जलं स्वान्तस्थपदार्थान् विशदं दर्शयति । एवमेव योगी भवेत्। सर्वत्रविद्यमानं परमशक्तिमवलोक्य सर्वप्राणिषु स्नेहं करोति।

गीतायां चोक्तं भगवता श्रीकृष्णेन –

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥** - भगवद्गीता

अपि च योगी स्वसम्पर्केण सज्जनेषु लग्नमज्ञानं निवारयति। उक्तं चान्यत्र –

**न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।**
**ते पुनन्त्युरुकालेन दर्शनादेव साधवः॥**

नदीसमुद्रादितीर्थानि वा परमक्षेत्रेषु विद्यमानाः भगवन्मूर्तयो वा बहुकालीनसेवानन्तरं अनुगृह्णन्त। किन्तु सज्जनाः स्वदर्शनमात्रेण सज्जीवान् परिपुनन्ति। स्वोपदेशेन हृदि संरूढमज्ञानतिमिरं नाशयित्वा उद्धरति स योगी । एतादृशसाधुगुणानहं जलेनाधीतवानस्मि।

५. **तेजः**

अग्निरपरो मम गुरुः। परमपुषार्थरूपमोक्षसाधनमेव योगिनः परम उद्देशः। तत्पथे योगी कथं जिजीविषेदिति वह्निं दृष्ट्वाधिजगे।

क्वचिच्चन्नः क्वचित् स्पष्टः उपास्य श्रेय इच्छताम्।
भुङ्क्ते सर्वत्र दातॄणां दहन् प्रागुत्तराशयम्॥

भस्मनावृतो वह्निः न दृश्यन्ते सामान्येन पुरुषेण। यदि पुनः वायुसखो भवेत् प्रज्वलति झटिति। एवमेव योग्यपि स्वज्ञानं न सर्वत्र प्रकाशेत्। यत्रावश्यकता तत्रैव प्रकटिकुर्यात्। अपात्रे दत्ता विद्या अनर्थकारिणी भवति। तस्मात् दुष्टजनसमूहे योगी सुप्तवद्भवेत्। ये पुनः शरणं गताः तेषां पापानि निवारयेत्। सर्वभुगिति वह्नेः अपरं नाम। अर्थात् यत्किञ्चिदप्यग्नौ प्रक्षित्पं शुभं वा अशुभं तत्क्षणादेव भस्मीभवत्येव। योगी स्वसामर्थ्येन शरणंगतानां सर्वाणि पापानि भस्मीकरोति।

अन्यच्च तत्त्वमहमधीतवान् अग्निना। परतत्त्वं सर्वत्रविद्यमानमपि न बाह्यचक्षुषा दृश्यते। यथारणिकाष्ठे विद्यमानोऽग्निः मथनात् व्यक्तो भवति। तथैव निरन्तरशास्त्रमथनेन परतत्त्वं जानीयादिति।

६. **चन्द्रः**

दर्शानन्तरं चन्द्रे कलावृद्धिं पश्यामः। पौर्णमास्यनन्तरं च ह्रासम्। एतौ वृद्धिह्रासौ दर्शकदृष्ट्यैव न चन्द्रमण्दलस्य। तत्र न कोपि विकारः सञ्जायते। तथैव जीवस्य स्वप्रारब्धकर्मानुसारेण अन्यान्ययोनिषु जन्म जायते। तत्रापि बाल्ययौवनवार्धक्यमरणाद्यवस्थाः अनुभूयन्ते। किन्तु भगवन्निष्ठो योगी न कस्मादपि बाह्यपरिणामाते परिणमते।

**'वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि'**

यथा छिन्नं वस्त्रं परित्यज्य नूतनं ध्रियते एवमेव बाह्यशरीरस्यैव पूर्वोक्तजननमरणादि न पुनः आत्मनः। स नित्यः अविकारी च। तस्मात् देहपोषणादपि प्रधानं आत्मपोषणमिति चन्द्रादधीतवानहम्।

७. **सूर्यः**

कर्तव्यानुष्टाने सदा निरतः सूर्यः ममापरो गुरुः। सूर्यवद्वर्तेत योगी। स्वप्रकरकिरणैरादित्यः नीचोच्चस्थानान्यविगणयन् यत्र कुत्रचिदपि जलं स्वीकरोति। निदाघकाले नद्यर्णववापीतटाकरथ्याचत्वरेभ्यः जलं सङ्गृह्य वर्षाकाले यत्रावश्यं तत्र वर्षति सूर्यः। अत एव न वैशाखे निदाघदूषणेन पापभाजो भवेम। न पिबति स्वसंगृहीतं जलमादित्यः। किन्तु तस्य संग्रहः लोकहितायैव। एतादृशपरोपकारेण सन्तुष्टः भगवान् अनुगृह्णाति स्वभक्तम्।

जीवपरमात्मसम्बन्धः कीदृश इति सूर्योऽनुशास्ति। स्फटिकजलदर्पणेषु दृश्यमानः न साक्षात्सूर्यः। किन्तु तस्य प्रतिबिम्बमेव। प्रतिबिम्बं बिम्बाधीनम्। वर्तते च किञ्चित्साम्यं बिम्बप्रतिबिम्बयोः। जीवोऽपि परमात्मनः प्रतिबिम्बम्। नित्यत्वरूपसादृष्यं वर्तते जीवेशमध्ये। किन्तु तौ अत्यन्तभिन्नावेव।

अनया एव प्रणाड्या अवधूतमुनिः 'कथमेते मम गुरवः' इति दर्शयति यदुराजाय। सन्तुष्टः राजा मुनिं पूजयित्वा तमनुज्ञाप्य गच्छति।

**उपसंहारः**

अद्यतनकालेऽपि अस्माकं मार्गदर्शकाः गुरवः सर्वत्र प्राप्यन्ते एव। हंसक्षीरन्यायेन साधुगुणान् तेभ्यः संगृह्णीयात्। तदेवोच्यते कविना –

**आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।**
**पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च॥**

गुरुकुले वा पाठशालायां वा विश्वविद्यालयेषु वा न सर्वं शिक्षितं भवति। आमरणान्तं सर्वेऽपि विद्यार्थिन एव। तस्मात् सर्वत्र व्यवधानेन वर्तितव्यम्। प्रत्येकमवसरं सोपानं कृत्वा उज्जीवनं सम्पादनीयमिति आशयः। तदेव विवृतं – "युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि" इति।

## Bibliography


1. भगवद्वेदव्यासविरचितं श्रीमद्भागवतमहापुराणम्
2. श्रीमदानन्दतीर्थविरचितम् भागवततात्पर्यनिर्णयः
3. भगवद्गीता
4. सर्वमूलग्रन्थाः
5. प्रो. हयवदनपुराणिकविरचितं भागवतकन्नडानुवादः
6. डा. श्रीविश्वेशतीर्थविरचितं भागवतसारः (कन्नडभाषायाम्)
7. स्वयं लेखकनेन २०१६ तमे वर्षे पर्यायश्रीकृष्णमठश्रीपेजावरमठेन प्रकाशितम् बालादपि शुकादपि – कन्नड आवृत्तिः


https://doi.org/10.5281/zenodo.7256404

Paper 27

# एकदर्शी- एकादशी

**Shrikara Tantry**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - shreekaratantry@gmail.com

## सार: (ABSTRACT)

**पावनभूमिभरतखण्डस्तावत् कर्मभूमिः। कर्मानुष्टानं नाम धर्मानुसरणम्। तदनुसारेण धार्मिको भवति । धार्मिकश्चेत् सदाचारी एव । तादृशाचरेषु एकादशीव्रतमन्यतमं बहुप्रधानं च । तद्विषये प्रमाणानि अत्र विवृयन्ते। तत्फलं च निरूप्यते। लोकक्षेमाय वैष्णवाचार्यैः कथमस्य व्रतस्य आवश्यकता निरुपिता इत्यपि अत्र विचार्यते।**

## प्रस्तावना

समस्तभूमण्डलस्थितसप्तद्वीपान्यतमजम्बूद्वीपे भरतवर्षे भरतखण्डे विद्यमानातिपवित्रदेशः अस्माकं भारतदेशः । यतः "क्षणायुषां भारतभूजयो वरः" इति वेदविभागकर्त्रा पुराणप्रणेत्रा व्यासमहर्षिणोक्तम् । अपिच भगवतो विष्णोः रामकृष्णादि अवताररूपाणि ,माहाल्क्ष्म्याः सीतारुक्मिण्यादिरूपाणि,वाय्वादिसमस्तदेवानां अवतारोपि अस्मिन् पावनक्षेत्रे बभूव । इदन्तु ज्ञायते -

आद्यं स्वयं व्यक्तमिदं विमानं रङ्गसञ्ज्ञितम् ।
श्रीमुष्णं वेङ्कटाद्रिश्च शालग्रामस्तु नैमिषम् ॥
तोताद्रिः पुष्करश्चैव नरनारायणाश्रमम् ।
अष्टौ मे मूर्तयः सन्ति स्वयं व्यक्ता महीतळे ॥

इतोपि एतादृशः पुण्यभूमिसद्भावविषयः अर्थात् तीर्थक्षेत्राणि बहवः सन्ति । तस्मात् जन्तूनाम् एतस्मिन् पवित्रमये भारते क्षणकालवास एव महत्भाग्यम् । यैः विविधसांसारिकदुःखतप्तजीवैः , सदाचारिभिःज्ञानिभिश्च मानवैः यद्यत् दानादिसत्कर्म अत्र क्रियते चेत् तच्च अतीवपुण्यदायकं स्यात् । तेषाम् चेतनानाम् अतीवपुण्यसङ्ग्रहो भवति । तेन च पुण्यसञ्चयेन नानाप्रकारैः भगवद्विषयक ज्ञानसम्पादनम् । तेन ते च जीवाः भगवत्प्रसादरूप चतुर्विधपुरुषार्थेषु अन्यतमं मोक्षं प्राप्नुवन्ति ।

**सदाचारस्य-महिमा**

ननु भो एतावता अलम् । प्रकृते सदाचरिभिरित्युक्तः कः सदाचारः? किञ्च सत्कर्म ? के ते पुण्यपापे ? को मोक्षः ? इत्येवं बहुविधाः प्रश्नाः नास्तिकानां मध्ये उद्भूताः । केवलं नास्तिकमतमपि एकः सिद्धान्तः अथवा दर्शनशास्त्रम् इति पूर्वजैः अनुमतम् । तस्मादेव हरिपदसंस्पृष्टे लक्ष्मीसञ्चलिते ब्रह्मावाय्वादिसकलसुरसञ्चरिते सुसंस्कृतसंस्कृत्युपेते पुण्यप्रदे पृथक्राजर्षिपालितानेकचक्रवर्तिसंरक्षिते ब्रह्मर्षिमहर्षिप्रभृत्यनुगृहीते पावने मलयहिमालयादिनगभरिते गङ्गादिसरित्परिशोभिते वेदवेदान्तपुराणेतिहासोक्तकर्मशील बहुजनसङ्ख्याघटिते वैविद्ध्यमये भरतखण्डे तावत् बहवः दार्शनिका:बभूवु:। तैश्च स्वाभिप्रायाः सिद्धान्तरूपेण प्रतिष्ठापिताः । यतो हि स्वीयज्ञानप्रतिपादने स्वातन्त्र्यसद्भावात् । तस्मादेव आस्तिक नास्तिक, निरीश्वरवादिनः ईश्वरवादिनः,वैदिकावैदिक इत्येवंरीत्या विविधप्रकारा दार्शनिकाःखलु तत्र तत्र प्रदृश्यन्ते। एतादृशेषु प्रकारेषु ऐक्यं सम्पादनमेव अस्माकं भारतीयानां ध्येयोद्देशः । न तावदेवास्माकम् ,युष्माकम् अपिच एकैकभारतीयानां कर्तव्यम् इति अस्मद्गुरवः श्रीविश्वेशतीर्थश्रीचरणानामाशयः । एतादृशविचारशुद्धिः सदाचारेणैव स्यात् ।

अस्मत्भारते कुलधर्माचारविशिष्ट-सदाचार-सुसंस्कृत-सत्सम्प्रदायस्थ-वैदिक- जातिवर्णाश्रमव्यवस्थित-धार्मिकजनाः सर्वत्र दृश्यन्ते । यतो हि "आचारः प्रभवो धर्मः","आचारहीनं न पुनन्ति वेदाः" इत्यादि शास्त्रोक्तिः । आचरणमेव आचारः। प्रमाणत्रयसिद्धाचार एव सदाचारः। अथवा सनातनधर्मपरिपालनमेव सदाचारः । धर्मो

नाम "अहिंसा सत्यमस्तेयः दानं शौचं" इत्यादि कथयन्ति । तस्यापरं नाम सत्कर्म इति । सदाचारस्तु देहे मनसि च दार्ढ्यं स्थैर्यञ्च ददाति । नन्वत्र खल्वयं सन्देहः । किमर्थं शास्त्रवचनम् अस्माभिः अनुपालनीयम् ?

इत्युक्ते - " श्रुतिस्मृतीहरेराज्ञा " इत्यस्ति वचनम् । अपौरुषेयत्वात् श्रुतेः प्रामाण्यम् । तदनुसृत्य विद्यमानत्वात् स्मृतेरपि प्रामाण्यम् । ताः श्रुतिस्मृत्यादिशास्त्रोक्तयः भगवतः परमात्मनः मुखारविन्दात् निःसृताः? तानि च वाक्यानि अस्वतन्त्रजीवानां कृते स्वतन्त्रपरमात्मनः आज्ञावचनमेव । यथा राजपुरुषेण राजाज्ञा नोत्क्रमते तथा तद्वचनमपि वैदिकैः नोल्लङ्घते । तदर्थमेव पन्डिताः 'जीवैः श्रौतस्मार्तकर्म अवश्यानुष्ठेयम्' इति भणन्ति । ततः "कर्मणा ज्ञानमातनोति " इति वचनानुसारेण माहात्म्यज्ञानपूर्वकभक्तिविशिष्टकर्मणा भगवद्विषयकापरोक्षज्ञानम् तदनन्तरं भगवद्प्रसादरूप नित्यानन्दस्वरूपमोक्षः लभते ।

**कर्मयोग एव सदाचारः**

गीताचार्येण तावत् इदमुक्तम् - सदाचारस्तु "कर्मयोग "एव इति । पुरुषैः कामक्रोधादीन् वा रागद्वेषादीन् विजित्य ऐहिकसुखभोगादीन् निरपेक्ष्य केवेलपरमात्मतुष्ट्यर्थं अर्थात् परमात्मप्रेरणया परमात्मप्रीत्यर्थं इति भावनया स्वविहितकर्म अवश्यमनुष्ठेयं इति महाभारतपारिजातमधुभूतायाः भगवद्गीतायाः कर्मयोगस्य सारः । नित्यम् नैमित्तिकम्,दैशिकम्-कालिकम् एवंरीत्या विहितकर्म विभज्यते । तत्कर्मसु दान-तीर्थयात्रा-जप-तपः-यज्ञ-उपवासव्रतादिबहुविधानि विद्यन्ते । एतेषु विद्यमानौपवासव्रताणां माहात्म्यं-तद्वैशिष्ट्यञ्च अनौपमम् । उपवासस्तु विष्णुपञ्चक, भीष्मपञ्चक, एकादशी, अतिरिक्तद्वादशी, श्रवणोपवास, श्रीकृष्णजयन्ती, चान्द्रायण, कृच्छ्राचरणम्,पयोव्रत, चातुर्मास्यादि बहुविध रूपेण दृश्यते । तेनेदं ज्ञायते-" कुर्वन्नेवेह कर्माणि जिजीविशेत् शतं समाः " , "धर्मञ्चर" इत्यादि वाक्यानि मनसि निधाय व्रतादि सत्कर्म कार्यम्।

**एकादशी-महिमावर्णनम्**

इदानीमेव निरूपितविद्यमानोपवासव्रतेषु श्रेष्ठः , महापुण्यप्रदः,अग्रिम एकादश्युपवास व्रतः । इमं व्रतं श्रुतिस्मृत्यादयः नियमेन सर्वेषांकृते विधीयते । अर्थात् जातिभेद - वर्णभेद - मतभेदान्परित्यज्य ,श्रीमान्-दरिद्रः, उच्च - नीच, विशेष - सामान्यरूपभेदानपि विहाय, अपिच देव - मानव - गन्धर्व - किन्नर - किम्पुरुष - यक्ष - रक्षः - भूत - पिशाचादिनानाविधचेतनविभागो वा निखिलभूमण्डलस्थसकलचेतनैः निश्चयेन अचरणीयमेतद्व्रतम् । अस्मिन्विषये श्रीकृष्णामृतमहार्णवग्रन्थे श्रीमदाचार्योक्तिः-

"ब्रह्मचारी गृहस्थो वा वानप्रस्थो वा यतिस्तथा ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो भर्तृमती तथा ॥
अभर्तृका तथान्ये वा सूतवैदेहिकादयः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥

यद्येतत् व्रताचरणम् महापुण्यकरम् नोचेत् महापापकरम् । वेदेतिहासपुराणप्रभृतयः यत्सच्छास्त्राणि सन्ति तेषु च एकादश्याः महिमा भूयो भूयो प्रशंसिता। । द्वैतमतसंस्थापक जगद्गुरु श्रीमध्वाचार्येणापि स्वीयग्रन्थेषु तन्महिमावर्णनम् तथा अनुष्ठानक्रमः,तथा आचरणस्य काल,पात्रयोः विचाररोऽपि उपपादितः । श्रीविष्णुतीर्थादियतिश्रेष्ठाः,त्रिविक्रमनारायणपण्डिताचार्यादिग्रन्थकाराः स्वीयग्रन्थे च पुरन्दरदासविजयदासादि हरिदासाः दाससहित्ये च अस्य व्रतस्य माहात्म्यानुष्ठानादि वैभवेन घण्टाघोषेण प्रतिपादितवन्तः। तत्र प्रमाणानि -

अहिंसा सत्यवचनं दानमिन्द्रियनिग्रहः।
एतेभ्यो हि महाराज तपो नानशनात् परम् ॥
इति महाभारते ,शान्तिपर्वणि ।

स ब्रह्महा स गोघ्नश्च स्तेनः स गुरुतल्पगः ।
एकादश्यां हि भुञ्जानः पक्षयोरुभयोरपि ॥
इति कृष्णामृतमहार्णवे ।

महादोषमयं चान्नमेकादश्यां भवेद् यतः ।
न दातव्यं न भोक्तव्यं न घ्रातव्यं विशेषतः ॥
इति स्मृतिमुक्तावल्ल्याम् ।

**एकादश्याः महत्वम् :-**

एकादशीतिथेः अभिमानीदेवता साक्षात् श्रीहरिः । यद्यपि भारतीयैः भरतभूमेस्तावत् न केवलम् जडत्वकल्पना किन्तु भरतमाता इति तदभिमन्यमानदेवीं स्मृत्वा जननी स्थानं यथा कल्प्यते तथा सर्वतिथीनामपि तदभिमन्यमानदेवतामपि कल्पते । श्रीमन्नारायणो अस्याः तिथेःसाक्षात् देवत्वात् "हरिदिनम्"इति नामान्तरेण कथ्यते । अशनोपचारान् विहाय विषयसुखभोगान् हित्वा केवलम् अहोरात्रं भगवत्पूजा, सच्छास्त्रश्रवणम्, भगवत्कथा श्रवणम्, तत्कथामननम्, भगवद्ध्यानादिषु कालं यापनीयम् । अस्य व्रतस्य प्रमुखांशस्तु एवं भणन्ति - कानिचित् अवश्यकरणीयान्यपि त्यक्त्वा भगवत्भक्तिपरवशो भवेत् इति । शरीरे विद्यमानजीवः वाञ्छति निद्राम् । यद्यपि देहव्याप्यजीवेन जीवितुं निद्रा, जलपानादिकं अवश्यकरणीयमेव । यदि तादृशावश्यकरणीयाः न क्रियन्ते तर्हि देहः स्वस्थो न स्थीयते । तथापि तादृशावश्यकरणीयान् पञ्चदशदिनेषु एकस्मिन् हरिदिने विहाय भगवत्समीपे वास एव एकादश्युपवासस्य विशिष्टलक्षणम् । एतच्च निष्कामकर्मणः उदाहरणम्।

**एकादश्याः प्रयोजनम्**

निष्कामकर्मसु अग्रगण्यः एकादश्युपवासः । अष्टवर्षादारभ्य अशीतिवर्षपर्यन्तं निखिलसज्जनबन्धुवर्गैः अवश्यानुष्ठेयव्रतमिदम् । व्रतानुष्ठानेन तु अन्तःकरणशुद्धिः तत्वज्ञानवृद्धिश्च स्यात् । अवशेन्द्रियान् वशीकर्तुं प्रयोजको भवति । गीतायाम्- चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

इति अर्जुनप्रश्नस्य भगवदुक्तिरेवमस्ति - असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

वैराग्यद्योतक एवायम् उपवासः । यतोहि उपवासेन चेतनस्य विषयासक्तिः न्यूनो जायते । तेन च हृषीकाणाम् ईशित्वम् संपाद्य हृषीकेशतावत्त्वेन हृषीकेशपदं लभ्यते । तत विचारशक्तिः तीक्ष्णो भवति । यद्यपि तदवधावेव देहे यद्यदपायकारी आहारांशः स्यात् तच्च दुष्टविचारोपि च नश्यति । अपरं कारणम् तद्दिने मनसि हरेः कथादीनां श्रवणादि कर्तव्यत्वात् कुत्सितविचारधाराः न स्फुरन्ति । आहारमौल्यमपि ज्ञायते । 'न किञ्चिद्भक्षणीयम्' इत्यादि सन्नियमसत्वात् संयमाभिवृद्धिः आत्मनि एधते । अपिच आस्तिक्यभावना जागृता भवति । प्रायशः कदाचित् पञ्चदशदिवसेषु द्विदिनं यावत् उपवासेनापि देहस्य असमतोलनं न सम्भवति। नच देहस्य निराहारेण जीवनं कष्टसाध्यम् । उपवासेन कायस्य आरोग्याभिवृद्धिर्भवति इति आयुर्वेद,अलोपति इत्यादि वैद्यपद्धतयः अनुमन्यन्ते। हृद्रोगो अर्बुद इत्यादि महान्रोगोपि तद्व्रतप्रभावेन क्षीणमुखो जायते इत्यत्रास्ति निदर्शनानि ।

**इतिहासपुराणादिषु उल्लेखः -**

महाभारतादि इतिहासग्रन्थे,भागवतादि पुराणग्रन्थे च विपुलतया अस्य व्रतस्योल्लेखः दृश्यते । भागवते तावत् चक्रवर्ति अम्बरीषस्य चरितम् पश्यामः । एवं महाराजरुग्माङ्गदकथापि । गतकालस्थ रुग्माङ्गदादि महाराजास्तु स्वीयराज्ये एकादशीव्रताचरणम् रोगी,शिशु,गर्भिण्यादि केचिज्जनान् विहाय राज्यस्थसकल आबालवृद्धैः कर्तव्यमिति शासनमासीत् । सच आग्रहपूर्वकेण सर्वैः कारयामास। एवं ग्रन्थे लिखितमस्ति ।

श्रीमन्महाभारते तावत् - इन्द्रियाणीह रक्षन्ति स्वर्गधर्माभिगुप्तये ।
तस्मादर्थेच धर्मेच तपो नानशनात् परम् ॥इति ॥

तत्मधुभूतगीतायामपि विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते ॥ इति॥

ब्रह्मवैवर्तपुराणे- `एकादश्युपवासेन द्वादशीपारणेन च ।
यदार्जितं मया पुण्यं तेन प्रीणातु केशवः ॥इति॥

स्कान्दे- सत्यं शौचं तपोधीतं दत्तमिष्टं श्रुतं तथा ।
तस्य सर्वमिदं व्यर्थं विना जागरणं हरेः ॥ इति॥

दैहिकमानसिकारोग्यस्य हितदृष्ट्या योगक्षेमापेक्षया वा इहपरे भगवत्प्रसादमीप्सितस्य एतत् ऋषिमुनिसम्मतं परम्परागतं दिव्यव्रतानुष्ठानम् अस्माकम् श्रेयस्करम् ॥

ज्योतिःशास्त्रे तावत् विधिः -

" सा तु शुक्लपक्षे सूर्यमण्डलात् चन्द्रमण्डलस्य निर्गमरूपैकादशकला क्रियारूपा, कृष्णपक्षे सूर्यमण्डले चन्द्रमण्डलस्य प्रवेशरूपा एकादशकलाक्रियारूपा ॥ शुक्लपक्षैकादश्यां चन्द्रः सूर्यकान्तिवृत्तात् पृथ्वीकान्तिवृत्तस्यागमनदिनम् ,कृष्णपक्षे तावत् तद्विलोमेन भवति" इत्यभिप्रायः । एतेन वाचस्पत्य वाक्येन चन्द्रगतेः एकादशीतिथेः च सम्बन्धो ज्ञायते । "अन्नाभिमानी चन्द्रस्तु "इत्यनेन सूचितम् ओषधीनामधिपतित्वमपि चन्द्रस्य इति । चन्द्रे कान्तिहीनतावत्वात् तद्दिने आहारत्यागः युज्यते । भुक्ताहारस्याजीर्णेनापि रोगः उल्बणो जायते । अत एव एकादशीदिने उपवास बहुयुक्तो भवति ।

" एकादशीसमं किञ्चित् पापत्राणं न विद्यते ।
व्याजेनापि राजन् न दर्शयति भास्करीम् "॥

शनिग्रहभुक्तौ वा दशायां वा कार्यप्रतिकूलानि परिणामानि यदि स्युः तर्हि अनेन व्रतानुष्ठानेन निवार्यन्ते । एतदनुष्ठानम् नवग्रहादीनामानुकूल्याय भवति इत्यपि ज्ञायते ।

वैद्यशास्त्रे तावत् "लङ्घनम् परमौषधम् "इत्यस्ति आरोग्यसूत्रम् । न केवलम् आयुर्वेदः आधुनिक-वैद्यशास्त्रमपि उपवासस्य महत्वं वर्णयन्ति । " एकादशेन्द्रियैः पापं यत् कृतं भवति प्रिये । एकादश्युपवासेन तत्सर्वं विलयं व्रजेत् ॥ उपवासस्तु पञ्चकर्मेन्द्रिय, पञ्चज्ञानेन्द्रिय, मनोरूपैकादशेन्द्रियविशिष्ट कायस्य स्वास्थ्याय प्रयोजकः । अनेनायं देहे दार्ढ्यं मनसि स्थैर्यं च ददाति । देहेन प्राप्यमानवृद्धाप्यप्रतिरोधे, हृद्दुर्बलता, अजीर्णता, मलबद्धता, पार्श्ववायु, विस्मृता इत्यादि जरावस्थरोगाः अपि उपवासेन कादाचित्केनापि प्रतिरोद्धुं शक्यते ।

कलियुगे विद्यमानानि आधुनिकसंशोधनानि अपि उपवासव्रतस्य गुरुत्वं प्रतिपादितानि । देहे आरोग्यं, मानसिकशान्तिं, तात्विकविचारशुद्धिः, नित्ययौवनं, सर्वेषु उत्साहः इत्यादीन् उपवासव्रतेन साधितुं शक्यते इति संशोधनेन दृढीकृतम् । " Fasting can save your life" ( by Dr. Herbert M. Shelton , published by American Natural Hygiene Soceity, Indian edition published Prakruti Jivana Kendra ,Bangalore), There are many such documentaries and Videos available to bringout the siginificance of Ekadashi Fasting. त्रिशतपुटसङ्ख्याकपुस्तके उपवासस्य बहुमुखप्रयोजनं साधारपूर्वकेन निरूपितम् । डा॥ ड्यूवे वदन्ति - " रोगी यदा निराहारी भवति तदा भुभुक्षया म्रियते तस्य रोगः न तु स रोगी" इति । पशवः ,पक्षिणस्तावत् सम्प्राप्तरोगस्य निवारयितुं स्वयमेव स्वीयाहारान् त्यक्त्वा अर्थात् उपोष्य औषधेन विना रोगमुक्तो भवति " इति वैद्यस्य विश्लेषणम् । एतेन रोगपीडितस्य उपवास एव चिकित्सा इति निश्चीयते ।

**देशसेवा**

एकादशीव्रतस्तु गृहग्रामराष्ट्राणि तथा समाजमपि सबलं सुदृढञ्च कर्तुं शक्यते । पौराणिकदृष्टान्तस्तु अम्बरीषादयः । एकवर्षे प्रतिमासस्य द्वौ इति गणितेन चतुर्विंशति दिनानि एकादश्युपवासस्य भवेयुः । दश्मी,द्वादशी इति दिनद्वये नियमेन अल्पाहारेण अथवा एकभुक्तो भवेत् तदा एकस्मिन् वर्षे बहुशः एकमासपर्यन्तम् उपवासकरणं भवति । यद्यपि एकपौरः दिने त्रिशतरूप्यकाणि यावत् व्ययीकरोति चेत् तदा एककुटुम्बस्य एकमासे त्रिंशत्सहस्ररूप्यकाणि व्ययः । तथा एकग्रामे, राष्ट्रे अन्ततः भारतदेशस्थ शतकोट्यधिकसङ्ख्याक भारतीयानांकृते बहुशः त्रिशताधिकसहस्रकोटिरूप्यकाणां व्ययो जायते । यदि देशस्थजनैः सर्वैः उपवासो क्रियते चेत् तदा तावत्परिमितं धनं शिष्यते । देशस्येदम् अतिलाभदायकं भविष्यति । तदर्थमेव अस्मत्पूर्वजाः अम्बरीषरुक्माङ्गदादयः स्वीयराज्ये इदमपूर्वव्रतम् शासितवन्तः ।

" दि फ़िलासफ़ि फ़ास्टिन्ग् " इति कृतेः लेखकः डा॥ एड्वर्ड् फ़्यूरिंग्टन् लेखनावसरे एवंवदति - शरीरे उत्पत्स्यमानस्य रोगादेः प्रकृतिचिकित्सादिना स्वास्थ्यं प्राप्यते । मानसिकस्वास्थ्यगृहीतुं उपवासस्य आवश्यकता

अस्त्येव। तेषामभिप्रायस्तु उपवासेन ज्ञानेन्द्रियाणि प्रबलानि भवन्ति । मानसिकचाञ्चल्यं विहाय मनसि धैर्यं स्थैर्यं शान्तिः मनोनिग्रहश्च साध्यते । स्वाभाविकगुणाः तत्कर्मणा अभिव्यक्ताः भवन्ति । अन्ततः उपवासेन नीतिवन्तः तथा अध्यात्मवन्तश्च भवेयुः ।

**दिनत्रयव्रताचणम् :-**

दशमी,एकादशी,द्वादशी इति त्रिदिनसम्बद्धव्रतमिदम् । ब्राह्मीमुहूर्तेचोत्थाय स्नानादिनित्यकर्म विधाय व्रतसङ्कल्पश्च कुर्यात् । दशमीदिवसे प्राप्ते व्रतस्थोहं जनार्दन ।
त्रिदिनं देवदेवेश निर्विघ्नं कुरु केशव ॥ ब्रह्मवैवर्तपुराणे ॥

एकादशीसङ्कल्पस्तु एवं वर्तते - एकादश्यां निराहारः स्थित्वाहनि परेह्यहम् ।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥

द्वादश्यां तावत् अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदोभव ॥

इति सङ्कल्प्य कृतनित्यक्रियः पारणादीन् समाप्य एकादश्युपवासेन द्वादशीपारणेनच । यदार्जितं मया पुण्यम् तेन प्रीणातु केशवः ॥ इति कृष्णार्पणम् कुर्यात् ।

| एकादशीनां नामानि | | | |
|---|---|---|---|
| ऋतु | मास | शुक्लपक्ष - नामानि | कृष्णपक्ष - नामानि |
| वसन्त | चैत्र | कामदा | पापविमोचिनी |
| | वैशाख | मोहिनी | वरूथिनी |
| ग्रीष्म | ज्येष्ठा | निर्जला | अपरा |
| | आषाढ | पद्मा (शयनी) | योगिनी |
| वर्ष | श्रावण | पुत्रदा | कामिका |
| | भाद्रपद | जयन्ती | अजा |
| शरद् | आश्वयुज | पापाङ्कुशा | इन्दिरा |
| | कार्तीक | प्रबोधिनी | रमा |
| हेमन्त | मार्गशीर्ष | उत्पन्ना | पवित्रा |
| | पुष्य | पुत्रदा | सफला |
| शिशिर | माघ | जया | षट्तिला |
| | फाल्गुण | आमलिका | विजया |
| अधिक मास | | पद्मिनी | परमा |

**एकादशीनां नामानि-**

एकस्मिन्वर्षे तावत् चतुर्विंशतिसङ्ख्याक एकादशीतिथयः भवन्ति । त्रैवार्षिकाधिकमासे तावत् द्वौ । अतः षड्विंशसङ्ख्याक हरिदिनानि बभूव । तेषां नामानि -

**उपसंहारः-**

इदानीन्तनपर्यन्तं उपवास इत्यस्य पदस्य आहारत्यागः इत्यर्थेन व्यवहृतम् । तत्पदस्य अपरार्थस्तु शास्त्रे निरूपितम्

उपावृत्तस्तु पापेभ्यो यस्तु वासो गुणैः सह ।
उपवासः स विज्ञेयः सर्वभोगविवर्जिताः ॥ इति भविष्योत्तरपुराणे ॥

तद्दिने न केवलं अशनाख्यपापकर्मणि दूरवृत्तिः किन्तु पुण्यकर्मणि च रतो भवेयुः । अर्थात् केवलाहारत्यागं कृत्वा दूरदर्शनादिषु निरतः न स्यात् । किन्तु सामीप्यद्योतकमुपेतिपदं च आवासार्थकः वास शब्दः । तस्मात् उपरिस्थ भगवत्समीपे वृत्तित्वम् अथवा भगवद्भक्तसकाशे वृत्तिः इति यावत् । अनेन अस्माकं मनसि भागवतादि भगवद्कथायाः श्रवणमननादिपुरस्सरम् भगवच्चिन्तनमेव करणीयम् । दूर्वासमहर्षिणा प्रयुक्तः कृत्यः राजानम् अम्बरीषं हन्तुं प्रयतते । तदा अम्बरीषस्य एकादशीव्रतदीक्षया सन्तुष्टः विष्णुः स्वचक्रेण कृत्यं यथा मारयति तथा अनेन व्रताचरणेन आभिचारादि कृत्रिमदोषाः विनश्यन्ति एव । एतद्व्रतानुष्ठानं जीवने सम्भाव्यविपदां रामबाण एव । सर्वपापेभ्यो वज्रकवच इव रक्षति । अन्ततः लौकिक, सामाजिक, आर्थिक, नैतिक, मानसिक, शारीरिक,

आध्यात्मिक इत्यादि सकलविधेषु अर्थपूर्णः महान्व्रतः । यद्यपि जीवः स्वस्वजीवने तावत् अनिष्टनिवृत्तिं इष्टप्राप्तिं च सदा अपेक्षते । श्रीमन्मध्वाचार्यैस्तावत् कृष्णामृतमहार्णवग्रन्थे सर्वशास्त्राणि आलोड्य सङ्ग्रहेणोक्तम् -

अश्वमेधसहस्राणि वाजपेयशतानि च ।
एकादश्युपवासस्य कलां नार्हन्ति षोडशीम् ॥
नेदृशं पावनं किञ्चिन्नराणां भुवि विद्यते ।
यादृशं पद्मनाभस्य दिनं पातकहानिदम् ॥ इति ॥

तस्मात् एकादशी विषये अज्ञानात् भयादि सम्भवे सति अभयप्रदगोविन्दं स्मृत्वा व्रताचरणे अनुरक्तो भवामः । यदि भक्त्या स्तुत्या विरक्त्या वा तद्विशिष्टव्रतमाचरेम चेत् " यत्करोषि यदश्नासि यज्जुहोति ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्" ॥

इति गीतोक्तिस्मरणेन सर्वं कृष्णार्पणमस्तु इति वक्तव्यम् । वेदव्यासादिष्टं इदं व्रतं पुनरुज्जीवनङ्कृतवते जगद्गुरवे श्रीमध्वाचार्याय नमांसि भूयांसि । "गुरुप्रसादो बलवान् मतो मे न तस्मात् बलवत्तरः " इति वाचा गुरुप्रसादद्वारा भगवदनुग्रहः भूयात् इति प्रार्थ्य विरमामि |

Bibliography

1. श्रीमदानन्दतीर्थ विरचितः कृष्णामृतमहार्णवः
2. महाभारतान्तर्गता भगवद्गीता
3. सदाचारदर्पणम्
4. एकादशीव्रतम्

https://doi.org/10.5281/zenodo.7248933

Paper 28

# याज्ञीयमन्त्रमथनम्

**RADHESH**

Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru

Email id – radheshacharya10@gmail.com

## सार: (ABSTRACT)

***मनुष्यजीवनं पूर्णं भयोपेतम् । तद्भयमुक्तेः भगवद्शरणागतिरेव उपायः । अत्रापि मनुना अयमेव उपायः स्वीकृतः । भयात्शरणागतः सः भगवन्तंस्तोतुम् आरब्धवान् । अध्यात्मपथिसोपानक्रमेण पुरो गतवान् । अन्ते ज्ञातश्च जीवनस्य अन्तिमः प्रधानश्च लक्ष्यः मोक्षः इति । तस्य प्राप्तेः अस्मान्सु पथि प्रवर्तय इति प्रार्थयति । इममुपकारं प्रति प्रत्यर्पयितुं अस्मासु किमपि नास्ति । यतः ईशावास्यमिदं सर्वम् । अतः सुकृताञ्जलिना नमस्कारवचांसि अर्प्यन्ते तावदेव । अत्र मोक्षार्थंप्रयत्नः आवश्यकः, करणीयश्च । परन्तु भगवदनुग्रहेणैव सः लभ्यते न केवलं प्रयत्नेन ।***

**पूर्वपीठिका**

'वेदयन्ति इति वेदाः । कं वेदयन्ति? ब्रह्म । किं ब्रह्मज्ञानेन? तदेव परमं लक्ष्यं अस्मज्जावनस्य । किमर्थं ब्रह्मज्ञानं परमं लक्ष्यम्? ईशावास्यमिदं सर्वं तस्मात् । ईशः कः? स ब्रह्म एव । तादृशं ब्रह्म वेदयन्ति वेदाः । महान्तः ज्ञानराशयः इमे वेदाः अनन्ताः । ऋक्यजुस्सामाथर्वश्चेति चतुश्शाखाः वेदानाम् । तासु मूलवेदभागः मन्त्राः संहिता वेति व्यपदिश्यन्ते । उदाहरणार्थं ऋक्संहिता यजुस्संहिता इत्याद्याः । प्रतिसंहितानुगुणतया ब्राह्मणारण्यकाश्चेति भागाः सन्ति । संहितायां विद्यमानानां मन्त्राणामर्थः, तेषां विनियोगश्च ब्राह्मणेषु विवृतः । ब्रह्म नाम वेदः । तेषाम् अर्थविवरणार्थं विद्यमानो वेदभागः ब्राह्मणम् । अरण्ये मुनिभिः, वानप्रस्थैश्च एकान्ते मननं कृत्वा ज्ञेयः, विशेषतया अध्यात्मभूयिष्ठश्च वेदभागः आरण्यकम् ।

प्रथितेषु दशोपनिषत्सु नव उपनिषदः ब्राह्मणारण्यकभागेषु दृश्यन्ते । मूलमन्त्रभागे दृश्यते इयमेका उपनिषत् याज्ञीयमन्त्रोपनिषत् । तस्मादेव इयं सार्थकं नाम अस्याः । इयमेका मन्त्रोपनिषत्, अवशिष्टाः सर्वाः ब्राह्मणोपनिषदः अथ वा आरण्यकोपनिषदः ।

एतैः उपनिषन्मन्त्रैः प्रतिपाद्या देवता यज्ञनामको भगवान् । यज्ञप्रतिपादकानां मन्त्राणाम् उपनिषदियम् । अतः याज्ञीयमन्त्रोपनिषदिति अन्वर्थम् अस्या नाम । अस्याः उपनिषदः आद्यद्रष्टा ऋषिः स्वायम्भुवमनुः । भागवतब्रह्माण्डपुराणयोरनुसारेण एतन्मन्त्राणां साक्षात्कारस्य पूर्वकथा एवमस्ति- चतुर्दशमनुषु प्राथमिकः स्वायम्भुवमनुः । अयं मनुकुलस्य मूलपुरुषः । शतरूपादेवी अस्य पत्नी । अनयोः दम्पत्योः प्रियव्रतः उत्तानपादश्चेति द्वौ पुत्रौ, आकूतिः देवहूतिः प्रसूतिश्चेति तिस्रः पुत्र्यश्च । तासु देवहूतेः पतिः कर्दमप्रजापतिः । अनयोः दम्पत्योः भगवान् नारायणः कपिलरूपेण अवततार । आकूतेः पतिः रुचिप्रजापतिः । भगवान् इमां दम्पतीं तयोः पुण्यपरिपाकात् स्वावातारवेदित्वेन नियोजयामास । तत्र यज्ञनामकरूपेण अवततार च। अयं यज्ञनामकभगवानेव अस्याः उपनिषदः देवता । स्वायम्भुवमनुः एतैर्वैदिकमन्त्रैः स्वदौहितृरूपेण अवतीर्णं यज्ञरूपिपरमात्मानं स्तुत्वा अभीष्टं प्राप्नोत् ।

कदाचित् पित्रा स्वयम्भुना जगद्रक्षणे नियुक्तः स्वायम्भुवमनुः तपसि निरत आसीत् । एतद्रक्षणव्यवस्थायाः हानिमिच्छन्तः केचिद् राक्षसाः स्वायम्भुवमनुं हन्तुं प्रववृतिरे । त ईश्वरेण अवध्यत्ववरं लब्ध्वा स्वशत्रुहनने शक्तिं सम्पादयन्ति स्म । एतद्वरबलेणैव दृप्ताः सन्तः स्वायम्भुवमनुहनने प्रेरिता अभवन् ।

तदर्थं ते तत्रागताः । एवमत्र पालनसंहारक्रिययोः सङ्घर्षः उत्पन्नः । तदा स्वायम्भुवमनुः स्वदौहित्रं भगवन्तमेव प्रार्थयामास । आर्षदर्शनेन पूतात् तन्मुखात् याज्ञीयमन्त्राः निसृताः । तेन सन्तुष्टो भगवान् आसुरीशक्तिं संहृत्य मनुम् अनुग्रहीतवान्।

विषयः :

इयं उपनिषद् 'ईशावास्यम्' इति पदेन आरभ्यते । तस्मादियमुपनिषत् ईशावास्योपनिषत् ईशोपनिषदिति वा भण्यते । मनुं हन्तुम्असुरेषु उद्युक्तेषु सः मनुः न तिलमात्रं विचलितो बभूव । सपद्येव तस्य मनः इदमचिन्तयत्- शिववरेण अवध्यानां तेषां वधोपायः कः ? समस्यायाः निवारणार्थं तेन त्रयः उपायाः चिन्तिताः । तत्र प्रथमः - असुरान् शरणं गत्वा तेषाम् इष्टानुसारेण जीवनयापनम् । द्वितीयः - तैस्साकं युद्धकरणम् । तृतीयः - सर्वनियामकं भगवन्तं शरणं गत्वा तस्मिन् समस्यापरिहारस्यार्पणम् । उक्तेषु उपायेषु खलनम्रतां गत्वा भगवदादेशस्य द्रोहं कृत्वा जीवनयापनं तामसमार्गः । आत्मरक्षणोपायः अस्माभिरेव ऊढव्य इति विचिन्त्य युद्धाय प्रवर्तनं राजसमार्गः । एतेन आत्मरक्षणस्य श्रेयसो वा निश्चयोऽपि नास्ति। अतः भगवति शरणमिति तृतीयो मार्गः श्रेयः, तस्मादेव उपादेयश्च । तेन दत्तम् भगवत्प्रसाद इति स्वीकृत्य जीवनं समस्यापरिहारे सात्विकोपायः । द्रौपद्या अपि स्ववस्त्रापहारकाले अयमेव मार्गः अनुसृतः । यदा भगवानेव सर्वेषां मानकर्ता इति मत्वा हस्तद्वयम् उद्धृत्य कृष्णं प्रार्थयति तदा सा अक्षयाम्बरा भवति ।

तथैव सर्वकर्ता सर्वभर्ता सर्वहर्ता च भगवानेव । स सर्वत्र व्याप्तत्वात् मम चिन्ता किमु? इति मनुः विवेचयति। अचिरादेव भगवद्शरणागतये नियतपूर्ववृत्तित्वेन अस्मासु अवश्यान् अधिकारात्मसंस्कारान् स्वस्मिन् द्रढयति ।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥

इदं जगत् ईशस्य वासगृहम् । सः सर्वत्र व्याप्य इदं जगन्नियमयति । सर्वकर्ता भगवान् इति चेत् अहं, ममेतदिति चिन्ता किमु ?, कुरु भुङ्क्ष्व च कर्म निजं नियतम् । भगवद्दत्तं तत्प्रसाद इति स्वीकृत्य तृप्तिमेहि । अन्यवस्तुषु आशां मा कुरु ।

सर्वमिदं भगवदधीनं, सः सर्वकर्ता चेत् किमर्थं कर्तव्यकर्माणि करणीयानि ? सः यदिच्छति तद्भवति। जगद्रक्षणे अहं नियुक्तेति भवतु नाम । यदि न तन्निवर्तितम् तर्हि कः प्रमादः ? यदि असुराः मां हनिष्यन्ति तेनेदं जगत् अतन्त्रं, तर्हि को दोषः ? सर्वेषां मूलरक्षकस्सन् भगवानस्ति तदा अस्माकं रक्षणकार्यस्य औचित्यं किम्? एवं मनसि सन्देहे सति द्वितीयेन मन्त्रेण स्वयमात्मानं सान्त्वयति ।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥

जीवने विश्वासः, आजीवनं यावत् कर्तव्यकर्मसु आसक्तिश्च इत्युभावेव जीवनधर्मः । यत्किमपि करोतु भगवत्पूजारूपेण भगवदर्पणबुद्ध्या च करोतु न स्वहिताय । उक्तञ्च-

प्रातः प्रभृति सायान्तं सायादिप्रातरादिकम् ।
यत्करोमि जगन्नाथ तदस्तु तव पूजनम् ॥

लोकसेवायां भगवत्सेवायाञ्च रतस्सन् शतं समाः पूर्णायुष्यं जीवितुमिच्छेत् । कर्तव्यकर्मशून्यं निष्क्रियं जीवनं जडवत् शून्यम् । ज्ञानी अज्ञानी वा स्वकर्तव्यकर्मणः न विरमेत् । भगवत्प्रीतिकरकर्मकरणेनैव कर्मबन्धं विनाशयेत् न कर्मत्यागेन ।

कर्मत्यागस्तु पुनः कर्तव्यच्युतिरूपपापाय भवति । भगवत्साक्षात्कारेण लुप्तकर्मणोऽपि सत्कर्म आनन्दवृद्धये भवति।अतः एतद्दुखात्मकसंसारस्य कर्मबन्धस्य च निर्वृत्तिं भगवत्पूजारूपसत्कर्मभिरेव साधयेत्

नान्यैः । भगवान् नम्यताम्, वाचा भगवान् स्तूयताम्, मनसा च भगवान्ध्यायताम् । एतया कर्मजागर्त्या एव प्रमादात् अज्ञानाद्वा कृतदुष्कर्मणः लेपेन आत्मानं रक्षेत् । सार्थकजीवनेच्छूनाम् अयमेव श्रेयो मार्गः ।

भगवन्नियत्या जगदिदं अस्ति, प्रवर्तते च । हरिचित्तसत्यम्, नरचित्तमिथ्या इत्युक्तिः प्रसिद्धा च । किन्तु असुराः एतन्नज्ञात्वैव स्वेच्छया जगद्वर्तेत इति विचिन्त्य तथा कर्तुं प्रवृत्ताः । मनुं हिंसितुमागतानां तेषां दुरवस्थां दृष्ट्वा तस्य मनः व्याकुलीबभूव । अज्ञानात् अन्धन्तमसि प्रवृत्तानां तेषां दुःस्थितौ स चिन्तया आक्रान्तः । एते शङ्करमुपास्य साक्षात्कृतवन्त इति तु सत्यमेव । किन्तु शुभमार्गे न गताः । अविद्याविषयकम् उपासनमेव अत्र कारणं न तु विद्याविषयकम् । कुपथि प्रवर्तय एव देवः तैः साक्षात्क्रियते इति मनुः चिन्तयति । ईदृशचिन्तनस्य फलत्वेनैव तृतीयमन्त्रस्य दर्शनमभवत् ।

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चाऽत्महनो जनाः ॥

भगवन्तं विमुखीकृत्य ये जीवन्ति ते तमसः पथि गच्छन्ति । जीवने लब्धान् सर्वावकाशान् ते भगवद्द्वेषे एव यापयन्ति । भव अवनतिं गते तमसि मलिनतां यन्ति । यतः ते भगवतः अस्तित्वम् अथ वा तस्य गरिमां निराकुर्वाणाः आत्मघातिनः कृतघ्नाश्च । ऊर्ध्वमुखः सन् स्वयं शिरोपरि क्षिप्तसिकत इव तेषां स्थितिर्भवति । ईदृशानाम् आरक्षितं तदन्धन्तमः तमसा पूर्णं गृहम् । तत्र ज्ञानप्रदीपस्य ज्वलनाय अवकाश एव नास्ति । सुखलेशोऽपि तत्र नास्ति इत्यतः दुःखस्यैकमात्रस्थलत्वाच्च ते लोका असुर्या इत्युच्यन्ते ।तादृशानां तदन्धकारलोकात् मुक्तिर्नास्ति । स तेषां शाश्वतधाम ।

एवं भगवद्विमुखजीवनस्यापायो ज्ञात्वाभगवद्विभूतिविषये आदरवान् मनुः अनेजदेकं, तदेजति तन्नेजति इति मन्त्रद्वयेन तं विशेषतः ध्यायति । ततश्च भगवदुपासनार्थमपि आत्मरक्षणं लोकरक्षणञ्च पवित्रं कर्तव्यं भवति।प्रयत्नं पृष्ठतः कृत्वा केवलं दैवावलम्बनम् उचितं किम्? स्वकर्तव्यात् विमुखस्य दैवानुग्रहः लभ्यते किम् ? इत्यादिप्रश्नस्य समाधानरूपेण अयं मन्त्रः दृष्टः -

यस्तु सर्वाणि भूतान्यात्मन्येवानु पश्यति ।
सर्वभूतेषु चाऽत्मानं ततो न विजुगुप्सते ॥

इदं चराचरजगत्पूर्णं भगवन्तमाश्रित्य जीवितम् । सर्वप्राणिनां अन्तर्बहिश्च भगवानेव स्थित्वा धारयति नियमयति च ।एवं जगत् भगवत्यस्ति, भगवान् जगत्यस्ति । ईदृशं जगत्सर्वं भगवदधीनत्वेनैव तस्येच्छयेव चलति इति सत्यं यो जानाति, तत्सत्यञ्च जीवने य आत्मसात्करोति, सः केन किमर्थञ्च भयग्रस्तो भवेत्? परभयस्य सन्देहः, तेन स्वयमात्मा अरक्षित इति अनाथप्रज्ञा एव आत्मरक्षणप्रवृत्तेः मूलम् । भगवतः रक्षादीक्षायाम् यो विश्वसिति तस्मादेव भयदूरवान् च भवतितेन स्वरक्षणाय प्रयत्नःनापेक्ष्यते । तादृशज्ञानवतः जीवनं भगवति सुरक्षितमेव । आत्मरक्षणं स्वाधीनमिति ज्ञानम् अहङ्कारमात्रम् । स्वयमात्मानमहमेव रक्षामीत्येतत् काचित् भ्रान्तिरेव । आत्मरक्षणं भगवदधीनमेव ।

भगवद्रक्षणे विश्वासः सन्नपि कदाचित् विपदि अयं विश्वासः शिथिलतामेत्य धैर्यं नश्यति । कश्चिद्मोहः अस्मानावृणोति । आवरणस्यास्य अनिवारकत्वात् अत्यन्तं दुःखमनुभूयते । एतेषां शोकमोहानां निवारणे अस्माकं, भगवति अचलो विश्वास आवश्यकः । आत्मनि तं विश्वासं वर्धयेत् । यतः भगवति सर्वमिदमवलम्बितम्, सर्वत्र भगवानेव अस्ति इतीदम् अनुसन्धानमात्रं तं विश्वासं सम्पादयेत्।अतः एतान् तात्कालिकान् शोकमोहान् अनेन मन्त्रेण निवारयति यथा-

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

यः सर्वजीविनां ,सकलजगतां, सकलचराचराणाञ्च आश्रयः, स एव भगवान् सकलप्राणिनां अन्तर्बहिश्च व्याप्य तिष्ठति । स एव सर्वत्र अन्तर्यामी, सर्वनियामकत्वेन वर्तते इत्यस्मादेव तं सर्वेषाञ्च आत्म इति 'आत्म'पदेन

व्यवह्रियते । एवं सर्वत्र भगवन्तं यो पश्यति,सर्वान्तर्यामिणः भगवतः अनन्तरूपेषु य एकत्वम् अवगच्छति स एव ज्ञानी भवति । तस्य रूपम् अनन्तम्, किन्तु स एक एव ।तस्य अवताररूपेषु रामकृष्णादिषु भेदो नास्ति । यथा मूलरूपं पूर्णं तथैव अवताररूपाण्यपि ।एतादृशस्य एकत्वज्ञानिनः अहं, मयि इति को मोहः? तदुत्पत्स्यमानाः अज्ञानभ्रान्तिदुःखादयः न भवन्त्येव । स्वायम्भुवमनुः चिन्तयति- मम तु लोकस्य देहस्य च रक्षणे चिन्तायाः आवश्यकता नास्ति । अस्य रक्षणं भगवदिच्छा चेत् नाशोऽपि तस्येच्छा । यदि मां प्रविश्य रक्षणे प्रेरयति तर्हि असुरेषु तिष्ठन् संहारप्रेरकोऽपि भगवानेव खलु? तस्यैव मुख्यकर्तृत्वात् स एक इत्युच्यते । 'स मां रक्षति यो हि गर्भे ' इतीदृशम् अनुसन्धानं दृढं यस्मिन् ज्ञानिनि तस्य अन्येभ्यः भयं कथम् ? । यतः सः मोहात् दूरे एव तिष्ठति । शोकः तदुपसर्तुं बिभेति ।

अनेन प्रकारेण यो भगवन्तं जानाति स एव ईदृशां मनोदृढतां सम्पादयितुमर्हः । तस्मात् ज्ञानिनां चित्तगोचरान् भगवतः महागुणान्, ज्ञानिनः मुक्तिं निश्चयेन दातुमर्हान् ज्येष्ठगुणान् मनुः अनेन मन्त्रेण अनुसन्धत्ते-

स पर्यगाच्छुक्रमकायमव्रण
मस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भू
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥

भगवान् स्वयं दुःखदूरः । नित्यानन्दमूर्तेः तस्य दुःखं तु कुतः ? तस्मादेव सः स्वभक्तानां दुःखं नाशयति । अन्यथा स्वयं दुःखे निमग्नः कथमन्येषां दुःखं परिहरति ? यो भगवन्तं शुक्र इति उपासते स शुक्रो भवति । सः गुणपूर्णः, तस्मिन् न किञ्चिदपि न्यूनता अस्ति । सः गुणमूर्तिरपि अशरीरवान् । यतः तस्य जीवानामिव सूक्ष्मं लिङ्गशरीरं, स्थूलं भौतिकशरीरञ्च न स्तः । नित्यमुक्तस्य शरीरबन्धनं कुतः ? शरीरेण यदि न बद्धः तर्हि पापस्य, दोषस्य च सम्बन्धः कुत आगच्छेत् ? तस्मात् सः सर्वदोषदूरः गुणसमुद्रश्च । ज्ञानानन्दादिशुद्धगुणैरुपेतः परमपावनमूर्तिः सः ।

भगवतः शरीरबन्धो नास्ति इत्यनेन सः निराकार इत्युपास्यते तदा तदुपासनमसद्भवति । यतः सः ज्ञानानन्दमूर्तिः। स्वभक्तसन्तापशान्तये सहस्ररूपेण आगच्छतः सत्यमूर्तिः । नृसिंहावतारप्रसङ्गे स्फुटोऽयं विषयः। यत्ते रूपं कल्याणतमं तत्ते पश्यामि इति मनोरिच्छ्या भगवान् साकार इत्यवगम्यते तदपि अज्ञानं भवति । यतः अस्माकमिव पञ्चभूतैर्निर्मितम्, अस्थिमांससङ्घातरूपं, यातनामयं, जराजननमरणैरुपेतं, दुःखस्यावासस्थानञ्च नश्वरशरीरं तस्य नास्ति । सः यथा साकारः तथा निराकारोऽपि । लोकदृष्ट्या सः निराकारः, किन्तु अलौकिकाकारेण साकारः । तथैव भगवान् सगुण इत्युच्यते तदा अस्माकमज्ञानं प्रकटितं भवति । यतः सः अस्माकमिव सत्त्वरजतमोरूपैः प्रकृतिगुणैर्न बद्धः । अपि च सः निर्गुण इत्यवगम्यते तर्हि तदपि असद्ज्ञानं भवति। यतः सः ज्ञानानन्दादिसर्वैः शुभगुणैः पूर्णः । सुज्ञानिनामत्रसम्मोहस्य कारणमेव नास्ति । भगवान् सगुणः निर्गुणश्च। सः अनन्तशुभगुणानां वासस्थानात् सगुणः । ये केऽपि अशुभधर्माः तस्मिन् न सन्ति इत्यतः सः निर्गुणः। तादृशः भगवान् सर्वज्ञः कविः । स एव प्रकृतेः सर्वजीविनाञ्च हृदये तिष्ठन् तन्नियन्त्रको हृषीकेशः । सः सर्वं नियम्य उत्कृष्टतया वर्तते । सर्वं व्याप्य तिष्ठतः तस्य कस्यचिदपि साहाय्यस्य आवश्यकता नास्ति । स सदा सर्वस्वतन्त्रः। सः केनापि न सृष्टः । स्वेच्छयैव अनन्तरूपाणि धरति । अनादिकालतः अस्य सृष्टिलीला सम्पन्ना, अनन्तकालपर्यन्तं सम्पत्स्यते च । अत इयं अनाद्यनन्ता च । जगदिदं तस्य सत्यसृष्टिः । तस्य सृष्टिलीला च सत्यम् ।तस्मादेव सः सत्यसङ्कल्पः सत्यकर्मश्च । विचित्रमिदं विश्वं तस्य अद्भुतशक्तेः एकः प्रत्यक्षसाक्षी । एतस्य निराकरणं तन्महिमानिराकरणत्वेन सम्पद्यते । एवमीदृशः दृढतासम्पन्नः साधकः भगवन्तं सम्यक् जानाति, तस्मादेव सः भवबन्धनात् विमुच्य भगवत्पदमेति ।

भगवद्स्तुतौ प्रवृत्तो मनुः विद्याविद्ये सम्यक् विश्लेष्य भगवद्साक्षात्काराय शुद्धविद्यायां स्वमनः स्थिरीकर्तुं प्रयतते । एतदनुसन्धाने अन्धं तमः प्रविशन्ति इत्यादीन् षण्मन्त्रान् साक्षात्करोति।

एतैः षण्मन्त्रैः अविद्यां निरस्य शुद्धविद्यायां स्थिरीकृतमनसा मनुः भगवन्तम् अप्रार्थयत् । किन्तु एतावत्पर्यन्तं कृता प्रार्थना परोक्षप्रार्थना । भगवता सह साक्षात्सम्भाषणं न कृतम् । भगवत्समाध्या मनुमनः इदानीम् उत्कण्ठिता । सः भगवद्साक्षात्काराय उद्युक्तः । यतः भगवदपरोक्षदर्शनमात्रेण भवबन्धनात् निवृत्तिः । सः भगवता साकं साक्षात् सम्भाषणे प्रवर्तते । किन्तु उपासनार्थम् एकः प्रतीकः आवश्यकः । तदर्थमेव देवः प्रतिमायां कलशे अथ वा अन्यस्मिन् प्रतीकेषु पूज्यते । अन्यथा केन साकं इदं सम्भाषणम् ? मनुः स्वोपासनाय यज्ञरूपभगवतः मूर्तिमेव प्रतीकत्वेन स्वीकृतवान् । परन्तु सः स्वदौहित्रः । तथापि यज्ञनामकभगवतः प्रार्थनायां सः स्वदौहितृरूपेण न चिन्तितवान्। यतः स्वसम्बन्धित्वेन उपासनं पुनः संसारबन्धनाय भवति । अस्मिन्नेवार्थेगीतोपदेशप्रसङ्गे कृष्णः अर्जुनं प्रति भीष्मादिषु स्वबन्धुत्वबुद्धिं परित्यज्य भगवत्सेवारूपेण तान् घ्नन्तु इत्युपदिशति । स्वदौहितृरूपेण अवतार्य अनुगृहीतः यज्ञपुरुष एव इदानीं वेदमात्रा गायत्र्या प्रतिपादितः सूर्यमण्डले वसति । एषः यज्ञनारायण एव सूर्यनारायणः । एवमेतन्मन्त्राणां मुख्यप्रतिपाद्यदेवतां भगवन्तं मनुः सूर्यप्रतीके स्मृत्वा वक्ष्यमाणमन्त्रेण शरणं गत्वा स्वस्य भगवतश्च अन्तरे विद्यमानं जवनिकामपनेतुं प्रार्थयति -

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥

कनकेन पात्रेण सत्यस्य मुखं निलीनम् । तस्मादेव सत्यादपि सत्यस्यावरकमेव अतीवाकर्षकतया भासते । जनाः आवरणदर्शनेनैव भ्रान्ताः सन्तुष्टा भवन्ति । आवरकपात्रं निष्कास्य न प्रयतन्तेसत्यदर्शनाय । सत्यजगन्नियामके सत्ये भगवद्विषयेऽपि इयमेव चेष्टा । भगवदावरकं पात्रं सूर्यमण्डलम् । एतद् सत्यावरकं सूर्यमण्डलं वयं पश्यामः । किन्तु नयनायासकप्रकाशात् परे किरणेष्वन्तरे गूहितोऽस्ति भगवान् । कोटिसूर्यसमप्रभस्य तस्य ज्ञानं तु दुष्करमेव । अस्माकं प्रयत्नादपि भगवदनुग्रहः अत्र अतीवावश्यकः।न केवलं अस्मदिच्छया अलं, किन्तु स आत्मानं दर्शयितुमिच्छेत् खलु ? तदर्थं मनुः 'हे यज्ञपुरुष अहं शरणं गतोऽस्मि, हे गायत्रीप्रतिपाद्य, हे गुणपूर्ण!, अहं सदा भवद्भक्तः इति भवान् जानाति । सत्यमूर्तिं भवन्तं हृदये प्रतिष्ठापितोऽस्मि। यथा मनसि तथैव बहिरपि भवतः रूपं द्रष्टुकामोऽस्मि । एतयोर्नयनयोरीक्षणसामर्थ्यं भवता एव दातव्यम् । न ऋते त्वत्क्रियते । अत एतद् कनकावरणम् अपसर्पतु । सूर्यमण्डलात् परे विद्यमानं भवतः मङ्गलरूपं दर्शय' इति प्रार्थयति ।

'पूषन्नेकर्षे यम सूर्य' इति प्रार्थनया मनोः भगवद्दर्शनफलं लभ्यते । आत्मना साक्षात्कृतं तं विराड्रूपं मनुः उत्तरार्धेण मन्त्रेण अनुसन्धत्ते- सूर्ये, सर्वस्मिन् जगति, अपि च आत्मनिविद्यमानस्य भगवतः व्यष्टिसमष्टिरूपेषु एकत्वं पश्यति । **योऽसावसौ पुरुषः सोऽहमस्मि ।**

सूर्यमण्डले दृष्टो भगवान् असुनाम्ना अस्माकं सर्वेषां श्वासो बभूव । अस्माकं कर्माणि भगवते अर्पयति प्राणदेवः । तस्मिन् स्थितः, मदन्तर्यामी , मम गृहे यज्ञरूपेण विद्यमानश्च षड्गुणपूर्णो भगवान् एक एव । स एव सर्वत्र व्याप्य वर्तते । सर्वत्र व्याप्तः स एव पूषन्नाम्ना गायत्रीप्रतिपाद्यः, पुरुषनाम्ना पुरुषसूक्तप्रतिपाद्यश्च । तत्पुरतः अहमेकः अणुकः । इदम् मदायत्तमपि भगवदधीनम् । तस्मात् अहमिति नामापि भगवन्नामैव । तेन विना अन्यत्सर्वं हेयम्, स एक एव अहेयः ।सर्वश्रुतिसारस्तु सर्वदा स अहेय इति । सर्वजीवेषु तस्य सन्निधानात् जीवोऽपि अहेयत्वेन अहं पदवाच्यः । यदा परमात्मनः वियोगः जायते तदा जीवोऽपि हेयवस्तु भवति । तस्मादेव सः अहमिति अस्मीति च रहस्यनामभ्यां वाच्यः । सः अहंशब्दवाच्यतया मयि स्थितत्वादेव अहं अहम्, अहंशब्दवाच्यश्च ।

नारायणः जगदेकदेवः, मुख्यप्राणः जगद्गुरुश्च । जीवस्य सत्कर्माणि भगवते समर्प्य तानि भगवन्निकटे नयतः अन्तरङ्गसचिवः । भगवतः आद्यभक्तः, साधकानां आद्यगुरुश्च । तस्मादेव स नरोत्तमः । गुरुकरुणाहीनः न

कदापि अभिवर्धते । साधनापथि गुरोरनुग्रहः अतीवावश्यकः । हरिः क्रुद्धश्चेत् गुरुः रक्षेत् । गुरुरपि क्रुद्धः तदा न कोऽपि रक्षकः । अतः गुरुं विस्मृत्य न कोऽपि परिश्रमः न कापि सिद्धिरस्तीति सर्वाः श्रुतयः प्रतिपादयन्ति । तदर्थमेव मनुः आदौ भगवत्प्रार्थनायां 'तस्मिन्नपो मातरिश्वा दधाति' इति स्वकर्माणि भगवते अर्पयतः मुख्यप्राणं स्मृतवान् । भगवति साक्षात्कृते सति भगवतः मुख्यप्रतीके मुख्यप्राणे सन्निहितं भगवद्रूपं दृष्टवान् । भगवत्साक्षात्काराय अनुग्रहीतं तमेव प्राणतत्त्वं, तस्य गरिमाञ्च कार्तज्ञ्येन स्मृत्वा वक्ष्यमाणेन मन्त्रेण प्राणतत्त्वस्यापि प्राणशक्तिदातारं भगवन्महिमाम् अनुसन्धत्ते । **वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।**

भगवतः अस्तित्वं सर्वत्र विद्यमानमपि प्राणदेवे विशिष्टतया विद्यते । परमामृतस्वरूपस्य भगवतः विशेषसन्निधानादेव प्राणदेवोऽपि अमृतस्वरूपवान् । तस्य चेतनः सदा जागृतोऽस्ति । तस्य मृतिर्नास्ति । यदाकदापि, प्रलयकालेऽपि तस्य भगवद्विस्मरणं नास्ति । सः सदा भगवति वर्तते । भगवन्तं विना तस्य अन्याश्रयो नास्ति । सः भगवतः मुख्यप्रतीकः, भगवतः एकान्तभक्तश्च । परमात्मपवमानयोर्द्वयोरमृततत्त्वयोराश्रयात् अमृतपुत्राः वयमपि अमृतत्वं प्राप्येमहि । एतादृशः महामहिमो वायुदेवोऽपि भगवदनुग्रहेणैव अमृतत्वं प्राप्नोति । वायुः अनिलम् अमृतम् इत्यस्य वायुः अनिले; नाम परमात्मनि स्थित्वा अमृतस्वरूपवानित्यर्थः ।यतः अमृतस्वरूपो प्राणदेवोऽपि संसारकाले भौतिकशरीरवान् । मोक्षकाले प्राणस्य शरीरमपि भगवतः तेजोमूर्तौ तस्वा लयमेति किमन्येषाम् । अप्राकृतस्वरूपस्य भगवतः प्राप्तिः प्राकृतानेन शरीरेण न साध्यते । अद्य श्वः परश्वो वा एतच्छरीरं विनश्यत्येव । अमृतं जीवं नश्वरादस्मात् शरीरात् विमुच्य परमामृतस्य भगवतः समीपे प्रापणायैव अयमेतावान् परिश्रमः ।

मनुः स्वप्रार्थनां प्राणदेवद्वारेण भगवते निवेदयति । भगवान्मम प्रार्थनाम् अङ्गीकृत्य अनुग्रहाय भवतु इति तं मनुः पौनःपुन्येन प्रार्थयति । प्रार्थनायाः फलरूपेण मनोः भगवद्साक्षात्कारः जातः । पुरो तिष्ठतः भगवन्तं दृष्ट्वा तस्मिन् को वरः याचयेदिति मनुः अचिन्तयत् । भगवद्दर्शनसन्तुष्टः सः सर्वं विस्मृतवान् । यदि देवः प्रत्यक्षतः भवता को वर अपेक्षित इत्युच्यते चेत् तदास्माकं जिह्वा न व्यापारयति । यतः अस्माकं किमावश्यकम् किम् नेति अस्मादपि सुष्ठु भगवान् जानाति । तस्मात् मनुः भगवति भक्तिं प्रार्थयति । भगवतः पदतले शाश्वतमाश्रयं याचयति । यदीदं लभ्यते अवशिष्टाः सर्वाः क्षुद्रकामनाः स्वयमेव प्राप्यन्ते अथ वा द्रवन्ति ।अन्तरङ्गभक्तस्य मार्गोऽयम् । अस्मिन्नेव मार्गे प्रवृत्तो मनुः स्वसर्वं भगवते समर्पयति ।

**अग्ने नय सुपथा राये अस्मान्**
**विश्वानि देव वयुनानि विद्वान् ।**
**युयोध्यस्मज्जुहुराणमेनो**
**भूयिष्ठां ते नमउक्तिं विधेम ॥**

भगवान्अग्नौ स्थित्वा हवींषि स्वीकरोति । सः अग्निसूक्तप्रतिपाद्यश्च । चराचरप्रपञ्चेषु व्याप्य नियमनं कुर्वाणः अयं भगवान् अग्निमार्गेण भक्तान् मोक्षं प्रति नयति । तादृशः सः अस्माकं अङ्गेषु स्थित्वा तानि सूत्रेण नियम्या पाञ्चालिका इव अस्मान् पालयति । अतः अस्मान् मोक्षाय सुपथे नय । ज्ञानिनां मार्गं प्रदर्शय । मयि मत्सदृशेषु सर्वेषु भक्तेषु च भवतः करुणाप्रवाहः प्रवहताम् इति भगवन्तं प्रार्थयति मनुः । सृष्टिसंहारबन्धमोक्षादयः भवते लीलाय । अस्माकं ज्ञानस्य पारपरिमित्योः वेत्ता भवानेव । अस्माकं ज्ञानस्य यावती परिमितिर्वर्तते ताम् अस्मादपि अधिकं वेत्ति भवानेव । भवतः बृहद्रूपे वयं कणलवाः । अस्माभिः कृतपापकर्माणि पुनरस्मान् लघूकुर्वन्ति सन्ति । ज्ञानात् अज्ञानाद्वा कृतैः तादृशैः पापकर्मभिः अस्मान् विमोचय । इतः परमस्माभिः तानि यथा न भवेयुः तथा कुरु । एतादृशाय भवते अस्माभिः किं देयम्? किमपि दातुं न शक्यते । भवान् यथेच्छति तथा जीवामः । भवतः दर्शितकरुणस्य कृतानुग्रहस्य च वयं भक्त्या पौनःपुन्येन नम इति शब्दं वक्ष्यामः । भवतः स्त्रीरूपेण वाचितस्य उक्तिं पुनः भवते हि अर्पयामः ।

**उपसंहारः**

एवम् इयमुपनिषत् गात्रेण लघीयानपि अर्थेन गरीयान् । अत्र अष्टादश मन्त्राः विद्यन्ते । पुनःपुनः मथनेन अर्थगौरवं सिद्ध्यति । इदम् यशोदायै कृष्णेन दर्शितब्रह्माण्डवत् विस्मयं जनयति । शुक्लयजुर्वेदस्य काण्वसंहितायाम् विद्यमाना इयमुपनिषत् प्रतिदिनमनुसन्धानमर्हति ।

## Bibliography


- ईशावास्योपनिषद्भाष्यम् (पूर्णप्रज्ञसंशोधनमन्दिरतःप्रकाशितम्)
- भगवद्गीता (गीताप्रेस्गोरख्पुर्
- ಯಾಜ್ಞೀಯಮಂತ್ರೋಪನಿಷತ್ (ಕನ್ನಡಅನುವಾದ : ಬನ್ನಂಜೆಗೋವಿಂದಾಚಾರ್ಯ)
- महाभारततात्पर्यनिर्णयः
- ಮಹಾಭಾರತ (ಪ್ರಕಾಶನ :ತತ್ವಸಂಶೋಧನಸಂಸತ್, ಪಲಿಮಾರುಮಠ)
- आथर्वणोपणिषत्
- काठकोपणिषत्


https://doi.org/10.5281/zenodo.7248887

Paper 29

# माध्वग्रन्थविमर्शः

**N.Vittal Bhat**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id -– nvittalabhat@gmail.com

## सारः(ABSTRACT)

**श्रेयःप्राप्तिरेव समेषामाचार्याणामाशयः। श्रीमदानन्दतीर्थापरनामकमध्वाचार्यैः सप्तत्रिंशदधिकग्रन्था विरचिताः सज्जनसंविदे । तादृशग्रन्थान् अधिकृत्य, तत्रवर्णितविषयानप्यधिकृत्य अत्र लेखने चिन्त्यते । पौरुषेयापौरुषेय-ग्रन्थेषु किं प्रतिपाद्यते इत्यपि अत्र विवृयते। भक्तिस्वरूपं तस्य उपयोगश्चात्र निरूप्यते।**

## पूर्वपीठिका

सर्वोत्तमेन श्रीमन्नारायणेन ब्रह्मादीनाम् उपदिष्टं विष्णुसर्वोत्तमत्वविषयकः तत्वज्ञानं क्रमेण क्षीणं अभूत्। अष्टाविंशतितमे द्वापरे गौतमस्य ऋशेः शापात् तत्वज्ञानं पूर्णतया नष्टतां गतम्। क्रमेण तत्वज्ञानप्रचारकः कोपि नाभूत् । तदा सज्जनेषु कृपालवः ब्रह्मादयः देवाः अनन्तकल्याणगुणपरिपूर्णं सकलदोषरहितं सर्वोत्तमं नारायणं तत्वज्ञानस्य पुनरुत्थापनाय भक्तिपूर्वकं प्रार्थयामासुः। तदा शरणागत भक्तैः देवैः प्रार्थितः श्रीमन्नारायणः तत्वज्ञान प्रसारार्थं पराशरनामक ऋषिणा सत्यवत्यां श्री वेदव्यासाभिधया अवततार। ततः हयग्रीव रूपेण ब्रह्मादीनां उपदिष्टं अनन्तवेदं ऋग्यजु:सामाथर्वत्वेन चतुर्था व्यभजत्। एवं अनन्तशाखात्मकं चतुर्वेदानां तत्वज्ञान निर्णायकं वेदार्थ निबन्धनार्थकं "ब्रह्मसूत्रं" रचयामास। एतत्सूत्रणि उत्तरमीमांसासूत्रं इति ब्रह्ममीमांसासूत्रं इति परविद्या इति प्रसिद्धमभूत्। ततः मुमुक्षूणां सात्विकानां वेदोक्तज्ञानानधिकारिणां स्त्रीशूद्रब्रह्मबन्धूनां मोक्षार्थं अनुकंपेन वेदोक्तार्थगणितानां परोक्षार्थनिर्णायकं सर्वशास्त्रोत्तमं महाभारतं, मूलरामायणं, भागवतादि अष्टादश महापुराणानि च चकार। एवं सज्जनवृन्देषु महदुपकारं कृतवन्तः।

## विषयनिरूपणम्

अष्टादश पुराणेषु वेदेषु च "सर्वत्र भगवत् प्रमाणात् भगवद्वचनं प्रामाण्यं॥" (इति मूलश्रुति:) इति वेद एव घोषयति। वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते। ब्रह्मसूत्राणि वेदार्थनिर्णायक शास्त्रं भवति। "अथ परा यया तदक्षरं अधिगम्यते" इति अथर्वोपनिषदि ब्रह्मसूत्राणि "परविद्या" इति निरूपितम् । एतादृश ब्रह्मसूत्राणां एकविंशति भाष्यकाराः वेदव्याससम्मतं अर्थं त्यक्त्वा तद्विरुद्धं स्वबुद्धिसम्मतं भाष्यार्थं व्यवृण्वत। पुराणानि सात्विक राजस तामसेति विभागेन विभक्तानि। शैवपुराणे शिव एव सर्वोत्तमः इत्यादि प्रतिपादकवाक्यानि सन्ति। अथर्व उपनिषदि अन्यदेवतानां सर्वोत्तमत्वं प्रतिपादितमस्ति। वेदेषु 'अहं ब्रह्मास्मि', 'तत्वमसि', 'नेहनानास्ति किञ्चनं' इत्यादि वाक्यैः मायावदिभिः ब्रह्मसत्यत्वं जगन्मिथ्यात्वं जीवब्रह्मणोः ऐक्यं च प्रतिपादितम् । एवं अनुभवविरुद्धं शास्त्रासम्मतं दुरभिप्रायं प्रतिपादयाञ्चक्रुः । एवं सति सज्जन वृन्दानाम् उद्धारार्थं देवाः जगद्रक्षकं विष्णुं पुनः शरणं जग्मुः। तदा हरिः
आत्मनः त्रियुगहूतित्वात् कलियुगे अवताराभावात् तत्वज्ञानप्रसारार्थं सर्वसामर्थ्योपेतं सर्वज्ञं मुख्यवायुं आज्ञापयामास। मुख्यप्राणः त्रेतायुगे हनुमदवतारे श्रीरामं, द्वापरयुगे भीमावतारे श्रीकृष्णं संसेव्य भगवतः सर्वोत्तमत्वं प्रतिपादितवान्। इदानीं हरेः सर्वोत्तमत्वं जगत्सत्यत्वं जीवब्रह्मणोः भेदं च द्वैतमतं प्रतिपादयितुं भगवदाज्ञां शिरसा धृत्वा रौप्यपीठे पाजकक्षेत्रे मध्यगेहभट्टवेदवतीदम्पत्योः अवततार। क्रमेण तुरीयाश्रमं स्वीकृत्य मध्वाभिधानेन "गीताभष्यं चकारासौ प्रथमं तुष्टिदं हरेः"। गीताभाष्यं कृत्वा बदरिकाश्रमे भगद्वेदव्यासाय समर्पयामास । तेन तुष्टः व्यासः 'कुरुभाश्यं अविलम्बितं व्रजेः' । सुमतेन

योजय कवे श्रुतिस्मृतीः इति ब्रह्मसूत्रभाष्यं कर्तं आज्ञापयामास । तेन तुष्टः वेदानां वेदार्थबृंहितानां ब्रह्मसूत्राणां स्मृतिसत्सिद्धान्तानां तात्पर्यस्य 'भाष्यं' अचार्य मध्वः चकार । वेदप्रामाणैः, अनुमानेन, प्रत्यक्षेण, साक्षिणा विशेषेणच सत्सिद्धान्तं प्रतिपादितवान्। त्रिविधपुराणानि भाषात्रयोपेतानि। समाधिभाषा, दर्शनभाषा, गुह्यभाषा इति समाधिभाषया विष्णोः सर्वोत्तमत्वमेव उक्तम् । तद्विरुद्धं दर्शनभाषा । तामसपुराणानि व्यासः तामसजनमोहनार्थं कृतवान् । "यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम्"– इत्यनेन प्रमाणेन समाधिभाषया उक्तं विष्णोः

सर्वोत्तमत्वशास्त्रं ग्राह्यम्। तद्विरुद्धं त्याज्यम्। अप्रामाण्यात्॥

श्रीमदानन्दतीर्थमुनिना गीताप्रस्थानं, सूत्रप्रस्थानं, श्रुतिप्रस्थानं, उपनिशत् प्रस्थानं, इतिहासप्रस्थानं, पुराणप्रस्थानं, प्रकरणग्रन्थाः, आचारग्रन्थाः, स्तोत्राणि एवंप्रकारेण सप्तत्रिंशत् ग्रन्थाः रचिताः। एतादृशद्वैत-सिद्धान्तग्रन्थेषु विष्णोः सर्वोत्तमत्वं, अनन्तकल्याणगुणत्वं, दोषवर्जितत्वं, प्रतिपादितम्। मायावदिमतरीत्या सगुणब्रह्मोपासनया निर्गुणब्रह्मज्ञानेन ब्रह्मैक्यरूप मोक्षो प्राप्यते। अन्यत् सर्वं मिथ्या इत्युच्यते ।

उत्पत्तिस्थितिसंहार नियातिज्ञानमावृतिः।
बन्धमोक्षौ च पुरुषात् यस्मात् स हरिरेकराट् ॥

इत्यादिस्कान्दवचनात् हरेः एव जगत्सृष्ट्यादि अष्टकर्तृत्वम्। एतदेव ब्रह्मणः लक्षणं इति प्रतिपादितम्।

"य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वो" .....

इत्यादि श्रुत्या सर्वलोक धारकत्वं सर्वपदार्थनियामकत्वं सूचितं।

"चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत्।"

इत्यनेन नारायणः अनिरुद्ध प्रद्युम्न संकर्षण वासुदेवाख्य चुतुर्रूपेण देवान् जगच्च चक्रवत् भ्रामयति इति सर्वश्रेष्टत्वं निरूपितम्।

"परो मात्रया तन्वो वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्मा रजसी पृथिव्या विष्णो देव त्वंपरमस्य वित्से ॥
न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप ।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ॥"

इत्यनेन भगवतः नारायणस्य निरवधिकमहिमा, भूतवर्तमानभविष्यादि कोऽपि जीवः तत्समः नास्ति। इत्येवं रीत्या बहुश्रुतिभिः विष्णोः सर्वोत्तमत्वं प्रतिपादितम्।

विष्णुं सर्वगुणैःपूर्णं ज्ञात्वासंसारवर्जितः ।
निर्दुःखानन्दभुक् नित्यं तत्समीपे सहमोदते ॥
मुक्तानांचाश्रयो विष्णुः अधिकोऽधिपतिस्तथा ।
तद्वशा एव ते सर्वे सर्वदैव स ईश्वरः ॥ (इति परमश्रुतिः)

हरेः सर्वगुणपरिपूर्णत्वज्ञानात् सर्वेषां संसारबन्धात् मोक्षः । मोक्षं प्रति सकलभूतानामाश्रयः सर्वनियामकः स एव। चराचरप्रपञ्चः तदधीनः । एतादृशः श्रीहरिः सर्वदोषविवर्जितः अनन्तकल्याण-गुणपरिपूर्णः सर्वतन्त्रस्वतन्त्रः सर्वनियामकः सच्चिदानन्दस्वरूपः इति प्रतिपादयति। "वेदैश्च सर्वैरहमेव वेद्यः" इति भगवद्गीतायां, पद्मादि पुराणेषु, श्रुतिषु, उपनिषत्सु, स्मृतिषु विष्णोः सकलगुणपूर्णत्वदर्शनात् निर्गुण ब्रह्म एव नास्ति । सगुण ब्रह्मोपासनेन सगुणब्रह्मप्राप्तिः । कदापि सगुणज्ञानं न निवर्तते । कदापि निर्गुणज्ञानं न भवति । जगन्मिथ्यात्वं जीवस्य ब्रह्मैक्यं च दूरतो एव।

"श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्वतो
भिन्ना जीवगणाः हरेरनुचराः नीचोच्चभावंगताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥"

"हरिः परतरः सत्यं जगत्तत्वतो" -
मायावदिभिः 'एकमेवाद्वितीयं ब्रह्म', 'नेहनानास्ति किञ्चन' इत्यादि श्रुतिप्रमाणवाक्यैः एषः प्रपञ्चः मिथ्या एव । निराकारः एकः आत्मा एव सत्यं । एतदृश ब्रह्मणि प्रपञ्चः कल्पितः । रज्जु दृष्ट्वा सर्पज्ञानेन भयं भवति । समीपदर्शनेन तत् निवार्यते। अतः अविद्यया कल्पितप्रपञ्चः कथं दृश्यते? विश्वं मिथ्या दृश्यत्वात् । शुक्तिरजतवत् इति मायावादिनां वादः सिद्धान्तश्च । अचार्य मध्वैः तैरेव वाकयैः तन्मतं निरस्तम् । 'विश्वं सत्यं दृश्यत्वात्' । साक्षिगोचरत्वात् । रज्जौ अज्ञानकल्पितः सर्पः। सर्पभ्रान्तिः भयस्य कारणं न तु सर्पः । सज्ञाने भ्रान्तेः निवृत्तिः । तत्र सर्प एव नास्ति । भयस्य कारणं सर्पो न भ्रान्तिज्ञानमेव । एवं कल्पित प्रपञ्चस्य मिथ्यात्वं वेदवाक्यैः कथं प्रतिपाद्यतेः? वेदवाक्यानां प्रपञ्चे अन्तर्भूतत्वात् अप्रमाण्यं भवति । वेदवाक्यानां भवद्भिः प्रामाण्यं स्वीकृतं। तादृश वेदे जगत्सत्यत्वं प्रतिपादितं ।

"विश्वं सत्यं मघवान युवोरिदापश्चन प्रमिनन्ति व्रतं वोम् ।" (ऋ २-२४-१२)

"य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वो"(ऋ १-१५४-४)

इत्यादि श्रुतिवाक्यानि विष्णोरेव जगत्स्रष्टृत्वं, सत्यत्वं प्रतिपादयन्ति । अतः तत्वतः जगत् सत्यमेव । एवं रीत्य प्रत्यक्षागमअनुमानादिना प्रतिपादितम् ॥

"भिन्नाः जीवगणाः"– मायावादिभिः 'अहं भ्रह्मास्मि', 'तत्वमसि' इत्यादि श्रुतिवाकैः जीवब्रह्मैक्यं प्रतिपाद्यते। तादृशजीवैक्यं निराकृत्य पञ्चभेदः निरूप्यते ।

जीवेश्वरयोः भिधा चैव जीवभेदः परस्परम् ।
जडेशयोर्जडानां च जडजीवभिधा तथा ॥
पञ्चभेदा इमे नित्याः सर्वावस्थासु नित्यशः ।
मुक्तानां च न हीयन्ते तारतम्यं च सर्वदा ॥ - इत्यादि पुराणवाक्येन

जीव-परमात्मभेदः, जीव-जीवभेदः, जीव-जडभेदः, जड-परमात्मभेदः, जड-जडभेदः इति पञ्चभेदः प्रसिद्धः। सर्वज्ञसर्वशक्तसर्वगुणपरिपूर्णपरमात्मना साकं दुःखाज्ञानास्वतन्त्र्ययुक्तस्य जीवस्य अभेदः कथं भवति । भिन्नाः जीवाः परो भिन्नः तथापि ज्ञानरूपतः ।
प्रोच्यन्ते ज्ञानरूपेण वेदवादेषु सर्वशः ॥ (भविष्यत् पर्वणि ।) जीवाः भिन्नाः । जीवः परमात्मतः भिन्नः एव ।

"द्वासुपर्णा सयुजा सखाय समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति॥"

इत्यादिना श्रुत्या एकस्मिन् शरीरे जीवः
पारमात्मा च वसतः । परन्तु सुखदुःखरूपं कर्मफलं जीवः भुंक्ते अन्यः अनश्नन् प्रकाशते । इत्यत्र जीवपरमात्म भेदः प्रसिद्धः ।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वानि भूतानि कूटस्थोक्षर उच्यते _____॥"इत्यादि गीता वाक्येन क्षाराक्षर पुरुषाणां भेदः
उक्तः । अतः विश्वं सत्यं दृश्यत्वात् इत्यनुमानेन च भेदः प्रतिपाद्यते । परमात्मनि अनन्तगुणाः सन्ति। तादृशगुणैः परमात्मनः अनन्ताभेदः एव । परन्तु परमात्मनि अनन्तगुणाः सन्ति इति भिन्नत्वेन व्यवहारः दृश्यते । अतः द्वैतमते गुणपरमात्मनोः अत्यन्ताभेदः कथम् सिद्ध्यते? इति चेत् ।

गुण क्रियादयो विष्णोः स्वरूपं नान्यदिश्यते ।
अतो मितोऽपि भेदो न तेषां क्वचित् कदाचन ॥
स्वरूपेऽपि विशेषोऽस्ति स्वरूपत्वभेदेन तु ।
भेदाभावेपि तेनैव व्यवहारश्च सर्वशः ॥ (इति परमोपनिषदि)

'स्वरूपे स्वरूपत्वं' इति व्यवहारः वर्तते । त्व प्रत्यये विशेषनिमित्तत्वात् अभेदोऽपि भेदः युक्तः ।

विशेषो नाम काचन वस्तुनः शक्तिः । स विशेषः अभेदसत्वेऽपि 'भेदकार्यकारि' इति निर्णीतः ।
'अभिन्नत्वम् अभेदश्च यथा भेदविवर्जितम् ।
व्यवहारार्थं पृथक् च स्यात् एवं सर्वगुणा हरेः ।' .....
'व्यावहार्यं विशेषेण दुस्तर्कबलतो हरेः ।' .....
इति ब्रह्मतर्केऽपि अभेदेऽपि गुणेषु: भेदव्यवहारः विशेषेण निरूपितः। जीवेशौ भिन्नौ विरुद्धत्वात्। जलानलवत्। - इत्यनुमानादिना भेदः प्रतिपादितः । अल्पज्ञत्व- सर्वज्ञत्व, अल्पशक्तित्व-सर्वशक्तित्व, पारतन्त्र्य-स्वातन्त्र्य, इत्यादि परस्पर विरुद्धगुणायोः जीवपरमात्मनोः जलानलवत् भिन्नौ एव इति ।
"हरेरनुचराः"– परमात्मा स्वामी, जीवः दासः । य एतत् परतन्त्रन्तु सर्वमेव हरेः सदा वशमित्येव जानाति संसारात्मुच्यते हि सः । (इति तत्व विवेके) परतन्त्राः जीवाः हरेरनुचराः एव ।
"श्रुतिस्मृति हरेराज्ञा" इत्युक्तत्वात् श्रुत्युक्तस्मृत्युक्त सदाचारानुष्टानं जीवः कृत्वा, परमात्मनः अष्टकर्तृत्वं ज्ञानं मोक्षसाधनमिति श्रुतिः विशदयति। सर्वं तदधीनमिति यः जानाति सः संसारात् मुच्यते ।
"नीचोच्चभावाः"– ब्रह्माद्याः मनुष्यपर्यन्ताः सर्वे जीवगणाः नीचोच्चभावंगताः नृपाद्याः शतधृत्यन्ताः मुक्तिगाः उत्तरोत्तरम् । गुणैः सर्वैः शतगुणैः मोदन्ते इति हि श्रुतिः । (इति पाद्मे) देवर्षिपितृपनराः ब्रह्मान्ताः उत्तरोत्तरं तारतम्यक्रमेण श्रेष्ठाः । ते सर्वे मुक्तौ शतोत्तरगुणैः शतानन्दं अनुभवन्ति ।

रुद्रं समाश्रिताः देवाः रुद्रो ब्रह्माणमाश्रितः ।
ब्रह्मा मामाश्रितो नित्यं नाहं कञ्चिदुपाश्रितः ॥
बलमिन्द्रस्य गिरीशश्च गिरीशस्य बलं मरुत् ।
बलं तस्य हरिः साक्षात् न हरेर्बलमन्यतः ॥ (भारते)

इत्यादिवचनात् नीचोच्चभावज्ञानेन भगवतः सर्वोत्तमत्वं ज्ञात्वा देवाराधनं कर्तव्यम् ।
ब्रह्मान्ताः गुरवश्चैव संप्रदाय प्रवर्तकाः ।

तत्तद्गुणानुसारेण पूज्या ध्येयाश्च कृत्स्नशः ॥
सर्वेभ्योप्यधिको भक्तिः विष्णोः स्यादिति निश्चला ।

इत्यादि तन्त्रसारोक्तसारेण तारतम्यज्ञानेन ब्रह्माद्यासु देवतासु पूजाध्यानाधिकं कृत्वा तदधिकतया विष्णोः भक्तिः कार्या । एतादृशः भक्तिः मुक्तेः कारणं भवति ।
"मुक्तिर्नैजसुखानुभूतिः"–
सर्वेजीवाः सुखमेवस्यात् दुःखं मनागापि मा भूत् इति अपेक्षन्ते । किन्तु धर्मार्थकामाः पुरुषार्थाः न नित्याः । मोक्ष एव नित्यपुरुषार्थः । एतादृश नैज सुखानुभूतिरूप मुक्तिः भगवत्प्रसादतः लभ्यः।
अतः मोक्षो नाम न ब्रह्मैक्यम् । ब्रह्मणा साकं नैजसुखानुभूतिः ।
"नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन ।
यमैवेष वृणुते तेन लभ्यः तस्यैष आत्मा तनूं स्वाम् ॥"
"अनित्यत्वात् सुखदुःखत्वान्न धर्माद्या परं सुखम् ।
मोक्ष एव परमानन्दः संसारे परिवर्तनम् ॥" (इति भारते)
उत्पत्तिस्थिति संहाराः नियतिर्ज्ञानमावृत्तिः
बन्धमोक्षौ च पुरुषात् यस्मात्स हरिरेकराट् । (इति स्कान्दे)
यस्य प्रसादात् परमार्तिरूपादस्मात् संसारात् मुच्यते नापरेण । (नारायण श्रुतिः)
सर्वोत्तमः श्रीहरिः यं तु मोक्षार्थं इच्छति तेन भक्तेन भगवत्प्रसादतः मोक्षः लभ्यते । तादृश भक्तस्य अनाद्यज्ञानं नाशयित्वा संसारबन्धनात् मोचयति । एतादृशः मुक्तिः अमलया भक्त्या सिद्ध्यति।
"अमलाभक्तिः"–

श्रवणं मननं विष्णोः कीर्तनं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यं आत्मनिवेदनम् ॥ (भागवते)
एतादृश नवविध भक्त्या भगवान् प्रसीदति ।

"माहात्म्य ज्ञान पूर्वस्तु सुदृढो सर्वतोधिकः ।
स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्नचान्यथा ।"

निरवधिकानन्तानवद्यकल्याणगुणत्वज्ञानपूर्वकस्वात्मात्मीयसमस्तवस्तुभ्योऽनेकगुणोऽन्तराय-सहस्रेणापि अप्रतिबद्धः निरन्तरप्रेमप्रवाहः "भक्तिः" इत्युच्यते ।

भक्त्या प्रसन्नः परमो दद्यात् ज्ञानमनाकुलम् ।
भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं व्रजेत् ॥
ततोऽपि भूयसीं भक्तिं दद्यात् ताभ्यां विमोचनम् ।
साध्यानन्दस्वरूपैव भक्तिर्नैवात्र साधनम् ॥

ज्ञानवैराग्ययुक्तभक्त्या तुष्टो भगवान् तत्वज्ञानं ददाति । तेन ध्यानं । ध्यानेन परिपक्वता । तेन भक्तियोगो जायते । तेन अपरोक्ष ज्ञानं । तेन भगवद्दर्शनम् । तेन स्वात्मस्वरूपोऽनन्दं मोक्षं दत्वा तमुद्धरति । अतः भगवति स्नेहप्रवाहः अमला भक्तिरुच्यते ।

मनुष्यजन्मसाफल्यं केवलं धर्म साधनात् । (गारुडे)

ब्राह्मणस्य च देहोऽयं क्षुद्रकामाय नेश्यते ।
कृच्छ्राय तपसे चैव प्रेत्यानन्त सुखाय च ॥

कृच्छ्राय तपसा ज्ञानभक्तिवैराग्येण भगवदाराधनमेव परमोधर्मः ।

**उपसंहारः**

इत्येवं पूर्वोक्तरीत्या हरिः आम्नायैक वेद्यः । भगवतः सर्वोत्तमत्व प्रतिपादकानि शास्त्राणि स्मृति पुराणादयः प्रमाणग्रन्थाः एतैः प्रत्यक्षानुमानाभ्यां च प्रपञ्चसत्यत्वं भगवतः सर्वोत्तमत्वं प्रतिपादयितुं शक्यते । एतदेव सकल शास्त्रार्थसारः इति भगवदनुज्ञातमुख्यप्राणः मध्वाभिधया अवतीर्य द्वैतसिद्धान्तं व्याससम्मतं तत्वार्थं विषदयित्वा प्रतिष्टापितवान् । एवं अचार्यमध्वः द्वैतसिद्धान्तं स्थापयित्वा महदुपकारं सज्जनवृन्दानां चकार॥

**Bibliography**

1. श्रीमदानन्दतीर्थविरचिताः सर्वमूलग्रन्थाः
2. महाभारतम्
3. शीमद्भागवतम्
4. सर्वदर्शनसङ्ग्रहः
5. भारतीयदर्शनम्

https://doi.org/10.5281/zenodo.7253617

Paper 30

# महाभारतस्य एककर्तृकत्वम्

**Krishnaraja Bhat**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - parovareeya@gmail.com

## सारः(ABSTRACT)

**भारतीयसंस्कृतेः यदि कश्चित् प्रवक्ता भवितुमिच्छति तर्ह्यवश्यं भारतरामायणयोः सम्यगध्येता भवेत्। तादृशस्य महाभारतस्य जयाभिधानस्य प्रामाण्यमङ्गीकरणमवश्यं कर्तव्यं भवति । व्यासः कः? स एवास्य कृतेः रचयिता पात्रधारी च। तेनोक्तं परमं प्रमाणं भवति। स एक एव रचयिता । युगान्तरे व्यासा आगताः स्युः । परन्तु अष्टाविंशतितमे द्वापरे एक एव व्यासः एतादृशान् ग्रंथान् व्यरचयदिति ग्रंथावलोकनेन ज्ञायते। तदस्मिन् लेखने प्रस्तुततां भजते।**

## पूर्वपीठिका

अष्टादशपर्वात्मकस्य महाभारतस्य रचयिता नारायणावतारभूत: श्री वेदव्यास: । पञ्चमवेद:, इतिहास:, शतसाहस्रिका सम्हिता, सर्वशास्त्रार्थ सार:, जय:, भारतम् , महाभारतम् , अक्षयद्रुम: इति साकूतम् नामान्तराणि शास्त्रेषु व्यवह्रियन्ते । सर्वाण्यप्येतानि ग्रन्थस्यैकस्यैव नामानि नैतानि ग्रन्थवैविध्यम् कर्तृवैविध्यं वा सूचयन्ति । तावद् आकरण क्रियोपयोगि कुत एतानि नामान्तराणि ? न ,न भो: ! संस्कृते पर्यायपदान्यपि भिन्नभिन्न धर्मबोधकानि भवन्ति । किं वक्तव्यम् पुन: , इतिहासभूतस्य रतस्य नामान्तर वैशिष्ट्यम्

## विषयनिरूपणम्

महाभारतस्य ऐतिहासिकत्वम्– भो: ! नैष इतिहास:, कल्पनाविलास: निरूप्यताम्तावत्स्वविषयकं प्रामाण्यम् । भो: पाश्च्यात्यचिन्तनग्रस्ततेज: आसहस्रेभ्य: वर्षेभ्य: आभारतम् आदर्शनम्सन्जना: भारतमिति इतिहासमिति अभिप्रायन्तनमेऽस्ति सिद्धविषयस्य साधानकार्पण्यम् । भवत: एव अनैतिहासिकत्वस्य प्रतिपादनमापतितम् कथाविसन्गति: ,असमानता, जातिवैषम्यम्, बन्धुकलह:, अराजकता, कापट्यम् इत्यादीनि अनेकानि कारणानि भारतस्यानैतिहासिकत्वम् प्रतिपादत्येव । तवाहो बुद्धिचातुर्यम्प्रश स्तियोग्यम् अद्यतनदिनेष्वपि भवदुक्ता: दोषा: वर्तन्तएव । नाद्यतनीया वार्ताश्वस्तन इतिहासोभवितुमर्हति । शिवाजि, गान्धी, ठागूर्, भोस्, तिलक्, भगत्सिम्ह, विवेकानन्दादय: अनैतिहासिका: पुरुषा: इतिमन्यसेवा ?

समानयोगक्षेमबलेन रामकृष्णादयोपि ऐतिहासिकपुरुषा: इतिसिद्धम् । पाश्चात्यजालोपजीवन: आधुनिकविमर्शा: एनां भारतकथाम् an Indian mythical story इति कथयन्ति । आख्यानोपख्यानसम्बन्धं भारतम् इदम्जानपादिकं काल्पनिककाव्यमिति तेषां मतम् ।

पाश्चात्यजालोपजीवन: आधुनिकविमर्शा: एनां भारतकथाम् **an Indian mythical story** इतिकथयन्ति। आख्यानोपख्यानसम्बन्धं भारतम् इदम्जानपादिकं काल्पनिककाव्यमिति तेषां मतम् । परन्तु , उत्खननतज्ञा: ,

पुरातत्वविद: एष भारतकथा जघटे इति साधारम्न्यरूपन्। एस.आर्. राव्महोदयस्य द्वारकासबन्धिन्य: सम्शोधनकृतय: अपि च अपरा: अर्वाचीनविज्ञानिनो विषयमिमं प्राकाशयन्ति। संस्कृतिः, जीवनशैली, भाषासम्प्रदाय: भारतेन प्रभाविता: इति मध्याह्नसूर्य: इव प्रत्यक्षभाति। अद्यतनीयस्थ्ल, देश, नदीनामानि तेषमितिहास: खगमृगक्रिमिकीटादिजीवसन्कुलस्य मृदादीनाम्च स्वभाव: अद्यापि भारतवर्णनम्लगति। भारतस्य नैककर्तृत्वम्नानाकालावच्छेदेन रचितत्वम्मन्वाना: विद्यन्ते। पाश्चात्या: तदनुसारिण: देशीयप्रबन्धारश्च एवम्भारतीयैतिहासिकत्वम्सप्रमाणम्ज्ञातुम्महाख्यानम्सम्बन्धैव उपाख्यानानि वर्तन्ते। पञ्चतन्त्रहितोपदेशादिग्रन्थप्रेरका: कथा: अपि विद्यन्ते।

- वैदेशिकचिन्तका: कवय: नाटककारवानकेऽपि व्यासवत्पंचलक्ष्यपरिमितम्ग्रन्थपूगम्जग्रन्थु: समग्रमायुष्यम्न्कोऽपि लिचति लिखत्यपितावन्लिखितुम्शक्नोति
- एकैवकथाभिन्नतया विरुद्धतया च एकस्मिन्नेव ग्रन्थे निरूप्यते
- कालभेदसूचिकाकथनशैलीभाषा च पुराणेषु बहुत्र दृश्यते
- ग्रन्थवैविद्यपरिचायिकानि नामानि लभ्यन्ते
- बह्मकर्तृकत्वम्पुराणेषु विद्यमानै: लोकैर्वा साध्यते
- ब्रह्मवाय्वग्निस्कन्दशक्तिशिवविष्णुवाद्यादिदेवतानाम्सर्वेषां सर्वोत्तमत्त्वम्पुराणेषु प्रतिपाद्यते
- एककर्तृके कथमुपासनवैविद्यम्दृश्यते ?
- अनन्वर्चन:, अपशब्दयुक्ता: धर्मविरुद्धा:, अर्वाचीनघटनायुक्ता: असम्भवा: श्लोका अपि दृश्यते

इत्येतै: कारणै: न वयम्पन्चलक्षापरिमितानाम्ग्रन्थानाम्कर्ता एक एव इति निर्धारितुम्शक्नुम: पुराणभारतयो: आरचनमन्यान्येषु कालेषु विभिन्नकर्तृभि: अभवदित्येव सुवचम्

समग्रम्व्याससाहित्यं य: पश्यति सूक्ष्मेक्षितयाय: पिपासु: काश्चित्पुराणाध्ययनस्य पूर्वसिद्धान्ताम्प्राप्यनाध्येति। यो निर्मल: ज्ञानेच्छया शरणागतिभावनया न कदापि पुरत: , तिष्ठति तस्य पुरत: भारतनलिनीपत्युर्जायेवकथा अपावृता भवति। ज्ञानलवदुर्विदग्धस्य पण्डितमन्यमानस्य पुरत: व्याससाहित्यम्स्वम्न दर्शयतीति तु सत्यम्वच: । वैदेशिकसम्शोधनपद्धतिरेव गरीयसी सुसमीचीनेति ये भ्रमन्ति, ते न पथाये अधीयन्ते, तेषाम्पदक्रम: श्रम एव हि केवलम्। न तैः सत्यमाविष्क्रियते।

उपक्रमोपसंहारादि उपप्पत्तिबलेन तात्पर्यग्रहणशक्ति:, समग्रशास्त्रदर्शनं पाणिन्यतिरिक्तसम्स्कृतपरिचय:, प्राचीनसम्स्कृते: अवगम:, भाषापरिणतिश्च ,यत्र चानहन्कारता- तत्र शास्त्ररहस्यमपावृणुते।

**समस्या- समाधानम्**

- एकस्य जीवितावधौ पन्चलक्षपरिमितिस्य ग्रन्थस्य रचनम् अश्क्यम्। प्रथमम्व्यासस्य दैवत्वं विहाय उच्यते। व्यास: रचयिता इति यत्रोच्यते तत्रैवभारते तहयोऽपि निगद्यते "व्यास: षट्शतवर्षीय:

धृतराष्ट्रमजीजनत्" व्यासस्यषटशतवर्षाणियावत्धृतराष्ट्रस्य जननावसरे अतीतानि इति ज्ञायते। विपुलकालावकाशस्तु विद्यत एव। भीष्मद्रोणकृपविराटद्रुपदादय सप्ताष्टानिशतानि वर्षाणि जिजीवु: । तावन्ति वर्षाणि य: कोऽपिजीवति वेतिप्रश्न: उत्पत्यते। जीवति अद्यापि। Living with Himaa।ayan Masters अपि च Autobiography of Yogi इत्यादिनि पुस्तकानि गुप्तचराणां हिमगिरिवासिनां गुप्तचराणां साधकानां दीर्घजीवनवधिं कथयन्ति। एवम्व्यासस्य केवलम् ऋषित्वेन चिन्त्यते चेदपिग्रन्थरचनं ज्ञायते। अपि च ज्ञातव्यमस्ति व्यासः भारतपुराणानि समपादयत्। तत्र तत्र जनपदे , नगरे , यज्ञक्षेत्रेषु राजस्थानेषु दुष्टान्श्रुतान्विषयान्समगृह्णात्। व्यत्यासादीन्सप्तभेदान्वेदार्थं तथा वदेत्।

- ❖ एकैवकथापर्वद्वयेषु भिन्नतयानिरूप्यते। एकेनैव कर्तृणा कथं विरुद्धाः कथाः विरच्यते इति अन्य आक्षेपः। सत्यं, क्वचित्तथादृश्यते। कथनशैली त्रिधा भिद्यते। एकैव कथा भिन्नानां जनानां दृष्टिभिः अनेकधा भिद्यते। दृष्टं सर्वदातथ्यं न स्यात्। क्वचित् अन्यथा कथ्यते। विरुद्धमिवभाति। पदसमन्वयेन , अवशिष्टकथायोजनेन च विरोधः परिहियते।
- ❖ भाषास्वरूपमपि वैविध्यं भजते। अनेके रचयितारः विद्यन्ते इति अनुमीयते। अत्र एवमस्ति समाधानम्। पुराणाध्ययनार्थं पूर्वसिद्धता अपेक्षिता।

'भाषात्रयं न जानन्ति रीतीनां शतमेव च।
पुराणार्थं वदन्यातिनरकं नात्र संशयः'।।
भाषासु त्रिविधास्तत्र मयैव सम्प्रदर्शिताः।

एवं भाषा , शैली अनेकधा भिद्यते। दर्शनभाषा , समाधिभाषा, गुह्यभाषाणां त्रयाणां च योजनया पुनस्तेषां आवापोद्वापकरणेन एकाशीतिधा विभिद्यते। यथादृष्टस्य कथनं दर्शनम्। यथावस्तुकथनम्समाधिः। निगूढ्तया कथनं गुह्यम्। चलच्चित्रक्षेत्रे यथाद्य कथासङ्कलनं पश्यामः तादृशं कथायोजनं भारते च दृश्यते।

४. नामानि बहूनि श्रूयन्त इति। इति एकस्यैव ग्रन्थस्य कालक्रमेण अनुभूयते। उपकथाः ,उपदेशाकालान्तरे भारतोक्तश्लोकैरेव ज्ञायते।

'अष्टौश्लोकसहस्राणि अष्टौश्लोकशतानि च।
अहंवेद्मि शुकोवेत्ति सञ्जयो वेत्ति वा न वा'(आदि.१.११७)
'इदं श्लोकसहस्रन्तु श्लोकानां पुण्यकर्मणाम्।
उपाख्यानैः सहज्ञेयं श्राव्यं भारतमुत्तमम् '
चतुर्विंशतिसाहस्रीं चक्रे भारतसम्हिताम्।
उपाख्यानैर्विना तावत्भारतं प्रोच्यते बुधः।।

जयः भारतं महाभारतमिति कथायाः उद्गमने तिस्रः श्रेणयः वर्तन्त इति विवदन्ते। तन्न साधु।

तच्छ्लोककूट्मद्यापि ग्रथितं सुदृढं मुने।
भेत्तुं न शक्यतेऽर्थस्य गूढत्वात्प्रश्रितस्य च।।

इति कूटश्लोकानां सङ्ख्याविवृता । नाष्टौ श्लोकसहस्राणि भारतस्य मूलग्रन्थः। चतुर्विंशतिसाहस्रं पाण्डवचरित्र कथनम्। तदेवोक्तं किल, सोपाख्यानं सोपदेशं भारताख्यानमेव समग्रं भवति। पुराणेषु नानाविधोपासकानां राद्धन्तस्यानुवाद: । अत: ब्रह्मरुद्रस्कन्दादीनां पारम्यं दृश्यते,न तत्कर्त्रभिमतम्। भारते तादृशी संकीर्णता न

दृश्यते। तत्रनारायणपारम्यं जोपुष्यते व्यासेन। एकदेववादमेव व्यासोपि मन्यते। सर्वनामसमन्वयमपि सूत्रैरेव प्रतिपादितम्। सर्वान्तर्यामित्वेन सर्वदेवतासु सर्वभूतेषु एको गूढः देवः उपास्यते।

- ❖ अनन्वयिनः , अपशब्दयुताः ,धर्मविरुद्धाः , अर्वाचीनघटनायुक्ताः असम्बद्धाः श्लोकाः कथं कर्तुः विश्वासं जनयति ? अद्य उपलभ्यमानं ग्रन्थनिचयं सर्वात्मना प्रमाणमिति न मन्तव्यम्।

क्वचित्ग्रन्थान्प्रक्षिपन्ति क्वचिदन्तरितानपि।
कुर्युः क्वचिच्च व्यत्यासं प्रमादात्क्वचिदन्यथा ' ।।
अनुत्सन्ना अपिग्रन्था व्याकुला इति सर्वशः।
उत्सन्नाः प्रायशः सर्वे कोट्यंशोऽपि न वर्तते।। ( म.भा.ता.नि२.३)

एवं व्याससाहित्यं श्रेष्ठमिति न चक्षुषी निमील्य अङ्गीकरणीयम्। परं चर्चा , वादः , निकषणं , तत्वबोधायावश्यं भाव्यम्। नतत्र दुराग्रहः प्रवेष्टव्यः। ' पुराणमित्येवनसाधुसर्वम्।नचापिकाव्यंनवमित्यवद्यं '। इति काळिदासवचनं सर्वदेशग्राहि, सर्वजनग्राहि च।

भारतस्य ऐतिहासिकत्वम् उपनिषत्स्वपि श्रूयते। इतिहासपुराणः पञ्चमो वेदानां वेदं , पित्र्यं , शशिं , दैवं , निधिम् ' ( छा.७.१.२ )

सर्वेषु वेदेषु तथेतिहासे इति पैङ्गिश्रुतिवचनम्तत्वदीपाचार्यः त्रिविक्रमपण्डिताचार्यः स्वकीयेग्रन्थे उद्धधार। इतिहासपुराणेषु केषाञ्चनमन्त्राणां यथावदनुवादः दृश्यते। उपनिषदां वाक्यानि क्वचित्पदव्यत्यासेन भारतेपठ्यते। भारतेस्वेतिहासबोधनपरः श्लोकाः वर्तन्ते।

तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम्।
इतिहासमिदंचक्रे पुण्यं सत्यवतीसुतः।। आदि. १.३८

**शास्त्रेषु भारतं सारः**

नवनीतं यथा दध्नः द्विपदां ब्राह्मणो यथा।
आरण्यकं च वेदेभ्यो ओषधीभ्योऽमृतं यथा।।
ह्रदानाम् उदधिः श्रेष्ठः गौर्वरिष्ठा चतुष्पदात्।
यथैतानीतिहासानां तथा भारतमुच्यते।।

यद्वाक्यं चिन्तनसरणिं जनयति तदुद्धृतमिति सूरिभिः उररीक्रुतम्। भारतं तु चिन्तनसहस्रबीजम्। धर्मशास्त्रम् , कामशास्त्रम् , मोक्षशास्त्रम् , साङ्ख्यस्म् , आरोग्यम् , वेदार्थविवरणम् , राजनीतिः , लोकनीतिः , मनश्शास्त्रम् इत्यादिशास्त्रसमूहः एकस्मिन्नेव स्पष्टं दरीदृश्यते चेत्, तन्महाभारतम् । श्रुतिसागरं मनोमन्दरेण मथिते महाभारतचन्द्रमाः उदेति । तेनैव समस्तजगत्प्रकाशमाप्नोति ।

भारतं भानुमान्विष्णुः यदिस्युरमीत्रयः।
ततोऽज्ञानतमोऽन्धस्य काऽवस्था जगतो भवेत् ।।पद्म . सृ१.४२
मतिमन्थानमाविध्य येनासौ श्रुतिसागरात्।
प्रकाशो जनितो लोके महाभारतचन्द्रमाः ।।

महाभारतं श्रेष्ठमिति समेषां मुनीनां पुराणानां शास्त्राणां च ऐकण्ठ्यमनुभवाम। भारतस्य सर्वशास्त्रोत्तमत्वं प्रतिपादयन्त्येतानि वचांसि। ' महत्वात्भारवत्वाच्च महाभरतमुच्यते। निरुक्तमस्य यो वेद

सर्वपापै प्रमुच्यते । ब्रह्मादयः देवाः ऋषयः च मिलित्वा तुलायामेकस्मिन्पार्श्वे सषडङ्गाः चत्वारः वेदाः, धर्मशास्त्राणि , स्थापितम्। अन्यस्मिन्पार्श्वे महाभारतम् आरोपितम्। तदाभारतं सर्वेभ्यः अत्यरिच्यत।

## उपसंहारः

महाभारतं वृक्षत्वेन परिकल्प्य सर्वेषां पर्वणां प्रामुख्यं सुष्ठु विव्रियते । महाद्रुमः सकलविधजीवराशेः आवासस्थानम् । भूमेः दृढतां निष्पादयति । छायां च यच्छति । धराशायी भवति चेदपि इध्मरूपेण उपकाराय भवति । अयं भारतवृक्षोऽपि तथैव । सवकविजनानां कथावस्तु ददाति । दुःखितानां सान्त्वनमत्र भवति । उपाख्यानानां सूक्तीनां रत्नाकरः । परन्तु अयमत्र विशेषः । नैष वृक्षः म्रियते । नहि दृष्टान्ते सर्वसाम्यम् खलु । बीजानि , मूलं , स्कन्धाः , फलपुष्परसाः सार्थक्यं भजन्ते ।

सम्स्कृतसाहित्ये महती कृतिरियं शतसहस्रिका , जयः । अस्य ग्रन्थस्य न्यूनातिन्यूनं दशार्थाः विद्यन्ते इति ऋषिभिः जोघुष्यते । विनूतना शैली अत्र आदृता । सर्वशास्त्रनिर्णायकभूतस्य सम्स्कृतेः आश्रयभूतस्य महाभारतस्य व्याख्याप्रवाहः निरन्तरः । किमन्यत्? अनुभवैकवेद्यमिमं ग्रन्थं सेवताम् ।

Bibliography

१. भगवद्वेदव्यासविरचितम् महाभारतम्।
२. श्रीमदानन्दतीर्थविरचितं महाभारततात्पर्यनिर्णयः
३. डा. बन्नञ्जे गोविन्दाचार्यविरचितं व्याख्यानम्
४. स्कान्दपुराणम्
५. पद्मपुराणम्
https://doi.org/10.5281/zenodo.7256090

Paper 31

# वेदाङ्गस्य महत्वम्

**HARIPRASAD BHAT**

Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru

Email id – hergaharibhat@gmail.com

## सार: (ABSTRACT)

**समग्रेऽस्मिन् लेखने वेदस्यार्थगाम्भीर्यं, समुचितपदप्रयोगे पूर्वसूरिभिः कृतभूरिपरिश्रमः निरूपितो वर्तते। वेदावगमने वेदार्थावगमने वा उपकरणं विना न शक्यते इति निरूप्य उपकरणानि वेदाङ्गाङ्गानि प्रतिपादितानि। अङ्गं विना अङ्गिकल्पन यथा असम्भावितं तथा शिक्षादि शिक्षाद्यङ्गसाहाय्यं विना वेदः दुरूह्य एव स्यात्। अतः अङ्गभूतानि शिक्षादिषट् शास्त्राणि सप्रमाणं सलक्षणा निरूपितान्यत्र।अपि च पुराणादिविस्तृतवाङ्मयप्रपञ्चे षडङ्गानां परिचयः विवरणं च कुत्र उल्लिखितमिति च अत्र विवृतम्।**

**पूर्वपीठिका**

अस्मिन्महनीये प्रपञ्चे पुरुषार्थचतुष्टयस्य साधकौ मानवौ भवति । मनुष्याणां शरीरे यथा हस्तपादादयौ विविधान्यङ्गानि भवन्ति तद्वद् धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थस्य प्रतिपादका वेदास्सन्ति । वेदा अपि अङ्गैरेव व्याक्रियन्ते अत एव चतुर्दशविद्यास्वङ्गानां चर्चा विद्यते ।

अङ्गशब्दस्य व्युत्पत्तिलभ्योऽर्थो भवति 'उपकारक' इति । तद्यथा ट्ट 'अङ्ग्यन्ते, ज्ञायन्ते अमीभिरिति अङ्गानि' । अत्रायमाशयः, यैः उपकरणैः कस्यापि वस्तुनः स्वरूपावगमने सहायतां प्राप्नोति तानि अङ्गानि भवन्ति । वेदस्तु स्वयमेव दुर्बोधः, दुरूहश्च विषयः भाषा-भावयोर्द्वयोरपि दृष्ट्या । निष्कर्षश्चात्रायं विद्यते यत्, वेदार्थज्ञाने तत्कर्मकाण्डस्य च प्रतिपादने च सक्षमं सार्थकं च यच्छास्त्रं तमेव विद्वांसो 'वेदाङ्ग' इति नाम्ना कथयन्ति, व्याहरन्ति च । तथा च वेदस्य, वेदार्थस्य च यथार्थ ज्ञानाय शिक्षादिषड्विषयान् सम्यगध्ययनस्य नितान्तं प्रयोजनं विद्यते ।

**विषनिरूपणम्**

वेदसूक्तानां वेदमन्त्राणां वा उचितरूपेणोच्चारणं वेदाङ्गेषु प्रथमः कल्पः । अत एव शब्दमुख्यमन्त्राणां यथार्थरूपेणोच्चारणस्थापने बहु महत्वं दीयते । एतदर्थ प्रवर्तमाना व्यवह्रियमाणा च पद्धतिः वेदाङ्गस्य 'शिक्षा' इति कथ्यते । वेदस्य मुख्यतात्पर्यं, प्रयोजनं च वैदिकं कर्मकाण्डम् तथा यज्ञयागादेः यथार्थमनुष्ठानमस्ति । एतत्प्रयोजनाय प्रवृत्तमङ्गं 'कल्प' इति उच्यते ।अस्य शब्दस्य निष्पत्तिः एवं भवति, यज्ञ-यागादिप्रयोगाणां सदवसरे समर्थकं शास्त्रमिति । तद्यथा - ' कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति कल्पः' । व्याकरणमपि वेदाङ्गभूतमेव । तस्य शास्त्रस्य वेदानुकूलत्वं वेदार्थानुकूलत्वं आहोस्वित् वेदाङ्गत्वप्रयोजनं यथा ट्ट पदानां प्रकृतेःप्रत्ययस्य च विवरणं कृत्वा पदस्वरूपस्य परिचयं करोति अर्थविश्लेषणं च । एतादृशाय महाफलाय व्याकरणशास्त्रस्योपयोगित्वात् तस्मिन्नपि शास्त्रे वेदाङ्गत्वं विद्यते ।

निरुक्तस्य कार्यमस्ति ट्ट पदानां निरुक्तिकथनं व्युत्पत्तिप्रदर्शनं च । निरुक्तेर्विभिन्नत्वात् अर्थोऽपि भिन्नः भवति । अतो वेदस्यार्थनिरुक्तस्य वेदाङ्ता सिध्यति । वेदः छन्दोमय्यां वाण्यां विद्यते, तत्परिचयं विना कथं वेदार्थावगमो भवेत् । परिचये प्राप्ते सत्येव मन्त्राणामुच्चारणस्य पाठस्य सम्यग् ज्ञानं भविष्यति ।

उदाहरणम् ट्ट वरुणविषये शुनःशेपऋषेः बहुचर्चितोऽयं मन्त्रः,

निषसाद धृतव्रतो वरुणः पस्त्याश्वा । साम्राज्याय सुक्रतुः ॥

अस्मिन् मन्त्रे त्रिपदा गायत्री छन्दोऽस्ति, यस्य प्रत्येकस्मिन् पादे अष्टावष्टाक्षराणि भवन्ति । छन्दसः एतद् विज्ञापनं मन्त्राणां उच्चारणाय अत्यावश्यकमस्ति । द्वितीये तृतीये च पादे आपाततः सप्तैवाक्षराणि सन्ति । अतः एनमष्टपदाविरचनाय पस्त्याश्वा इत्यस्योच्चारणं चतुरक्षरसमन्वितं भाव्यम् । तद्यथा ट्ट पस्त्या ट्ट सुआ, साम्राज्य इत्यस्याप्युच्चारणे पूर्वोक्तपद्धत्या 'साम्राजि आय' इति भविष्यति । अनेनैव प्रकारेण छन्दसः ज्ञानं मन्त्राणामुच्चारणायातीवावश्यकं भवति । छन्दसो वेदाङ्गतायामेतदेव कारणमस्ति ।

ज्यौतिषशास्त्रमपरं वेदाङ्गम् । ज्यौतिषशास्त्रं प्रत्यक्षमस्ति । तथाचोक्तं ट्ट प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ इति । शास्त्रमिदं यज्ञ-यागस्य समुचितकालस्य निर्देशं करोति । श्रौतयागस्यानुष्टानं कस्मिन्नपि विशिष्टे नक्षत्रे च भाव्यम् । विवाहादि गृहकर्मणे नक्षत्रज्ञानं ज्यौतिषशास्त्रादेव प्राप्तुं शक्यते । अपरञ्च ट्ट दीक्षाया विधानं कर्मकांडस्य महान् विषयः । अस्मिन् विषये कतिपयोदाहरणानि प्रस्तूयन्ते ।

यथा,

तैत्तिरीयब्राह्मणस्य कथनमस्ति यत्, कृत्तिकास्वग्निमादधीत । फाल्गुनीपूर्णिमायां दीक्षानां विधानमस्ति । कथनस्याभिप्रायोऽयमस्ति यत् ट्ट कर्मकाण्डीये प्रत्येकस्मिन् विधाने ट्ट नक्षत्रस्य, तिथेः, मासस्य, संवत्सरस्य च ज्ञानमावश्यकं कर्तव्यकोटिकं च भवति । एभिरुपर्युक्तैः कारणैः ज्यौतिषशास्त्रस्य वेदाङ्गत्वं सिध्यति । संक्षेपेण वेदाङ्गानां लक्षणं एवं संगृहीतुं शक्यते यत्, मन्त्राणां यथोचितोच्चारणाय शिक्षायाः, कर्मकाण्डीय-यज्ञीययोरनुष्ठानाय कल्पस्य, शब्दस्वरूपव्युत्पत्यादीनां ज्ञानाय व्याकरणस्य, समुचितार्थज्ञानाय शब्दानां स्फोटनपूर्वकं निर्वचनानिरुक्त्यै निरुक्तस्य, वैदिकछन्दसां सम्यग् ज्ञानाय छन्दसः, विविधानुष्टानानां कालज्ञानाय ज्यौतिषस्य एतेषामङ्गानां यथार्थरूपेणोपयोगित्वात् 'वेदाङ्ग' इति कथयन्ति सार्वदेशीयविद्वांसः ॥

**वेदाङ्गसाहित्यस्य प्रयोजनम्**

वेदोऽस्माकं सनातनप्रजानां धर्मस्याधारभूतस्तंभ इव । अतःविद्वज्जनाः एनमतिशयेनादरेण, सम्मानेन, पावनेन दृष्ट्या चावलोकयन्ति । एतस्य महन्महत्वं को न विजानाति । यदा तर्ककुशलाः नैयायिकाः अनुमानादीनामपि साहाय्येन न किमपि कर्तुं पारयन्ति यागादिना स्वर्गादि विषये , तदा तेषां वेद एव शरणं भवति । तथाचोक्तम्-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता ॥

अस्य तादृशी विपुला प्रतिष्ठा तदुदयकालान्तरमेव समस्ते विश्वे प्रसृता बभूव । वेदस्यैकमप्यक्षरं पूतं ज्ञनवर्धकं च मन्यते । अत्र परिवर्तनं स्वरूपतश्च्युतिर्वा महतेऽपकाराय मन्यते स्म । एतादृश्यामवस्थायां वेदस्वरूपसंरक्षणायैव वेदाङ्गस्योदयो बभूव । ऋते वेदाङ्गात् शब्दानां अर्थानां च संरक्षणमसंभवमेवास्ति । अस्य सहयोगिनः साहित्यस्योदयः समुत्पत्तिर्वा उपनिषत्कालो एव संजाता । अस्मिन् विषये मुण्डकोपनिषदेव प्रमाणम् ट्ट

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ ।
कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ।
तस्मै सहोवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्
ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः
शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ॥

अपरं च - अपरविद्यायां वेदचतुष्टयानन्तरं तेषां तेषां षडङ्गानां शिक्षा-कल्प-व्याकरण- निरुक्त- छन्दो ज्योतिषादीनां गणना विद्यते । एषु प्रत्येकस्य विपुलं वैशिष्ट्यं विद्यत इति न तिरोहितमस्ति विद्वन्मण्डले । अत

एतेषामुपयोगिता सुतरामेव सिद्धा भवति । अस्य महतीमुपयोगितामवलोक्य महर्षिणा पाणिनिना पतञ्जलिना च स्वपाणिनीयशिक्षायां महाभाष्ये पस्पशाह्निके च सत्यमेवोक्तं यत्,

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ( पाणिनीय शिक्षा ४१-४२ )

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ( पस्पशाह्निके )

इत्येताभ्यां सूच्यते यत् ब्रह्मलोकस्य प्राप्तिः षडङ्गानामध्ययनेनैव भवतीति पारलौकिकी स्थितिः, लोके तु सर्वविदितमेव महत्वम् । अतः कारणेनविनाप्यध्ययनस्यास्यैव वेदाङ्गस्य महनीयता वर्तते न तु अन्येषां लौकिकशास्त्राणाम् । एतेन वेदाङ्गस्य लौकिकी-पारलौकिकी स्थितिः सुस्पष्टा भवति ॥

वेदाङ्गानां शास्त्रान्तरे वर्णनम्

वेदाङ्गेषु व्याकरणं प्रमुखमस्ति । अस्य विवेचनं नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्यैकपञ्चाशत्तमेऽध्याये संक्षेपतया, रमणीयतया सुवर्णितम् । नारदपुराणस्य व्याकरणं 'कातन्त्रव्याकरण'स्य सारभूतमस्ति, यं माहेश्वरं अथवा कौमारं व्याकरणं कथयन्ति विद्वज्जनाः । अपि च अग्निपुराणस्य ३४९ तमादध्यायात् ३५९ तम अद्यायपर्यन्तं व्याकरणशास्त्रस्य विवरणं विद्यते ।

छन्दःशास्त्रस्य अथवा पिङ्गलशास्त्रस्य वर्णनं गरुडपुराणस्य २०७ तम अध्यायात् २१२ तम अध्याय पर्यन्तं दरीदृश्यते । अपि च नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्य सप्तपञ्चाशत्तमेऽध्याये वैदिकानां ट्ट लौकिकानां च छन्दसां वर्णनमस्ति । अनेनैव प्रकारेण अग्निपुराणस्य २२८ तमाध्यायात् ३३५ तमाध्यायपर्यन्तं छन्दःशास्त्रस्य विशदं निरूपणं प्राप्यते ।

ज्यौतिषशास्त्राध्ययनाय नारदपुराणस्य विष्णुधर्मोत्तरस्य च विवेचनमतीव महत्वपूर्णमस्ति । नारदपुराणे त्रिस्कन्धज्योतिषस्य सिद्धान्तसंहिताहोरात्मकस्य कमनीयं निरूपणमस्ति । यत् ट्ट 'नारदीयं ज्यौतिषं' इति नाम्नैव विख्यातम् ।

निरुक्तसंबन्धिनः विषयाः पुराणेषु न्यूनं दृश्यन्ते । नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्य त्रिपञ्चाशत्तमेऽध्याये निरुक्तसंबन्धिताः कतिपयश्लोकाः वर्तन्ते, ये मुख्यतया व्याकरणशास्त्रस्य स्वरवैदिकप्रक्रियातो धातुप्रकरणाच्चाभिन्नाः प्रतीयन्ते ।

वेदादीनां पाठविधानस्य, स्वराणामुच्चारणविधेः, सामवेदस्य गान-प्रक्रियायाः वर्णानां स्पष्टोच्चारणस्य विधिर्यस्मिन् शास्त्रे वर्णिताः स्युः तच्छास्त्रं 'शिक्षाशास्त्रम्' । अस्य शास्त्रस्य प्रयोजनं तैत्तिरीयोपनिषदि एवमुक्तमस्ति-

अथ शिक्षां व्याख्यास्यामः ट्ट वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः

तत्र वर्ण इति पदेनाकारादेः ग्रहणम्, स्वर इत्यनेन उदात्तादेः, मात्रया ह्रस्व-दीर्घ- प्लुतानां, बलेन स्थानप्रयत्नौ गृह्येते, साम्ना निषादादिः, सन्तानेन विकर्षणादिः इति प्रयोजनमप्युक्तम् । अपि च शिक्षाशास्त्रस्य वर्णनं नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्य पञ्चाशत्तमेऽध्याये प्रायः शतत्रयश्लोकेषु तथा चाग्निपुराणस्य ३३६ तमेऽध्याये विद्यते ।

कल्पानां वर्णनं तु प्रायः पुराणेषु विद्यमानमस्ति । कल्पेऽस्मिन् वैदिकानां लौकिकानां च कर्मकाण्डानां समन्वयः दृश्यते । येषु श्रौतसूत्रं,गृह्यसूत्रं, स्मार्तसूत्रं, शुल्बसूत्रं इतिचेमानि चत्वारि गृहीतानि भवन्ति । ऋग्वेदप्रातिशाख्ये वर्गद्वयवृत्तौ कल्पविषये कथितमस्ति यत्-

कल्पो वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम्

अत्रायं निष्कर्षो विद्यते यत् येषां यज्ञ-यागादिविहितानां विवाहोपनयनादिकर्मणां च महत्वपूर्णं प्रतिपादनं वैदिक ग्रन्थेषु कृतमस्ति तेषां सूत्रग्रन्थानामभिधानमस्ति कल्पः । इमानि सूत्राणि प्राचीनतमानि एतदर्थं मन्यन्ते । यतो हि एतानि स्व-स्वविषयप्रतिपादने ब्राह्मणारण्यकैस्सह तैरन्तर्येण संबद्धानि सन्ति । कल्पशास्त्रस्य वर्णनं भविष्यपुराणे सर्वाधिकमस्ति । येषु यज्ञस्य, इष्टापूर्तेः, संस्कारस्य विधयो वर्णिताः सन्ति ।

तद्यथा च कल्पानां पञ्चभेदाः सन्ति । ते तु - नक्षत्रकल्पः, वैतानकल्पः , संहिताविधानकल्पः, आङ्गिरसकल्पः, शान्तिकल्पश्चेति ।

अत्र नक्षत्रकल्पे - यज्ञ-संस्कारादीनांकर्मणां मुहूर्तानां च निर्णयो भवति ।

वैतानकल्पे - हविर्यज्ञ ट्ट सोमयज्ञ- पाकयज्ञानां साङ्गोपाङ्गविधिर्निरूपिता विद्यते ।

संहिताकल्पे - विशेषतो वेदनिर्दिष्टानामश्वमेध-राजसूयादियज्ञानां तद्भिन्नानाञ्चापि सर्वविधीनां सम्पादनप्रक्रिया प्राप्ता भवति ।

आङिरसकल्पे - शत्रुराष्ट्रेभ्यो मारणस्य, मोहनस्य, वशीकरणस्य उच्चाटनाद्याभिचार कर्मणां च निर्देशोऽस्ति ।

शान्तिकल्पे - दैवान्तरिक्षाद्भुताद्युत्पातानामीतिभीत्यादिभयानां निवारणस्य, एवञ्च शत्रुराष्ट्रैः कृतनां, मारण-मोहनादिप्रयोगाणां शान्ति विधीनां वर्णनं विद्यते ।

## उपसंहारः

एतादृशस्य षडङ्गयुक्तस्य वेदाध्ययनस्य परम्परा आसहस्रवर्षात् अस्मिन् भरतखण्डे अनुस्यूततया दृश्यते । पारलौकिकपरब्रह्मस्थानैक काम्येन षडङ्गसहितवेदविद्यार्जनं अधुनापि क्रियते इतीदं प्रमोदावहो विषयः ।

## Bibliography


1. **ऋग्वेदसंहिता – मैसूरुमहाराजसंस्थानद्वारा प्रकटितोऽयं ग्रन्थः। कन्नडभाषायां विद्यमानेऽस्मिन् ग्रन्थे व्याख्यानं , विस्तृतपीठिका च वर्तते।**
2. **धर्मशास्त्रक का इतिहास – Dr. P.V Kane**
3. **संस्कारमहोदधिः –** Dr. A Ananthanarismhachar
4. **हिन्दुधर्मकोशः** – Raajabali Pandeya
5. **धर्मकोशः –** Lakshminarasimha Joshi


https://doi.org/10.5281/zenodo.7253714

Paper 32

# ज्योतिःशास्त्रप्रशंसा

**Srikantha Upadhya B**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - shrikanthupadhyari@gmail.com

## सारः (ABSTRACT)

**'श्वः किं भविष्यति? कथं वा मम जीवनमुज्जीवनं भवेत्। ' इत्यादि भविष्यत्कालीनवार्ताजिज्ञासा प्रायः सर्वेषामस्त्येव। तदर्थं प्राचीनशात्रं ज्यौतिषशास्त्रमाश्रियते। अस्मिन् लेखने ज्यौतिषशास्त्रस्य विस्तारः लक्षणं प्रयोगक्रमश्च संक्षेपेण निरूपितः वर्तते। ज्यौतिषशास्त्रस्य प्रयोजनमपि चिन्तितमत्र। प्रश्नशात्रमधिकृत्य नैके विषया अत्र प्रस्ताविताः वर्तन्ते।**

## पूर्वपीठिका

"ओं तमसो मा ज्योति र्गमय" इति प्रार्थनाम् अभिलक्ष्य सर्वान्ज्योतिषां मार्गे प्रवर्तयितुं वेदद्रष्ट्टृणां मुनीनां प्रतिभया परिस्फुरन्नयं ज्योतिःशास्त्रसन्दर्भः; वेदपुरुषस्य चक्षुःस्थानीयः सन्, ग्रहगणितात्वेदविहितानां यज्ञानां कालं भुक्तिमुक्तिफलं च प्रकाशयन्, एवमेव ग्रहगणितात्व्यावहरिकगणितं साधयन्, कालविशेषं बोधयन्, लोकान् लौकिकव्यवहारे प्रवर्तयन्, गणिते पथि उन्नेतारं शून्याङ्कं आविष्कुर्वन्, विश्वस्याप्युपकुर्वन्, कालविशेषसंलग्नं शुभाशुभं प्रकटीकुर्वन्, प्रादेशिकं इष्टानिष्टं प्रदर्शयन्, प्रतिव्यक्तिं अनिष्ठं शुभाशुभं उद्भावयन्, संस्कारयात्रादीनां लौकिकानां कर्मणां कालमपि प्रतिपादयन्, षडङ्गेषु अपि अनितरसाधारणं स्थानमवाप । अत एवोक्तं अभियुक्तैः

**न हि एकमेव फलं अभिलक्ष्य प्रसूते दैवी वागिति ।**

अत एवैनं, चक्षुःस्थानीयं वेदपुरुषस्य, अष्टादशमुनिमुखारविन्दात् प्रसरन्तं, हरिहर ब्रह्मात्मकत्वेन परतत्त्वमिव स्कन्धत्रयात्मकत्वेन त्रिधा विभक्तं वर्णयन्ति दैवविदोऽप्यस्य पारमनवलोकयन्तः । तत्र ज्योतिःशास्त्रस्वरूपं किम्? कालस्य च स्वरूपं किम्? तयोः सम्बन्धः कः? इत्यादि विचारः प्रसङ्गात् अवश्यकत्वेन अवभासते । ज्योतिःशास्त्रपदनिर्वचनात् स्कन्धत्रयेऽपि तत्पदत्वेन व्यवहारयोग्यता सद्भावसमर्थनं क्रियते।

## विषयप्रस्तावः -

**स्कन्धत्रयात्मकं ज्यौतिषम् ॥**

सिद्धान्तः-

ज्योतिषाम् आकाशे प्रकाशमानानां ग्रहादीनां सम्बन्धिशास्त्रम्इति व्युत्पत्त्या सूर्यादिग्रहाणां गत्यादिनिरूपकं शास्त्रमिति सिध्यति । सूर्यादिग्रहाः तेषां गगनसम्बन्धः षष्ट्युत्तरत्रिंशत्अंशात्मकेषु भगणेषु, अर्थात् राश्यंशककलाविकलाद्यात्मकेषु राशिचक्रगतसूक्ष्मांशकेषु विद्यते । अनेन अभीष्टकाले ग्रहाणां

भचक्रगतसूक्ष्मांशकेषु परिभ्रमणस्य बोधकं शास्त्रंज्योतिःशास्त्रं इति आयाति । एवं ज्योतिःशास्त्रपदं सिद्धान्तस्कन्धं निरूपयति ।

संहिता -

ग्रहेषु राशिचक्रभागेषु अपि, आकृतिस्वभाववर्णादिवैशिष्ट्यं परिकल्प्य, ज्योतिषां शुभाशुभगुणविशिष्टभगणांशेषु सञ्चरतां ग्रहादीनां ग्रहणोल्काकेत्वादिकानां ज्योतिर्मयपदार्थानां सम्बन्धिशास्त्रं इदम् । अनेन निर्वचनेन शास्त्रमेतत्भगणभागविशेषगतग्रहप्रकाशसंबंधस्य भूमावपि सम्भवात् तत्रत्यप्राणिनां शुभाशुभफलबोधकं इति सिध्यति । एवं तत्पदं संहितास्कन्धं निरूपयति । संहितास्कन्धे तु नक्षत्रविशेषे दृश्यमानानां ग्रहग्रहणकेतूल्कादीनां इष्टानिष्टफलस्य भूप्रदेशविशेषे सम्भाव्यत्वेन प्रधानतया वर्णनात् ज्योतिःशास्त्रपदं संहितास्कन्धमपि स्वात्मनि लीनयति ।

होरा-

क्रियाविशेषकाले पूर्वक्षितिजस्पृष्टं राशिंलग्नमिति परिकल्प्य, ततः भावान् संसाध्य, तस्माद्राशिभावविशेषगतग्रहात्, परस्परग्रहगतान्तरविषेषाच्च मनुष्येषु भूतभविष्यद्वर्तमानफलं यस्मादुद्भाव्यते तत् होरास्कन्धं बोधयति । अत्रापि ग्रहादीनां प्रकाशसम्बन्धस्य, भूमौ तथा प्राणिष्वपि दृश्यमानत्वात् ज्योतिःशास्त्रमिति पदं सार्थकत्वमेति ।

अत्र कालशब्दवाचकः पदार्थः कः ? कालशब्देन कीदृग्विधः पदार्थ उच्यते । इति विचारे:

१) किमयं कालः आत्मवत् निर्गुणो निराकार आद्यन्तविरहितः ?

२) किं व्यवहारलाभाय आरोपितगुणकत्वेन आपाततो भासमानः सगुणत्वविशिष्ट; यथा आंग्लादिभिः निर्दिष्टपदार्थमुपलक्ष्य, तस्मात् वर्षमासदिनघट्यादिरूपेण व्यवहारः प्रवर्त्यते तद्वद्वा?

३) किं वा अविद्यासम्बन्धात्शरीरं लब्ध्वा सगुणत्वव्यवहारयोग्यः निर्गुण आत्मेव कालः ग्रहराशिसम्पर्कात् कालपुरुषस्वरूपं प्राप्य, सगुणो भूत्वा, कल्प-युग-मनु-वर्ष-अयन-ऋतु-मास-पक्ष-तिथि-वार-घटी-विघट्यादि-रूपेण, शुभाशुभात्मकतया परिणतस्सन् प्रतिपन्न इति शङ्का जागर्ति । व्यवहारायोग्यत्वादेव प्रथमः पक्षोऽपास्तः। केवललौकिकव्यवहारसाधकत्वात् शुभाशुभसम्बन्धलेपाद्यभावाच्च द्वितीयोऽपि पक्षो निरस्तः।
कल्पधर्माधर्मादितारतम्यजन्ययुगादिकालविशेषतया प्रतीयमानत्वात् शुभाशुभसम्बन्धविशिष्टः तृतीयपक्ष-प्रतिपादितः सगुणः काल एव शास्त्रेऽभिहितः ज्योतिर्विद्भिः आदृतश्च ।
अत एव कालस्य राशेर्ग्रहाणां च अविनाभावसम्बन्धं परिकल्प्यैव स्कन्धत्रयं प्रवृत्तम् । त्रयाणां सम्बन्धाभावे ज्योतिः शास्त्रस्य स्थितिः उत्पत्तिर्वा न स्यात् । तस्मादेव सिद्धान्तगणितस्योद्भावनायाः पूर्वमेव, आकाशे गोले च नाडीवृत्तक्रान्तिवृत्तयोः कल्पना कृता । तत्र नाडीवृत्तं कालं बोधयति, क्रान्तिवृत्तं तु ग्रहसञ्चारमार्गं निरूपयति । एवं दिनाद्यात्मके काले अभीष्टो ग्रहः, क्रान्तिवृत्तगतम् एतावन्तं भागमाक्रामति चेत् इष्टे काले ग्रहः कियद्भागमाक्रामेदिति अनेन ज्ञानं भवति । आकाशस्य अमुके स्थानविशेषे सञ्चरन्ग्रहः कंकालविशेषं बोधयतीति यावत् । एवं ग्रहस्य क्रान्तिवृत्तनाडीवृत्तयोश्चपरस्परसम्बन्धं परिकल्प्यैव गणितस्य सिद्धिः कर्तव्या नान्यथा ।

एवं निर्गुणस्यापि कालस्य, ग्रहस्य च व्यवहारयोग्यः औपाधिकः, अत एव काल्पनिकः सम्बन्धः सूपपादः । किन्तु निर्गुणे काले ग्रहे राशावपि शुभाशुभलेपस्य प्रतिपादनं, परस्परसम्बन्धात् भूमौ, तद्गतजीवसमुदाये च इष्टानिष्टनिरूपणं कथम् उपपादयितुं शक्यम् ? अस्य प्रश्नस्योत्तरं रमणीयतया प्रत्यपादि मानवदृष्टेः दौर्बल्यम् अवगच्छद्भिः वराहमिहिराचार्यैः, लौकिकेषु ज्योतिःशास्त्राचार्येषु सर्वप्रथमस्थानमलङ्कुर्वद्भिः । इदानीं

स्कन्धत्रयात्मकस्य ज्योतिःशास्त्रस्य प्रामाण्ये सिद्धे प्रश्नशास्त्रस्योत्पत्तिः कस्मात्? तस्य स्वरूपं किम् ? तस्य स्कन्धत्रयसम्बन्धः कथम् ? तस्य प्रामाण्यमपि कथं सिध्यति इत्यादिः प्रश्नः उदेत्येव । तदुपरिविचारः प्रसङ्गात् आवश्यकत्वेनापतत्येव ।

बालकृष्णरचिते "भारतीयज्यौतिषम्" इति ग्रन्थे प्रश्नमधिकृत्य स्वल्पमेवोक्तम् । तच्छास्त्रस्य मूलभूतौ षट्पञ्चाशिकार्यासप्तत्याख्यौ द्वावेव प्राचीनग्रन्थौ दृश्येते । ततः क्रमेण प्रश्नशास्त्रस्य विकासो बभूव ।

नेमिचन्द्रशास्त्रिरचिते "भारतीयज्यौतिषम्" इति ग्रन्थस्य षष्ठे पत्रे "प्रश्नशास्त्रम्" अधिकृत्य ईषदधिको विचारः उपलभ्यते । इदं तत्कालफलबोधकं शास्त्रम् । अत्र प्रष्ट्रा पृष्टं प्रश्नाक्षरमनुसृत्य फलं दैवज्ञाः निरूपयन्ति । अयमेव सम्प्रदायः क्रिस्तोत्तरं पञ्चमशतकं यावदासीत् । तत्पश्चात् (१) प्रश्नाक्षरसिद्धान्तः, (२) प्रश्नलग्नसिद्धान्तः, (३) स्वरविज्ञानसिद्धान्तः इति त्रयाणां सिद्धान्तानां प्रवेशस्तत्राभूत् । पृथुयशसः काले प्रश्नलग्नसिद्धान्तस्य प्रचुरप्रचार आसीत् । क्रमेण क्रिस्तोत्तरैकादशशतकान्ते पूर्णतया इदं शास्त्रं विकसितमभूत् । कालक्रमेण चेष्टाहावभावादिद्वारा मनोगताभिप्रायस्य वैज्ञनिकदृष्ट्याविश्लेषणपद्धतिमपि आत्मसादकरोदिदं शास्त्रम् ।

पूर्वोक्तग्रन्थद्वयमपि प्रश्नशास्त्रस्य प्राचीनतां नैव साधयति । अतः बृहतसंहिता, तट्टीका, बृहत्पाराशरहोराशास्त्रं, दशाध्यायीगतान् विचारान् किञ्चित् प्रदर्शयामि ।

बृहत्संहितायां पञ्चाशत्तमोऽङ्गविद्याध्यायो विद्यते, तस्मिन् चतुश्चत्वारिंशत् श्लोकाः सन्ति। तेभ्यः स्पृष्टाङ्गमनुसृत्य चोरव्याधिगर्भादिचिन्ताविधिं बोधयति वराहमिहिरः । प्रथमपद्ये पृच्छकाभिमुखदिशं, पृच्छकवचनं, प्रदेशं, तत्काले अन्यैः आहृतं द्रव्यं सुपरीक्ष्य, प्रष्टुः अङ्गस्पर्शनचेष्टादिकं कालमपि विचार्यफलं वक्तव्यमिति वदति, यथा -

दैवज्ञेन शुभाशुभं दिगुदितस्थानाहृतानीक्षता
वाच्यं प्रष्टृनिजापराङ्गघटनां चालोक्य कालं धिया ।
सर्वज्ञो हि चराचरात्मकतयासौ सर्वदर्शीविभु-
श्चेष्टाव्याहृतिभिः शुभाशुभफलं सन्दर्शयत्यर्थिनाम् ॥

**इदानीं प्रश्नस्वरूपं कथयति**

प्रश्नो द्विविधः, लौकिकः अलौकिकश्चेति । प्रश्न इत्युक्ते अस्मिन्चलच्चित्रेनायिका का इत्यादिविषयेषु संशयितेन पुरुषेण स्वकीयसंशयनिरासाय तज्ज्ञस्यान्यस्य समीपे क्रियमाणा पृच्छा, सतु लौकिकः । द्वितीयस्तु विवाहः कदा भवति ? मम पुत्रमुखदर्शनभाग्यंविद्यते वा न वा, अस्ति चेत्कदा ? अयं अस्मात्रोगान्मुक्तो भवति वा न वा ? भवति चेत्कुत्रत्यात् कस्माच्च वैद्यात्, कस्या देवतायाः प्रसादात्, कस्मिन् काले ? नष्टधनं वा, अपहृतपदार्थो वा नष्टः पुरुषो वा प्राणी वा लभ्यते चेत्कदा, इदानीं तस्य स्थितिः कुत्र, इत्यादिना मानसिकेन प्रश्नेन प्रक्षुब्धः, अस्य परिहरणे समर्थं दैवज्ञात् भिन्नमन्यमपश्यन्, तमेवशरणं मन्वानः तमुपसृत्य पृच्छति । अयम् अलौकिक इति उच्यते ।

अनेन सामान्यो लौकिकः प्रश्नस्तु, भूतकालिको वर्तमानकालविषयको वा, दृश्यमानपदार्थ-विषयकदेशकालान्तर्गत एव भवति । स तु तज्ज्ञेषु क्रियते । अलौकिकप्रश्नस्तु त्रैकालिकसम्बन्धी, देशकालादि अनवच्छिन्नविषयकः दृश्यादृश्यसमस्तवस्तुविषयकश्च भवति । अस्य दैवानुकूल्यतत्प्रकोपादिहेतुकस्य तथा

जन्मान्तरे आर्जितपापपुण्यानुसारिणः भविष्यत्जीवनसम्बन्धिसुखदुःखप्राप्तिविषयकस्य, दैवज्ञनिकट एव क्रियमाणस्य प्रश्नस्य अलौकिक प्रश्न इति नाम । अस्योत्तरं दातुं समर्थः प्रश्नशास्त्रे तज्ज्ञः दैवज्ञ एव दृश्यते ।

तस्मात् त्रिकालविषयकसन्देहस्य परिहारको दैवज्ञः । स यस्माद्वचनात् समाधत्ते, तस्य प्रश्नशास्त्रम्इति व्यवहारः सिध्यति । "कर्मार्जितं पूर्वभवेसदादियत्तस्य पक्तिं समभिव्यनक्ति ।" इति बृहत्जातके उक्तं वराहमिहिरेण। होरा तुजन्मान्तरकृतपापपुण्यानुसारि ऐहिकशुभाशुभफलं प्रतिपादयतीत्यायाति । तथा होरामाधारीकृत्य प्रश्नशास्त्रं प्रवृत्तं यथाग्रहराश्यादिबलनिर्धारणं जातकोक्तभावमनुसृत्य प्रश्नलग्नादपि पञ्चमात्पुत्रचिन्ता, सप्तमात्विवाहचिन्ता, षष्ठात् रोगचिन्ता इत्यादिजातकोक्तन्यायेन सर्वभावचिन्ता क्रियते । अत एव होरास्कन्धसम्बन्धः सिध्यति । जन्मलग्नायत्तत्वाद्धोरायाः, प्रश्ने जन्मलग्नभावात्तुल्यन्यायेन फलनिरूपणं कथं युक्तमिति पुनः प्रश्ने, समाहितं प्रश्नमार्गकारैः यथा -

सम्प्रेर्यमाणस्त्ववशः शरीरी प्रसह्य दैवेन शुभाशुभेन ।
ज्योतिर्विदसन्निधिमेति यस्मात् प्रश्नोऽप्यतो जन्मसमः फलेषु ॥

यथाजन्मान्तरार्जितशुभाशुभकर्मबोधके कालविशेषे, हठात् दैवेन प्रेरितः अवशः सन्नेव शिशुः गर्भाशयात्बहिः आयति । जनने कर्मविशेषारम्भसमये वा पूर्वक्षितिजस्पृष्टं राशिं लग्नमिति निरूपयन्ति । तद्वत् दैवेनैव प्रेरितः पृच्छकोऽपि अवशः सन्कर्मानुगुणकालविशेषेणैव दैवज्ञसन्निधिमेति । एवं जन्मलग्नवत्पृच्छालग्नस्यापि दैवनिष्पादितत्वात् फलसाम्यम् । उभयत्रापि तत्तत्जीवकृतकर्मप्रकाशको कालएव प्रेरयति, नात्र दैवमपि स्वातन्त्र्यमवलम्बते । अतः -

**जातके यद्यदुद्दिष्टं तत्तत्प्रश्नेऽपि चिन्तयेत् ॥ इतिप्रश्नमार्गे उक्तम् ।**

अनेन होराप्रश्नशास्त्रयोः अभेदं, नित्यसम्बन्धं, जन्यजनकभावसम्बन्धं चदृढीकृतवान्। प्रश्नलग्नं जन्मलग्नत्वेन स्वीकृत्यजातकोक्तं सर्वफलंप्रश्नेऽपि चिन्तयेदिति निरूपयन् ।

## उपसंहारः -

एवं समग्रं ज्योतिषम् अस्माकं जीवने बहुउपयोगाय भवति । अतः सर्वे जनाः ज्योतिषम्अनुसृत्यजीवनं यापयन् परिहृतानिष्टो भूत्वा श्रेयः प्राप्नोति । इंद शास्त्रं सार्वदेशिकं सार्वकालिकं च विभाति ।

## Bibliography

1. वराहमिहिरकृतबृहज्जातकम्
2. प्रश्नमार्गः
3. सिद्धान्तशिरोमणिः
4. प्रश्नचिन्तनम्
5. ज्यौतिषसोपानम्

https://doi.org/10.5281/zenodo.7256326

Paper 33

# भगवद्गीतायाम् आहरपद्धतिः

**THULASI SHENOY**
Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id - chitra.menasi@gmail.com

## सार: (ABSTRACT)

**कार्यसन्नद्धः कार्यकुशली अर्जुनः भ्रान्त्या कार्यविमुखः इव सञ्जातः । अर्जुनसहायाः शेषाः सर्वे पाण्डवाः ससैन्या विषण्णा अभवन् । अकस्मात् उत्पन्ने विषमावसरे अर्जुनं व्यापारयितुं भगवान् श्रीकृष्णः गीताम् उपादिशत् । गीता गुरुशिष्ययोः संवाद इव वर्तते । अत्र अर्जुनः शिष्यः, स्वात्मनि उत्पन्नान् सन्देहान् पृच्छति । श्रीकृष्णः तु गुरुः, अर्जुनस्य प्रश्नवाक्यं श्रुत्वा मनोगतमिङ्गितं विज्ञाय सावधानेन उत्तरं ददाति। संसारस्य विषमतां, जन्ममृत्योः रहस्यम्, आत्मनः स्वरूपं, कर्तव्याकर्तव्यकर्मविचार, भक्तिं, गुणत्रयं श्रद्धां, आचार, आहारे, तपः, त्याग इत्यादि बहुविषयान् बोधयति। कार्यसिद्धेः प्राक् मनोनिर्वहणम् अनिवार्यम् इति अर्जुनस्य मनसः चाञ्चल्यं दूरीकर्तुं मनोनिर्वहणं कथं करणीयम् इति बोधयति । भगवता कथिता सर्वोपनिषत्सारभूता इयं ज्ञाननिधिः, चिकीर्षितम् अर्थं यच्छति, ज्ञापयति च तां समाश्रित्य मोक्षार्थं प्रवर्तमानः मोक्षमेव विन्दति ।**

जगद्रणाङ्गणे यस्य स्मरणं जयकारणम् ।
पार्थसारथये तस्मै श्रीकृष्णब्रह्मणे नमः ॥

**पीठिका**

जीवनम् उन्नेतुं बहवः विचारा: गीतायां वर्तन्ते । केवलं गीतायाम् उक्तविषयं जीवने अनुष्ठानं कुर्मः चेत् समृद्धं जीवनं निर्वोढुं सर्वेऽपि समर्थाः भवन्ति । या प्रसिद्धोक्तिः महाभारतविचारे अस्ति सा "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्?" इयमुक्तिं भगवद्गीता विषयेऽपि निस्संशयम् अन्वयं कर्तुं शक्यते । अत एव अध्यात्मविचारयुक्ता भगवद्गीता भारतीयानां सर्वश्रेष्ठ: महान् धार्मिकग्रन्थ इति प्रसिद्धः । प्रस्थानत्रयेषु (ब्रह्मसूत्र, भगवद्गीता, उपनिषद्) द्वितीयं महत्त्वपूर्णग्रन्थ एवेयमस्ति। भगवान् वेदव्यासप्रणीत पञ्चमवेदः" इति अति प्रसिद्ध ग्रन्थस्य महाभारतस्य "भीष्म पर्वणि" भगवद्गीता निरूपितास्ति । गीता सर्वशास्त्रमयी तथा सर्वशास्त्राणां साराभूतेति प्रसिद्धा भगवतः श्रीकृष्णस्य मुखारविन्दात् निसृतेति कारणतः "भगवद्गीतेति" उच्यन्ते । इयम् भगवद्गीता श्रीकृष्णस्य दिव्यवाणी अस्ति। गीतायाः महिमा अपारा सामान्यजना अपि अवगन्तुं सुलभम् अस्ति इति कारणादेव भगवद्गीता अत्यन्त लोकप्रिया तथा जनादरणीया। अस्याः संरचना सरला, सुलभा, सुललितापि। अत एव किञ्चित् प्रयत्नेन पुरुषः सहजतया अर्थमवगन्तुं समर्थो भवति। पौनपुन्येन पठितमपि अन्यान्यविशेषार्थाः दृष्टिगोचराः भवन्ति ।

"गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिसृता॥"

गीतायाः श्रवणं, कीर्तनम्, अध्ययनम् ,अध्यापनं, मननं धारणं च अवश्यं कर्तव्यम्। गीताध्ययनं सम्यक् क्रियते चेत् अन्यशास्त्रसङ्ग्रहस्य का आवश्यकता? एषा तु स्वयं भगवतः पद्मनाभस्य मुखकमलादेव आगतास्तीति भगवान् वेदव्यासः स्वयमेव अवोचत् ।

कौरवाः पाण्डवाश्च सपरिवाराः युद्धाकाङ्क्षिणः धर्मक्षेत्रे कुरुक्षेत्रे समवेताः। महाभारतयुद्धं कर्तव्यज्ञापनाय, दुष्टनाशाय, शिष्टपरिपालनाय च अभूत् । "समरमुखे विजयशीलाः समग्र भूमण्डलम् अनुभवन्ति मृताश्च स्वर्गं प्राप्नुवन्ति" इति विचिन्त्य सर्वे युद्धाय सन्नद्धाः अभवन् । स्वयुद्धकौशलं प्रदर्शयितुम् अहमहमिकया उत्सहन्ते स्म । सन्निवेशेऽस्मिन् पाण्डवेषु मुख्य: महारथी, गाण्डीवी, अर्जुनः स्वस्य सारथिं श्रीकृष्णमवदत् "उभयोः सेनयोः मध्ये रथं स्थापय, शत्रुपक्षस्य दुर्योधनप्रियकाम्येण समागतान् योद्धुकामान् निरीक्ष्ये" इति । तथा कृते च केशवे, गाण्डीवी अर्जुनः" ये प्रतिपक्षेषु स्थिताः ते सर्वे स्वजनाः तेषु गुरवः, आचार्याः, मातुलाः, भ्रातरः च सर्वे सम्बन्धिन एव । तान् कथं हनिष्यामि? कथं वा रणे पूजार्हं पितामहं भीष्मं, गुरु द्रोणं च प्रहरिष्यामि? स्वजनघातकेन युद्धेन कं वा पुमर्थं साधयिष्यामि? एतैर्विहीनेन राज्येन किं प्रयोजनं प्रतिपादयिष्यामि? भोगेन कथं वा आनन्दम् अनुभविष्यामि? किन्तु कुलक्षयकारणात् मया पापकर्ममेव कृतमिति भवति, अतः राज्यसुखलोभात् युद्धे स्वजनान् हन्तुं कथम् अहम् शक्नोमि?" इत्यादि ब्रुवन् रथात् अवतीर्य सशरं धनुः भूमौ निधाय शोकयुक्तः सः तत्रैव उपाविशत् ।

एवं कार्यसन्नद्धः कार्यकुशली अर्जुनः भ्रान्त्या कार्यविमुखः इव सञ्जातः । अर्जुनसहायाः शेषाः सर्वे पाण्डवाः ससैन्या विषण्णा अभवन् । अकस्मात् उत्पन्ने विषमावसरे अर्जुनं व्यापारयितुं भगवान् श्रीकृष्णः गीताम् उपादिशत् । गीता गुरुशिष्ययोः संवाद इव वर्तते । अत्र अर्जुनः शिष्यः, स्वात्मनि उत्पन्नान् सन्देहान् पृच्छति । श्रीकृष्णः तु गुरुः, अर्जुनस्य प्रश्नवाक्यं श्रुत्वा मनोगतमिङ्गितं विज्ञाय सावधानेन उत्तरं ददाति। संसारस्य विषमतां, जन्ममृत्योः रहस्यम्, आत्मनः स्वरूपं, कर्तव्याकर्तव्यकर्मविचारं, भक्तिं, गुणत्रयं, श्रद्धाम्, आचारम्, आहारं, तपः, त्याग इत्यादि बहुविषयान् बोधयति। कार्यसिद्धेः प्राक् मनोनिर्वहणम् अनिवार्यम् इति अर्जुनस्य मनसः चाञ्चल्यं दूरीकर्तुं मनोनिर्वहणं कथं करणीयम् इति बोधयति । भगवता कथिता सर्वोपनिषत्सारभूता इयं ज्ञाननिधिः, चिकीर्षितम् अर्थं यच्छति, ज्ञापयति च । तां समाश्रित्य मोक्षार्थं प्रवर्तमानः मोक्षमेव विन्दति ।

"सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थोवत्स सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥"

सर्वे उपनिषदोऽपि धेनवः, श्री कृष्णः गोपालकः, अर्जुनः वत्सः, गीतामृतम् इत्युक्ते उपदेशसारः एव क्षीरमस्ति । अत्र न तु केवलम् वत्सः इत्युक्ते अर्जुनः क्षीरं पिबति, अपि तु सर्वे पण्डिताः अपि शेषः क्षीरं पीत्वा तृप्ताः भवन्ति। भगवद्गीता सम्पूर्णं वेदमयी अस्ति। समग्र वेदानां सम्पूर्णसारं गीतोपदेशरूपेण भगवान् श्रीकृष्णः जगति समर्पितवान् ।

भगवता प्रतिपादितेषु बहवः अंशाः मनोनिर्वाहकाः, केचन अंशाः आचारनिर्वाहकाः; केचन अंशाः व्यवहारनिर्वाहकाः च सन्ति । त्रिगुणैः निबद्धेषु व्यवहारेषु सात्त्विक एव गरीयान् शुद्धजीवनस्य निर्वहणे सत्त्वगुणानुवर्तनम् अनिवार्यम् इत्यादीनां प्रकाशाय विवेकविस्ताराय च आहारादीनां प्रभेदं प्रबोधितवान् | आहारः यज्ञः, तपः, दानं,ज्ञानं, कर्म, कर्ता च सात्त्विकराजसतामसभेदेन त्रिविधाः भवन्ति ।

आहारस्य अवश्यकता: "उदरनिमित्तं बहुकृतवेषम्" इयमुक्तिः सुप्रसिद्धा एव । अतः सर्वे प्राणीनां कृते जीवनं निर्वोढुम् आहारम् आवश्यकमेव सर्वे जीवाः शिलायुगे तु कन्दमूलाहारमेव स्वीकृत्य जीवनं यापयन्ति स्म। कालान्तरे व्यवसायं कृत्वा स्वयमेव आहारं उत्पाद्य सेवन्ते स्म।

**भगवद्गीतोक्त आहारपद्धतिः**

भगवद्गीतायां भारतीयचिन्तनस्य सर्वतत्त्वसङ्ग्रहे, जीवीनां भोजनविषये गम्भीराः विचाराः सन्ति । जगति सत्वयुत आहारस्वीकारादेव सर्वभूतानाम् अस्तित्वं भवति इत्यपि उक्तमस्ति अत्र। आहारविषयकं वचनं भगवद्गीतयाः तृतीया तथा सप्तदश अध्याये च उक्तमस्ति ।

तण्डुलः वृष्ट्या उत्पद्यते। यज्ञद्वारा वर्षम्। कर्मात् यज्ञोपपद्यते।"यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः, भुञ्जन्ते ते त्वघं पापा ये पचन्त्यात्मकारणात्" इति श्लोकः यज्ञ-अन्नयोः सम्बन्धं स्पष्टीकरोति। अतः भगवद्गीतायाम् आहारविषये प्रतिपादितविषयम् एवमस्ति, यत् "मनुष्याणां भोजनसेवनस्य तथा व्यक्तित्वस्य विषये प्रत्यक्षः सम्बन्धः वर्तत इति" ।

अत्र न केवलं जीवननिर्वहणकौशलं अपि तु आरोग्यसम्बन्धी मार्गदर्शनं च वर्तते । सामरस्य सन्देश: विद्यते, विश्वमङ्गल सुविचारा: वर्तन्ते । गुणविमर्शापि दृश्यन्ते ।आहारपद्धतिः कथं? कीदृशाहारं जीवनमुन्नयति इत्यपिसूचितमस्ति । किं बहुना! विश्वमङ्गलार्थम् आवश्यकाः सभ्यताशिक्षणं गीताद्वारा एव सर्वेऽपि प्राप्तुं शक्नुवन्ति । अतः एव गीतायाः महत्वम् असदृशम् इति प्राज्ञाः निरूपितवन्तः। प्रकृतप्रबन्धः गीतोक्त आहारपद्धतिमुद्दिश्य वर्तते । जीवन निर्वहणं कर्तुं सर्वेऽपि आहारं स्वीकुर्वन्ति । आहारमनुसृत्य बुद्धिः प्रवर्धते सात्विकाहारेण सात्विकी बुद्धिःराजसाहारेण राजसी बुद्धि, तामसाहारेण तामसी बुद्धिश्च प्रवर्धते ।अतः आहारस्वीकारावसरे कीदृशाहारं स्वीकर्तव्यम् इति चिन्तनीयम् । इममेव विचारं गीतायाः सप्तदशोध्याये गीताचार्यः सम्यक् निरूप्य, जीवन सार्थक्यं कथमिति उपदिशति । अत्र भोजनलक्षण विषये श्री कृष्णेन एवमुक्तमस्ति "आहारः अपि सर्वस्य प्राणिजातस्य सत्त्वादिगुणत्रयान्वयेन त्रिविधाः प्रियो भवति" इति । लौकिकेषु न केवलं श्रद्धैव त्रिविधा आहारोऽपि सर्वस्य त्रिविधस्य लोकस्य त्रिविधः सात्त्विकादिरूपः प्रियो भवति। अत्र च क्रमेण रसादिवर्गः सात्त्विकः, कट्वादिवर्गो राजसः, यातयामादिवर्गस्तामस इत्युक्तमाहारवर्गत्रयम् । "ये सात्त्विकाः ते देवाः, ये तु राजसाः तामसाश्च ते विपर्यस्तत्वादसुराः अत्र सात्त्विकानां श्रद्धाहारयज्ञतपोदानानां परिग्रहार्थं राजसतामसानां वर्जनार्थं च तेषां प्रत्येकं त्रैविध्यं विधीयते। तत्रापि श्रद्धात्रैविध्यम् आहारत्रैविध्यं च प्रागेवोक्तम्।

**सात्विकाहारा:**

सत्त्वगुणोपेतस्य सत्त्वमया आहाराः प्रियाः भवन्ति । "आयुर्जीवनं, सत्त्वमुत्साहः, बलं, शक्तिः, आरोग्यं, रोगराहित्यं, सुखं, चित्तप्रसादः, प्रीतिरभिरुचिः एतेषां विवर्धनाः वृद्धिकराः ते आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धना"। मधुरादिरसयुक्ताः स्निग्धाः, स्थिराः, हृद्याः, आहाराः सात्त्विकाः भवन्ति । एते आयुष्यम्, आरोग्यं बलं, सत्त्वं, सुखं, प्रीतिं च वर्धयन्ति । सत्त्वमय-आहारात् ज्ञानवृद्धिः अपि भवति। सत्त्वमयाः आहाराः क्षेमकराः तथा सात्त्विकस्य पुरुषस्य प्रियाः ।

**राजसाहाराः**

अतिकटुः अतिआम्लः, अतिलवणादियुक्ताः तीक्ष्णस्वभावाः आहाराः राजसाः भवन्ति । ते सर्वदा दुःखं, शोकं, रोगं च यच्छन्ति । राजसप्रीतिविषयमाहारविशेषं दर्शयति ।श्रेयोर्थिभिः च एवं विधा आहाराः परिहरणीयाः ।

**तामसाहाराः**

दीर्घावधेः प्राक् सज्जीकृताः (यातयामाः), रसरहिताः, दुर्गन्धयुक्ताः, भुक्तशेषाः, यज्ञेषु अनर्हाः आहाराः तामसाः भवन्ति। एते सदा मोहम् आपादयन्ति ।

**उपसंहारः**

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्निग्धाः , स्थिराः, हृद्याः आहारा:सात्त्विकप्रियाः | सात्विकाहाराः प्रीतिविवर्धकाः। सात्विकाः हि धर्ममाचरन्ति । 'सत्यात् धर्मो भवेत् पुंसाम्' | भगवद्गीता सात्विक भोजनस्य आदर्शं दर्शयति । अयमेव श्रीमद् भगवद्गीतोक्तः आहारक्रमः । इयमेव आहारपद्धतिः लोकक्षेमाय भवति। सर्वेऽपि श्रीकृष्णस्य गीतानुसारम् आहारपद्धतिं सम्यक् विमृश्य जीवनेऽनुष्ठीयन्ते चेत् सर्वेऽपि रोगवर्जिताः भवन्ति,सर्वेषामपि आरोग्यवृद्धिः तथा आयुष्यवृद्धिः भवति , प्रत्येकः मनुष्योऽपि सद्गुणवान् , बुद्धिमान् च भवति। "जीवनं यापयितुं शरीररक्षणार्थमेव अहारः" न तु यथेच्छमाहारं भक्षणार्थमेव जीवनम्। सर्वैरपि सर्वदा इमं विचारं विचिन्त्य अनुष्ठीयन्ते चेत् क्षेमतरं भवेत् ।

## ग्रन्थऋणम्

1. श्रीमद् भगवद्गीता भाष्यटीकासंवलिता तथा भगवद्गीतालक्षालङ्कारः, सम्पादकः - डा॥ व्यासनकेरे प्रभञ्जाचार्यः, श्री व्यसमध्वसंशोशोधनप्रतिष्ठापनम,पाजकम हनुमन्तनगर, बेङ्ग्लूरु.

2.ಗೀತಭಾವಧಾರ: ಲೇಖಕರು: ಸ್ವಾಮಿ ಸೋಮನಾಥಾನಂದ, ಪ್ರಕಾಶಕರು: ಶ್ರೀ ರಾಮಕೃಷ್ಣಾಶ್ರಮ, ಪ್ರಕಟನೆಯ ವರ್ಷ:೨೦೧೮

3. ಗೀತಾ ಸಾರೋದ್ಧಾರ, ಲೇಖಕರು: ಶ್ರೀ ವಿಶ್ವೇಶ್ವರ ತೀರ್ಥ ಸ್ವಾಮೀಜಿ,ಪೇಜಾವರ ಮಠ

4.ಗೀತೆಯ ಗುಟ್ಟು ಅಥವಾ ಪರಮಾತ್ಮ ಯೋಗವು, ಲೇಖಕರು ಮತ್ತು ಪ್ರಕಾಶಕರು: ರಂಗನಾಥ ರಾಮಚಂದ್ರ ದಿವಾಕರ, ಧಾರವಾಡ, ಪ್ರಕಟನೆಯ ವರ್ಷ:1928

5. ಗೀತಾ ಸಂದೇಶ, ಲೇಖಕರು ಮತ್ತು ಪ್ರಕಾಶಕರು: ಆಲೂರು ವೆಂಕಟರಾಯರು, ಗೀತಾ ಕುಸುಮ ಮಂಜರಿ ಗ್ರಂಥಮಾಲೆ, ಧಾರವಾಡ. ಪ್ರಕಟನೆಯ ವರ್ಷ:1935

6. The Gains and Glories of the Geeta: P. Krishnamoorthy, Published by: The Executive Officer, Tirumala Tirupati Devasthanams, Tirupati-2001

7.-Gitasupersite-www.gitasupersite.itk.ac.in Translations and Commentories by:

https://doi.org/10.5281/zenodo.7258944

Paper 34

# कोंकणी-संस्कृताचे संबंध आनी साम्यता

**DR. ARAVIND CHANDRAKANT SHANBHAG**
Research Professor, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru
Email id – gsb7baleri@gmail.com

(ABSTRACT)

भाशेनची मानव समाजाचे संसकृताय फुल्या. आमगेले व्यवहाराक अगत्य जावनास्सूचे साधन हें भास. कोंकणी एक स्वतंत्र भास जावनू आसल्यारियी ती मराठी आनी बेंगाली भाशेचे एक रूप म्होणू थोडे लोकू सांगतात. भारताचे संसकृत जन्य भाशेंत कोंकणिवरी एक जावनासा. हें भाशेक ताजेची अनेक विशेषताय आसा. ध्वनी उच्चारणांतू संसकृताचे सावळी दिसता. देखीक : 'चारी पैसे संपादन करी', आनीक 'पणसाचे चारी गायी खात्ता' म्हणचे हें दोन वाक्यांतू 'चारी' शब्द आसा. दोन वाक्यांतुयी ताजे उच्चार दोन भिन्न अर्थ दित्ता. एक वाक्यांतू संख्यावाचक जाल्यारी आन्येकांतू चारी नामवाचक जाल्या. चार पैसे म्हणतना थंयी उच्चार जावचे 'चा' अक्षर तालव्य म्हळ्यार जिब्बेचे स्पर्शान शब्द भायरी येत्ता. पणसाचे चारी म्हणतना 'चा' तालव्य जाल्लेरीय थोडेशे दंत्याक्षर म्हळ्यार दांताचे सहकारान उच्चार करका जात्ता. अशें करना जाल्यार अर्थाक अनर्थ येत्ता. त्या देकूनू हांगा संसकृताचो संबध आनी ताजे ध्वन्यंग म्हणचे उच्चारण स्थानाविशी पाणिनी व्याकरणांत यवचे विचाराचे प्रभाव कोंकणिरी गाढ जावनू दिसता.

**प्रस्तावन**

सुभाषीतरत्न भांडागारातू एक प्रहेलिका अशी आसा.
एकचक्षुः न काकोयं बिलमच्छन्नपन्नगं|
क्षीयते वर्धते चैव न समुद्रः न चंद्रमा||
हाज्जे कोंकणी अर्थ सांगता. एक दोळो आसा कावळो नंही. बिळांतू वच्चाक इच्छा करता तरी दिवोडू नंही. क्षीण जात्ता, वाडता... जाल्यारी समुद्रयी नंही, चंद्रूयी नंयी. तशी जाल्लेरी हें कितें? आलोचना करा. मनशाले बुद्धीक चिंताप करचे तसले सवाल दोन पंक्तींतू आसलेरी दोन मिनिटांत जाप दिवचाक जायना. मनाक आनंद दित्तच जवाब कित्ते आसतले म्हणचे आश्चर्य आमगेले आंतर्‍यांतू जल्मू घेत्ता. हें उरतले, तें उरतले म्हणत सर्व चूक उत्तरच दित्तले. आखेरीक प्रश्न केल्लिले मनशानच जवाब सांगचे जात्ता. हें प्रहेलिकेचे उत्तर 'शिवणे यंत्राचे सूव' जावनासा.

प्रहेलिकाक प्रवहलिका म्हणचे आन्येक अर्थुयी आसा. हिंदींतू पहेली जाल्लेरी, कन्नडांतू ओगटू जात्ता. मराठिंतू उमाणा, उमाणे म्होणू आपयतात. उमाणेचो अर्थ कूट, उखाण, कोडे म्होणू शब्धकोशांतू सांगल्या. गोंयां तू हुमाणे, उमाणे या कुवाडे म्हणतात. हाज्जे अर्थ सुटनाशिल्लो प्रश्नो म्होणू जात्ता. एकवसतू आन्येक वसतुचे रूपारी सादृश्य सारके वर्णन कोरनू तो वसतू कसले उरतले म्होणू सोद्दुनू काडचाक हुम्मण म्हणतात. असले संसकृत आनी मराठी भूयिषट भास जावनासा आमगेली कोंकणी. गोमांतक कोंकण प्रांत्याचे चडावत लोकाले मायभास ती कोंकणी. इतले दीग पीठिका कित्याक म्होणू तमगेले मनाक दिसतले. ताक्का कारणयी आसा. कोंकणी भाशा वरवी संसकृताचे संबंध आनी साम्यता कशी आस्सा म्होणू सांगचे मेगेले लेखनाचे मूल उद्देश. त्या निमित्तान सुरवेक संसकृताषे प्रहेलिका म्हळ्यार प्रश्नदूती, विवादिका, वाचनकम तसले वेवेगळे अर्थ दिवचे उमाणे एक विशिषट लोकवेद साहित्य प्रकाराचे वळख हांगा केल्ले.

भाशेनची मानव समाजाचे संसकृताय फुल्या. आमगेले व्यवहाराक अगत्य जावनास्सूचे साधन हें भास. कोंकणी एक स्वतंत्र भास जावनू आसल्यारियी ती मराठी आनी बेंगाली भाशेचे एक रूप म्होणू थोडे लोकू सांगतात. भारताचे संसकृत जन्य भाशेंत कोंकणिवरी एक जावनासा. हें भाशेक ताजेची अनेक विशेषताय आसा. ध्वनी उच्चारणांतू संसकृताचे सावळी दिसता. देखीक : 'चारी पैसे संपादन करी', आनीक 'पणसाचे चारी गायी खात्ता' म्हणचे हें दोन वाक्यांतू 'चारी' शब्द आसा. दोन वाक्यांतुयी ताजे उच्चार दोन भिन्न अर्थ दित्ता. एक वाक्यांतू संख्यावाचक जाल्यारी आन्येकांतू चारी नामवाचक जाल्या. चार पैसे म्हणतना थंयी उच्चार जावचे 'चा' अक्षर तालव्य म्हळ्यार जिब्बेचे स्पर्शान शब्द भायरी येत्ता. पणसाचे चारी म्हणतना 'चा' तालव्य जाल्लेरीय थोडेशे दंत्याक्षर म्हळ्यार दांताचे सहकारान उच्चार करका जात्ता. अशें करना जाल्यार

अर्थाक अनर्थ येत्ता. त्या देकूनू हांगा संसकृताचो संबAध आनी ताजे ध्वन्यंग म्हणचे उच्चारण स्थानाविशी पाणिनी व्याकरणांत यवचे विचाराचे प्रभाव कोंकणिरी गाढ जावनू दिसता.

संख्याचे गणनांतूयी कोंकणीं त विशेष पळोवयेत. संसकृताचे एकम कोंकणीं त एक, तशीच द्वे-दोन, त्रीणी-तीन, चत्वारी-चार, पंच-पांच, षट-स, सप्त-सात, अषट-आट, नव-नौ, दश-धा, विंशतीः-वीस, एकविंशतीः-एकवीस, त्रिंशत-तीस, चत्वारिंशत-चालीस, पंचाशत-पन्नास, षषटीः-साठ, सप्ततीः-सत्तर, अशीतीः-अंयशे, नवतीः-णव्वद, शतम-शंबर आंकडेचेर नदर घाल्लिलेतेन्ना आमका कोंकणी आनी संसकृताचे संबंधाचे वांगडा साम्यताय अणभवाक येत्ता.

वैदीक संसकृतातुले पवते कोंकणीत पावता, चक्षते-चोयता, मन्यते-म्हणता, चवंती-चींवता, यत-इत्या, चमस-चमचो, दर्वी-दवलो आदी साबार शब्द कोंकणी भाशा प्रयोगांत आसा. वेदसूक्ताचे उच्चारांतू आश्चे उदात्त, अनुदात्त स्वराघात कोंकणीAतूय आस्सूचे विस्मयकारक विशयू. हाजेन वैदीक भाशेचो संबंधू कोंकणीक आसा म्हणचे स्पषट जाता. वैदीक संसकृत आनी कोंकणिचे तुलनात्मक अध्ययनाक कोंकणीचे प्राचीनता निर्णय करचाक साध्य जात्ता.

फूडे थोडे लोकानी कोंकणीक प्राकृत या महाराष्ट्री प्राकृत म्होणू आपयिल्ले. शौरसेनी आनी महाराष्ट्री प्राकृताचे मिश्ररूप 'आवंती'चे रूपांतर जावनू आशिले म्होणू भाशातज्ञ ऊहा करतात. उदाहरणेक संसकृताचे भूतकालरूप 'आगतः' म्हणचे शौरसेनिंतू 'आअदो' जात्ता. तेंच कोंकणीतू 'आयलो' म्होणू सांगतात. संसकृताचे 'व्रजती' शब्दाचो अर्थ 'वत्ता' म्होणू आसलेरी शौरसेनिंतू 'वच्चदी', महाराष्ट्री प्राकृतांतू 'वच्चई', कोंकणीत 'वच्चई' रूप सारके जावनासा. हाज्जे प्रभावान वच्चदी, करदी, म्हणदी असले पदपरयोग रूढीक आयिले साध्यता आसा.

संसकृताचे 'हसत' शब्दाक हात या हाथ म्हणचे अर्थ येत्ता. हाज्जे तृतीया विभक्ती 'हसतेन' एकवचनरूप कोंकणीत 'हात्तान' या 'हात्ताने' म्होणू मराठिंत 'हाताने' गुजरातिंत 'हाथे', हिंदीत 'हाथसे' रूप घेत्ता. हांगा सूक्षö्म जावनू पळयल्यारी कोंकणी आनी वiराठिचे रूप अगदी लागीच आशिलेतशी या एक्कचिशे जावनू दिसता. संसकृताचे 'गतः' म्हळ्यार गेल्लो शब्द आद्यपराकृतांत 'गतो', शौरसेनिंत 'गदो', नंतरचे प्राकृतांत 'गओ', पोरने हिंदीत 'गयो', नवे हिंदीत 'गया' तशीच कोंकणीत 'गेलो' आनी मराठिंत 'गेला' जावनाश्चे स्पश्ट आसा. कोंकणिचे 'आयलो' मूळरूप मराठिंत रूपांतर जावनू 'आला', शौरसेनिंत 'आअदो', संसकृतात 'आगतः' म्होणू आसा. हांगा संसकृताचे 'त'कार, शौरसेनिंत 'द'कार, कोंकणीत 'ल'कार जात्ता.

तशीच कोंकणी भास अर्धमागधी या पैशाची भाशेचे मूळाथावन जल्म घेतल्या म्हणतात. ताक्का चड कसले आधार मेळना जाल्लेरीय शौरसेनी आनी प्राकृत संसकृताचे अपभ्रंश रूप म्हणयेत. पुराणांत आश्चे थोडे काणियेंत संसकृताचे फाटभूंयेर कोंकणिचे मूळांपाळा आशिले सोद्दूयेत. उदाहरणेक 'मंगेश' शब्द 'मांगिरीश' शब्दाचे रूपांतर म्हणतात. ईश्वरू पार्वतीक परीक्षा करचाक वागाले रूपान गर्जन करत आयिलेतेन्ना ती भीवनू 'त्राही मां गिरीश' म्हळ्यार 'पर्वतराया माक्का राक' अशी सांगिले 'मां गिरीश' संसकृत प्रार्थना 'मांगिरीश' जाल्या म्होणू काणी सांगतात.

आन्येक काणिंत परशुराम 'त्रिहोत्रपूर' दाकून थंयिचे निवासी जावनाश्चे धा गोत्राचे ब्राह्मणांक तांगेले कुलदेवांगेले सैत आपोवनू यवनू गोंयात स्थापन केल्लो म्होणू आसा. माक्षी बिहाराचे एक प्रदेशाक 'विदेह' आनी 'मिथिला' म्होणू आपयताशिले. उपरांत तें नांव 'तिरुहूत' जाल्या. काश्मीरचे 'त्रिगर्त' जागे थावन आयिले ब्राह्मण गोंयात आशिले. जाल्लेरी हें 'त्रिगर्त' काश्मीरांत ऊरनाशी पंजाबचे ईशान्याक चंबा थावनू कांगडा मेरेन आश्चे जागेरी उरचे पोरने नांव म्हणतात.

धावे शेकडेंत कोंकण थावनू सैन्य सहीत बंगाळाक वचूनू राज्य स्थापन केल्लिलो 'सेन' वंशाचे रायाले राजधानिचे नांव 'गौड' म्होणू आशिले. पाणिनिले अषटाध्यायिंत यवचे 'गौडपूर' प्रांत्य हेंच आसतले. हें सगट पुराण आनी धार्मीक साहित्यांत यवचे संसकृत शब्द कोंकणी लोकांक संबAध पाविल्लेक हें दोन भाशामधें अविनाभाव संबंध आशिले आमगेले नदरेक येत्ता.

गोंयाचे सारस्वत ब्राह्मण शीव, शक्ती आनी महाशेष असले देवांगेले आराधना प्राचीन कालादाकूनू करत आयिलेक खूब पुरावो आसा. कोंकणी भाशिकाले चडावत कुलदेवळां गोंय आनी कर्नाटकांत स्थापन कोरनू अनादी कालादाकूनू थंयी पूजा, पुनसकार आनी वेवेगळे धार्मीक विधिविधान चलोवनू होरत आशिले सगटांक कळीताक आसा. तें देवळांत विशेष रीतीर घडचे होम-हवन, भागवत-प्रवचन, कीर्तना, भजन आदी गोषटिंत संसकृत प्रधान कोंकणी भाशेचे प्रयोग अनूचान रीतीर चलत आयल्या.

देवाक प्रार्थना करत कांयतरी मागणी दवरतना कोंकणी भाशा वापरलेरी बी तांतू सत्तर ठक्केपशें चड शब्द संसकृताचे उरता. अशें कोंकणी भाशेचेर संसकृताचो प्रभाव कशें आसा म्होणू सांगपाक आधुनीक कोंकणी साहित्यांतूय उदाहरण मेळता.

एकशे धा वरशा माक्षी बंटवाळचे बोळंतूर कृषण प्रभू हान्नी बरैले 'चंद्रहास' नाटकांत खूब संसकृत पदां आनी श्लोक मेळतात. देखीक नाटकाचे सुरवेचे वृत्तांतू-

श्री शेषाचलवास वेंकटपती श्री लक्षीनाथ सदा|
दासाल्या हृदयाक भक्तिधन ते दी दान मुक्तपरदा||
दोषांतूनतिदूरकरी कृतिहीदोषाद्री वज्रायुधा|
हे सर्वांतरयामी कृषण प्रभू तूं सुक्षेमदी सर्वदा||

म्होणू म्हणतना दासाल्या हृदयाक, दी, तूं असले चार शब्द कोंकणिचे मेळता. वरलेले शब्द सगट संसकृत मूळा थावन कृषण प्रभुनी कोंकणीक आपणायल्या. मुकारसुनू आन्येक पद्यांत तान्नी अशी बरयतात.

गरूड वाहना वंदना| मुरमर्दना||पल्लवी||
वेद उद्दार कोर्नू| साधनी कूर्मू जावनू|
भूधरू म्होणोनू प्र|ह्लादाक राक्किल्या||१||
घेवनू भूदान वग्गी| दीवनू भूदेवांलाग्गी||
चोवनू सुग्रीवाक्मन| पावनू राकिल्या घन||२||
कपटी कंसाक मार्नू| त्रिपूर स्तीयांक चोवनू||
अपरूप व्रत तूवें| अपहार कर्निवें||३||
सृषटी भ्रषटली म्होणू| श्रेषट घोड्यारी चोणू|
दुषटांक शिक्षा दीवनू| शिषटांक राक्तल्या||४||
अबली दासाक पूर्ण| अभय दीवननुदीन||
अभव मूरुती कृषण| प्रभू करी रक्षण||५||

हांगा कोर्नू, जावनू, म्होणोनू, राक्किल्या, पावनू, मार्नू, चोवनू, म्होणू, चोणू, दीवनू, करी, राक, असले धा-बारा क्रिया संबंधीत पद कोंकणीत दर्‍नू वरलेले सगट संसकृतांतूय उरोवनू घेतल्या. तसलेच आन्येक पुसतक 'श्री कृषण सत्यभामा संवाद' म्होणू कृषण प्रभू बोळंतूर हान्नी बरैलेले प्रथमाध्यायांतू यवचे श्लोक अशी आसा.

कदाचीत देवकी पुत्रो मृगार्थीः वनमागतः|
कंदर्प शरमोहेन प्राप्तस्सत्यालये निशी||
कवाटं सुस्थिरं बध्वा सुप्तासा सत्रजीत सुता|
कवाटो परिसंताड्य अंगुल्यग्रेण माधवः||

हें श्लोक कोंकणीक येत्ताना मंदरधर धाटिंतू

कृषणाले चरणमनांतू उल्लासान मृगबेटेक| घोरडवेंतू||
गेल्लोलो कृषणनेक|| गोल्लांतै बैसुनू| उल्लोनू अपरात्री|
जाल्लेली कोळनू वग्गी| येवनू घरल्यागी||१||
हात्ता बोट्टानेद्राचा| बागलारनू|| पत्यान मार्नाप्पोच्या||
कृत्याक हास्सुनू| सत्यभामेन वी|| चित्र रीतीन निमगिले||२||

म्होणुखंयी बी अर्थभंग जायनातशे केल्लिले अपरूपायेचे प्रसंग जावनासा.

१२ वे शेकडेंतू आश्यिलो संत ज्ञानेश्वर हाणे बरयिल्ले 'ज्ञानेश्वरी' ग्रंथ कोंकणी या मराठी की म्हणचे वाद आनिकयी चाल्तिंत आसा. तांतुले एक श्लोक-

ओं नमोजी आद्या| वेद प्रतिपाद्या|
जय जय स्वसंवेद्या| आत्मरूपा||१||
देवा तूंची गणेशू| सकलमती प्रकाशू|
म्हणे निवृत्ती दासू| अवधरिजो जी||२||
हें ब्रह्मशब्द अशेष| तेची मूर्ती सुवेष|
तेथ वर्णवपू निर्दोष| मिरवत असे||३||
स्मृतितेची अवयव| देखा अंगीक भाव|
तेथ लावण्याची ठेव| अर्थशोभा||४||
अषटादश पुराणे| तीची मणिभूषणे|
पदपद्धती खेवणे| प्रमेय रत्नांची||५||

हांगा आश्चे तूंची, म्हणे, तेची, तेथ, असे, देखा, ठेव, खेवणे आदी शब्दां कोंकणी आनी मराठिंतू वापरतात. महाराषटç प्रांत्याचे कोंकणी लोकांगेले उलोवणिंतू मराठी शब्द प्रयोग जात्ता. अशे आसताना 'ज्ञानेश्वरी'तू मेळचे असले बहुभाशीक शब्दाचे निमित्यान त्या कृतिचे उत्कृषटता आनी बरयणाराचे कवी प्रतिभा लोकामुकार झळकता. तशीच संसकृताचे प्रभाव कोंकणी आनी मराठिचेर कशी आसा म्हणचे आमका वळख जात्ता.

अशें संसकृत शब्द आनीक कोंकणी शब्दांतू सादृश्य, साम्य आश्चे स्पषट जात्ता. 'तव नाम कीम'? म्हणचे 'तुगेले नांव कित्ते'? शूर्प-सूप , अंगारः-अंगारो, कलश-कळसो, दर्वी-दायी, जीरक-जीरे, हरिद्रा-हळदी, लशुनः-लोसूण, चणकः-चणो, अपूप-आप्पो, कार्पास-कापूसू, तंडुलः-तांदूलू, उदकं-उद्दाक, कुसतुंबर-कोत्तोंबरी, सीवनं-शिवण, मार्गः-मार्गू, द्वारः-दार..... इत्यादी नित्यजीवनांतू व्यवहार दृषटीन प्रयोग करचे शब्दांतू संसकृत भूयिषट कोंकणी पदां हजारो आंकडेत मेळता.

**Bibliography References:**

1. Subhashitha Ratna Bhandagara
2. Chandrahasa : Bolanturu Krishna Prabhu
3. Srikrishna Satyabhama Samvada : Bolanturu Krishna Prabhu
4. Jnaneshwari : Santha Jnaneshwar

https://doi.org/10.5281/zenodo.7249799

Paper 35

# आंजेल - कादंबरिची विशलेषण

**Flavy D'Souza**
Research Scholar, Institute of Social Sciences and Humanities Research Centre, City Campus, Pandeshwar, Mangaluru
E-Mail ID -freesiahome@gmail.com

(ABSTRACT)

पावल आलवारीस आनी इजाबेल्ला डिसोज हांचो पूत जावन २५-०७-१९१६ बंटवाळ तालूकांतल्या ओमजूर गावांतल्या कैगूरी म्हळ्ळे कडेन जल्म घेवन इंटर मिडियेट शकाप जोडन पत्रिकोद्यम आनी साहित्य कान्य क्षेत्र घेवन आपलें जीवीत जेयेवन १९८९वेर तो मरण पावलो. ४० वयर कादंबरी,१०० वयर मटव्यो काणियो बरेयल्यात. भाषंतर क्रतियो ०४, आनी ताच्या जिवीताची आत्म चरित्रा ताणें लिकल्या.२० वर्सानीं सुमार ६० पुसतकां ताणें प्रगट केल्यांत. ह्याच्च खातीर मंगळूरांत मित्र भवन आनी उद्योग भवन प्रेस म्हळ्ळो छापकानो सुरू केलो.१९५८ वर लूर्ड्स रोम, इटेली, फ्रान्स, आश्ट्रीया जर्मनी, बेलजियं गावांत आसच्या यात्रीक जाग्यांक भेट दिल्ल्या.१९६० इस्वेंत रषयाच्या मासको, ताषकेंट तसल्या शहरांचे जीवन पोळेयलां.

**प्रस्तावन**

भारतांतल्या साहितिंक फावो जांवची अती उन्नत प्रतिषठीत प्रशसती म्हव्यार ज्ञान पीठ प्रशसती. ही प्रशसती भारताचा संविधानातल्या अटव्या वोळेरिंत उल्लेख केल्ल्या २२ भाषेंतल्या अत्युत्तम साहित्य कृती व समग्र साहितीक देणगी दिल्ल्या भारतीय नागरिकांक फावो जाता.

१९६५ थावन २०२१ पर्यांत ५७ भारतीय नागरिकांक ही प्रशसती फावो जाल्या हांतू कोंकणी साहित्याक ४२ व्या क्रम संख्याक मानेसत रवींद्र केळेकर हांका २००६ वेर आनी क्रम संखो ५७ दामोदर मौझो हांका २०२१ वेर फावो जाला.

ज्ञान पीठ प्रशसती तसले प्रतिषठीत प्रशसती लाभल्ल्यो कृती केवल दोन मात्र. इतर भासेंच्या साहित्यक तुलन केल्यार कोंकणी साहित्यांत बर्पां उणीं आसात. तशें आसतां विमर्सो कर्तेले आनी विशलेषणकार उणीं आसात तशें दिसता.

हांव संशोधन कर्च्या ह्या वग्ता आंजेल म्हळ्ळी कादंबरी विशलेषण करुंक म्हका एक अवकास मेळ्ळा. मानेसत जोकीं संतान अलवारिसान (जो.सा. अलवारीस) बरयिल्ली कादंबरी कोंकणी नाटक सभा मंगळूर हाणीं १९५० डिसेंबर महिन्यांत कानडी लिपियेंत प्रगट केल्ली.

## मानेसत जोकीं संतान अलवारीस

पावल आलवारीस आनी इजाबेल्ला डिसोज हांचो पूत जावन २५-०७-१९१६ बंटवाळ तालूकांतल्या ओमजूर गावांतल्या कैगूरी म्हळ्ळे कडेन जल्म घेवन इंटर मिडियेट शकाप जोडन पत्रिकोद्यम आनी साहित्य कान्य क्षेत्र घेवन आपलें जीवीत जेयेवन १९८९वेर तो मरण पावलो.

४० वयर कादंबरी,१०० वयर मटव्यो काणियो बरेयल्यात. भाषंतर क्रतियो ०४, आनी ताच्या जिवीताची आत्म चरित्रा ताणें लिकल्या.२० वर्सानीं सुमार ६० पुसतकां ताणें प्रगट केल्यांत. ह्याच्च खातीर मंगळूरांत मित्र भवन आनी उद्योग भवन प्रेस म्हळ्ळो छापकानो सुरू केलो.१९५८ वर लूर्ड्स रोम, इटेली, फ्रान्स, आश्ट्रीया जर्मनी, बेलजियं गावांत आसच्या यात्रीक जाग्यांक भेट दिल्ल्या.१९६० इस्वेंत रषयाच्या मासको, ताषकेंट तसल्या शहरांचे जीवन पोळेयलां.

**लोकानी दिल्लें पुरासकार आनी मान**

१) १९७२ इस्वेत मंगळूर टौन हालांत रूप राग संस्थ्यान
२) १९७३ आकटोबरांत डान बोसको सालांत कोंकणी नाटक सभेन
३) १९७४ फेबरवरिंत मिलार मैदानार आखील भारतीय कोंकणी परिषदेन
४) १९७८ इस्वेंत राकणो पत्रान डान बोसको सालांत
५) १९८० इस्वेंत कला संपत संघटनान डान बोसको सालांत
६) गोंयच्या भाषा मंडळीन केंद्रीय साहित्य अकाडेमीन ताका गौरव सांदो म्हण मानून घेतला.

गूंड चिंत्पाचो उण्या उलोवण्याचो, शिसते, शिसते भरीत जीवनाचो व्यक्ती जो.सा. अलवारीस. अपल्या कादंबरी मुखांत्र, विनोदां मुखांत्र काणिये मुखांत्र, लेखनां मुखांत्र कोंकणी- भास-साहीत-ताणें ग्रेसत केलां. मित्र आनी झेलो पत्रां मुखांत्र आनी अपल्या स्वंत प्रकाशानालय मुखांत्र शेंबोरां घटल्यान लेखक-लेखकिंक अवकास कर्न दिला. ताच्या क्रतियांक लिपीक लागोन पुरासकार मेळोवंक नां तरी लोकाच्या काळजानी स्थीर स्थान दिला.

**विषय मंडन-**

बरवपी जो. सा अलवारीस हाणी लीख ल्लीं आंजेल कानडी लिपिंत प्रथम कोंकणी कादंबरी १९५० वेर कोंकणी नाटक सभा मंगळूर हाणीं प्रगट केली.
काणियेचें थळ- प्रारंभार घटाचें मूळ जावन उपरांत मंगळूरांतलें बोंदेल जावनासलें.
काणियेचो वेळ काळ -दुस्रें महा झूज.

**कथा विशलेषन**

आंजेल मांय सुनेची कथा
कोंकणी नाटक सभा मंगळूर हाणिं१९५० वेर पयलो छापो छापला. दुस्रो छापो२००८वेर तांच्या अनुमतेखाल सां लूवीस कोंकणी संस्थ्यान प्रगट केल्ल्या कादंबरिंत ९अध्याय आसोन २४५ पानां आसात. ह्या कादंबरिचें मोल रूपै १००/ जावनासात
प्रक्रतिच्या पासलेंत जियेवन आस ल्लें ग्रेसत कुटां उपरांत तें अमाल पियोण्यांत पिड्ड्यार जाल्लें पिंत्रयलां.उपरांत परत शहराक येवन चाल गेणिच्या हिताल भटाचेर वावर कर्न आस ल्लें रीण फारीक कर्न रोज बायेक अपल्या सासू मांयक आनी पुताक पोसलें.रोज बाय चाल गेणिचेर वावर कर्न संतोसान रिणाविणें जियेल्ल्यांत तर रोफीक त्या जाग्यार वावर कर्न जियेवंक कित्याक सक्त जालोना म्हळ्ळें लेखकान विवरुंक नां.आपली पतीन आंजा सार्क्य आंजेला वयर अपल्या ईषट जावन त्या नांवार धनी नोरबट ताची सोभाय पळेवन भुलुल्लो.ईषटाची बायल अपणाची कर्न घेजे म्हण नोरबट विलन रूपार अपलो पात्र खेळता.रोफी असल्यार अडकळ म्हण ताका पायस दाडन पाटीं येनातल्या गावाक दाडचें आलोचन कर्न तार्वाटी जावंक सगळी मांडावळ कर्ता.चलियेची सोबाय,बरे गूण,बरें नडतें,पसंद जावन तो तिका अपणाची कर्न घेवंक आलोचन केल्ली.विलन म्हळ्ळ्या फरा लडाय, माराफार, झगडें,अशें विविंगड कूस आसतात.तसलें द्रश्य नासताना सतेवंता बरीं नाटक खेळोंक सुर्वात केली.मोगा मायपासान हासोन खेळोन आस ल्लें काजारी जोडें विविंगड जावन कषटांच्या सागोरांत बुडलीं.अशें जो.सा.अलवारिसान वेगिंच्च ह्या प्रकार घुंवडी दिली.

**अवस्वर २**

दूसऱ्या अवस्वरांत लेखक रोपी तार्वाटी जावंक गेल्ल्या उपरांतली काणीं पिंत्रायता. सबार दीस रोपिचा कागदाचा येण्याक राकाशें कर्ता मांय सुनो सांगाता जियेतासताना कितेंच्च आडकळी जायनाशें अवय धुवे बरीं पात्र दाकयता. तिका तांकाना तरीजतन घेता म्हळ्ळें लिख्ता. सून तीं खरिच्च अवय म्हळ्ळें बरीं तिची जतन घेंवची पात्र लिख्ता. कुटमांत अयिल्ले कषट दोगांयी मोगान स्वीकार कर्न जियेंवचें आदर्श पण वाच्याक जाणा जांवच्याक अवकास कर्न दिलां.

पोटाची भूक धांबवच्या खातीर रीणा वयर रीण जाताना मालघांड्यांचो नग विकून रीण फारीक कर्तात आशें दीस वेता वेताना रीण वाडोन वेता गालुंक मुसतायकी ना पडोंक जाल्लें घर आशें तांची बेजाराय आनी खंत व्यक्त कर्ता. लेखक इल्लें इल्लें कषटांवे दृश्यां लिखून निमाणें कितेंच्च नातलें विवरिता.

बोंगसाव्याचा सालून रीण फारीक कर्चें खातीर कांकणा भितर गाल्ता. तांचा लागीं आसल्या सर्पळी विशीं दोळे घालन घरा येवन लूटुंक प्रयत्न कर्ताना हीरो बरीं धनियाचो शेणय थै येवन पावता. ह्या मनशा मुखांत्र देवान राकलें म्हण समाधान पावतात उपरांत धनी आनी शेणय सांगाता मेळोन घडलें कार्ययोजन यशस्वी कर्च्याक विवीध वाटो सोधतात. बऱ्या मनाचा मनशा बरीं वेस पांग्रून आसलो तरी रोज बाय आनी अंजेल ह्या वेळार तांका पात्येलीं.आशें शेणै आयिल्ली गजाल कितें म्हण सांगच्याक मुखार सरलो.वकलांगेर धनियान कामागारांक धाडचें कित्याक म्हण तुमी जणांत म्हणोन वोपारिंनी शेणय मामाचो पात्र खेळता.धनियान धां दिसां भितर गेण वसूल करिनाय जाल्यार ताचें लागचें वसूल कर्ता आनी गोमट्याक धर्तां कामांतलो काडन उडयता म्हण सांगला आशें रोज बायेक सिंतिमेंताळ रीतीन भरलें उपरांत इतलो तेंप थंड रावलो एक आजाप म्हणाजाय म्हणोन धनियाची धारुणकाय व्यक्त कर्तां आशें दोन द्वंद्व रीतिचा उलोवन्यांक अंजेल सवाल कर्ता.

बाकी असल्या देव्याक सर्पळी दीवंक तयार जाताना तीं आयापणाची बेंजार जाल्ली काजाराचे बेसांव पडोन आशें देंवचार सांगाता असोन देंवचार उलोंवचो पात्र लिख्ता. आशें शेणय अपल्या सवायेचेर उलयताना चूक जातागी विसारल्यार युक्तेन बुद्धंत म्हळ्ळो चित्रीकरण केलां. अतां अंजेलान धनियाक मेळाजे, धनियाचा घरा काम करिजे, आशें नोरबट अंजेलाक सांगाता मेळ्ळ्यार विविंगड अळ्कास कर्न दीवंक प्रयत्न कर्तां, एदोळ पऱ्यांत देव भिरांतिचा मनशा बरीं अस ल्लो नोरबट अपलो रंग दाकयता. रोपी पाटीं येना म्हळलें जाणां जावन रोज बाय आनी अंजेलाक गेण वसूल करिनासताना तांदूळ दीवन तांका तांचे सर्शीं वोडुंक प्रयत्न कर्न आसा. धन्याक फुलां घाल्ल्यार सर्व कामां सलीस जातात आशें विवीध मतलब कर्न रोज बअयेक सत म्हण पात्येंवचें बरीं कर्तां लेखाकान एदोळच्च तिळसिल्ल्या प्रकार अंजेलाक हो विषय समजालो. पूण रोज बायेचो पात्र विशिषठ रीतीन ह्या वेळार रचला. अवयच्या जाग्यार आसली मांय सुखी जीवनाक लागोन अंजेलाक द्वेषिता तिचो अधिकार चलयता, आनी अपूण सासू मांय म्हळ्ळें व्हडपाणाक अंजेलाक धनियाचा घरा धाडचें आश्वासन दितां हांहासर सासुमांयक अपलो अधिकार, गर्व हंकार असचें बरीं बरयलां सासू मअंयन सांगले आयकाजे आनी तिचा हाताखाल असाजे म्हळ्ळें लेखाकान तिळसिलां आशें विभिन्न रीतिचे पात्र हांगासर आयल्यात बोंगसाव्याचो सालू शेणय आनी धनी ह्या मांय सुनेक असल्या पासांत गाल्चें प्रयत्न केल्लें आसा.

समाजेंत जांव समुदायांत कोणियी एकलो कषटांत सांपडलो म्हणताना सांगात दिंवच्याकी तांका दुर्सोंचे खेंडून उलंवचें, आनी कषटा वयर कषटांत घाल्ल्यांत विकृत्पण दाकयतात म्हळ्ळें दिसता

धनी नोबर्ट सोभायेची भावली अंजेलाक अपणाची कर्न जियेंवची एक च्च आशा देकून तीं ज्यारी करुंक एदोळ वरेग दिसाक तशें रातीक सपणांत अंजेला विशीं नियाळन तिचा मोगाक राकोन रावलो म्हळ्ळार ग्रेसतकाय पद्वी ,आसल्ल्या व्यक्तीक कितेंयी आशेव्येत तें चूक न्हय म्हण इगर्ज मातेचा नियामा प्रकार सगळी मांडावळ जावंक जाय तें लेखक कळीत कर्तां आशें सामान्य कुटमांत येंवच्या कषटांची गत एका वर्नीं एक कषट वाळतात म्हळ्ळें लिख्ता.देवाचा भासावण्यांची उचार्नी कर्तां देवाक कषटा आकांता वेळार उलो मरल्यारी कषट उणें जायनांत तरी तें सोसुंक देवाची कुर्पा लाभता म्हळ्ळें जो,सा अलवारिसान भावाडताचा पात्रां द्वारीं तिळसिलां.

**<u>अवस्वर ३</u>**

तीसऱ्या अवस्वरांत रोपी तार्वाटी जावन गेल्या उपरांत ४ महिन्यानी अयिल्ले पत्र आनी ७५ रुपय धाडल्या उपरांत जिवंत आसागी नांगी म्हळ्ळी खबर च्च ना. अंजेल अपल्या घरांत राकोन राकोन सदां मागणें तेसांवा. नोवेना कर्नच्च आसा. हांगासर लेखक अंजेलाचे मागणें आनी अखंड भर्वसो लिख्ता. रोज बाय देव यी जाय देंवचार यी जाय म्हळ्ळ्या चिंत्पाची जावनासा, मागणें रजार केल्लें बरिच्च शेणैचा उत्रांक पिस्वोन ग्रेसत कायेचा आशेन अंजेलाक कशें पुणी कर्न म्हळ्ळ्यार मोगान उपरांत लडाय कर्न धनियाचा ताबेन फावोंक प्रयत्न केल्लें.

व्हडिलाचे उतार मिर्वोन चल्ताय आनी शांतिपणाचो खेळ खेळताय म्हळ्ळ्या निषटूर उत्रांनी लेखाकान लिकल्यांत. अक्रेक रोज बाय सलवल्ल्या वेळार तीं बांयक उडचें प्रयत्न कर्तां. तशें निषटूर व्यक्तित्व रूपीत जाता.

डेल्ली नावीक मुख्या ठाण्या थावन रोपीन असचें तारूं बुडोन मिस्सिंग म्हण खबर आयल्या, तो मेला म्हण येवंक ना, भावाडतान आनी भर्वस्यान तुमीं मागणें करा. कुद्रू असल्ल्या जाग्यार तो जिवंत आसा म्हण पात्येया. हांगासर पेदो भावडतान भर्वस्यान सांग ल्ले वाचताना लेखक क्रिसतांव पेद्याक पात्र दिल्लें बरीं भोग्ता.

**<u>अवस्वर ४</u>**

चवत्या अवस्वरांत लेखाकान धनी नोरबट शेणै आनी निक्कुचो पात्र लिख्ता. ह्या तेगांयी मनशां लागीं अंजेलाचो विषय सोडल्यार दुस्रो विषय ना. धनी नोरबट अंजेलाचा मोगान आसोयी पिसो जाला म्हण लिख्ता. ना तर बहुशा काणी अखेर जावंक लांभ काळ घेता म्हळ्ळ्या इराद्यान म्हण समजोव्येत शेणय शिंतऱ्या चो सुळियो तयार कर्च्या वावराक नांवाडललो म्हण जाल्लो. अपलो इषट म्हण लेकचो रोपी अतां ताका आड जालां पूर्व योजीत कर्न ताका धाडलें ताका पाटीं येंवच्याक न्हंय म्हणता. कितलें खर्च जाल्यारी अंजेलाक अपणाची कर्न घेंवची एक च्च आशा आशें रोपिची मर्णाची खबर आयिल्ल्या शिवाय अंजेलाक सुलाबायेन पासांत शिर्कावंक जायना देकून नेवल हेड क्वाटर्साक बरवन खबर हाडच्याक कागद बरवन धाडलें. टेलिग्रां पेद्यान हाडन दिल्लें गांवार सगळ्यान प्रसार जाल्लो. आशें दुखेसत जाल्ल्या कुटमाक भुजावण पाटवंक धनी आनी शेणय रोज बAैेचा घरा वचोंक तयाराय कर्तां.

लेखाकान हांगासर रोपी मरण पावला, धनी नोरबट अंजेलAचा संगी लग्नांत एकवटता काजारी स्त्रीयेचो दादलो जिवंत आसताना परत काजार जावंक आडकळ आशें विचार विवरिला सांगाताच्च धनी अंजेलाचे गूण धैर मेचवाता आनी वर्णंक लेखाकान प्रयत्न केलां.

**<u>अवस्वर ५</u>**

ह्या अवस्वरांत टेलिग्रामाचो विषय मेला म्हळ्ळें स्पषट ना तरी सगळ्या गांवार प्रसार जाली. सबार जणां घरा येवन भुजावण पअटवन गेल्लीं आवय बापय येवन दुवेक अपवन वर्च्याक विचारलें. टेलिग्राम आयिल्ल्या उपरांत मेला म्हळ्ळी खबर मतिंत दवरून फितिस्पणांची खुणां तिका झळ्ळ्काल्यांत म्हण सांग्ता. रातीक चलोन येंवचें दडबडे पर्परे आशें तिचा फितिस्पणा विवरिताना अंजेल वैजङानीक जवाब जावन आवाज कर्चो, मनशान चल ल्ले बरीं चल्चें, सेजार्च्या माडतिनामा गेल्या धडभडे जांवचे घरा पाटल्यान असच्या केंळब्याचीं पानां वोडन खाताना म्हण जवाब दिता. हांगासर लेखाकान टेलिग्राम विषय लिखून रोपी मेला म्हळ्ळी खबर सगळ्यांनी प्रसारून सामाजीक दसतुरा पर्माणें घोव सरल्ल्या धुवेक पाटीं अवय बापय चा घरा (कुळारा अपवन व्हर्चें विवरिलां) हांगासर वैजङानीक रीतीन विशलेषण कर्चें तितलेंच्च स्वाभावीक म्हळ्ळें वाचप्यांक कळीत केलां.

रोज बाय आनी शेणय अंजेलाक नाडच्याक विवीध रीतिचे उपाय घेवन पेचाडचें आनी एक्सुरी अंजेलान दोगां देंवचाराचेर झजा जाय जाल्यार अंजेलाचे धैऱ्य विशेष जावनासा. तें खंडीत देवाचा कुर्पेचे बळ म्हळ्ळे लेखाक कळयता.

ह्या नमुन्यार सामाजीक व्यवस्था आसतना बऱ्या मौल्यंनी लोक कशें जियेतलो? कित्याक जणां स्त्रीयांक असलें भावाडताचें भर्वस्याचे जिवीत असा म्हणोन लेखाकान सामाजीक मौल्यां विशीं जागृती दिल्या.

अवय धुवे सार्कें आसल्या रोज बाय अनी अंजेलाक मनां भेध कर्न शेणय रोज बाये संगी मेळोन हर प्रयत्न कर्न सलवाता निमाणें धुवेक भेट करुंक अपयतोलो म्हण सांगोन कळया

ह्या अध्ययांत देवाचेर अखंड भर्वस्यान असल्या अंजेलाक शेणय अनी रोज बाय अपल्या देंवचाराचा हिक्मतेन हर प्रयत्न केल्ल्यारी लेखक देवाचेर विश्वास दवरल्यांक केदिंच्च सांडिसोना म्हळ्ळें भर्वस्याचे कीर्ण फांक्ता.

**<u>अवस्वर ६</u>**

ह्या अवस्वरांत मांय सुनेचो जाल्लो खंदर चडच्च जाला शिवाय उणें जांवचें दिसाना रोज बाय शेणयन सांगाता मेळोन रागान दडबडे भेषटावणें रडणें आशें केल्लें वर्वीं विरार जावन खाल जातेली म्हळ्ळें चिंताप तिचें, हें सगळें जाणां आस ल्ली आंजेल गण्णेंच्च केलेनां तिचे जवाब्दारेन करिजाय जाल्लें काम कर्न देवा मुखार रोपीक दिल्ली भास सांबाळच्याक तीं तयार आस ल्ली पादऱ्याब कुमगार दीवन उपरांत अर्गां आराधन जातेच्च पादऱ्याबान टेलिग्राम आयिल्लें विशीं विचार्न वाचताच्च मिस्सिंग मेला म्हण दिवंक ना आशें बचाव जांवचो शेंबरांत धा वांटे आसात म्हळ्ळें आयकोन भर्वसो उदेलो ह्या भर्वस्यान मुकल्या दिसांनी पोटाचा ग्रासाक व्यवस्था कर्च्या मांयलागीं अनुमती विचार्न दुर्स्या दिसा सकाळीं उटोन सगळीं घर्चीं तयाराय कर्न कामाक भायर सरलीं.

अंजेलान कामाक वेचें मन नात ल्ले असकत चिव्या बरीं तीं चलोन वेताना भिर्मतेन दोळ्ळांक दुखां लेगून आयलीं सबार कडेन काम विचार्न गेल्यारी काम दिंवचें सोडन तिचो तारिपो कर्च्याक पडलीं धैं हऱ्येका गाद्यांनी अंजेलाक उलोवन तमाषे कर्न खेळकुळां केलीं शिवाय काम दिलेनां चवत्या गाद्याक वेताना तर्नाट्यान पळेयिल्लेंच्च गर्ज समजोन कितेंच्च उलयनासताना गाद्यांक देंव म्हण सांगोन पाशार जालो आशें गाद्यांत तिका काम करुंक तांकलेना पूण सांग्त्यांनी कुमक कर्न सांज म्हणासर तिका सुधार्सिलें. ह्या वेळार तिणें कठीण कषट भोगले आशें दुस्रो दीस उदेल्या उपरांत जाग जाल्ल्यन कामाक वेची अलोचन केलिना.

धनी नोरबटान कुल्कराक धाडन दोन कळसी तांदू दीवन धाडला उपरांत दनी येता म्हळ्ळी खबर कळताच्च अंजेलाक खंयसरी वचोंक जायनांशें रोज बायेन एकेका दिसा एकेक निबां दिलीं धनी आनी शेणय रोज बायेचा घरा पावलें. उलंवणें प्रारंभ जातेच्च रोपी विशीं खंत उचार्न तार्वाटी जांवच्याक धनियांच्च धाड ल्लें म्हण विवरिले, आशें अंजेला लागीं उलवंक ताचे तोंड पळेवंक नोरबट आशेल्यारी अंजेल मात्र भिरांतीन ससोन असली निमाणे चडीत ओत्तायेक लागोन मोर्ता म्हणासर विधव रांवचें म्हण निचेव केलां म्हणताना धनी कालुबुलो जालो उपरांत ताका सैरीक कर्ची जवाब्दारी धनियान घेतली. अंजेल हट धर्तागी अपलो भर्तार खंडीत जावन मरण पावला म्हळ्ळी अपूट खबर येंवचे वरेग अपूण कसलिच्च विंचवन करिना म्हण घट रावता. डेल्लिंतल्या नेवल हेड क्वाट्रवासाक बरवन धा दिसा भितर खबर हाडतांव म्हण शर्त मार्न धनी आनी शेणय चल्तात.

ह्या अवस्वरांत कुटमा जिण्येंत अर्थीक अडचणी अन्वारां आयिल्ल्या वेळार घर्च्या सांद्यांनी त्याग साक्रिपीस कर्तात म्हळ्ळें लेखाकान दाकवन दिलां ,घरांत मांय सुनो आसले कडें ल्हान ल्हान संग्तीक थोडें पावटीं व्हडलें खंदक उदेतात म्हळ्ळें दाकवन दिलां.रोज बायेचो पात्र सूक्त जावन लिकला.सांगाताच्च अंजेल सून जावन सासुमांयची चाक्री कर्चें तिका खाल्तिमान गालन जियेंवचें हें वाचप्यांक एक देख दिल्ले परीं जालां रोपी विशीं आयिल्लें टेलिग्राम मिस्सिंग म्हळ्ळें आयकोन गेल्लो जीव परत पाटीं मेळ्ळें बरीं जालें,हें भोव द्वंद्व रीतीन लेखाकान लिकून रोपी कितें जातालो म्हळ्ळें सवाल वाचप्याक उंचायेक येता, अमचें समाजेंत लोक कितें उलयता कशें हेरांक वायट देख दिता म्हण लिखलें स्वाभावीक जालां आज काल समाजेंत लोक हरेका कडें उलयता.अंजेलाक धनी आनी शेणय अंजेलाचें मन वोडुंक प्रयत्न कर्तात म्हळ्ळें बरें कर्न लिकला. हरेका संग्तिंनी अंजेल अपल्या गुंडायेचा भावाडतान कितल्या शिंत्रव्या शेणय आनी धनियाक खडक्क जाप दिंवच्याक लिखलें तें गंभीर विषय म्हण्येत.

**<u>अवस्वर ७</u>**

ह्या अवस्वारांत रोज बाय अपणाक व्हडलें भाग लाभता म्हण भर्वस्यान राकोन आसा अंजेल ह्या सांकळी थावन भायर येंवचें खातीर देवा कडें भर्वस्यान मागोन गुपीत नोवेन कर्न आसा.

हांगासर एका समस्ये विशीं दोगां दोन चिंत्पांनी चिंतून आसात रोज बायेक संतोसाची गजाल तर अंजेलाक भोव कठीण घडीत जावनासा. भीकऱ्याक भीक जअवन तांदूळ दिताच्च भिकाऱ्यान भर्वस्याची उत्रां सांगची लेखाकान गर्जे भायर लीख ल्लें म्हळ्ळें बरी दिसता. भिकाऱ्यान भीक मागचें सोडल्यार दान दिल्ल्यांक देवाकडेन मागचें दिसना.हांगसर शेणय अपल्या नांव आनी पात्र सार्कें सगळो गजाली शिंतऱ्यो कर्न नावाडदीक जाला.अशें म्हणताना एक दीस आंजेल घरांत नातल्या वेळार शेणय येवन सगळ्या संसाराची खबरो उलोवन धनिंच्च आंजेला लागीं काजार जावंक आशेता म्हण खबर सांग्ता.ह्या वेळार रोज बाय बसल्ले कडेन घट फात्रां बरी जाल्ली हीं गजाल तिळसुंक शेणय घरा अयिल्लो वेळ आनी अंजेल कुम्सार जावन मीस

भेटवंक गेल्लो वेळ एक च्च कर्न लेखकान काणीं आयोजन केल्लो वेळ सूक्त जालां.शेणयन सांगलो विषय वोपारिंनी अंजेलाक तिळसितां आनी तीं ह्या विशीं कांयच गण्णें करिना कित्याक म्हळ्ळार ताका तो विषय पयलेंच्च कळीत असलो. रोज बायेन ओत्ताड गालन विषय प्रसताप केल्यारी अंजेल अपणें धरलें नोवेन अखेर जांवदी म्हण अपल्या निर्धाराक घट रावता, अंजेलाक कितल्या समस्यांक ओळग केल्यारी आनी भुलेयल्यारी देवाचेर पात्येणेन देवाचा मांदावळीक राकोन रांवचें वाच्यांक सवकासायेन देवाचा भासावण्याचेर पात्येणीं चडाशें कर्तां

**<u>अवस्वर ८</u>**

ह्या अवस्वरांत धनी अपणें मोग केल्ल्या आंजेलाक अपणांवचें खातीर वेळघडी मेजून आसलो. आशें धा दीसां भितर धनी रोफी जिवंत आसागी मेला म्हळ्ळी खबार काडच्या वावरांत मेतेर जाल्लो. आशें आसतां नेवलांत रोफी सांगाता वावर केल्लो तार्वाटी ताका भेटोन तारूं नास जावन रोफी खंडीत जावन मेला म्हळ्ळें कळयला.
हो विषय लेखाकान रोपीन बरयिल्ल्या पत्रांत तिळसून वाचप्यांक ताळ पडचें सार्कें लिकला. ह्या वेळार टेलिग्रांत रोपिची खबर कळयनासताना मेल्ल्यांत दाखल जाला म्हळ्ळी वर्दी लेखक अपल्या बुद्धांत्कायेंत लिख्ता. हीं वर्दी घेवन इक्राव्या दिसाची भेट एक विशेष घडीत जांवच्या अबलेसान धनी रोज बायेचा घरा पावलो. अंजेल एकले मात्र अपल्या भद्र निर्धाराचेर आसोन धैरान इनकार केल्यारी धनी अपलें व्हडपण सांडूनसर्वस अंजेला मुखार समर्पण कर्तां. अंजेलाचा मोगाक आशेता आनी भीक मागलें बरीं दिंबियेर पडोन मागचें दृश्य सिंतिमेंताळ रीतीन लिखला, शेणय आनी रोज बाय भियान कांपचें, धनियाचा क्रोधाची रीत भिरांकूळ रीतीन विवर्सिल्लें दिसोन येता, विदोव बायल मनशांक घरांतले भायर लोटचें विलेवारी कर्न गेण वसूल करिजे म्हण धनियाचा अधिताराचो प्रभाव कशें लिखलां.

**<u>अवस्वर ९</u>**

ह्या अवस्वरांत धैराधीक चली दुबळी चली कोणाचोयी प्रभाव नासताना इतल्या व्हड धनियाचा मोगाक इनकार कर्तां .रागाक आनी क्रोधाक एक जवाब दीवन रचलेल्या रचनराक मात्र पात्येवन रांवचें भोव वर्ती गजाल ह्या पात्रा द्वारीं हऱ्येका मनशान देवाचा मांडावळीक खाल्ती मान गालुंक जाय देवाचेर दीषट लायिल्ल्यांक अपलो विंचणार आशीर्वादां आनी कुर्पां दिता म्हण वाचप्यांक संदेश दितां.हांगासर परत काणियेची घुंवडी जाता रोज बायेन शेणय सांगाता अंजेलाक केल्ल्यो शिंतऱ्यो कळीत जातात .धनी नोरबटाच्यो कुतांत्रा खळीत जातात आशें अपल्या चुकिंचो पश्चात्ताप पावोन अंजेला संगी जियेवंक खुशीं वर्तां .कितलें कषट नषट अन्वारां अयल्यारी सुनें सांगाता जियेता म्हण निर्धार कर्तां रोज बाय देव भिरांतिची मनीस तरी अपल्ला कषट हाळू करुंक रीण फारीक करुंक असली वाट धरली म्हण कळीत कर्तां. आशें मांय सुनेचो एक्तार परत जियेंवगचें दृश्य भोव अर्धाबरीत. ह्या मारिफात समाजेक व्हड मौल्यांची देणगी लेखाकान दिल्या. वाचप्यांक बरीं देख दिल्या. रोज बायेक आनी अंजेलाक घरांतले भायर गाल्ल्या वेळार तांका रावोंक क्रिसतांवांनी अस्रो दिनासताना हिंद्वांनी दिल्लो म्हण उल्लेख केलां. हांगासर मानवीय मौल्यांक जात भेध ना म्हळ्ळें वाचप्यांक लेखाकान कळीत करिजे आस ल्लें आशें सात आट महिने पाशार जाल्लें नंतर रोपी पाटीं कुटमा संगी सांगाता मेळचें तो एक विशिषट विषय तरी लेककान साद्या रीतीन विवरिलां. अपूण खरोच्च मरण पावलो तर धनी अंजेला संगी लग्न जावन कुटाम नंदन कर्तो म्हळ्ळो विषय समजोन घेतो आशें लिकलो तो विषय सामाजीक रीतीन खंडीत लेकाकाची पयसिली दीषट म्हण्येत.
रोपी नोरबटान भेटलेंच्च अपापली गजाली पाशार जातेच्च अंजेलाची सर्पळी मोगान आनी गौरावान अपली चूक वळकोन अंजेलाक पावीत केल्या म्हण लिकचें भोगसाण्याचो स्पिरीत म्हण विवरिलां आनी अंजेलाचो अखंड भर्वसो वाखाणता गेण माफ कर्तां नवें घर भांधून दितां उपरांत नोरबट अपली राटावळिची आनी ग्रेसत कायेची जिणीं सांडून ब्रदर राफायेल म्हळ्ळ्यां नांवान कोवेंताक भायर सर्तां. रोपी आनी अंजेलाचा आयल्या चेर्क्या भुर्ग्याक नोरबट म्हळ्ळें नांव दीवंक प्रयत्न कर्ता रोपी अपली पतीण अंजेल आनी आवय मोगान संतोसान सांगाता जियेलीं.

अखरेचे घडीत खंडीत देवाचा मांडावळीन एकामेका भोगसाण्याचा स्पिरितान लिखून हीं कादंबरी वाचप्यांक खंडीत बरीं मौल्यां दाकवन दितां. आनी हऱ्येका घड्ये देवाचा आधाराचेर पात्येवन जियेवंक प्रेरण दिलां.

**संपवणी**

आंजेल मांय सुनेची कथा म्हण नांव दिल्ल्यारी धनियान आंजेलाक पळेयले दीसा थावन ताच्या काळजांत मोग उदेल्ले वर्वीं दुबळें कुटां आनी नवें काजारी जोडें आपल्या कुटमा जीविता सांगाता जियेंवच्या वेळार भोगुंक नजो जाल्ली आनी सोसुंक आसाध्य जाल्लें कषट भोगले.

प्रक्रतिच्या पासलेंत प्रारंभ जावन कोड्याळ शेहरा पऱ्यांत काणी पावली.ग्रेसत कुटमा थावन सर्वस्व सांड ल्लें कुटमाची काणी ही.नीती विरोध मोग कर्न चलियेक आपणाची कर्न घेवन सूख भोगुंक जाय म्हळ्ळ्या अबलेसाची काणी.निती खातीर सता खातीर जीव लेगून होगडावन माडतीर मरोंक तयार आसच्या कुटमाची काणी.खंच्यायी संसारी ग्रेसत कायेक भुलानासताना कितले कषट सोसल्यारी देवाचेरग अचल भर्वोसो दवरन खरें पुणी मागल्यार देव आपलें भासायिल्लें फावो कर्तां म्हळ्ळें आंजेल रुजू कर्ता.आशें ही काणी सामाजीक धार्मीक आनी नैतीक मौल्यानी रूपीत जाल्ल्या म्हण्येत.

**आधार ग्रंथ**

१.आंजेल कांबरी-जो.सा. अलवारीस.
२.विसाव्या शेकड्याची कोंकणी मान मनीस-१६९-१७३
३.पद्युत्तर पदविका कोंकणी संस्थो सां लूवीस कालेज -११-१४
४.विल्सन पिंटो-विषलेशन

https://doi.org/10.5281/zenodo.7249817

Paper 36

# चा. फ्रा. देकोस्ताच्या सोस्याचे कान पुस्तकाचेर विमर्सो

**Prem Moras**
Research Scholar, Institute of Social Sciences and Humanities Research Centre, City Campus, Pandeshwar, Mangaluru
**E-mail ID - premmjmoras@gmail.com**

(ABSTRACT)

चा. फ्रा. देकोस्ता सैंभानंच कवी. ताचा नाटकांनी सयत कवितेची झर आसा. ताचा कवितेंनी विशय आसा, चिंताप आसा, अलंकार आसा, गांवचो वास आसा, आमची संसकृती आसा, आचार विचार आसात. ताची पयली कविता १९५२ इस्वेंत, आकाशवाणी मुंबय थावन प्रसार जाली. त्या कवितेचें नांव "सपणांतलें राज" ताच्या उपरांत एका वरवीं ऊंच कविता ताणें रचल्यो. ताच्या "सोंस्याचें कान" कविता झेल्याक केंद्रीय साहित्या आकाडेमी पुरसकार १९८९ व्या वर्सा लाभल्या. हें पुस्तक मंगळुरांत प्रगती प्रकाशनान आनी नागरिंत (गोंय) जाग प्रकाशनान छापलां. मंगळुर्चा आनी गोंयचा पत्रांनी ताचीं कविता छापून आयल्यांत. "मोतियां"ताचा कवितेचो संग्रह, मांड सोभाण संस्थान पर्गटल्या

**प्रस्तावन :**

सोंशयाचे कान देवादिन चा. फ्रा. देकोस्ताच्या विंच्णार कविताचो संग्रह जावनासा. आपल्या सबार कविता मधें मनिस कशें आपल्या पंचेंद्रीयाचो वापार कर्ता म्हळें सोंश्याचें कान कविता पुस्तकाच्या तक्ले नांवाक दिलां. चा. फ्रा. देकोस्ताच्या उत्रांनी सांग्चें जालयार सैंभान मन्शांक इंद्रीयां दिल्यारी, विकासाच्या कर्मांनी तांकां आतांचे परिस्थितेक हाड्न पावयल्यांत. तांची दार आतां बड्ड जाल्या. म्हण्ताना गिदाच्या दोळयांक आसल्ली धोसोम मन्शाच्या दोळयांक ना. सोंश्याचे कान कवितेंत मन्शांक सर्व इंदीया गर्जेचे म्हळें चिंताप दिलां. ह्या पुस्तकांत्ली हर्येक कविता वेवेगळ्या सामाजीक आनी लोकाच्या जिण्येची झळक दिता. ताच्या मुकल्या कवितेंनी कविचीं उत्रां कशें पुस्तकार सीमीत आसतात आनी लोक कविक वळकाता पुण ताच्या कवितेंक वळकाना. ह्या पुस्तकांत थोडे विंचणार कविता विमर्शाक घेतल्यात, तांतुन वेवेगळ्या चिंत्पान बरय्लेल्यो कविता हांगासर उल्लेख केल्यात.

ताची केवल चार पंगती कविता मोग आनी पियाव एक वर्तो संदेश दिता.

मोग पियावाच्या कांद्याबरी
सग्ळो आस्तां हातांत खेळटा
सुरियेधारीन कातर्लो तर
कासप्प्याचेय दोळे पिळटा !

अशें सबार कविता चार थान्न धा पंगतींनी आसल्यारी संसाराची सबार सतां उग्डापें करतात. ह्या पुस्तकाक १९८९ वर्साचो केंद्र साहित्य आकाडेमी प्रशस्ती फावो जाल्या.

**चार्ल्स फ्रान्सिस डिकोस्ताची मट्वी वळक:**

चा. फ्रा. देकोस्ता, कोंकणेंतलो उंचलो कवी, नाटकगार आनी पत्रकर्त. ताचो जल्म १०.१०.१९३१ वेर मंगळुरांत मारनमीकट्टे लागसर जालो. ताचें प्राथमीक इसकोल कास्सिया इसकोलांत संपलें. मिलार हैसकूलांत हैसकूलाचें शिकाप जोडलें.

१९४८ इस्वेंत चा. फ्रा. चें कुटम मंगळूर सोडन मुंबय गेलें. थंय इलेक्षन कमिशनांत दोन वर्सां काम कर्तेच्च मुंबयचा बस्सांची कंपेनी "बेसट" हांतूं ताका काम मेळ्ळें. तवळ बोंबयत "पयणारी"पत्र आरंभ जालें. ह्या पत्राक तो काणियो, लेखनां बरयतालो. १९५२ इस्वेंत बोंबय आकाशवाणी केंद्र सुरू जाल्लें. हाचेर चा. फ्रा. च्यो कविता प्रसार जाताल्यो. १९५६ इस्वेंत बोंबय "जागमाग" पत्राचो आनी १९५९ इस्वेंत "पयणारी"चो संपादक जालो.

१९६९ इस्वेंत बोंबय सोडन मंगळुराक आयलो. १९७४ इस्वेंत स्टेल्लालागीं ताचें लग्न जालें. ती एक शिक्षकी तशेंच फामाद लेखकी. "नंदिनी" नांवार तिचीं बर्पां पर्गट जातात.

**चा, फ्रा.चे नाटक**

**पुस्तका रुपार प्रगट जाल्ले**

१. तरनें तरनें मोरनें; २. सुणें माजार हास्ता; ३. मागिरचें मागीर; ४. भांगार मनीस

**इतर खेळवन दाखयलेले नाटक**

१. निषटूर बोतल; २. सोभीत संसार; ३. आंकवार मेस्तरी; ४. जुजे दयाळ; ५. विशेंतिचे भाव;

६. सुणें माजार हासता; ७. शिरिगुंडी सिमांव; ८. टोमेटो; ९. मांकडाचो पाय; १०. कुवाळ्याची आल कोवळी जाल्या; ११. जोर्जी बुतेल; १२. बोंचो बंध; १३. बोकलाक सात जीव; १४ हांडो उटला

**कविराय चा. फ्रा:**

चा. फ्रा. देकोस्ता सैंभानंच कवी. ताचा नाटकांनी सयत कवितेची झर आसा. ताचा कवितेंनी विशय आसा, चिंताप आसा, अलंकार आसा, गांवचो वास आसा, आमची संसकृती आसा, आचार विचार आसात.

ताची पयली कविता १९५२ इस्वेंत, आकाशवाणी मुंबय थावन प्रसार जाली. त्या कवितेचें नांव "सपणांतलें राज" ताच्या उपरांत एका वरवीं ऊंच कविता ताणें रचल्यो. ताच्या "सोंस्याचें कान" कविता झेल्याक केंद्रीय साहित्या आकाडेमी पुरसकार १९८९ व्या वर्सा लाभल्या. हें पुस्तक मंगळुरांत प्रगती प्रकाशनान आनी नागरिंत (गोंय) जाग प्रकाशनान छापलां.

मंगळुर्चा आनी गोंयचा पत्रांनी ताचीं कविता छापून आयल्यांत. "मोतियां"ताचा कवितेचो संग्रह, मांड सोभाण संस्थान पर्गटल्या.

सन्मान आनी पुरस्कार:

१. १९८९ इस्वेंत, केंद्रीय साहित्य आकाडेमीन "सोंस्याचें कान"कविता संग्रहाक पुरसकार दिलें.

२. १९९० इस्वेंत मंगळुरांत, "कोंकणी साहित्य कुलारत्न"म्हळ्ळें बिरूद दिलें.

३. १९८७ इस्वेंत गोंयांत जाल्ल्या अखील भारतीय लेखकांचा सम्मेळनाचो अध्यक्ष जावन ताका विंचलें.

४. १९८८ इस्वेंत मंगळुर्चा बिस्पान ताका सन्मान केलें.

५. ७५वें "मांड सोभाण"चा. फ्रा.क समर्पिलां आनी "मोतियां"नांवार ताचें पदां संग्रह पर्गटलां.

**०३.१२.१९९२ इस्वेंत चा. फ्रा. देवादीन जालो.**

**चा. फ्रा. देकोस्ताच्या साहित्याचेर नियाळ आनी अभिप्राय:**

"भांगार मनीस पयले पाव्टीं बोंबयांत खेळयताना प्रेक्षक नास्ताना रद्ध जालो. आतां तो एक महान नाटक जाला. चा. फ्रा.च्या नाटकांनी लिपल्लीं तत्वज्ञानीक चिंत्पां, लोकाची चिंत्पा सकत जागन्न उटोंव्चे तसलीं. प्रेक्षकांची

मनां हालोंक्क धलोंक्क सकचीं. ताचें 'तरनें तरनें मोरनें' मस्तु उलोव्ण्याक चर्चांक विमर्शकांक कारण जाल्लो नाटक.

***देकोस्ता सोनिया; पान ७-८, अमर कोंकणी ३९***

मंग्ळूरी कोंक्ण्यांक 'कविता' म्हळ्यार कितें? पयलो पाठ शिकयिल्लो चा. फ्रान ताच्या कवितेंनी प्रासाचे त्रास दिसानांत. खंय्चेय कवितेंत उत्रांच्या बर्गालान उर्डाल्लो दिसाना.

'सकाळींच्या धोवा, भिजय म्हजिं फुलां
वोड्त म्हजें रातीं चंद्रेमान धुलां'

हि कविता वाच्ली. तिच्या उत्रां उत्रांतल्यात संगीत साधक येतालें. तांतल्यान कविच्या अभिव्यक्तिचें साधन आनी वेग्ळेंच काव्यात्म प्रेतन पळेतच चा. फ्राची कवी म्हणोन वेग्ळे थरेन वळक करची गर्जच उरलीना.

संसार चक्राच्या लाट्यार सग्ळेच केन्ना ना तर केन्ना खर्शेतात. पुण चा. फ्राली "खरस" वेग्ळीच. तो म्हण्ता,

"काळशेलां मोळब, मोळबार नेकेत्रां
मेजुंक आशेलों
म्हवाली पोर, मेजुन गेलो
हांव खर्शेलों"

चा. फ्राल्या उत्रांक, वयल्या वय्र सास्पीत, मोडात दोडात धांव्ची सवय ना. तीं कविच्या अंतरगर्भांतलो साद आनी नाद घेन्न येतात. तशींच तीं कोणाय संवेदनशील मनां काळजांत तिल्लींच. गुंडायेन रिगोन बस्तात. काव्यानुभाव सांगाता अंतस्कर्नाचे धांपल्ले कोपे उसोंव्क लागतात.

***डिसिल्वा विक्टर: पान १०, अमर कोंकणी ३६***

Cha. Fra. Is one of the rarest towering personalities in the konkani literary scene. There is perhaps no one in Konkani who has achieved so much in such a varied fields as plays, poetry, lyrics, journalism. What is important to note his that Cha. Fra is perhaps the only one who became close to the masses, who moved with them, and who actively took up their causes. While most writers were largely arm chair writers, Cha. Fra became a writer-activist, a brand that has become famous today but much looked down upon.

***Pinto Anil : Page 95, Work of Cha Fra: A Study***

## सोंश्याचे कान

मातिये धुळिंत दुरबळ्यांचे
घमामणी मोळून
अस्तमतेच्या दिगंताचेर
आयलें रगात पिळून
देकून देकून सोम्या म्हज्या
दिष्टी गेल्यो वोळोन
आतां नाकात, दोळे नाकात
रग्तापिशे रग्तां देकात
म्हाका देवा, दान दी
सोंशा सांगडे कान दी.

हांगासर कवी वोताच्या धावेक घोळच्या दुरबळ्यांचो उल्लेख कर्ता. सकाळीं सूरयो उदेताना सुरू जाल्लो वावर, सांजेर सूरयो रग्ताबरी तांबडो जाता म्हणासर आस्ता. हें पळंव्क जायनाशें म्हाका दोळे नाकात, आतां नाकात केवल आयकोंक सोंस्याचे कान पुरो. ह्या संसारांत झगडें मारामारी पळवन कवीक बेजार जालां. त्या देकून मुकार हें सर्व देकुंक नाका. म्हाका समाजेंत वर्तो मान जाय. कितेंच वायट

पळवंक नाका. केवल आयकोंक जाय म्हणून कवी म्हणता. हांगासर जिबेन एदोळ म्हणासर कांदे पेंदे मुळे खावन, पालो मासां व्हडा खुशेन रुचल्यात म्हण कवी सांग्ता. (१, ५ आनी ६ व्या गिटाक सांगाता वाचुंक जाय)
कलवंताच्या पायांभाशेन (देवदासी) हाणीं देवाच्या पाल्लकी मुकार मस्तेन हेणें तेणें धांवून भाजू सुटवन रूच सोधून नाचलेल्या बरी (२, ३ आनी ४ व्या गिटाक सांगाता वाचुंक जाय)
कांदे, मासांचें रूच सेवलां. आतां म्हाका जिबली (जीब) नाका केवल आयकोंक कान आसल्यार पुरो.
भोंवची सकत घोणीक दिली
नाकांतुली मस्ती मेली
सोंश्या सांगडे कान मेळटां
खुशी मनांत कुसत्यो घाली
आतां लोक कानांक धर्ता
सोंश्या भाशेन जातां गुळी

बाबा, बाये सोडात म्हाका
कानांक म्हज्या धरूं नाका
देवा तुवें कान दिले
सोसून व्हर्चें त्राण दी

आतां देवान मागणें आयकालें. कविच्या मागण्या पर्माणें नाकांत पर्मळ घेंवची सकत गेली. देव कवीक सोंशा सांगडे कान दिता. हें पळवन कवी संतोस पावता.
पूण लोक कशें सोंश्याक कानाक धर्न उकल्तात, तशें कवीक भोग्ता आनी तो सोंश्या बरी गुळी जाता.
आतां कवीक ताची चूक समजाता. संसारांत कितें जाता तें पळवंक जाय. रूच चाकुंक जाय आनी पर्मळ घेवंक जाय. आतां कवी देवालागीं सोसून वर्ची तांक विचार्ता.

## म्हजीं उत्रां तुजे कान

सदांय तुजे उग्ते दोळे
आनी कान उत्रांक धांप्ते
देकून सुकीं हाडां पळे
आनी बाकी मोडके वोमते

आमच्या जिण्येंत केवल भोंवतणिच्या वसतुंक पळयल्यार आनी कितें आयकाता त्या उत्रांक कान धांपल्यार, आमच्या भोंवारी केवल कविचीं सुकी हाडां दिसतेलीं आनी उदाक नातलेले कोळशे दिसतेले. कितें घडता ताचें फरक आमकां पडचें ना. कवीक प्राय वाडत वेतेली. केस धवे जातेले आनी पोले गळोन सोभाय धामतेली. कपालार मिरियो पडतेल्यो आंगाचा भोंवती शेळेर मांडतेलें. वोंठ वोळोन कांप्तेलीं. कवीक प्राय जावन हर्ध्यार हाडां दिसतात. पाय भागोन लांब दिसतात. पोट पाटीक लागून माटें जालां. बोटां बारीक खिळ्या बरी जाल्यांत. आंगार आसचे मासाचे मुदे देंवल्यात. बारा गांवांनी बोबाट घालुन रडतात आनी थोडे कोवळी नीद निदल्यात. कवी मेला ताच्या मर्णाच्या पेट्येक किळे मार्चो वेळ आयल्यात आनी ताच्या पेट्येक झेले घाल्यां. केवल दोळे उग्ते दवरून कान धांपचे नाकात. आमचे कान उग्ते दवरुयां. रुपां म्हजीं काल्चे कळे, आज ते बावून गेल्यात. केवल हांवें लिखलेलीं कविता उरल्यांत.

एकेक उतर दोंगोर मळे

आनी उलयताना जमते
अंत्रळाचेर मोगापेळे
आनी दुसर्याचा उत्रान तोवते

कवीन बरयलेलें एकेक उतार दोंग्रा तेदे किळे जावनासात आनी ते आमचा अंतस्कर्नाक तोप्तात आनी रोंबून रावतात. पयलें पावटीं आय्काताना अंत्रळाचेर आसचा मोगा पेळ्या बरी दिसल्यारी ताचो अर्थ गुंडायेन चिंताना तो मोगा पेळो हून जावन कर्गाता.

दोनच कान आसल्यार पळे
आनी उत्रांक धर्शी फुल्ते
उत्रां जातीं दारुगुळे
आनी तुज्या कानांत रोमते!

देवान सर्वांक दोन कान दिल्यात, ते आमी उग्ते दवरयां. कविचीं उत्रां आमचा कानाक पडताना, आमचे कान फुल्तेले आनी तीं उत्रां 'दारुगुळे' जावन कानांत रोंबतेले.
ह्या कवितेंतल्या उत्रांनी एक गुंडायेचो अर्थ लिपून आसा. देवान आमकां कितें दिलां. तांतून संतोस पावाजय. संसार आसा तशेंच आसता. आमी त्या संसारांत होंदून जियेवंक शिकाजय.
आमच्या तांकि पर्माणें बरेंपण करून संसारांत जाल्लेल्यो संग्ती आयकून जियेजय. संसार कोणाय खातीर रावाना या नवें रूप घेना.

## तळ्यांतली उडी

तळ्यांतू उडी मारली दोगांनी
चोयलां सारया जगान
हांव सांगाना, तुमी सांगा न्हय
रागान की वा मोगान?

तळ्याच्या तोंडार साळका बायेन
आगटें कित्याक झळयलां?
पाकळेर बसून, भंवरया बाबान
उज्यार तेल मेळयलां
तळ्याच्या तोंडार फुटलें घामाळें
भोग भोगच्या त्या धगान
हांव सांगाना, तुमी सांगा न्हय
रागान की वा मोगान?

हांगासर कवी साळका वयर कशें भोंवोर म्होंव चिंवोंक वचून नव्या साळकाचा पिळगेक कुमोक करता, तशेंच चलो चली तळ्यांत उडोन चलंवच्या मोगा विशीं वर्णन करता. तळ्यांत भितर वेतात मासळे बरी मसती करतात. एकमेकाक भोकायतात. एकल्याच्या पोल्यार आन्येकल्याचे उमे. एकल्याचा नाकार उदेता रगात.

तळ्यांत उडललीं पावलीं थळाक
उबरांत लोळोन उबेली

मारलिगा मीटी एकामेकाक
उमाळ्यांनी तीं गाबेलीं
मारलेली मिटी लजेक लायता
चितळाक जयशें वागान

हांव सांगाना, तुमी सांगा न्हय
रागान की या मोगान?

तळ्यांत उडोन थळाक पावून उबरांत खेळुंक लागलीं. मारलिगा एकामेका मिटी. तांच्या मधें उमाळो भरून आयलो. मारलली मिटी लजेन बुडयता. वाग चितळा (जिंके) बरी लजेता.
तरन्या प्रायेर जांवचो मोग, तांच्या भितर उदेंवची भोगणां सोंप्या रितीन त्याच भोगणांनी घुंतल्यांत. हांगासर हीं उत्रां वाचताना, हरेय्कलीं त्याच संसाराक चल्तात.

## सुंबाचे आनी पाय

शेवटीं जालों हांव सुंबाचें
हें कार्भार म्हज्या मोगाचें

म्हाका दारार उबात घालां
ताणीं सगळ्यांनी पाय पुसल्यात
किचड माती गुड्डावन आयल्यात
म्हजेर येवन पाय घासल्यात
कांय गुरू कांय शीस
तांणीय म्हजे चारे तासल्यात
कांय आमीग कांय दुस्मान
म्हज्यो शिरेनशिरो लासल्यात
थोडे म्हाका सांबाळ्ळले
तांणीय म्हजेर पाय घासल्यात
थोडे म्हाका कांटाळ्ळले
तांणीय म्हज्यो काती धोसल्यात
कोणेय रागान कोणेंय मोगान
भरोन म्हजे कांटे पिसल्यात
म्हजीं व्हडां, म्हजीं भुर्गीं
तांणीय म्हजेर जाळ पोसल्यात

हांगासर सुंबान घुंतलेले पाय पुसचा 'सुंबाच्या' चो घोळ दाकयला. एक सुंबाचे ताचीं भोगणां हांगासर उचारता. थोड्यांनी मोगान पुसल्यार, थोड्यांनी जाळ पोसल्यात. थोड्यांनी म्हाका कांटाळ्ळ्यार, थोड्यांनी म्हजे काती धोसल्यात.
थोडे ईषट, थोडे दुस्मान, म्हज्यान पयलें जल्माल्ले, म्हज्यान मागीर जल्माल्ले सर्वांनी म्हज्येर पांय पुसल्यात. आपणाचें काम लोकाचा पायांची माती नितळ कर्चें, व्हडा मोगान 'सुंबाचें' करता. लाख लाख पांय म्हजेर घासताना, कोणाचो पाय म्हणून दिसलोच्च ना. पांयजणांचो खिणकुळो कानांक आयकोंक ना. सर्वांचे पाय म्हजेर पडताना, कोण मोगान पुसता कोण रागान पुसता म्हळ्ळें कळुंक ना.

हांगासर सुंबाचें सोभीत चलियेक मुकार आपयता. सर्वांक लोटून मुकार ये सगळे रागान पांय पुसताना, तुज्या उडकाणेंत मोग आसोंदू. पायजणांचें ताळ मेजतां हांव. हांव एका सुंबाचें जावन तुमी म्हाका कितल्या रागान गुड्डायल्यारी, तुमचो मोग कर्चें पळवन सर्ग लजेंव्दी.
आमी संसारांत वेवेगळ्या कामांनी आसतांव, त्या त्या कामांनी आमकां संतोस जोडुंक साध्य आसा. एक सुंबाचें जावन तांणीं करच्या वावरांती संतोस मेळता जाल्यार आमी कित्याक आमच्या वावरांत संतोस मेळुंक नजो म्हणून ही कविता सांगता.

## दिवोड आनी दोरी

खुंट्याक बांदून उम्काळ्वी
सुंबाची एक दोरी
आनी एक लांबसो दिवोड
दोगांय मोग करी

चिंतून चिंतून विरार
खोर्पीत आसां खड्डो
खरयान ही दोरी नाडगी
वा दिवोड दोळ्यान कुड्डो?

हांगासर एका दिवडान उम्काळच्या दोरिये संगीं मोग करच्या विशीं तुलन आनी मनशाच्या जिण्येक सरी करयेता.
आमी कोणाचो सांगात घेतांव, खंच्या वाटेर चल्तांव त्या वाटेर आमकां वायट जाता म्हणून कळीत आसल्यारी मुकार वेचें कितलें सार्कें? म्हणून कवी म्हणता.

## हांव कोण?

हांव होगा हिचो हाचो
हांव तोगा तिचो ताचो
हांव आमको फलाण्याचो
सांगल्या शिवाय कोणयी म्हाका ओळकाना

कोणशार एका बायलो मोव
म्हणतात तो शिजललो पोव
तोचगे टिचेरिचो घोव
लज दिसता खरी हें आयकाताना

हांगासर कवी चा. फ्रा. देकोस्ता आपली जिणी कविते मुखांत लोका मुकार दवरता. कशें लोक समाजेंत बरें स्थान मान नातल्यार तांकां वळकातात म्हणून कळयता.
चा. फ्रा.ची बायल टीचर जाल्ल्यान आनी तो कोंब्या कोंबियेंक पोसतालो जाल्ल्यान ताका टीचेरिचो घोव म्हणून वळकातात म्हळ्ळो संदेश दिता.
संसार थोड्या वावराक चड लोक मागता. चा. फ्रा. पर्माणे ताणें कितलो वावर केल्यार ताच्या नांवान वळकनांत, कोंबियो पोसता म्हणतात.

## दितां दिताना

सूरयो केदीं कांय निवलोना

चंद्राक चांदणें दितां दिताना
चंद्रेम केदीं कांय बावलोना
घेतल्लो उज्वाड दितां दिताना

आमी जिण्येंत हासोन खेळोन जियेजय म्हळ्ळो संदेश ही कविता दिता. चंद्राच्या उज्वाडाक घरा थावन भायर येवन मोग कर्नारांनी हासोन खेळून आसाजय, लजेन जिणी जियेंवची न्हंय म्हणून कवी सांगता.
एक चली लग्ना पयले लजेता आनी सादी आसच्या बरी दाकयता. पूण लग्ना उपरांत तिचें रूप दुस्रेंच आसता. पयलें केल्लोलो केवल नाटक जावनासा.
चा. फ्रा. देकोस्ताच्या 'सोंश्याचे कान' कविता संग्रहांत हरयेक कविता संसारांत जांवच्या वेवेगळ्या संग्तीं विशीं दीषट घाल्तां. चा. फ्रा. देकोस्तान बरयलेल्या उंचल्या कवितेंचो पुंजो म्हणच्यांत कसलोच दुबाव ना.

https://doi.org/10.5281/zenodo.7249833

Paper 37

# लोकगीतांत जाल्लेली वाडावळ

## (16 व्या शेक्ड्या थान्न 20व्या शेक्ड्या म्हणासर)

**Prem Moras**
Research Scholar, Institute of Social Sciences and Humanities Research Centre, City Campus, Pandeshwar, Mangaluru
**E-mail ID - premmjmoras@gmail.com**

(ABSTRACT)

एका तोंडा थावन आन्येका तोंडाक पाचारलेलीं जाण्वायेचीं उत्रां लोकवेद म्हण आमी वळकातांव. वेळाकाळा पर्माणे ताका ताळे घडून तीं व्हाळोन आयलीं. आमचे पुरवज शिकपी जावंक नातलेल्यान दीस, म्हयने, वरसां पाशार जाताना उत्रांयी बदल्लीं. तेदनांच्या भुरग्यांक, युवजणांक कितें गरजेचें आसा तें जाण्वायेचें शिकाप लोकवेदा ध्वारीं युवजणांक दिलें.

केदनां कवितेंत संगीत दितांव तें आमच्या मतीक आनी आतम्याक संतोस दिता. हांगासर लोकवेद गितांचें संगीत आनी मुकल्या दिसांनी उदेल्लें आधुनीक संगीत म्हळ्ळो फरक गरजेचें. लोकवेद संगीत सुरवात जाताना व्हाजंत्रां नातल्लीं. लोकांनी आपल्या पुरवजांची जाण्वाय मतिंत दवरुंक गाणा गांवची रिवाज आसल्ली. मुकार वेळाकाळा पर्माणे विवीध ताळे, व्हाजंत्रां आयलीं. आयच्या काळार लोक कवितेंतल्या उत्रांनी आसच्या जाण्वायेच्याकी ताच्या संगीताक चड मत दीवन आसा. आयच्या काळार एक गीत संगितांनी लोकामोगाळ जाता आनी तांतून आसच्या उत्रांक या गुंडायेच्या चिंतपाक कसलोच महत्व ना.

**प्रस्तावन**

**संस्कृती म्हळ्यार कितें?**

"मन्शा संस्कृतिचें अध्ययन करताना लोकवेद शास्त्र प्रमुख जाता. १८६५ वर्सा सर एड्वर्ड टैलर म्हळ्ळ्यान 'culture' म्हळ्ळो सब्द रचुन, ताका फावो जाल्लें विवरण दिलें. विशाल अर्तांत 'संस्कृती' मन्शान जोडल्ल्या समेस्त विशयांक आटाप्ता.

आद्ल्या मन्शा थावन आधुनिक मन्शा पर्यांत जिण्ये विशांत विश्लेषण करताना झळ्कोंच्यो सर्व झरी 'संस्कृती' अध्ययनाच्या व्याप्ती भितर येतात.

"१८४६ वर्सा W.J. Thoms म्हळ्ळ्यान नांवाड्दिक पळेयुळिको आनी नांवाड्दिक साहित्य म्हण आपन्न आसल्ल्या सर्व विशयांक संबंध जान 'Folklore' (लोकवेद) म्हळ्ळो सब्द घड्लो. ह्या नांवाची सृष्टी भोव आय्लेवारची तरी जानपद मन्शाचे सृष्टे तिल्लेंच पर्नें. ताच्या अध्ययनाकी तीन चार शेक्ड्यांचो ऐक इतिहास आसा. W. J. Thoms हाच्या काळारच इंग्लेंडात लोकवेद संग्रहाचें अध्ययन जायत्या प्रमाणार चलोन आसल्लें. १८१२ वर्सा जर्मनिच्या ग्रिम भवांनी लोकवेद काणियांचें वेग्यानिक अध्ययन चलय्लें. १७०२ थावन १८३१ पर्यांत फिन्लेंडांत स्थापन जाल्ली 'फिन्निश लिटररी सोसाय्टी' संसारांत्ली पयली लोकवेद परिशत जांव्क पाव्ली. १६, १७ व्या शेक्ड्यांत इंग्लेंडांत थोड्या ग्रंथांनी संप्रदायांच्या आचरणांचें वर्णन दिसोंक लाग्लें. १७२५ इतल्याक हेन्री बोर्नेची 'Antiquities of the common people' कृती फाय्स जाली. १६०० थान्न १६८६ पर्यांतल्या आव्देंत गादिंचो नांवाड्दिक संग्रह 'Books of Mercy Riddles' (1575) आट आवृत्तो देकोंक सक्लो.

युरोपाचा हेरकडेनी लोकवेद काणियां तेव्शिन विशेस गमन व्हाळ्ळें. १८२८ इस्वेंत 'Thomas Keightlyb 'The Fairy Mythology' कृती फाय्स जाली. Folk आनी Lore सब्दां विष्यांत सबार चर्चा चल्ल्या. 'Folk' सब्दाक आक्सफर्ड सब्दा कोशांत सबार अर्थ आनी विवर दिल्यात. १९६७ वर्सा डा। हा. मा. नायकान 'लोकवेद' म्हळ्ळो सब्द पयलो वापराक हाड्लो. ताच्या प्रकार 'Folk' म्हण्जे लोक, जनांग, कुळी, सादो लोक, ऐक कळित आसल्ल्या वर्गाचो लोक. संकीर्ण स्वभावाच्या नागरिक समाजांत पर्नो पंगड, मूळ संस्कृती वर्चो सामाजिक वर्ग, वा संप्रदायासवें वोळल्ली समाज, पर्ने संप्रदाय उरवन घेन्न आयिल्ल्या साद्या लोकाचो ऐक समूह जाता."

***मोरास पाव्लु: २००८, Page 5***

**लोकवेद म्हळ्यार कितें?**

"लोकवेद" म्हळ्यार कितें म्हळ्ळ्या एका विशयाचेर पाट्ल्या शेक्ड्यां थावन विद्वांसा मधें जायतीं चर्चा चलत आयल्या. जोनास बेलिस म्हळ्ळ्याच्या अभिप्राये परमाणे 'Folklore is not a science about a folk but, the traditional folk scince and folk poetry' म्हण्जे लोकवेद म्हळ्ळें एका लोकवेदा विश्यांत विज्ञान न्हय, तें संप्रादायाक विज्ञान आनी लोकवेद काव्यें म्हळ्ळें स्पष्ट जाता. तशें जावन लोकवेद भौतिक मन्शा शास्त्रा थावन आनी हेर विज्ञाना थावन कशें वेग्ळें म्हळ्ळें स्पष्ट कर्न घेव्येत.

मेरियस बार्पे प्रकार 'पर्न्या तक्ले थाव्न नव्या तक्लेक सम्जणी, अन्भोग, बुद्धंतकाय, हव्यास आनी आचरणांच्या प्रदर्शना मुकांत्र व्हाळोन येंव्वेंच लोकवेद म्हण विवरिलां. तशें तर लोकवेद म्हळ्यार **'तोंडपाट परंपरा नव्या काळाच्या पांवड्यार सजीव जाव्न नव्या नव्या रुपा मुकांत्र प्रदर्शित जाता'.**

विद्वांस मार्क एड्वर्ड लीचान **'संग्रह जाल्लें अन्भोगाचें भंडारच लोकवेद'** म्हण आपय्लें. तें नागरिकतेच्या प्रभावाक शिर्कल्ल्या समान धर्माच्या, संप्रदायांच्या लोकाक संबंध जाल्लें. आचार विचारांनी एका रितिचीं गुणा लक्षणां आसच्या वा भौतिक आनी भावनांनी समानताय वळ्काल्लो एक जमो लोकवेद (Folk) जाता.

**तोंडा थाव्न तोंडाक व्हाळोन, सबार बद्लावणेंनी घुसोन, निरंतर वेवेग्लीं रुपां सृष्टी कर्न नवी सृष्टिच सव्कास जोड्न घेता.** हाकाच लोकवेद म्हण्चें.

अर्थर टैलर 'लोक्वेद विश्वकोशांत लोकवेदाविशीं विवरित, 'Folklore consists of Materials that are handed on traditionally from generation to generation without a reliable ascription to an inventor or author'. लोकवेद कशें परंपर रितिन येता, एके तक्ले थावन दुस्रे तक्लेक वेता म्हळ्ळें स्पष्ट करता. मुळान एका वेक्तिची चरित्रा आसल्यारी मुकार ती सामूहिक पुनर सृष्टेक तयार जाता म्हण सार्की अभिर्पाय दिता.

***मोरास पाव्लु: २००८, Page 5***

मंग्लुराच्या क्रिस्तांव समाजेंत लोकवेदाची वेवेग्ळीं रुपां अशीं आसात.

लग्ना कार्यां वेळार व शेंतांल्लीं लुंव्णी जाल्या नंतर कुण्बी समाजेंत नाचाची आनी लोकवेद गायानाची संस्कृती आसा. आज पाश्चात्य संस्कृती चडल्ल्यान केवल वोवियो गायन कर्ची संस्कृती उरल्या. लग्ना वेळार वोवियो म्हणच प्रकिया आदिं थाव्नयी आसल्ली. पुण चडुणे मधल्या काळार ती विविध कारणांक लागोन इल्लिशी माज्वोन आयिल्ली जाल्यारयी आतातां ती प्रक्रिया पर्तुन पालेल्या.

कोंकणी क्रिस्तांव समाजेची लग्ना संबंधीट वोवी

१. रुजाय माये
कितें तु पय्स
कदेल घेव्न बस
ह्या रोसालागी

२. कोसेस माये
कितें तुका येवें
कदेल दिलां नवें
माये सियासण

लग्ना कार्यांनी वोव्यांचीं रिवाज उणें जाल्यारी रोसाच्या कार्यीं पुर्त्या रितीन वोवियांनी जातात.

दिंबी आमी घाल्यां, सांता कूर्हु काड्यां,
कुर्पा आमी माग्यां, आमचा जेजुलागीं.
वोवे काड्यां कुर्पा ... जेजुलागीं

देवा बापाक देवा पुता, देवा स्पिरीत सांता
कुर्पेच्या दिसा येज्मानीन रोस काडला
वोवे कुर्पेच्या दिसा..... रोस काडला.

आप्रोसाच्या वाटलेक भांगाराचो बोंवार
रोसाक बसला कुंवर आमचो होरेत बाब
वोवे बोंवार..... होरेत बाब.

कानी घालें तेल म्हणोन कपालीं काडलो खुरीस
वैकुंठिचो जेजू क्रिस्त होरेताक बेसांव दींव
वोवे खुरीस, वैकुंठिचो..... बेसांव दींव.

कानी ताळवे तेल घालन बसया बांकार,
पयलो मान तुका सर्गिंचा देवा बापा
वोवे बांकार..... देवा बापा.

आकाशीं माड, नारल खुब्यार,
तेलाचो खुरीस होरेताच्या कपालार
वोवे खुब्यार..... कपालार.

आप्रोसाच्या बोश्येक मुयांच्यो हारी
अयावो नारी चोगी रोस लाय
वोवे हारी..... रोसालाय.

सकाळीं काडल्लीं आबोलीं सांजेर बावोलीं
आल्मां पावलीं ह्यायी रोसालागीं
वोवे बावोलीं..... रोसालागीं.

कानी ताळवे तेल घालन जेजूक मार्यां उलो
आपुरबायेचो चलो आमचो होरेत बाब
वोवे उलो..... आमचो होरेत बाब.

आमचा घरा मुकार केंळब्यान घाला मोको
पुताक काजार म्हणोन आवयक लागला धखो
वोवे मोको..... आवयक लागला धखो.

रस्याच्या रांदणीक कट्ट्यांचो फोग
विस्रानाका मोग होरेत तुज्या आवय-बापायचो
वोवे फोग..... तुज्या आवय बापायचो.

तांब्याच्या बाणी उदाक तापयला
न्हावंक आपयलां आमच्या होकलेक
वोवे तापयलां न्हावंक आपयलां... होकलेक

वोवियो प्रकारांत देवाक आपोव्णें आसा, देव कार्यालागीं कदेल दवर्न बस्ता. अशें सुर्वात जाल्ल्यो वोवियो देवादीन जाल्ल्यांचो उग्डास काड्न सांप्रदायिक रितीन मुकार वेतात. मधें थोड्यो हास्यास्पद वोवियो म्हणुन संप्या रितीन अखेर जातात.

**कोंकणी लोकवेदाची झळक**

एका तोंडा थावन आन्येका तोंडाक पाचारलेलीं जाण्वायेचीं उत्रां लोकवेद म्हण आमी वळकातांव. वेळाकाळा पर्माणे ताका ताळे घडून तीं व्हाळोन आयलीं. आमचे पुरवज शिकपी जावंक नातलेल्यान दीस, म्हयने, वरसां पाशार जाताना उत्रांयी बदल्लीं.

तेदनांच्या भुरग्यांक, युवजणांक कितें गरजेचें आसा तें जाण्वायेचें शिकाप लोकवेदा ध्वारीं युवजणांक दिलें.

केदनां कवितेंत संगीत दितांव तें आमच्या मतीक आनी आतम्याक संतोस दिता. हांगासर लोकवेद गितांचें संगीत आनी मुकल्या दिसांनी उदेल्लें आधुनीक संगीत म्हळ्ळो फरक गरजेचें. लोकवेद संगीत सुरवात जाताना व्हाजंत्रां नातल्लीं. लोकांनी आपल्या पुरवजांची जाण्वाय मतिंत दवरुंक गाणा गांवची रिवाज आसल्ली. मुकार वेळाकाळा पर्माणे विवीध ताळे, व्हाजंत्रां आयलीं.

आयच्या काळार लोक कवितेंतल्या उत्रांनी आसच्या जाण्वायेच्याकी ताच्या संगीताक चड मत दीवन आसा. आयच्या काळार एक गीत संगितांनी लोकामोगाळ जाता आनी तांतून आसच्या उत्रांक या गुंडायेच्या चिंतपाक कसलोच महत्व ना.

देकीक: "फारार फार जाताय राना तूं'

हें गीत आमच्या लगनां कारयांनी आयकोंक मेळता. पूण कितल्या लोकाक ह्या वोळिये पाटलो इतिहास कळीत आसा?

कोंकणी लोक पाटल्या ५०० वरसां थावन बिजापुराचा सुल्ताना खाल, पोर्चुगिसांचा राजवटकायेन, मराठा रायांच्या आनी पोर्चुगिसांच्या झुजा मधें तशेंच कर्नाटकांत टिप्पू सुल्तानाच्या बंधडेंत जियेला.

ताणें सोसलेले त्रास लोक वेदाच्या वोळियांनी घुंतून मुकल्या पिळगेक पावयल्यात.

थोडीं लोकामोगाळ जावन लोकांच्या वोंठांनी सदांनीत पुस्पुस्तात.

**देकीक**:

**हांव सायबा पल्तोडी वेतां**
**दामुल्या ल**गना**क वेतां**
**म्हाका सायबा वाट दाकय**
**म्हाका सायबा वाट कळाना**
**दामुल्या माटवांत**
**धाकटुल्**यां**चो फेळ**
**आगा म्हजा ता**रिया **मामा**
**दामुल्या माटवांत** धाकट्यांचो **फेळ**
**पार**व**तिच्या दोंग**रार, **मुजगो व्हाजोता**
**आनी मुजगाच्या सादार, मोग**रें **नाचोता**
**घे, घे, घे, घे घेरे सायबा**
**म्हाका नाकागो...**

कोंकणी लोकवेदांतल्या गितांतलो विवर मुकार लाभता. हांगासर कोंकणी लोकवेद कशें कोंकणी लोकांनी वेवेगळ्या राजवटकी भोगल्ली अन्याय म्हळ्ळीं झळकयी मेळता.

**कर्नाटकांत लोकवेदाची वाडावळ**

पाटल्या ५०० वर्सां थावन वेवेगळ्या हंताक गोंयकार कर्नाटकाक येवन वसती करुंक लागले. हांगासर पयलें हंत जावनासा, गोयांत पोर्चुगिसांचे राजवट. पोर्चुगिसांनी गोंय आपलें स्वाधीन केल्लेंच क्रिस्तांव धर्माक गोंयकाराक मतांतर केलें. पूण सबार हिंदू आनी इतर धर्माचे लोक गोंयां थावन कर्नाटका महाराष्ट्राक पावले. कर्नाटकांत मुख्य जावन उडुपी आनी मंगळुरांत गोंयकारांनी आस्रो घेतलो. अशें विवीध हंतार कर्नाटकाक आयिल्ल्या लोकांनी आपली मांय भास आनी लोकवेद जिवाळ दवरलें.

आदीं लोकाक शिकाप नातलेल्यान लोकवेद गितां केवल तोंडपाशीं पाशार जातालीं. अशें गोयांत गायान करच्या गितांची उत्रां आनी मंगळुरांत गायन करच्या गितांच्या उत्रांनी इल्लोसो फरक दिसता. क्रिसतांव लोक मंगळुराक पावल्यारी पोर्तुगिसांच्या मुटी थावन पुरतो सुटोंक नातल्लो. केनरांत क्रिस्तांव समोडत सांबाळुंक पादरींची गर्ज आसल्ली आनी ताणीं गोयां थावन्ंच येजय आसल्लें. तशें जाल्ल्यान तांच्या मांय गांवाचो संबंध तसोच उरलो. गोंय सांडून मंगळुराक आयिल्ल्या चरित्राचेर कोड्याळांत आमच्या मालघड्यांनी गुमटांचेर गांवचें जानपद अशें बरयलां.

**"गोंय सांडून आयली मांय रोजाय सायबीण**
**मेक**ळ्या **केसांनी मांय देंवली समदिराक**
**देंवली समदिराक मांय आयली मंगळुराक**
**आयली मंगळुराक माय गेली बोळाराक**

**बोळ**रच्या **वाड्यांत तिणें थारो तिचो केला**
**बोळरच्या पबेन तिका आ**सरो**गा दिला…"**

मेकळ्या केसांची मांय म्हळ्यार, मंगळुरांत पयलेंच मंगळादेवी मंग्लुरची मांय म्हळ्ळें चिंताप आसल्लें. आतां क्रिस्तांव लोक मंगळुरांत हजारांनी येवन आसात. ह्या गांवच्या रायांनी तांकां आसरो दिला.
अशें आमच्या पुरवजांनी गोंयां थावन मंगळुराक पयण, 'गोंया सांडून आयली मांय'म्हळ्ळ्या गितांत बरयलां. ह्या गितांत 'सांडून' म्हळ्ळें उतार आनी परत्यान पाटीं वचुंक ना म्हळ्ळें चिंताप दिता.
मंगळुरांत शेतां बाटांनी वावर करून आसल्लो लोक बाटकाराक गेणीं दीवन जियेवन आसल्लो. पूण कोणेगी केल्ल्या पातकाची शिक्षा साद्या लोकाक मेळ्ळी. टिप्पुच्या काळार क्रिस्तांव लोकाक बंधडेंत घालन गोळयलें. बेदनूर रायाच्या आडळत्या कालार केनरांत सुमार ८०,००० क्रिस्तांव आसल्ले आनी ते धादोसपणान जियेताले म्हण चरित्राकार सांगतात. १७६३ इस्वेंत कोंकणी लोकाच्या ग्राचारांक कन्नड देश मैसूराचो राय जावनास ल्ल्या हैदर आलिखाल आयलो आनी ताचे राजवटकेचीं सुरवेचीं पांच वरसां राय आनी परजे मधें समाधान आसल्लें. पूण त्या काळार ब्रिटिषांचें कार्भार हेवशीन चल्तालें जाल्ले वर्वीं हैदरआली आनी इंगलेजांक घरषण उबजाल्ल्यान १७६८ इसवेंत एडमिरल वोटसन म्हळ्ळ्या इंगलेज झजरयांक मंगळुरचें कोटें स्वाधीन करून घेतलें. ह्या झजांत हांगासर त्या वेळार आसल्ल्या पुडतुगेज सावकारांनी हैदरआलीक कुमोक करच्या बदलाक इंगलेजांक मजत दिली. केनरांतले क्रिस्तांव त्या काळार पुडतुगेज पादरींखाल आसलेले वरवीं, क्रिस्तांव लोकयी इंगलेजां सांगाता शामील जावन आसा म्हण हैदरआली दुबावलो. पुडतुगेजांनी इंगलजांक फुंका दिली म्हण हैदरआलीक कळल्ल्या फरा पुडतुगेज सावकारांक आनी पादरींक ताणें आपवन व्हरवन "तुमच्या राजांत असलो राजद्रोह केल्ल्यांक कसली शिक्षा दितात"म्हण तांकां सवाल केलें. "तसल्या चुकीक मोरनाची शिक्षा"म्हण ताणें जाप दिली. "तर आपूण तसली शिक्षा तुमकां दीना. आपणाक आनी इंगलेजांक सोल्लो जाता परयांत तुमी बंधेंत आसाजय आनी तुमची आस्त सक्कड सरकारा स्वाधीन वचजय म्हण ताणें तांचेर तीरप दिलें.
टिप्पुच्या बंधडेंत झजांच्या हातेरांनी वावर करून कठीण परिगतेंत सबार क्रिस्तांव लोक मरण पावलो. १७९२ इस्वेंत टिप्पुचें सैन्य ब्रिटीष सैन्या मुकार थंड पडताना, सबार मंगळुरी क्रिस्तांवाक बंधडे थावन सुटका मेळल्ली. १७९९ इसवेंत चलल्ल्या आकरेच्या श्रीरंगपट्टणा झजांत मंगळुरी क्रिस्तांव लोकाक पुरत्यान सुटका लाभली. ह्या झजांत ब्रिटीष सैन्य टिप्पुच्या सैन्याक नास करता आनी टिप्पू झजांत मरण पावता.
टिप्पुच्या बंधडे थावन हजारांनी लोक निराश्रीत जावन मंगळुराक पावलो.
मंगळूर क्रिसतांवांच्या गुमटां लोकवेद पदांत टिप्पू सरदारा विश्यांत एक गुमटागीत ह्या परी आसा.

१. आदीं मागा आसलोगा टिप्पू सुल्तान (२)
हैदरालिचो पूतगा टिप्पू सुल्तान (२)
राजवट तो चलयतालो श्रीरंगपट्टणा थावन (२)
मैसरचो वाग म्हळ्ळें बिरूद घेवन (२)
आदी मागा आसलोगा… टिप्पू सुल्तान

२. टिप्पू सुल्तान मनीसगा बरो
ताच्या राजवटांत क्रिस्तांवाक आसलो आसरो
तांचे पयकी सिमांव म्हळ्ळो एकलो
टिप्पू सैनाचो तो सरदार जाव्नासलो

३. पयलें ब्रिटिषांक तो विरोध रावलो
दुस्रें क्रिस्तांव परजेक धोसुंक लागलो
मंगळुराक ताणें घालनगा वेडो
आमच्या मालघड्यांक घालो खोडो

४. तंत्री कुजनेर टिप्पू रायाचो
बाल्तू चेटनी म्हळ्ळो क्रिस्तांव एकलो
टिप्पू रायाक ताणें काडयेर घालो

दीवन ताणें आमकां घूटगा ताचो

५. भावा-भयणिंनो तुमी आयकाया खबर
मालघड्यांच्या तेंपार जाल्लेंगा कारभार
टिप्पू रायाक केलोगा काबार
क्रिस्तांव परजेक देवान दिलो व्हड आधार

ह्या वोळियेर एका कुज्ञेरान कशें टिप्पुक काडी घाल्ची? कोणाक कसलो गुट दिलो? या गुम्टांच्या गाणांनि एका तोंडा थाव्न आन्येका तोंडाक पाशार जाताना, नीज गजाल आव्वोन गेलिवे? बाल्तु चेटानी म्हव्यार कोण?
भावा भयणिंनो तुमी आय्काया खबर
माल्घड्यांच्या तेंपार जाल्लेंगा कारभार
टिप्पु रायाक केलोगा काबार
क्रिस्तांव परजेक देवान विलो व्हड आधार

टिप्पु सुल्तानाच्या बंधडेक लागुन थोडीं कविता वाचुंक मेव्ता. हिं कविता अध्ययन करताना, बंधडेक नीज कारण कितें म्हणुन स्पष्ट कळाना. थोड्यांनी टिप्पुच्या विरोध ब्रिटिषांक कुमोक केली जाल्यार, सग्व्या पर्जेक शिक्ला कित्या लाभ्ली? हांगासर कितेंगी लिपुन दवर्लां. पय्ल्या स्वातेर आम्चे पुर्वज अशिक्पी जाव्नासल्ले. तांकां तांचेंच म्हळ्ळें शेत नातल्लें. दुस्र्यांच्या शेतांनी कुल्कार जाव्न घोव्ताले. तांकां मेळल्ल्या बेव्यांत थोडो वांटो फिर्गजेक दान दिताले.
टिप्पु सुल्तानाच्ता काळार क्रिस्तांव पर्जेक कसले त्रास भोग्ले म्हळ्ळ्या विश्यांत सार्की खबार ना. थोडीं गुम्टांचि गाणां वय्ल्या वग्र झळक दितात सोड्ल्यार, गुंडायेचें चित्रण खंय्सरी मेव्ना. किल्ल्या जणांचें बंधड जालें? बंधडेंत कित्लो लोक मेलो? कित्लो लोक पाटीं गांवाक आय्लो? कितल्या लोकांनी इस्लाम धर्म स्वीकार केलें म्हळ्ळ्याक रुज्वात ना.
एका गुम्टाच्या कवितेवी एक वोळीं अशें आसा.
मंत्री कुज्ञेर टिप्पु रायाचो
बल्नू चेटनी म्हळ्ळो क्रिस्तांव एकलो
टिप्पु रायाक ताणें काड्येर घालो
दीवन ताणें आमकां घूटगा ताचो
टिप्पु रायाक केलोगा काबार आनी क्रिस्तांव पर्जेक देवान दिलो व्हड आधार. हीं उत्रां आनी थोड्या पुस्तकांनी बरय्लेलेया पर्माणें क्रिस्तांव लोक १७९२ इस्वेंत बंधडे थाव्न भाग्र आय्ले. हांगासर कितल्या लोकाक बंधडे थाव्न सुट्का मेळ्ळी म्हव्यांग आंक्डे नांत. ब्रिटीशा मधें आनी टिप्पु सुल्ताना मधें कसलो सोल्लो जालो म्हळ्ळ्यांत वाचुंक मेळ्ळ्यारी क्रिस्तांव लोकाच्या सुट्के विशांत खबार ना.
तर थोडो लोक बंधडे थाव्न भाग्र आय्लो आनी थोडो बंधडेंत उर्लो जाल्यार त्या लोकाक १७९९ इस्वेंत टिप्पु आनी ब्रिटिशांच्या मधें जाल्ल्या आक्रेच्या झुजांत सुट्का लाभ्ली म्हणुन कव्ता.

**संपवणी**

कोंकणी लोकवेद गितांनी भारतीय काव्य शास्त्रांनी उल्लेख आसल्ले विचार आसात म्हणून आमकां कळीत जाता. मुकार कविता वाडून येताना धार्मीक प्रभाव चड जालो आनी रिगलो जेजू मोळ्यांत असले महा काव्य उदेले.
ह्या मटव्या सोध वावरांत वेळा काळा पर्माणें कितें बदलावण घडलां म्हळ्ळ्याचेर नियाळ आसा. लोकवेदांत कितें बद्लावण घड्ता म्हळ्ळ्यांत सोध वाव्र करुंक सलीस ना. पुण वेळा काळा पर्माणें लोकाच्या जिवितांत भोगल्लें त्रास कशें मुकल्या पिळ्गोक प्रसार केल्यात म्हळ्ळें कव्ता. ह्या अध्ययनाच्या सुर्वातेर कोंकणी लोकवेदाची झळक दिताना, वोव्यांचो भोव मोटो वांटो वोव्यांनी घुंत्ला. हांगासर लोकाची जिणी आनी जिण्येंत गर्ज आस्लेलें संग्ती कव्तात. आम्चा पुर्वजांच्या जिण्येचो वाव्र ताणीं कर्च्या हर्येक कार्याची शिस्त कव्ता.

## BIBLIOGRAPHY

History of Konkani Language & Sahitya Part – II A St. Aloysius College Konkani Institution

Moras Wilma – Bhurgyanchi ganna, Karnataka Konkani Sahitya Academy, 2019 Page no. 2-3, 6, 9

Moras Paul, Mogre Karan, Mangalore: Padval Prakashan 2008

Moras, Paul Konkani Chalwal Mangaluru K. Prakashak: Konkani Institution, St Aloysius College, Mangalore 2002.

https://doi.org/10.5281/zenodo.7249843

# SRINIVAS UNIVERSITY

Srinivas Nagar, Mukka, Surathkal, Mangalore.
Phone: 0824 – 2477456, 2441022, 2411383 ; Fax : 0824 - 2426766
www.srinivasuniversity.edu.in

**INSTITUTE OF ENGINEERING & TECHNOLOGY**
**INSTITUTE OF COMPUTER SCIENCE & INFORMATION SCEINCE**
**INSTITUTE OF MANAGEMENT & COMMERCE**
**INSTITUTE OF AVIATION STUDIES**
**INSTITUTE OF SOCIAL SCIENCE & HUMANITIES**
**INSTITUTEOF HOTEL MANAGEMENT & TOURISM**
**INSTITUTE OF PHYSIOTHERAPHY**
**INSTITUTE OF EDUCATION**
**INSTITUTE OF ALLIED HEALTH SCIENCE**
**INSTITUTE OF NURSING SCIENCE**